कक्षा
11

# व्याकरणशास्त्रम्

( प्रथमो भागः )

## कनिष्ठोपाध्यायः

कक्षा 11
व्याकरणशास्त्रम्
( प्रथमो भागः )

# व्याकरणशास्त्रम्

## (प्रथमो भागः)

## कनिष्ठोपाध्यायः

माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः

# पाठ्य-पुस्तक-निर्माण-समितिः

## व्याकरणशास्त्रम् ( प्रथमो भागः )

श्रीमद्भट्टोजिदीक्षितविरचिता

**वैयाकरणसिद्धान्तकौमुदी**

संज्ञाप्रकरणतोऽजन्तनपुंसकलिङ्गपर्यन्तम्

पाणिनीयशिक्षा च

**कनिष्ठोपाध्याय-कक्षायै स्वीकृतं पाठ्यपुस्तकम्**


संयोजकः व्याख्याकारश्च-

**डा. राजधरमिश्रः**

आचार्यो व्याकरणस्य व्याकरणविभागाध्यक्षश्च

ज. रा. राजस्थासंस्कृतविश्वविद्यालयः,

जयपुरम्, राजस्थानम्

# प्रास्ताविकम्

संस्कृतं नाम दैवीवाक्, इयं वाक् किचिद्भेदमापन्ना व्यावहारिकी वाग्भवति सैव मानुषी वागित्युच्यतेस्म । इत्थं हि दैवीवाग्, मानुषीवाक्, इति नामतो द्विविधरूपेण संस्कृतमिति प्रयुज्यते स्म एतेन संस्कृतस्य द्वौ भेदौ दृश्येते। तद्यथा–

**स यदिदं पुरा मानुषीं वाचं व्याहरेत् ततो वैष्णवीमृचं वा यजुर्वा जपेत्।**

(शत. ब्रा. का. 1–4)

तदेव निर्दिशन्ति महर्षय: पतञ्जलय: स्वकीये महाभाष्ये शब्दानुशासनचर्चाप्रसङ्गे केषां शब्दानामिति जिज्ञासायाम् उत्तररूपेण वैदिकानां लौकिनाञ्चेति ।

(महा. भा. पस्पशा.)

तदिदं वैदिकं लौकिकञ्चोभयविधं संस्कृतं सर्वत्र प्रसिद्धं प्रचरितञ्च वर्त्तते। तत्र वैदिकलौकिकसंस्कृते वेद एव परमं निधानं प्रधानमङ्गिभूतञ्च यस्योपकारकानि तदङ्गभूतानि षडंगानि सन्ति तानि च शिक्षा निरुक्तम् व्याकरणम् छन्द:, कल्प:, ज्योतिषम् इति । तदुक्तं यथा–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।।**

एषु षडङ्गेष्वपि प्रधानं मुखस्थानीयं मुख्यं व्याकरणमेव। तद्यथोक्तं भर्तृहरिणा–इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्। किञ्च वेदानां वेद इति व्याकरणमुपक्रम्य छन्दोगश्रुतिरप्येतत्परैवेति नागेशभट्टोऽपि।

अत इदं व्याकरणं व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्युत्पत्त्या प्रकृतिप्रत्ययविभागद्वारा शब्दानां निर्वचनकरं शास्त्रं, शब्दनिर्वचनद्वारा शब्दसाधुत्वबोधकत्वात् शब्दानुशासनं शास्त्रमित्यपि कथ्यते । अत एव व्याकरणं पदशास्त्रमिति सर्वत्र व्यवह्रियते। प्रकृतिप्रत्ययार्थनिर्वचनपूर्वकशब्दसाधुत्वबोधकत्वेन लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति भाष्यकारोक्तदिशा धर्मप्रयोजकत्वं मोक्षसाधकञ्चापि वर्त्तते। तद्योक्तं भर्तृहरिणा–

**तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**

**तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।**

इत्थं व्याकरणेन शब्दव्युत्पत्तिप्रक्रियाज्ञानेन विवेकज्ञानं प्राप्य यः साधुशब्दस्य प्रयोगं करोति तज्जन्यपुण्येन वक्तुरन्तःकरणं शुद्धं भवति तेन शुद्धान्तःकरणद्वारा यथार्थज्ञानेन ब्रह्मस्वरुपं जानाति तस्मात् व्याकरणं मोक्षप्राप्तेः साधनमिति।

**व्याकरणस्याध्ययनस्य प्रोयजनम्-**

व्याकरणाध्ययनस्य पञ्च मुख्य-प्रयोजनानि कथितानि सन्ति तद्यथा महाभाष्यकारेण महाभाष्ये कथितम्- रसोहागमलघ्वसंदेहाः प्रयोजनम् इति अर्थात् रक्षा,ऊह, आगम, लघु असन्देहश्च इत्येतानि पञ्च मुख्यप्रयोजनानि सन्ति।

**(1) रक्षा-** रक्षार्थं वेदानाम् अध्येयं व्याकरणम्,-मन्त्रप्रयोगकाले वर्णागमवर्णविकारादिज्ञानपूर्वकेन उच्चारणेन मन्त्रो यथार्थम् अभीष्टञ्च फलं प्रयच्छति एवं मन्त्रप्रयोगेण वेदानां रक्षा भवति। व्याकरणज्ञानं विना वर्णविकारादिज्ञानं न सम्भवि तस्मात् वर्णविकारादिज्ञानद्वारा वेदानां रक्षार्थं व्याकरणस्याध्यायनमावश्यकम्।

**(2) ऊहः-** (तर्कः) वैदिकमन्त्राणां प्रयोगकाले यथाभीष्टं विभक्त्यादेः परिवर्तनं व्याकरणं विना न सम्भवि तस्मादपि व्याकरणस्याध्ययनमावश्यकम्।

**(3) आगमः-** व्याकरणम् आगमग्रन्थः, आगमग्रन्थस्याध्ययनं निष्कारणमपि कर्तव्येमेवेति। एतदर्थमपि व्याकरणमध्येयम्।

**(4) लघु-** अनन्ता वै शब्दा व्यवहारे प्रयुक्ताः तेषां प्रतिपदोच्चारणपूर्वकं ज्ञानमसम्भवं तस्मात् लघुनोपायेन शब्दज्ञानाय व्याकरणज्ञानमावश्यकं यतोहि व्याकरणमतिरिच्य कश्चन अतिरिक्तो लघूपायो न वर्तते येनोत्सर्गापवादन्यायेन लघुनोपायेन शब्दज्ञानं प्रयोजनं स्यात् । तस्मात् लघ्वर्थं चाध्येयं व्याकरणम् इति।

**(5) असन्देहः-** स्वरसन्धिसमासादिना अर्थपरिवर्तनं भवति तत्र शब्दविषयके सन्देहे जाते तन्निराकरणं व्याकरणं विना न कर्तुं शक्यं तस्मात् असन्देहार्थमपि व्याकरणाध्ययनं कर्त्तव्यम् इति।

**(1) व्याकरणस्य प्रवक्ता आचार्यः-** संस्कृतं पूर्वमव्याकृतं प्रकृतिप्रत्ययविभागरहितमासीत्। इन्द्रेन इदं प्रकृतिप्रत्ययविभागद्वारा व्याकृतम्, तस्मादियं व्याकृता वाक् संस्कृतमित्युच्यते -

**तदुक्तं यथा-** ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु इति, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यते । अत एव प्रथमव्याकरणकर्ता इन्द्र एवेति व्यवहारः प्रसिद्धः। अतो वैयाकरणेषु प्रथमम् इन्द्रस्य नाम दृश्यते तद्यथोक्तम्-

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।**

**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।।**

एभिर्वैयाकरणैर्लिखितं व्याकरणमेतन्नाम्ना एवाद्यत्वे प्रसिद्धमस्ति । तद्यथा-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**

**सारस्वतं चापिशलं शाकलं पाणिनीयकम् ।।**

**पाणिनीयं व्याकरणम्-**

सत्स्वपि नैकविधव्याकरणेषु सर्वत्र प्रसिद्धं प्रथितञ्च व्याकरणं पाणिनिव्याकरणमेव। पाणिनिव्याकरणमधिकृत्य

कात्यायनेन कृतं वार्तिकं, भगवता पतञ्जलिना कृतं भाष्यं यन्महाभाष्यम् इति नाम्ना विश्रुतं वर्तते, एतद्वयमपि पाणिनिव्याकरणस्य पोषकं संवर्धकञ्च वर्त्तते । पाणिनिव्याकरणं क्रमशः प्राच्यनव्यभेदेन द्विविधरूपेण विभक्तम् । तत्र पाणिनेरष्टाध्यायीसूत्रक्रमानुसारं व्याख्यानात्मको ग्रन्थः जयादित्य-वामनकृतः काशिकाग्रन्थः प्रसिद्धः। नव्यव्याकरणपरम्परायां प्रक्रियाग्रन्थरूपेण भट्टोजिदीक्षितकृतो वैयाकरणसिद्धान्तकौमुदी इति नामको ग्रन्थः आधारग्रन्थः। अस्य व्याख्यात्मके ग्रन्थे भट्टोजिदीक्षितकृता एव प्रौढमनोरमा, श्रीमन्नागेशभट्टकृतो लघुशब्देन्दुशेखरः सर्वत्र अध्ययनाध्यापने प्रतिष्ठितो वर्त्तते । तस्मात् एतेषामाचार्याणां तद्ग्रन्थानाञ्च विवरणं संक्षेपेणात्रोपस्थाप्यते ।

### पाणिनिः तदष्टाध्यायी च-

भगवतः पतञ्जलिविरचिते महाभाष्यग्रन्थे प्राप्तविवरणेन ज्ञायते यत् पाणिनेर्मातुर्नाम दाक्षी आसीत्। **दाक्षीपुत्रस्य पाणिनेः ( महा.1-2-20 )।** पाणिनेः कालविषये विदुषां भिन्नं भिन्नं मतमस्ति। तत्र युधिष्ठिरमीमांसकमते पाणिनेः कालः **2100 वि.पूर्वम्,** डॉ. वासुदेवशरणअग्रवालमहोदयानुसारं नन्दराजा महानन्दस्य समकालिकः पाणिनिः **500 ई.पूर्वं समभवत्।** केचन विद्वांसः पाणिनिः वाहीकदेशीय इति कथयन्ति। गणतन्त्रमहोदधि एनं शालातुरग्रामनिवासी इति स्वीकरोति। तद्यथोक्तम्- **शालातुरो नाम ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयः, तत्रभगवान् पाणिनिः ।**

पाणिनेः गुरोर्नाम उपवर्षः इत्यपि प्रसिद्धम्, यो हि बिहारप्रदेशस्थस्य नालन्दाविश्वविद्यालयस्य प्रसिद्ध आचार्य आसीत् । पञ्चतन्त्रानुसारं पाणिनेः मृत्युः सिंहद्वारा समभवत् । यथा लोकोक्तिः प्रसिद्धा वर्तते-**सिंहो व्याकरणस्य कर्त्तुरहरत् 'प्राणान् प्रियान् पाणिनेः'।** पाणिनिरचितस्य ग्रन्थस्य नाम अष्टाध्यायी इति वर्तते। अष्टाध्याय्यां प्रायशः **चतुः सहस्रं ( 3996 )** सूत्राणि सन्ति। अस्य ग्रन्थस्य प्रथमं सूत्रं वृद्धिरादैच् 1.1.1 अन्तिमञ्च सूत्रम् **'अ अ'** (8.4.68) वर्तते ।

पाणिनिव्याकरणस्य वैशिष्ट्यं विद्यते यत् न केवलमिदं सूत्रमयम्, अपितु गणपाठः धातुपाठः, लिङ्गानुशासनम्, उणादिसूत्राणि च इत्येतत्सम्बलितं वर्तते। इत्थमिदं व्याकरणं सर्वाङ्गपूर्णमत्यन्तं वैज्ञानिकं सूक्ष्मशैल्या विरचितमपूर्वं व्याकरणं वर्त्तते ।

### कात्यायनः तत्कृतं वार्तिकञ्च-

**'त्रिमुनिव्याकरणम्'** इति नाम्ना प्रसिद्धस्य पाणिनिव्याकरणस्य द्वितीयो मुनिराचार्यकात्यायनो वर्तते। कात्यायनः इति गोत्रजनाम अस्ति। अस्य अपरन्नाम वररुचिरस्ति। अयं शुक्लयजुर्वेदीयस्या अङ्गिरसशाखायाः याज्ञ्यवल्क्यस्य पौत्रः कात्यायनस्य च पुत्रः वररुचिरेव वार्तिककार इति विदुषां मतम्।

अस्य जन्मकालविषयेऽपि भिन्नं भिन्नं मतं विद्वत्सु स्वीक्रियते। तत्र युधिष्ठिरमीमांसकैः कात्यायनस्य कालः 2700 वि.पू. स्वीकृतः। अन्ये च विद्वांसः (400-300) ई. पूर्वं समयं स्वीकुर्वन्ति।

महाभाष्ये **'प्रियतद्धिताः दाक्षिणात्या( 1.2.2 )** इति**'** वाक्यप्रतीकमाश्रित्य कात्यायनो दाक्षिणात्य इति विदुषां मतम्।

कात्यायनेन लिखितं वार्तिकं पाणिनिव्याकरणस्यात्यन्तं महत्त्वपूर्णमङ्गं वर्तते यत्सूत्रार्थविषयं पोषयति। यद्यपीदं वार्तिकं स्वतन्त्रग्रन्थरूपेणोपलब्धन्नास्ति तथापि पतञ्जलिमहाभाष्ये उल्लिखितस्य वार्तिकस्य संख्या प्रायशः 1500 पञ्चदशशतादप्यदिकं वर्त्तते ।

### पतञ्जलिः महाभाष्यञ्च-

त्रिमुनिव्याकरणम् 'यथोत्तरं मुनीनां प्रमाण्यम्' इत्याद्यभियुक्त्या तृतीयः प्रामाणिको मुनिः भगवान् पतञ्जलिः।

अनेन पाणिनिव्याकरणस्य याथार्थ्यं गम्भीरञ्च विवेचनं सरलया भाषया कृत्वा पाणिनिव्याकरणस्य वैशिष्ट्यं महत्त्वं तस्यातिशायित्वञ्च प्रकटितम्।

महाभाष्ये **अरुणद्, यवनः, साकेतम्, अरुणे, यवने माध्यमिकाम्** (3.2.111) **इह पुष्यमित्रं याजयामः** (3.2.123) इत्यादिवचनं दृष्ट्वा पतञ्जलेः कालः **200 ई.पूर्वं निश्चीयते।** युधिष्ठिरमीमांसकः वि.पू.1200 इति समयं स्वीकरोति।

पजञ्जलेः जन्मस्थानविषयेऽपि मतभेदो दृश्यते। तथाहि– महाभाष्ये 'अभिजानासि देवदत्त **काश्मीरान् गमिष्यामः, तत्र सक्तून् पास्यामः** (म.3.2.114) इत्यादिवचनं प्रमाणीकृत्य कश्मीरवास्तव्यः पतञ्जलिरिति केषाचन मतम्।

अन्यत्र– **गोनर्दीयस्त्वाह** इत्यादिवचनेन अयं गोनर्ददेशीयः, यो हि साम्प्रतिके काले (गोण्डा) इत्युत्तरप्रदेशस्थितः, तत्रत्यो वास्तव्य इति कस्यचित् मतम्।

अयं पतञ्जलिः न केवलं शब्दशास्त्रस्यैव ज्ञानागारम्, अपितु योगदर्शनस्य चिकित्साशास्त्रस्यापि। योगदर्शनसूत्रस्य चरकसंहितायाश्च रचयिता पतञ्जलिरेव । अस्मिन् विषये प्रसिद्धं पद्यं प्राप्यते–

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।**

## महाभाष्यम्–

पतञ्जलिविरचितं पाणिनिव्याकरणसम्बद्धं भाष्यमेव '**महाभाष्यम्**' इति नाम्ना लोके प्रथितमस्ति। स्ववैशिष्ट्यादेव पाणिनीयाष्टकस्यात्यन्तमुन्नतं भाष्यं महाभाष्यमिति । यथोक्तम्– अन्यानि भाष्याणि, एतत् महाभाष्यम् महत्त्वं च इष्टादिभ्यो द्विपर्यन्तानामेवेष्टिः इत्यादिव्यवस्थाकारणात्।

**महाभाष्यप्रशंसायामाचार्यभर्तृहरिरपि कथयति–**

**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**
**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।**

अस्य व्याख्यायां पुण्यराजो वदति– **तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यत्सर्वेषां न्यायबीजानां बोद्धव्यमिति। अत एव-सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्यं महाभाष्यमित्युच्यते लोके** (वा. प. 2/477) **महाभाष्यं हि बहुविधविद्यावादबलमार्षं व्यवस्थिम्, सर्ववेदपारिषदं हीदं शास्त्रं, तत्र नैकः पन्था शक्य आस्थातुम्** इत्थमेवं भूतानि वाक्यानि महाभाष्यस्य वैशिष्ट्यप्रतिपाकानि दृश्यन्ते।

## आचार्यभर्तृहरिर्वाक्यपदीयञ्च–

पाणिनीव्याकरणतन्त्रे वैयाकरणदार्शनिकस्य भर्तृहरेरनुपमं स्थानं वर्तते । भर्तृहरिणा रचितं '**वाक्यपदीयम्**' इति व्याकरणदर्शनस्यानुपमा कृतिरद्यत्वे सर्वत्र प्रसरिता दृश्यते। महाभाष्ये निरूपितस्य दार्शनिकसिद्धान्तस्य अर्थविज्ञानसम्बद्धस्य नियमस्य च विवेचनं वाक्यपदीयकारिकायां महत्सूक्ष्मेक्षिकया कृतं विद्यते।

भर्तृहरेः कालविषये सत्स्वपि बहुविधमतेषु प्रायशो विद्वद्भिः अस्य समयः 450-500 ई. मध्यः स्वीकृतः।

स्कन्दस्वामिनो निरूक्तभाष्ये वाक्यपदीयस्य उद्धरणे पुण्यराजस्य वाक्पदीयटीकायां च भर्तृहरेर्गुरुर्नाम '**वसुरातः**' इति दृश्यते।

वाक्यपदीयं काण्डत्रये विभक्तमस्ति (1) ब्रह्मकाण्डम् (156 कारिकाः) (2) वाक्यकाण्डम् (486

कारिका:) (3) प्रकीर्णकाण्डं पदकाण्डं वा (14- समुद्देशेषु विभक्तं (1323 कारिका:) यत्र जातिसमुद्देश: द्रव्यसमुद्देश: सम्बन्धसमुद्देश: भूयोद्रव्यसमुद्देश:, गुणसमुद्देश: दिक्समुद्देश:, साधन (कारकम्) क्रियाङ्ककाल-पुरूष:-संख्या-उपग्रह: (आत्मनेपदं-परसमैपदम्) लिङ्गवृत्तिसमुद्देशश्चेति।

## भट्टोजिदीक्षित: तत्कृतयश्च-

नव्याकरणपरम्पराया: प्रथम: आचार्य: श्रीमान् भट्टोजिदीक्षित: । अनेन वैज्ञानिकदृष्ट्या सहजरूपेण व्याकरणसिद्धान्त: प्रक्रियाक्रमेण समुपस्थापित:।

आन्ध्रप्रदेशस्य तैलंगब्राह्मणकुले लब्धजन्मनो भट्टोजिदीक्षितस्य वंश: वैयाकरणपरम्परासम्पन्न आसीत् । अस्य पिता लक्ष्मीधरभट्ट:, भ्राता रंगोजीभट्ट:, आसीत् । भट्टोजिदीक्षितस्य पुत्र: भानुदीक्षित:, भ्रातृव्य: कौण्डभट्ट:, पौत्रश्च हरिदीक्षित: एते महान्तो वैयाकरणा:।

भट्टोजिदीक्षित: श्रीमता शेषकृष्णेन व्याकरणस्य धर्मशास्त्रस्य, नृसिंहाश्रमे वेदान्तस्य, अप्पयदीक्षितेन च मीमांसाशास्त्रस्य अध्ययनं कृतवान् । अस्य जन्मकाल: 1560 ई.त: 610 ईश्वीय तमस्य मध्यकाल इति स्वीक्रियते।

भट्टोजिदीक्षितेन रचिता: नैके ग्रन्था: सन्ति तेषु व्याकरणविषयकग्रन्थेषु वैयाकरणसिद्धान्तकौमुदी, प्रौढमनोरमा, शब्दकौस्तुभम्, वैयाकरणसिद्धान्त-कारिका (भूषण कारिका) एते प्रसिद्धा ग्रन्था: सन्ति।

वैयाकरणसिद्धान्तकौमुदी अस्य प्रसिद्धतमो ग्रन्थ:। अस्मिन् पाणिने: सम्पूर्णं सूत्रं प्रक्रियाक्रमेण विवेचितं वर्त्तते। सर्वेषां संक्षिप्तं परिचयपूर्वकं परिनिष्ठिता रूपसिद्धि: ग्रन्थस्य मुख्य: प्रतिपाद्यो विषय:।

अस्य पूर्वार्धे संज्ञा, परिभाषा, सन्धि:, सुबन्त:, अव्ययम्, स्त्रीप्रत्यय:, कारकम् समास:, तद्धित:, निरूक्तप्रकरणम्, प्रत्यन्तधातुरूपाणि, लकारार्थ:, कृत्यम् पूर्वकृतदन्त: उणादि, उत्तरकृदन्तम्, वैदिकप्रकरणम् स्वरप्रकरणम् इत्येतानि प्रकरणानि सन्ति। अन्ते लिङ्गानुशासनं वर्तते । प्रक्रियाग्रन्थेषु सर्वप्रसिद्धोऽयं ग्रन्थ इति।

सिद्धान्तकौमुदीमधिकृत्यानेके व्याख्याग्रन्था: सन्ति। तद्यथा-प्रौढमनोरमा शब्देन्दुशेखर:, तत्त्वबोधिनी, बालमनोरमा इत्येते प्राच्यटीकाग्रन्था:। एतदतिरिक्तम् अनुदिनं नैके टीकाग्रन्था विरच्यन्ते।

## व्याकरणशास्त्रोपयोगिन: पारिभाषिकशब्दा:-

**व्याकरणम्**- व्याक्रियन्ते- व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम् लक्ष्यलक्षणे व्याकरणम्- लक्ष्यञ्च लक्षणञ्चैतत् समुदितं व्याकरणमिति पतञ्जलि:।

सूत्रलक्षणम्-

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदोविदु: ।।**

सूत्रं षड्विधम्-

**संज्ञा च परिभाषा च विधिर्नियम एव च ।**
**अतिदेशोऽधिकारश्च षडविधं सूत्रलक्षणम् ।।**

## 1. संज्ञासूत्रम्-

शक्तिनियामकं, संज्ञासंज्ञिबोधकं सूत्रं संज्ञासूत्रम् । यथा-वृद्धिरादैच् ङ्कआदैच् पदाभिन्ना वृद्धिपदशक्ति:, वृद्धिरितिसंज्ञा, आदैच् इति संज्ञी ।

## 2. परिभाषासूत्रम्–

स्ववाक्यार्थबोधकत्वे सति विधिसूत्रैकवाक्यतयार्थबोधकत्वम्। अनियमे नियमकारित्वं परिभाषात्वमिति वा। यथा– इको यणचि इत्यत्र अचि इति सप्तम्यन्तपदं निर्दिश्य विधीयमानं यण्कार्यं अजव्यवहितस्य पूर्वस्य इकः– स्थाने भवति।

## 3. विधिसूत्रम्–

अपूर्वकार्यस्वरूपबोधकम्, आदेशादिविधायकं सूत्रं विधिसूत्रम्। तद्यथा– आद् गुणः, वृद्धिरेचिः इत्यादीनि सूत्राणि।

## 4. नियमसूत्रम्–

प्राप्तस्य विधेर्नियामकं सूत्रं नियमसूत्रम्। अपवादादिसूत्रं नियमसूत्रविधावेव गृह्यते। यथा–

**धातोस्तन्निमित्तस्यैव ( 6.1.80 ) इत्यादि।**

## 5. अतिदेशसूत्रम्–

आरोपेण आदेशादौ स्थानिधर्मबोधकं सूत्रम्। यथा स्थानिवदादेशोऽनल्विधौ।

## 6. अधिकारसूत्रम्–

स्वोत्तरसूत्रेषु स्वार्थसमर्पकं सूत्रमधिकारसूत्रम् । यथा– प्रातिपदिकात्, धातोः, स्त्रियाम्, इत्यादि।

**वार्तिकलक्षणम्–**

**उक्तानुक्तदुरूक्तानां चिन्ता यत्र प्रवर्त्तते।**
**तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा विचक्षणाः।।**

**भाष्यलक्षणम्–**

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।**

**व्याख्यानभेदाः–**

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।**
**आक्षेपोऽथ समाधानं व्याख्यानं षडविधं स्मृतम् ।।**

**उपदेशः–**

**उपदेश आद्योच्चारणम्–**

**धातुसूत्र गणोणादिवाक्यलिङ्गानुशासनम् ।**
**आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ।।**

**अव्ययम्–**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्नव्ययेति तदव्ययम्।।**

**निपातनम्–**

निपतन्ति वर्णाः स्वयमेव, लोके यथोच्चारितानि साधूनि । लक्षणं विनैव प्रवर्तते लक्ष्येषु यत् तन्निपातनम् इति।

**इत्थं श्रीमता भट्टोजिदीक्षितेन** विरचिता वैयाकरणसिद्धान्तकौमुदी व्याकरणस्य अन्यतमो ग्रन्थः। यमधिकृत्य नैके व्याख्याग्रन्थास्सन्ति। सत्स्वपि तथा भूतेषु व्याख्याग्रन्थेषु अद्यतनाध्ययनाध्यापनपरम्परायां सारल्येन सूत्रार्थबोधे पदपदार्थान्वये स्वतोऽध्ययनप्रवृत्यभिवर्धापने सहायिका, सहजबोधगम्या काचित् सरलाव्याख्या कर्त्तव्येति विचार्य लिखिता व्याकरणाध्ययनप्रवृत्तेभ्यश्छात्रेभ्यः अत्यन्तमुपकारिकेयं संस्कृतव्याख्या भविष्यतीत्याशासे।

कार्यमिदं सम्पादयितुं माध्यमिकशिक्षाबोर्डद्वाराधिकृतोऽयञ्जनः तेभ्यः कार्तज्ञ्यं व्यनक्ति। चञ्चलं मनः इति मनसि विधायात्र सञ्जातं प्रमादजन्यं मुद्रणजन्यञ्च दोषमपाकृत्य स्वीकरिष्यन्ति सहृदया मनीषिण इति निवेदयन्।

**विदुषां वशंवदः**

**डा. राजधर मिश्रः**
आचार्यो विभागाध्यक्षश्च,व्याकरणविभागस्य,
ज. रा. राजस्थानसंस्कृतविश्वविद्यालयः
जयपुरम्–राजस्थानम्

# विषयानुक्रमणिका


| | | |
|---|---|---|
| 1. | संज्ञाप्रकरणम् | 1–17 |
| 2. | परिभाषाप्रकरणम् | 18–23 |
| 3. | अच्सन्धिप्रकरणम् | 24–49 |
| 4. | प्रकृतिभावसन्धिप्रकरणम् | 50–58 |
| 5. | हल्सन्धिप्रकरणम् | 59–75 |
| 6. | विसर्गसन्धिप्रकरणम् | 76–82 |
| 7. | स्वादिसन्धिप्रकरणम् | 83–90 |
| 8. | अजन्तपुँल्लिङ्गप्रकरणम् | 91–156 |
| 9. | अजन्तस्त्रीलिङ्गप्रकरणम् | 157–176 |
| 10. | अजन्तनपुंसकलिङ्गप्रकरणम् | 177–187 |
| 11. | पाणिनीयशिक्षा | 188–197 |
| 12. | परिशिष्टः | 198 |

# अथ संज्ञाप्रकरणम्

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।**

**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।।**

**संस्कृतव्याख्या-**

**यां चिन्तयन्तो गतिमाश्रयन्ते ब्रह्मादयस्स्थावरजङ्गमाश्च।**

**वागर्थभावां श्रुतिगीयमानान्नमो वयन्तां शिवशक्तिरूपाम्।।**

विघ्नध्वंसपूर्वकग्रन्थसमाप्तये तत्प्रचारप्रतिष्ठापनादिकामनया च मनसाप्याचर्य्यमाणं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितञ्च विषयं स्थापयन् ग्रन्थादौ नमस्कारात्मकं मङ्गलमाचरति **मुनित्रयमित्यादि।**

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च इयं वैयाकरणसिद्धान्तकौमुदी मया (भट्टोजिदीक्षितेन)विरच्यत इत्यन्वयः।

त्रयोऽवयवा अस्य समुदायस्य इति त्रयम्, मुनीनां त्रयम् इति मुनित्रयम् त्रयाणां (पाणिनिकात्यायनपतञ्जलीनाम्) समुदायं नमस्कृत्य = नमस्कारं कृत्वा, तदुक्तीः तस्य = मुनित्रयस्य, उक्तयः = सूत्रवार्तिकभाष्यग्रन्थरूपवाक्यावलयः, ताः, परिभाव्य = सम्यग् विचार्य आलोच्य वा, इयम् = प्रत्यक्षतोऽसन्निकृष्टाऽपि करिष्यमाणा अपि कौमुदी, बुद्ध्या सन्निकृष्टा, वैयाकरणसिद्धान्तकौमुदी= व्याकरणमधीयते विदन्ति वा वैयाकरणास्तेषाम्, व्याकरणमधीयानानां ज्ञातृणां वा सिद्धान्ताः = निर्णीतनिर्णयाः, एते शब्दाः साधव इति निश्चितार्थाः ये वैयाकरणसिद्धान्ताः, तेषां कौमुदी इव कौमुदी= प्रकाशिका, निर्दुष्टसकल-जनाह्लादकत्वेन साम्याद् कौमुदी इवेयं (वैयाकरणसिद्धान्तकौमुदी) मया= भट्टोजिदीक्षितेन विरच्यते= क्रियत इति।

**अयम्भावः-**

मया भट्टोजिदीक्षितेन व्याकरणशास्त्रप्रवर्तकपाणिनिकात्यायन-पतञ्जलीति मुनित्रयाचार्यसमुदायं नमस्कृत्य सूत्रवार्तिकतद्भाष्यरूपाणि तद्वचनानि सम्यग् विचार्य (परिशील्य) व्याकरणविदुषां व्याकरणविषयका ये सिद्धान्ताः = निर्णीतनिर्णयास्तेषां कौमुदी इव प्रकाशिका इयं वैयाकरणसिद्धान्तकौमुदी विरच्यत=गुणाधानेनोपस्क्रियत इति।

अत्रेदन्नाशङ्कनीयं यत् ''स्वयंभुवे नमस्कृत्य'' इत्यादौ यथा चतुर्थी तथा ''मुनित्रयं नमस्कृत्य'' इत्यत्रापि चतुर्थी कथन्न भवतीति- **कारकविभक्तेर्बलवत्वात्** मुनित्रयं नमस्कृत्य इत्यत्र **उपपदविभक्तेः कारकविभक्तिर्बलीयसी**

इत्यनया परिभाषया नमस्कृत्य क्रियां प्रति मुनित्रय इत्यस्य कर्मसंज्ञया द्वितीयाया: कारकविभक्तित्वेन नम:पदप्रयोगे विधानादुपपदविभक्ते: चतुर्थ्यपेक्षया बलवत्वात् ''नमस्करोति देवान्'' इतिवत् द्वितीयैव युक्ता। किञ्च **स्वयम्भुवे नमस्कृत्य** इत्यादाविव चतुर्थी इत्यपि न वक्यव्यम्- उभयोस्तात्पर्यभेदात्। **स्वयंभुवे नमस्कृत्य** इत्यत्र तु स्वयंभुवम् अनुकूलयितुम् इत्यर्थविवक्षायां ''**क्रियार्थोपपदस्य च कर्मणि स्थानिन:**'' २.३.१४। इति सूत्रेण चतुर्थी, न सात्र विवक्षितेति भाव:। किञ्च जहत्स्वार्थावृत्तिपक्षे ''नमस्कृत्य'' इत्यस्य नम: पदस्यैकदेशत्वेन निरर्थकत्वात् **अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्** इति परिभाषया निरर्थकस्य अग्रहणात् स्वतन्त्रस्य नम: इति पदस्यैव सार्थकत्वेन तद्योग एव चतुर्थ्या: युक्तत्वात् ''**हरये नम:**'' इत्यादावेव चतुर्थी उचिता न तु 'मुनित्रयं नमस्कृत्य इत्यादाविति।

**अनादर: परिभव: परिभावस्तिरस्क्रिया** इति कोशबलात् ''परिभाव्य'' इत्यस्य तिरस्कारार्थकत्वे कथं विचारार्थकत्वमित्यपि न वाच्यं, **परौ भुवोऽवज्ञाने** इति सूत्रे **परौ** भुव: इत्यस्य अवज्ञान इति विशेषणात् तिरस्कारार्थकत्वेऽपि विचारार्थकत्वे स्वीकारे न किमपि बाधकम्, किञ्च तिरस्कारार्थकत्वेऽपि तदुक्ती: इत्यत्र तत्पदेन प्राचाम्= मुनित्रयपूर्वाचार्याणाम् उक्ती: तिरस्कृत्य इत्यर्थो वाच्य:। एतेन प्राचीनग्रन्थैरस्य व्याकरणस्य अगतार्थता समूलत्वञ्चापि ध्वन्यत इति।

इत्थमनेन वैयाकरणसिद्धान्ता: प्रतिपाद्यत्वेनास्य **ग्रन्थस्य विषय:**, अनायासेन तज्ज्ञानं **प्रयोजनम्,** तस्य ग्रन्थस्य च **जन्यजनकभाव: प्रतिपाद्यप्रतिपादकभावो** वा **सम्बन्ध:** वैयाकरणसिद्धान्तजिज्ञासुरधिकारी इत्यनुबन्धचतुष्टयमपि सूचितम्।।

## अथ सञ्ज्ञाप्रकरणम्

**अइउण् १. ऋॡक् २. ए ओङ् ३. ऐ औ च् ४. ह य व र ट् ५. लण् ६. ञ म ङ ण न म् ७. झ भ ञ् ८. घ ढ ध ष् ९. ज ब ग ड द श् १०. ख फ छ ठ थ च ट त व् ११ क प य् १२ श ष स र् १३. हल् १४.**

**इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इत:। लण्सूत्रेऽकारश्च। हकारादिष्वकार उच्चारणार्थ:।**

इति= उपरिनिर्दिष्टानि अइउण् इत्यादीनि सूत्राणि अल्पाक्षरासन्दिग्धसारवद्विश्वतोमुखानि अस्तोभमनवद्यानि च माहेश्वराणि= महेश्वरात् = शिवप्रसादात् आगतानि=प्राप्तानि सन्ति, एतानि अण्आदिसंज्ञाप्रयोजकानि। एषाम् = चतुर्दशसंख्याकानामपि सूत्राणाम् अन्त्या:= अन्ते भवा: अन्तिमा वर्णा इत: = इत्संज्ञका: सन्ति, किञ्च लण् सूत्रस्थो मध्यमो वर्ण: अकारश्चापि इत्संज्ञक:। **अन्त्यभिन्नत्वादस्य पृथगुक्ति:।**

अइउण् इत्यत: ऐऔच् पर्यन्तम् अच्वर्णानामेकत्र पाठात् हयवरट् इत्यादौ अकारपाठ उच्चारणार्थ एव, नाचं विना व्यञ्जनस्योच्चारणस्य सम्भवात्। नहि तस्य हल्प्रत्याहारे ग्रहणम्, न तु लणसूत्र इव प्रयोजनार्थ इति तात्पर्यम्।

इदं माहेश्वरसूत्रम् **आदिरन्त्येन सहेता** इति सूत्रेण सह एकवाक्यतया अणादिप्रत्याहारसंज्ञया वर्णबोधकत्वात् संज्ञासूत्रं स्वीक्रियते। किञ्च उप इन्द्र इत्यादौ **आदगुण** इति सूत्रेण गुणे उपेन्द्र इव 'अ इ उ ण्' इत्यादौ संहिताया अविवक्षितत्वात् सन्धिर्न भवति। चादिगणे अकारादीनां पाठात् **चादयोऽसत्वे** इत्यनेन प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यमिति** सूत्रेण प्रकृतिभावेनापि न सन्धि:। किञ्च छन्दोवत्सूत्राणि भवन्ति, छन्द सु दृष्टानुविधिर्भवति तस्मात् यथावत्प्रोक्तानि एवं सूत्राणि स्मर्यन्त इति कृत्वापि न सन्धिरिति बोध्यम्।

**( क ) हलन्त्यम् १.३.३ हल् इति सूत्रेऽन्त्यमित् स्यात्।**

**संस्कृतव्याख्या**- पाणिनेरष्टाध्याय्यां **हलन्त्यम्** इत्येकमेव सूत्रं वर्तते परं भट्टोजिदीक्षितेन अस्य सूत्रस्य द्विरावृत्ति: कृता, द्विरावृत्तौ प्रथमम् इदं सूत्रं वर्तते। हलन्त्यम् इति प्रथमान्तमेकपदात्मकं सूत्रम्। हलि अन्त्यं हलन्त्यम्

इत्यर्थे **सप्तमी शौण्डैः** इत्यस्य सूत्रस्य योगविभागात् सप्तम्यन्तं सुबतेन सह समस्यते इत्यर्थे सप्तमीतत्पुरुषसमासः अथवा **सह सुपा** इति सूत्रेण केवल समासोऽत्र बोध्यः। एतेन हल् इति चतुर्दशात्मके सूत्रेऽन्त्यम् = अन्तिमो वर्णो लकार इत्संज्ञक इति सूत्रार्थः सम्पद्यते।

अनेन सूत्रेण प्रथमं लकारस्येत्संज्ञायाम् **आदिरन्त्येन सहेता** सूत्रार्थसापेक्षस्य इत्संज्ञकस्य वर्णस्य ज्ञानं भवति तेन इत्संज्ञकेन हल्प्रत्याहारस्य ज्ञानं जायते तदनु द्वितीयेन **हलन्त्यम्** इति सूत्रेण उपदेशेऽन्त्यवर्णस्य इत्संज्ञा क्रियते। एतत्सूत्राभावे इत् ज्ञानं विना **आदिरन्त्येन सहेता** सूत्रस्यार्थबोधाभावात् न हल्ज्ञानं सम्भवं, तं विना द्वितीयस्य हलन्त्यम् इति सूत्रस्य अर्थज्ञानं न सम्भवम्। एवमुभयोः **परस्परापेक्षत्वात्** अन्योन्याश्रयदोषः समापतति तद्दोषवारणाय प्रथमं हलन्त्यम् इत्यस्यावृत्तिरावश्यकी। तस्मात् तत्प्रथमं सूत्रं भट्टोजिदीक्षितेनात्र प्रतिज्ञापितमिति।

**आदिरन्त्येन सहेता १.१.७२ अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। इति हल्संज्ञायाम्।**

**संस्कृतव्याख्या**– इत्संज्ञया किमिति जिज्ञासायाम् इदं सूत्रं निरूप्यते **आदिरन्त्येनेत्यादि।** इदं प्रत्याहारसंज्ञाबोधकं सूत्रम्। आदिः अन्त्येन सह इता इति सूत्रस्य पदविभागः। यस्मात् पूर्वो नास्ति स आदिरिति प्रथमान्तं पदम्, अन्ते भव अन्त्यः तेन अन्त्येन इति तृतीयान्तं पदम्– अन्तिमेन वर्णेन इत्यर्थः। सह इत्यव्ययपदम् इता इति इत् पदस्य तृतीयैकवचनान्तम्। **स्वं स्वरूपं शब्दस्याशब्दसंज्ञा इति** सूत्रात् स्वम् इति पदमनुर्वते तस्य षष्ठ्यन्ततया विपरिणमय्य अन्वयः क्रियते। इहाद्यन्तशब्दाभ्यां मध्यगा आक्षिप्यन्ते। इत्थम्– अन्तिमेन इत्संज्ञकेन वर्णेन सह आदिवर्णः स्वस्य मध्यगानाञ्च वर्णानां बोधको भवतीति सूत्रार्थः। अत्र आदिशब्दः आदिसदृशबोधकः, एवमेवान्त्यशब्दोऽन्त्यसदृशबोधकः तथाहि–इकोयणचि इत्यादौ इक् इत्यत्र अन्त्य इत्संज्ञको वर्णः ककारः तत्सदृशान्त्यवर्णो माहेश्वरसूत्रे ऋलृक् इत्यस्य ककारः, अत्र आदिवर्ण अकारः तत्सदृश आदिवर्णः अइउण् इत्यस्य इकारः इत्थम् अन्त्येत्संज्ञकेन सह आदि वर्ण ''इक्'' इति मध्यगानाम् उ ऋ लृ इत्येतेषां, स्वस्य इकारस्य च बोधको भवतीति तात्पर्यम्। स्व पदेनात्र आदेरेव ग्रहणन्नान्त्यस्य अन्त्येन इत्यत्र अप्रधाने तृतीयाविभक्ति सत्वात्, प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययत्वादिति बोध्यम्। इत्थमत्र आद्यन्ताभ्याम् अवयवाभ्याम् अवयवीसमुदाय आक्षिप्यते तस्य चैकत्र लक्ष्ये प्रयोगाभावात् इक् इति प्रत्याहारसंज्ञा प्रत्येकमवयवेषु अवतरन्ती मध्यगेषु विश्राम्यति इति। एवमेवान्येऽपि प्रत्याहाराः क्रियन्त इति।

**( ख ) हलन्त्यम् १.३.३ उपदेशेऽन्त्यं हलित्स्यात्।**

**उपदेश आद्योच्चारणम्। ततोऽण् अच् इत्यादिसंज्ञा सिद्धौ।**

**संस्कृतव्याख्या**– हल्प्रत्याहारे जाते तस्य किं कार्यमिति चेत् प्रतिपादयितुं– द्वितीयं सूत्रं विवेचयति **हलन्त्यमिति।** अत्र पदद्वयम्, हल् इति प्रथमान्तम्, अन्त्यम् इति च प्रथमान्तम्। अन्त्यम् इति नपुंसकलिङ्गसमानाधिकरण्यात् हल् इति नपुंसकलिङ्गेऽत्र बोध्यम्।

अत्र सूत्रे समासो न अपितु पृथक् पृथक् स्वतन्त्रं प्रथमान्तमेव पदम् यतोहि समासे अन्त्यपदस्य उपसर्जनसंज्ञायां पूर्वनिपातापत्तिः स्यात्। अतो यत्र समासे तदभावे वा विशेषाभावः तत्र कर्मधारययोग्यपदानां समासाभाव इति सूत्रकारस्य शैली दृष्टत्वात् नात्र समास इति। अत्र सूत्रे **उपदेशेऽजनुनासिक इत्** इति सूत्रात् उपदेशे इत्यस्य इत् इत्यस्य चानुवृत्तिर्भवति। एतेन उपदेशावस्थायां विद्यमानो अन्त्यं हल् इत्संज्ञको भवतीति सूत्रार्थः सम्पद्यते। **उपदेशो नाम** धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशागमा इति।

कस्तावदुपदेश इति चेदाह– **उपदेश आद्योच्चारणम्** इति। उपशब्द आद्यर्थकः दिश्धातोरुच्चारणक्रियार्थः उप उपसर्गपूर्वकात् दिश्धातो भावे घञ्प्रत्ययेन **उपदेशनम्** आद्योच्चारणम् इत्यर्थः। कस्य आद्योच्चारणमिति चेत् सन्निहिताचार्याणां पाणिनिकात्यायनपतञ्जलीनां, किं वाद्यप्रवर्तकत्वेन शिवोदिष्टम् **आद्योच्चरणमिति।** ततो =हलन्त्यम्

इति सूत्रेण हल्वर्णानाम् इत्संज्ञानन्तरम्- **आदिरन्त्येन सहेता** इति सूत्रेण अण् अच् इत्यादि प्रत्याहारसिद्धौ अग्रिमं सूत्रं प्रवर्तते।

**उपदेशेऽजनुनासिक इत् १.३.२ उपदेशेऽजनुनासिकोऽजित्सञ्ज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः। लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः सञ्ज्ञा। प्रत्याहारेष्वितां न ग्रहणम् 'अनुनासिक' इत्यादिनिर्देशात् न ह्यत्र ककारे परेऽच्कार्यं दृश्यते। आदिरन्त्येन (सू.२) इत्येतत्सूत्रेण कृताः सञ्ज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते।**

**संस्कृतव्याख्या**- पूर्वं लण् सूत्रेऽकारश्चेत्संज्ञक इति प्रतिज्ञातम्, तस्य अकारस्य अन्त्यभिन्नत्वात् हलत्वाभावाच्च **हलन्त्यम्** इति सूत्रेणेत्संज्ञायाम् अप्राप्तायां तत्प्रापकं सूत्रं विवेचयन्नाह- **उपदेशेऽजित्यादिः।**

सूत्रेऽस्मिन् उपदेशे अज् अनुनासिक इत् इति पदविभागः। उपदेशे इति सप्तम्यन्तं पदम्, अज् इति अनुनासिक इति इत् इति चेति प्रथमान्तं पदम्। एतेन उपदेशावस्थायाम् अनुनासिकोऽच् इत्संज्ञको भवतीति सूत्रार्थः। लण् इत्यादौ उपदेशावस्थायाम् अनुनासिकत्वेन निर्दिष्टाभावात् कथमनेन इत्संज्ञा, किञ्च मुखेन नासिकया सह उच्चार्यमाणस्य इत्संज्ञा शास्त्रकारेण स्वीकृता केचन मुखेनोच्चारितानां तर्हि कथमिदानीन्तनैरवगन्तुं शक्यमिति जिज्ञासायां कथयति मूले- **प्रतिज्ञानुनासिक्याः पाणिनीया** इति। अस्यायम्भावः प्रतिज्ञा आनुनासिक्यं येषान्ते पाणिनिशिष्या अनुनासिकविषये प्रतिज्ञया व्यवह्रियन्ते। प्रतिज्ञाधारश्च यत्रेत्संज्ञायाः प्रयोजनं, शास्त्रकृता वा यत्र निर्दिष्टं तत्र इत्संज्ञा बोध्या इति। एतेन लण् सूत्रस्थ अकारेण ''र'' प्रत्याहारप्रयोजनम् उद्दिश्य तस्येत्संज्ञेति ज्ञायते। एवमेव सर्वत्र बोध्यमिति। तदेव प्रयोजनं कथयन्नाह मूले- **लण् सूत्रस्थावर्णेनेत्यादिरिति।**

मूले र प्रत्याहारः रेफो रलयोः संज्ञा इत्युक्ते तयोर्मध्ये टकारस्यापि सत्वात्कथमिदं कथनमुचितमिति जिज्ञासायां कथयति- **प्रत्याहारेष्वितां न ग्रहणमिति।** प्रत्याहारेषु अजादिसंज्ञासु मध्यस्थितानामपि इत्संज्ञकवर्णानां ग्रहणं न भवतीति। प्रत्याहारे इत्संज्ञकवर्णानामग्रहणे किं प्रमाणमिति चेत्कथयति- **अनुनासिक** इत्यादिनिर्देश एव प्रमाणम्। तथाहि यदि प्रत्याहारे इत्संज्ञकानां ग्रहणं स्यात्तदा अच्प्रत्याहारे ककारस्य पाठात् मुखनासिकावचनोऽनुनासिक इत्यादौ ककारात् अव्यवहितपूर्वस्मिन् इक्प्रत्याहारस्य इकारस्य विद्यमानात् **इको यणचि** इति सूत्रेण यणादेशः स्यात् ततश्च **'लोपो व्योर्वलि'** इति सूत्रेण वल्प्रत्याहारेऽपि ककारस्य सत्वात् यकारस्य लोपे **अनुनास्क** इति स्यात् तन्न दृश्यते, एवमेवान्यत्र तृषिमृषिकृषेः **काश्यपस्य** इत्यादावपि तन्निमित्तकस्य कार्यस्य अभावात् प्रत्याहारेषु इतां ग्रहणन्न भवतीति विज्ञायते।

प्रत्याहारशब्दस्य अप्रसिद्धत्वात् कोऽयं प्रत्याहार इति बोधयितुमाह मूले **आदिरन्त्येन इत्येतत्सूत्रेणत्यादि।** प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा इति व्युत्पत्तिबलात् **आदिरन्त्येन सहेता इत्यनेन** अच् इत्यादौ वर्णानां संक्षेपकरणात् कृता संज्ञा प्रत्याहार इति शब्देन प्रयुज्यत इति तात्पर्यम्।

इत्थं वर्णसमाम्नाये इत्संज्ञकेन विधीयमानाः प्रत्याहाराः चतुश्चत्वारिंशत् संख्याकाः सन्ति। तद्यथा-

१. अइउण् सूत्रस्थ णकारेण **एक** अण् (१)

२. ऋलृक् सूत्रस्थ ककारेण **त्रयः** अ क् इक् उक् (०३)

३. ए ओङ् इति ङकारेण **एकः** एङ् (१)

४. ऐ औच् सूत्रस्थचकारेण **चत्वारः** - अच् इच् एच् ऐच् (४)

५. हयवरट् सूत्रस्थटकारेण **एकः** अट् (१)

६. लण् इति सूत्रस्थ णकारेण **त्रयः** अण् इण् यण् (३)

७. ञमङणनम् इति सूत्रस्य मकारेण **चत्वारः** अम् यम् ञम् ङम् (४)

८. झभञ् इति सूत्रस्थ ञकारेण **एक** यञ् (१)

९. घढधष् इति सूत्रस्थ षकारेण **द्वौ** झष् भष् (२)

१०. ज ब गड द श् सूत्रस्थ शकारेण **षट्** - अश् हश् वश् झश् जश् वश् (०६)

११. ख फ छ ठ थ च ट त व् सूत्रस्थवकारेण **एकः** छव् (१)

१२. कपय् इति सूत्रस्थ यकारेण **पञ्च**- यय् मय् झय् खय् चय् (०५)

१३. श ष स र् सूत्रस्थ रेफेण **पञ्च** - यर् झर् खर् चर् शर् (५)

१४. हल्सूत्रस्थलकारेण **षट्**- अल् हल् वल् रल् शल् शल् (०६)

१५. लण्सूत्रस्थअकारेण **एक** - र (१)

इत्थम्- १+३+१+४+१+३+४+१+२+०६+१+५+५+६+१ =४४

**ऊकालोऽज्ह्रस्वदीर्घप्लुतः १.२.२७ उश्च ऊश्च ऊ३ श्च वः। वां काल इव कालो यस्य सोऽच् क्रमाद् स्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा।**

**संस्कृतव्याख्या**- अचो भेदान् निरूपयन् तेषां ह्रस्वादिसंज्ञा विधीयतेऽनेन सूत्रेण। सूत्रेऽस्मिन् पदत्रयमस्ति। ऊकाल इति प्रथमान्तम्, अच् इति प्रथमान्तं ह्रस्वदीर्घप्लुत इति प्रथमान्तम्। सूत्रे ह्रस्वदीर्घप्लुतः इति ह्रस्वश्च दीर्घश्च प्लुतश्चेत्यर्थे समहारद्वन्द्वसमासः। समाहारद्वन्द्वसमासस्य नपुंसकलिङ्गे एकवचने प्रयोगात् अत्र पुंस्त्वं सौत्रत्वात् बोध्यम्, अथवा इतरेतरयोगद्वन्द्वस्वीकारे एकवचनम् आर्षमिति। **ऊकाल इति** उश्च ऊश्च ऊ३श्च इत्यर्थे प्रथमाबहुवचने वः, तेषां वाम् इति, वां काल ऊकालः इति फलितार्थकथनमात्रम्। विग्रहस्तु ऊकाल इव कालो यस्य इत्यर्थे **''सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यो वा चोत्तरपदलोपः''** इति वार्तिकेन बहुव्रीहिसमासे उत्तरपदस्य द्वितीयकालशब्दस्य लोपे ऊकाल इति। अत्र ऊकाले उ ऊ ऊ ३ इति त्रिविधोकारस्य सत्वात् ह्रस्व दीर्घ प्लुतः इति विधेयपदस्यापि समानसंख्याकत्वात् यथासंख्यमन्वयो भवति। इत्थम्- एकमात्रिक-उकारस्य, द्विमात्रिकस्य ऊकारस्य त्रिमात्रिकस्य ऊ ३ कारस्य उच्चारणकाल इव कालो यस्य अचः तस्य क्रमशः ह्रस्वदीर्घप्लुतसंज्ञा भवतीति सूत्रार्थः सम्पद्यते।

स ह्रस्वः दीर्घः प्लुतश्च अच् प्रत्येकम् उदात्तादिभेदेन अर्थात् उदात्तत्वेन अनुदात्तत्वेन स्वरितत्त्वेन च धर्मविशेषेण त्रिप्रकारको भवतीति।

**उच्चैरुदात्तः १.२.२९ ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसञ्ज्ञः स्यात्। आ ये।**

**संस्कृतव्याख्या**- संज्ञासूत्रमिदम्। पदद्वयमत्र वर्तते। उच्चैः इत्यव्ययपदम् उदात्त इति प्रथमान्तम्। अत्र ऊकालोऽज्झ्स्वेत्यादिना अचोऽनुवृत्तिर्भवति। उच्चैः इत्यस्य ऊर्ध्वभाग इत्यर्थः स च अधिकरणार्थप्रधानः। एतेन उच्चारणस्थानानां कण्ठताल्वादिसमानभागानाम् ऊर्ध्वभागे निष्पन्नोऽच् उदात्तसंज्ञको भवतीति।

वृत्तौ सभागेषु इति ताल्वादीनां सावयवत्वकथनम् ऊर्ध्वभागे इत्यस्य उपपादनार्थम्। सूत्रोदाहरणं प्रस्तौति- आ ये इत्यत्र अच् उदात्त इति।

**नीचैरनुदात्तः १.२.३०१ स्पष्टम्। अर्वाङ्।**

**संस्कृतव्याख्या**- नीचैः अनुदात्त इति सूत्रस्य पदविभागः। पूर्वरीत्या ताल्वादिषु सभागेषु निष्पन्नोऽच् अनुदात्तसंज्ञको भवति इति बोधनाय वृत्तौ कथयति **स्पष्टमिति।** यथा- अर्वाङ् इत्यत्र आद्य अकार अनुदात्त इति।

**समाहारः स्वरितः १.२.३१ उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्।**

**संस्कृतव्याख्या-** स्वरितसंज्ञाबोधकं सूत्रमिदम्। द्विपदात्मकम् एतत्। समाहारः इति प्रथमान्तं, स्वरित इति च प्रथमान्तं पदम्। **समाह्रियन्ते यस्मिन्** अथवा **समाहरणं समाहार** इति। स्वरविशेषः सञ्जातोऽस्य स स्वरित इति। ऊकालेत्यादिसूत्रात् अचः इति, पूर्वसूत्राभ्याम् उदात्त-अनुदात्त इति चानुवर्तते एतेन उदात्तः अनुदात्तश्च अच् अर्थात् उदात्तत्वअनुदात्तत्वधर्मौ यस्मिन् अच्वर्णे समानरूपेण स्यातां स अच् स्वरितसंज्ञको भवतीति सूत्रार्थः सङ्गच्छते। तत्फलितमाह सूत्र वृत्तौ **उदात्तत्वादिरिति।** यथा- **क्व** वोऽश्वा॑ः इत्यत्र अकार स्वरित इति।

**तस्यादित उदात्तमर्धह्रस्वम् १.२.३२ ह्रस्वग्रहणमतन्त्रम्। स्वरितस्यादितोऽर्धमुदात्तं बोध्यम्। उत्तरार्धं तु परिशेषादनुदात्तम्। तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टम्। अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये प्रसिद्धा। क्व॑ वोऽश्वा॑ः, रथा॑नां न येऽराः शतच॑क्रं यो॒ऽह्॑य' इत्यादिष्वनुदात्तश्रुतिः। अ॒ग्निमीले पु॒रोहितम् इत्यादावुदात्तश्रुतिः।**

**स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा।**

**संस्कृतव्याख्या-** उदात्तत्वस्य अनुदात्तत्वस्य चैकस्मिन्नपि मेलने उभयोः समावेशः कस्मिन्भागे भवतीति जिज्ञासायां सूत्रमिदं प्रवर्तते- **तस्यादितेत्यादि।** तस्य = स्वरितस्य आदितः पूर्वभागे, अर्धह्रस्वम् उदात्त इत्यर्थः। परिशेषात् उत्तरभागेऽर्धह्रस्वम् अनुदात्तमिति बोध्यम्। एवं सति दीर्घस्वरिते इयं व्यवस्था न स्यादित्याशङ्कायां कथयति मूले **ह्रस्व ग्रहणमतन्त्रमिति।** अतन्त्रन्नाम अविवक्षितम्। अत्रायम्भावः सूत्रे ह्रस्वग्रहणस्य अविवक्षास्वीकारे दीर्घस्वरितेऽप्यर्धभागः उदात्तः उत्तरार्धभागश्चानुदात्तः स्यात् यतोहि दीर्घस्वरितेऽप्युत्तरभागे अनुदात्तत्वं दृश्यत इति। **अग्निमील** इत्यत्र तु अनुदात्तभागस्य उदात्तस्वरपरत्वं दृश्यते। अन्यत्र अर्थात् उदात्तस्वरितपरकत्वाभावे अनुदात्तपरकत्वाभावे च उदात्तश्रुतिरेवेति ऋग्वेदप्रातिशाख्ये प्रसिद्धा। तद्यथा- **क्व वोश्वा**॑ इत्यादौ इति।

इत्थम् अच् ह्रस्वदीर्घप्लुतभेदेन त्रिविधः प्रत्येकम् उदात्तानुदात्तस्वरितभेदेन त्रिधासत्वे नवविधः। स नवविधोऽपि अच् अनुनासिकाननुनासिकभेदेन द्विविधत्वात् **अष्टादशविध** इति।

**मुखनासिकावचनोऽनुनासिकः १.२.८**

**मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसञ्ज्ञः स्यात्।**

**तदित्थम् अ इ उ ऋ एषां वर्णानां प्रत्येकम् अष्टादशभेदाः।**

**लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।**

**संस्कृतव्याख्या-** अनुनासिकसंज्ञाबोधयितुं सूत्रमिदमुपस्थापयति **मुखेत्यादि।** सूत्रेऽस्मिन् पदद्वयं वर्तते। मुखनासिकावचन इत्येकं प्रथमान्तं पदम्, अनुनासिक इति प्रथमान्तं द्वितीयं पदम्। अत्र **उच्यतेऽसौ इति** वचनः। मुखसहिता नासिका इति मुखनासिका, शाकपार्थिवादित्वात् सहितपदस्य लोपः तया वचनः (उच्चरितो वर्णः) मुखनासिकावचनः अनुनासिकसंज्ञको भवतीति। **इत्थम्** मुखसहितनासिकया उच्चर्य्यमाणस्य वर्णस्य अनुनासिकसंज्ञा भवतीति सूत्रस्य तात्पर्यम्। मुखनासिका इत्यत्र मुखं च नासिका चेति द्वन्द्वसमासो नोचितः, तथात्वे **द्वन्द्वश्च प्राणितूर्यसेनाङ्गनाम्** इति समाहारद्वन्द्वनियमात् तस्य नंपुसकत्वे **ह्रस्वो नपुंसके प्रातिपदिकस्य** इति सूत्रेण ह्रस्वे मुखनासिकवचन इत्यापत्तिः स्यात्।

अनुनासिकाननुनासिकत्वे अष्टादश भेदाः किं सर्वेषामचां भवति इत्याकारिकमाशङ्कायाम्- कथयति मूले **तदित्थमित्यादिः।** अ इ उ ऋ इत्येतेषां वर्णानां प्रत्येकमष्टादशभेदा भवन्ति, लृ वर्णस्य द्वादश तस्य दीर्घाभावात् ह्रस्वप्लुत भेदेन द्वादश भेदा एव। एवमेव एचां वर्णानां द्वादशभेदाः तेषां ह्रस्वाभावात् दीर्घप्लुत भेदेन द्वादश एवेति।

**तुल्यास्यप्रयत्नं सवर्णम् १.१.९ ताल्वादिस्थानमाभ्यन्तर प्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।**

**अ कुह विसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्द्धा। लृतुलसानां दन्ता। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। औदोतोः कष्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इति स्थानानि। यत्नो द्विधा- आभ्यन्तरो बाह्यश्च। आद्यश्चतुर्धा। स्पृष्टेषत्स्पृष्टविवृतसंवृत भेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। एतच्च सूत्रकारेण ज्ञापितम्। तथाहि-**

**संस्कृतव्याख्या-** वर्णसमाम्नाये पठितानां तद्भेदानाञ्च सवर्णसंज्ञां बोधयितुं सूत्रमिदं प्रवर्तते **तुल्यास्येत्यादि।** इदं सवर्णसंज्ञाबोधकं सूत्रम्। अत्र पदद्वयं विद्यते। तत्र तुल्यं च तुल्यश्चेति तुल्यौ, आस्यञ्च प्रयत्नश्चेति आस्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ ययोस्तत् तुल्यास्यप्रयत्नम् इति द्वन्द्वगर्भ बहुव्रीहिसमासघटितं प्रथमान्तं पदम्। सवर्णम् इति च प्रथमान्तं पदम्। आस्यञ्चात्र आस्ये (मुखे) भवम् इत्यर्थे- **उच्चारणस्थानम्, प्रयत्नश्च** प्रकृष्टो यत्नः (आभ्यान्तरः) तथाहि- उच्चारणस्थानम् आभ्यन्तरप्रयत्नश्च यस्य वर्णसमूहस्य तुल्यौ समानौ तस्य परस्परं सवर्णसंज्ञा भवतीति सूत्रस्यार्थः। आस्यन्नाम मुखम्= ओष्ठात् प्रभृतिकाकलपर्यन्तम्, तत्र भवम्- उच्चारणस्थानमिति बोध्यम्। सूत्रे आस्यग्रहणाभावे केवलं प्रयत्नसाम्यस्यैव सवर्णसंज्ञायां **तर्प्ता** इत्यादौ तकारे परे पकारस्य **झरो झरि सवर्णे** इति सूत्रेण लोप प्रसङ्गः। एवमेव प्रयत्नग्रहणाभावे केवलमास्यसाम्यात् सवर्णसंज्ञायां **वाक् श्चोतति** इत्यादौ चकारे परे शस्य लोपापत्तिः स्यात् तन्माभूत् तदर्थम् उभयोर्ग्रहणमिति। कस्य वर्णस्य किं स्थानमिति जिज्ञासायां कथयति मूले- **अकुहेत्यादि।**

तत्र **अ** इत्यनेन **अष्टादश भेदा** गृह्यन्ते कु इत्यनेन कवर्गः कादिपञ्चात्मकः, ह एवं विसर्गः इत्येतेषां वर्णानामुच्चारणस्थानं **कण्ठ** इति। एवमेव **इचु........** अष्टादश इकाराः, चवर्गः, य श इत्येतेषाम्- **तालु** इति। ऋकारस्याष्टादशभेदाः टवर्ग र ष एतेषां **मूर्द्धा**। लृ इत्यनेन द्वादश, तवर्गः ल स इत्येतेषां **दन्ताः।** उ इत्यस्य अष्टादश भेदा, पवर्ग उपध्मानीय (⌣प⌣क) इत्येतेषाम् ओष्ठौ। ञ म ङ ण न इत्येतेषाम् नासिका चकारेण स्ववर्गस्थानमपि। यथा- ञ इत्यस्य नासिका तालु, म इत्यस्य ओष्ठौ नासिका। एवमेवान्येषामपि। ए ऐ इत्यनयोः द्वादश संख्याकानां कण्ठतालु। ओ ओ इत्यनयोः कण्ठोष्ठम्। व इत्यस्य दन्तोष्ठम्। जिह्वामूलीयस्य ⌣क⌣ख इत्यस्य जिह्वामूलम्। **अनुस्वार-** नासिका उच्चारणस्थानम् इति। एवं प्रकारेण वर्णानाम् अभिव्यक्तिस्थानानि उच्चारणस्थानरूपेण बोध्यन्त इति।

सवर्णसंज्ञायां प्रयत्नग्रहणम्, **कोऽसौ प्रयत्न** इति जिज्ञासायां बोधयितुं कथयति **यत्नो द्विधा इति।** आभ्यन्तरो बाह्यश्च। तत्राभ्यन्तरो यत्नः, उच्चारणस्थाने वर्णोत्पत्तेः अव्यवहितपूर्वयत्नः, वर्णोत्पत्तेरव्यवहित ऊर्ध्व (उत्तरकालिको) यत्नो बाह्य इति पाणिनिशिक्षादौ स्पष्टम्। तत्र आद्य **आभ्यन्तर** श्चतुर्धा = चतुष्प्रकारकः। कथं स इति पठति- स्पृष्टः ईषत्स्पृष्टः ईषद्विवृतः संवृतश्चेति। तेषु स्पर्शवर्णानां (कादिपञ्चविंशतिवर्णानां) स्पृष्टप्रयत्नम्, अन्तस्थानाम् (यण् प्रत्याहारस्थवर्णानाम्) ईषत्स्पृष्टप्रयत्नम्। ऊष्मणानाम् (शल् प्रत्याहारस्थवर्णानाम्) स्वरवर्णाञ्च विवृतं प्रयत्नम्। ह्रस्वस्य अकारस्य प्रयोगे संवृतम् इति शिक्षावचनम् प्रक्रियादशायां शास्त्रीयप्रक्रियावस्थायां विवृतं प्रयत्नम्। इत्थमत्र तात्पर्यं यत् शास्त्रीयप्रक्रियया परिनिष्ठितानां राम कृष्ण इत्यादिशब्दानां प्रयोग काल एव ह्रस्वस्य संवृतम् शास्त्रीयकार्यप्रवृतिसमये तस्य विवृतत्वमेव। एतत् हि सूत्रकारेण महर्षिणा पाणिनिना ज्ञापितम् इति।

**तथाहि- अ अ ८.४.६८ विवृतमनूद्य संवृतोऽनेन विधीयते। अस्य चाष्टाध्यायीं सम्पूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव। तथा च सूत्रम्-**

**संस्कृतव्याख्या-** व्याकरणशास्त्रे इदम् अन्तिमं सूत्रम्। अत्र पदद्वयम्। अ इति प्रथमं पदं विवृतपरं, लुप्तषष्ठीविभक्तिकम्, द्वितीयं तु संवृतपरं लुप्तप्रथमान्तम्। अत्र षष्ठ्यन्तस्य विवृतप्रयत्नवतोऽकारस्य स्थाने संवृतप्रयत्न अकारो विधीयते। इदं सूत्रम् अष्टाध्यायीस्थानां सर्वेषां सूत्राणाम् अन्त्यत्वात् सर्वं प्रति असिद्धम्। तेन 'अ अ' इति सूत्रेण विधीयमानस्य अकारस्य संवृतत्वम् सर्वदृष्ट्या असिद्धमेव भवति। तेन ज्ञायते शास्त्रप्रक्रियायाम् अकारः विवृत एव यस्य संवृतत्वविधानेन प्रयोगे सर्वत्र संवृत एवेति। ''अ अ'' इति सूत्रस्य अष्टाध्यायीं प्रति असिद्धत्वे किं प्रमाणमिति चेत् असिद्धबोधकं सूत्रमुपस्थापयति। तथाहि-

**पूर्वत्रासिद्धम् ८.२.१ अधिकारोऽयम्। तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रतिपरं शास्त्रमसिद्धं स्यात्। बाहयप्रयत्नस्त्वेकादशधा। विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति।**

**खयां यमाः खय क पौ विसर्गः शर एव च।**

**एते श्वासानुप्रदाना अघोषाश्च विवृण्वते।**

**कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः।**

**अयुग्मा वर्णयमगा यणश्चाल्पासवः स्मृताः।।**

**वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नी, चख्खनतुः, अग्ग्निः, घ्घ्नन्तीत्यत्र क्रमेण क ख गघेभ्यः परे तत्सृदश-एव यमाः। तत्र वर्गाणां प्रथमद्वितीयाः खयः, तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ, विसर्गः, श ष सा श्चेत्येतेषां विवारः श्वासोऽघोषश्च। अन्येषां तु संवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः। अन्ये महाप्राणः इत्यर्थः। बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ताः, तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम्। कादयो मावसानाः स्पर्शाः। यरलवा अन्तस्थाः। शषसहा ऊष्माणः। अचः स्वराः। क प इति कपाभ्यां प्रागर्धविसर्ग सदृशौ जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ। इति स्थान प्रयत्नविवेकः।**

**ऋृलृवर्णयोर्मिथः सावर्ण्य वाच्यम् (वा.१५०) अकार हकारयोरिकारशकारयो र्ऋकार षकायोर्लृकारसकारयोश्च मिथः सावर्ण्ये प्राप्ते-**

**संस्कृतव्याख्या-** पूर्वत्रा। असिद्धविधायकं सूत्रमिदम्। अत्र पदद्वयम्। पूर्वत्र इति सप्तम्यर्थे त्रल् प्रत्ययान्तं प्रथामान्तमव्ययम्, न सिद्धम् इति असिद्धम्, नञ्तत्पुरुषघटितं प्रथमान्तं पदम्। सूत्रमिदम् अष्टाध्यायाः अष्टमाध्यायस्य द्वितीयपादस्य प्रथमम्, इतः प्राक्तनं सर्वं सूत्रसमूहं सपादसप्ताध्यायी इति व्यवह्रियते इतोऽनन्तरं सर्वं सूत्रसमुदायं त्रिपादीति कथ्यते। पूर्वत्र शब्दोपादानात् परम् इत्याक्षिप्यते। पूर्वत्र अर्थात् सपादसप्ताध्यायीस्थशास्त्रं प्रति त्रिपादिस्थं शास्त्रम् असिद्धं भवतीति सूत्रार्थः सम्पद्यते। एतत्सूत्रमधिकारसूत्रमपि- तेन त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धमित्यर्थोऽपि लभ्यते। एतद् उद्दिश्य एव मूले कथयति- **अधिकारोऽयम्** इति। अधिकारत्वाभावे त्रिपाद्यां पूर्वं प्रति परं शास्त्रमसिद्धमित्यर्थाभावात् **किमु उक्तम्,** किम्वुक्तम् इत्यादौ **मोऽनुस्वारः** इति शास्त्रं त्रैपादिकं प्रति '**मय उञो वा** इति वत्वशास्त्रं त्रैपदिकमसिद्धन्न स्यात्। एतेन मकारस्य स्थानेऽनुस्वारापत्तिः। तस्मात् अधिकारसूत्रत्वमपि अस्य आवश्यकम्। असिद्धं द्विविधं भवति शास्त्रासिद्धं कार्यासिद्धञ्च कार्यासिद्धत्वे कार्ये जाते तस्यासिद्धत्वविधानं व्यर्थं तस्मादत्र शास्त्रासिद्धत्वपक्ष एव स्वीक्रियत इति।

अथ बाहयप्रयत्नान् विवेचयति मूले **बाहयप्रयत्नेकादशधा इत्यनेनेति।** तथाहि बाहयप्रयत्ना (अत्र प्र इति अविवक्षितम्) **विवारः संवारः श्वास नाद घोषः अघोष अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितश्चेति** एकादशधा।

कस्य वर्णस्य को बाह्यप्रयत्न इति श्लोकद्वयेन कथयति– **खया यमित्यादिः** अस्यायम्भावः– खय्प्रत्याहारस्था यम्वर्णाः, ≍ क≍प, जिह्वामूलीयः उपध्मानीयः, विसर्गः शर् प्रत्याहारस्थाः वर्णाः, श्वासप्रयत्ना वर्णाः, अघोषाः, कण्ठविवारका विवृतप्रयत्नवन्तः, अन्ये= शिष्ट घोषा, संवृतप्रयत्नवन्तः, नादप्रयत्ना युग्मरहिता प्रथमतृतीयपञ्चमा वर्गयमगाः, यण्वर्णा इत्येतेषां अल्पप्राणप्रयत्नो भवति। अन्येषां महाप्राणप्रयत्न इति। यमशब्दस्यार्थं विवृणोति कवर्गादीनां पञ्चमे अक्षरे परे मध्यवर्ती यः पूर्ववर्णसमानवर्ण तस्य नाम यम इति। एतच्च प्रातिशाख्ये=वैदिकव्याकरणे प्रसिद्धम्। यथा **पलिक्क्नी, चख्खनतु अग्गिन घ्घ्नन्ति** इत्यादिषु क्रमेण कखगघेभ्यः परे तत्सदृशाः क ख ग घ इत्येते वर्णा यम इति कथ्यते। मूले कथितायाः प्रथमकारिकाया अर्थं विवृणोति– **तत्र वर्गाणां प्रथमद्वितीयेत्यादि।** अस्येदं तात्पर्यं वर्गाणां प्रथमद्वितीयवर्णाः खय् इति एते वर्णा, एतेषाञ्चैव यमाः जिह्वामूलीय उपध्मानीयः विसर्गः शषस एतेषां वर्णानां विवारः श्वासअघोषप्रयत्ना भवन्ति। अन्येषां तु व्यवहारे प्रयुक्ता वर्णाः संवारनादघोषप्रयत्नकाः सन्तीति। ते वर्णा, वर्गाणां तृतीयः चतुर्थः पञ्चमः तृतीयः चतुर्थो यमवर्णाः श ष स ह् इमे सन्ति।

द्वितीयकारिकाया अर्थं विवृणोति **वर्गाणां प्रथम तृतीय पञ्चमेत्यादयः** अर्थात् वर्गाणां प्रथमः तृतीयः पञ्चमः प्रथमतृतीययोः यमः, य र ल व् इत्येतेषाम् अल्पप्रयत्नाः। अन्ये द्वितीयचतुर्थ्योः शल् प्रत्याहारस्थवर्णानां महाप्राणाः भवन्ति। इत्थं बाह्यप्रयत्नं निरूप्य तेषां प्रयोगविषयं स्पष्टयति तद्यथा– **बाह्यप्रयत्नाश्चेत्यादि।** यद्यपि सवर्णसंज्ञायां बाह्यप्रयत्नस्य तथोपयोगो न भवति तथापि आन्तरतम्यपरीक्षायाम् अस्योपयोगः करिष्यते। स्थानेऽन्तरतम इति सूत्रेण **सादृश्य निर्धारणमेव** आन्तरम्यपरीक्षा कथ्यते। ककारादारभ्य म पर्यन्तं वर्गस्थाः पञ्चविंशतिवर्णाः स्पर्शसंज्ञका भवन्ति। तत्र यण् प्रत्याहारस्था वर्णा अन्तस्थाः कथ्यन्ते, शल्प्रत्याहारस्थावर्णा ऊष्माण इति। अच्प्रत्याहारस्था वर्णा स्वर इति शब्देन ज्ञायन्ते।

विसर्गस्य त्रयो भेदा भवन्ति तत्र क पौ इत्यनयोः इति प्राग् अर्धविसर्गसदृश कः जिह्वामूलीयः, प्राग् अर्धविसर्गसदृशः प उपध्मानीय इति। अकारस्य उपरि विद्यमानो बिन्दु अनुस्वार इति एवमेवान्येषामचामपि। अकारात्परं विद्यमानं विन्दुद्वयम् विसर्ग इति कथ्यते। एवमेव सर्वेषामचपरत्वेऽपि बोध्यम्।

**इति स्थानप्रयत्न विवेकः**

**ऋलृ वर्ण योर्मिथः सावर्ण्यं वाच्यम्–** वार्तिकमिदम्। तुल्यास्यप्रयत्नं सवर्णम् इत्यनेन विधीयमानायां सवर्णसंज्ञायाम् उच्चारणस्थानम् आभ्यन्तरप्रयत्नश्च इत्यनयोः साम्यम् अपेक्षितमस्ति ऋकारलृकारयोः परस्परमुच्चरणस्थानस्य भिन्नत्वात् न तेन सवर्णसंज्ञा सम्भवा परं तयोः सवर्णसंज्ञा अपेक्षिता वर्तते तस्मात् कात्यायनेन वार्तिकमुपस्थापयति– **ऋलृवर्णयोरिति।**

आ च आ च तयोरिति रलौ इति। तथाहि समासे अलौकिकविग्रहे ऋ सु लृ सु इत्यवस्थायां **ऋतोङि सर्वनामस्थानयोः** इति सूत्रेण लृकारस्य गुण लपरत्वे ऋ अल् औ इति जाते इकोयणचि इति सूत्रेण यणि कृते रलौ इति। रलौ च तौ वर्णौ इति विग्रहे ऋ लृ वर्णौ तयोः ऋलृवर्णयोरिति परस्परं सावर्ण्यं वक्तव्यमिति वार्तिकार्थः।

इत्थं स्थानाभ्यन्तरप्रयत्नसाम्यात् अकार हकारयोः कण्ठस्थानविवृतप्रयत्नसाम्यात्, इकारशकारयोः तालुस्थानविवृतप्रयत्नसाम्यात् ऋकारषकारयोः मूर्धास्थानविवृतप्रयत्नसाम्यात्, एवमेव लृकारसकारयोः दन्तस्थानविवृतप्रयत्नसाम्यात् परस्परं सवर्णसंज्ञायाः प्रसक्तिर्भवति। तस्मात् अग्रिमं सूत्रं विवेचयति–

**नाऽऽज्झलौ १.१.१० आकार सहितोऽच् आच्, स च हल् चेत्येतौ मिथः सवर्णौ न स्तः। तेन दधीत्यस्य हरति, शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न। अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलाच्चं स्यात्।**

**संस्कृतव्याख्या–** अपवादसूत्रमिदं सवर्णसंज्ञानिषेधकं वर्तते। अत्र पदद्वयमस्ति। न इत्यव्ययपदम् आज्झलौ

इति प्रथमान्तं समस्तं पदम्। तत्र आसहित अच् आच् इत्यर्थे शाकपार्थिवादित्वात् सहितपदस्य (मध्यमपदस्य) लोपे आच् इति, आच् च हल् चेति तयोरितरेतरयोगद्वन्द्वसमासे आज्झलौ इति। अत्र तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रमनुवर्तते। तस्य पुलिङ्गद्विवचनान्ततया वचनविपरिणामेनान्वयो भवति। एतेन आज्झलौ तुल्यास्यप्रयत्नौ मिथः सवर्णौ न भवत इति सूत्रार्थः सम्पद्यते। इत्थं अच् हलोः (व्यञ्जनयोः) परस्परं प्राप्ता सवर्णसंज्ञा न भवतीति सूत्र तात्पर्यम्। तेन अकारहकारयोः इकारशकारयो ऋकारषकारयोः लृकारसकारयोः प्राप्ता सवर्णसंज्ञा न भवति। एतत्फलं विवृणेति मूले- तेन **दधि हरति इत्यत्र अकार हकारयोः** सवर्णसंज्ञायां सत्यां प्राप्तो यणादेशो न। एवमेव **दधि शीतलम्** इत्यत्र दीर्घः, एवमेव षष्ठं सान्द्रम् इत्येतेषु परेषु प्राप्तं सन्ध्यादिकार्यं न भवतीति।

अन्यथा अर्थात् प्रकृतसूत्राभावे सवर्णसंज्ञाया निषेधाभावे ह्रस्वर्णेन दीर्घादीनामिव हकारादीनामपि वर्णानां ग्रहणकशास्त्रबलात् अर्थात् **अणुदित्सवर्णस्य चाप्रत्यय** इति सूत्रबलात् अच्त्वं स्यात् तन्माभूत् तदर्थं सूत्रमिदम्। महाभाष्यकारेणाभ्यन्तरप्रयत्नस्य पञ्चभेदान् स्वीकृत्य स्वराणां विवतप्रयत्नम्, ऊष्माणा-ईषद्विवृत प्रयत्नमिति भेदमाश्रित्य अज्झलोः आभ्यन्तरप्रयत्नभेदात् सवर्णसंज्ञाया प्राप्तिरेव नास्तीति कृत्वा सूत्रं प्रत्याख्यातमिति।

**किं तद् ग्रहणकशास्त्रमिति जिज्ञासायां प्रतिज्ञापयितुं कथयति मूले तथाहि- अणुदित्सवर्णस्य चाप्रत्ययः १.१.६९ प्रतीयते विधीयत इति प्रत्यय, अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्। अत्राण् परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम् अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं लृकारोऽपि। एचो द्वादशानाम्। एदैतोरोदौतोश्च न मिथः सावर्ण्यम्। ऐ औच् इति सूत्रारम्भसामर्थ्यात्। तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम्। नाज्झलौ ( सू.१३ ) इति सावर्ण्यनिषेधो यद्यप्यक्षरसमाम्नायिकानामेव तथापि हकारस्याऽऽकारो न सवर्णः। तत्राऽऽकारस्यापि प्रश्लिष्टत्वात्। तेन विश्वपाभिः इत्यत्र होढः ( सू. ३२४ ) इति ढत्वं न भवति। अनुनासिकानुनासिकभेदेन यवला द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा।**

**संस्कृतव्याख्या**- अण् उदित् सवर्णस्य च अप्रत्ययः इति सूत्रस्य पदविभागः। अण् इति प्रथमान्तं पदम्, उत् इत् यस्य स उदित् (ते उदितः) इति प्रथमान्तं, सवर्णस्य इति षष्ठ्यन्तं, च इत्यव्ययम्, अप्रत्यय इति प्रथमान्तं पदम्। सूत्रे प्रत्यय इति पदं यौगिकम् **प्रतीयते= विधीयत इति प्रत्यय** इत्यर्थकं गृह्यते न तु व्याकरणे संज्ञाबोध्यं सुप्-तिङ् वाचकं प्रत्ययपदम्। अर्थात् विधेयो ह्यत्र प्रत्यय इति। न प्रत्ययोऽप्रत्यय अविधीयमान इति। सूत्रे चकारात् स्वं रूपम् इति सूत्रात् स्वमित्यनुवर्तते। तस्य षष्ठ्यन्ततया विपरिणामो भवति। इत्थम्= अविधीयमानो यो अण् उदित वर्णः स सवर्णस्य संज्ञको भवतीति सूत्रार्थः सम्पद्यते। अत्र सूत्रे अण् इति परणकारेण गृह्यते न तु पूर्व अ इउण् इति सूत्रस्य णकारेणेति बोधयितुं कथयति मूले **अत्राणिति।** अस्यायम्भावः अस्मिन्नेव सूत्रे अण् प्रत्याहारः परणकारेण अन्यत्र अणोऽप्रगृह्यस्य इत्यादौ परणकारेण गृह्यते। एतत्स्वीकारे आचार्यपरं परोपदेशरूपं व्याख्यानमेव हेतुरिति बोध्यम्। के तावत् उदित्वर्णा इति जिज्ञासायां कथयति मूले- **कु चु टु तु एते उदितः।** एते उकारेत्संज्ञकाः प्रत्येकं वर्गस्य संज्ञा, प्राचीनाचार्यैः उदितसंज्ञकेन ज्ञापितत्वात्। इदं सूत्रं **तुल्यास्यप्रयत्नं सवर्णम्,** इति सूत्रेण सवर्णसंज्ञकवर्णानां परस्परम् एकेन वर्णेन अन्यस्य सवर्णस्य ग्रहणं बोधयति। अत एव अणुदित्सूत्रफलमाह मूले **तदेवम्** अ इत्यष्टादशानां संज्ञा इति। एवमेव इकारोऽपि उकारोऽपि, ऋकारः त्रिंशतः संज्ञा **ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्** इति वार्तिकेन ऋकारेण अष्टादशभेदानाम् लृकारेण च द्वादशभेदानां ग्रहणात्। ननु एचः चतुर्विंशतिः संज्ञा स्युः सवर्णसंज्ञायां सत्याम् एकारेण ऐकारस्य ओकारेण औकारस्यापि ग्रहणात् न तु प्रत्येकं द्वादशानाम् इति चेत् अत्र कथयति मूले **एदैतोरोदौतोश्च न मिथः सावर्ण्यमिति।** अर्थात् एकार ऐकारयोः ओकारोकारयोः परस्परं सवर्णसंज्ञा न भवतीति। कथं न सवर्णसंज्ञा इति जिज्ञासायां कथयति- **ऐ ओच् इति सूत्रारम्भसामर्थ्यात्।** अत्रेदं तात्पर्यम्- अनयोः परस्परं सवर्णसंज्ञायां सत्यां प्लुतानामपि ग्रहणसम्भवात् ऐऔच् इति सूत्रं नारभ्येत्, आरम्भ्यते च। अतः एदैतोरोदौतोश्च परस्परं सवर्णसंज्ञा न भवतीति विज्ञायत इति। बालमनोरमाकारस्तु वृद्धिरादैच् अदेङ् गुण इत्यादौ ऐच् **एङ्** इति प्रत्याहारद्वयस्यापि ग्रहणात्

एदैतोरोदौतोश्च न मिथः सावर्ण्यम्, किञ्च **प्लुतावैच्** इदुतौ, एचोऽप्रगृह्यस्य इत्यादौ प्रत्याहारद्वयग्रहणसामर्थ्यात् ओकारौकारयोः न सावर्ण्यम् इति। किञ्च अनयोः सवर्ण्याभावे एकारेण सह वर्तते इत्यर्थे स ए= सै इति जाते तस्य सम्बोधने **एङ् ह्रस्वात् सम्बुद्धेः** इति सूत्रेण सुलोपो न भवति ऐकारस्य एङ् प्रत्याहारे ग्रहणाभावात् अतः **हे सैः** इति रूपम्, एवमेव ओकार-ओकारयोः सावर्ण्याभावे ग्लौ शब्दात् द्वितीयाविभक्तौ अमि शसि च परे '**औतोऽम्शसोः**' इति सूत्रेण औकारस्य स्थाने आकारादेशो न भवति **ग्ला**वम्, ग्लावः इति रूपं भवति, सवर्णसंज्ञायां सत्याम् औकारस्यापि आकारदेशे ग्लाम्, ग्लाः इत्यनिष्टं रूपं स्यादिति।

अत्रेदं विचार्य्यते यत् अपवादशास्त्रस्य विषयं परित्यज्य उत्सर्ग (सामान्य) शास्त्रस्य प्रवृतेः **तुल्यास्य प्रयत्नं सवर्णम्** इति सूत्रात् प्रागेव नाज्झलौ अस्य सूत्रस्य वाक्यार्थबोध आवश्यकः। **अणुदित्सवर्णस्य चाप्रत्ययः** अस्य सूत्रस्य प्रवृत्तिः सवर्णसंज्ञानन्तरमेव। अतः **नाज्झलौ** एतत्सूत्रार्थसमये अणुदित्यादिसूत्रस्य अभावात् सवर्णग्रहणाभावे **नाज्झलौ** इति सूत्रेण अज्झलोर्निषेधः अक्षरसमाम्नायिकानां वर्णानामेव न तु दीर्घादीनाम् अस्यां स्थितौ आकार-हकारयोः किञ्च प्लुताकारहकारयोः एवमेव दीर्घानाम् अचां हलां च सवर्णसंज्ञानिषेधो न स्यात् अतस्तद्वारणाय नाज्झलौ इति दीर्घादीनामपि प्रश्लेषो बोध्यः। इत्थं दीर्घादीनामपि हलां सवर्णसंज्ञानिषेधो भवतीति। तेन विश्वपाभिः इत्यादौ आकारस्य स्थाने 'होढः'' इति सूत्रेण ढत्वं न भवति इति प्रतिपादयितुं- मूले कथयति **नाज्झलौ इति सावर्ण्यनिषेधो यद्यपीत्यादीति।**

अणुदित्सवर्णस्य चाप्रत्यय इति सूत्रे अच् एव ग्रहणमस्तु किम् अण् ग्रहणेनेति जिज्ञासायां कथयति तेन अर्थात् अणग्रहणेन अनुनासिकाननुनासिकभेदेन यवला द्विधा तेषां यवलानां द्वयोर्द्वयोः संज्ञा भवतीति।

**तपरस्तत्कालस्य १.१.७० तः परो यस्मात्स तात्परश्चोच्चार्यमाण समकालस्यैव संज्ञा स्यात्। तेन अत् इत् इत्यादयः षण्णां षण्णां संज्ञाः। ऋत् इति द्वादशनाम्।**

**संस्कृतव्याख्या**- सूत्रेऽस्मिन् पदद्वयमस्ति। तपर इति प्रथमान्तं, तत्कालस्य इति षष्ठ्यन्तं तपर इत्यत्र तात्परः तपर इति पञ्चमी तत्पुरुषः, तः परो यस्मात् स तपरः इति बहुव्रीहिसमासश्च। तस्य काल तत्कालः तस्य काल इव कालो यस्य स तत्काल इति तस्य तत्कालस्येति सूत्रघटकपदविग्रहः। अत्र **अणुदित्सवर्णस्य चाप्रत्यय** इति सूत्रात् अण् इत्यनुवर्तते। इत्थम् तः परो यस्मात् स तात्परश्च उच्चार्यमाणः समकालस्यैव संज्ञा = बोधकः स्यादिति सूत्रार्थः सम्पद्यते। इदं सूत्रम् अणुदित्सूत्रस्य बाधकम्। एतेन अत् इत्यनेन अत् इत् उत् लृत् एत् ऐत् ओत् औत् इत्येते अष्टौ तपरा अणः स्व स्व समानकालानां षण्णां षण्णामेव संज्ञकाः बोधका भवन्ति न तु अतत्कालानामित्यर्थः। ऋलृवर्णयोर्मिथसावर्ण्यम् इत्यनेन सावर्ण्यविधानात् ऋत् इति द्वादशानां सञ्ज्ञा (ह्रस्वऋकारस्य षण्णां लृकारस्य च षण्णां ग्रहणेन द्वादश इति भावः।

इत्थम् एतावापर्यन्तम् वर्णविषयकं सर्वं तथ्यमुपस्थापितम् तथाहि अइउण इत्यादिवर्णानां **बोधः** तेषां ग्रहणाय **इत्संज्ञा, लोपः** तदनन्तरं **प्रत्याहारनिर्माणम्,** अचां भेदः, तेषां ह्रस्वदीर्घादिसंज्ञा, तेषां सवर्णसंज्ञा, सवर्णग्रहणमिति।

**वृद्धिरादैच् १.१.१ आदैच्च वृद्धिसञ्ज्ञः स्यात्।**

**संस्कृतव्याख्या**- अष्टाध्याय्या आदिमं सूत्रमिदम्। आदिसूत्रसत्वेऽपि भट्टोजिदीक्षितेन आदौ नेदम् उपन्यस्तम्। यतोहि अस्य सूत्रस्यार्थबोधाय तपकरणज्ञानम्, ऐचप्रत्याहार ज्ञानं तद् ग्रहणकशास्त्रादिज्ञानमवश्यकं, तस्मात् तत्सर्वन्निरूप्य सूत्रमिदं प्रारभते **वृद्धिरादैच्** इति। अत्र पदद्वयम् **वृद्धिः** इति विधेयबोधकं प्रथमान्तं पदम् आदैच् इत्युद्देश्य बोधकं प्रथमान्तं पदञ्च।

आदैच् इत्यत्र आच् ऐच् इति समाहार द्वन्द्वः, इतरेतरयोगद्वन्द्वो वा। इतरेतरयोगद्वन्द्वे तु सौत्रम् एकवचनं बोध्यम्।

आदैच् इत्यत्र द्वन्द्वसमासे **द्वन्द्वाच्चुदषहान्तात्** इत्यादिसूत्रेण सामासन्तष्टच् प्रत्ययः स्यादिति न वक्यव्यम्, अत्र टजभावादेव समासान्तविधिरनित्य इति ज्ञाप्यते, किञ्च पदान्त्वे चो कुः इति सूत्रेण कुत्वमपि न **अयस्मयादीनि छन्दांसि** इति सूत्रेण भसंज्ञया पदसंज्ञायाः बाधात् इति। नागेशभट्टास्त्वत्र वृद्धिः आत् ऐच् इति स्वतन्त्रं पदत्रयं स्वीकृत्य समासान्तस्य टचः प्रसङ्ग एव नास्तीति कथयन्ति। सूत्रे तपरकरणेन आ ए औ इति उपस्थितस्वरूपकानामेव ग्रहणं भवति न तु अन्येषाम् एतत्सवर्णीनामिति। इत्थं व्याकरणे आ ऐ औ इत्येते वर्णा वृद्धिसंज्ञकाः सन्ति, एतेषां वृद्धिसंज्ञा भवतीति सूत्रार्थः सम्पद्यत इति। वृद्धिशब्दोऽत्र मङ्गलवाचकोऽपीति विशेषेणान्यत्र प्रपञ्चितम् इति।

**अदेङ् गुणः १.१.२ आदेङ् च गुणसञ्ज्ञः स्यात्।**

**संस्कृतव्याख्या-** गुणसंज्ञाबोधकं सूत्रमिदम्। अत् च एङ् च तयोः समाहारद्वन्द्वसमासे अदेङ् इति प्रथमान्तम् उद्देश्यवाचकं पदम्, गुण इति प्रथमान्तं विधेयं पदम्, तपरकरणसामर्थ्यात् समकालस्यैव संज्ञाविधानात् अ ए ओ इत्येतेषां त्रयाणां गुणसंज्ञा भवतीति सूत्रस्य तात्पर्यम्। एतेन व्याकरणे गुणवाचका एते त्रयो वर्णा सन्तीति बोध्यम्।

**भूवादयो धातवः १.३.१ क्रियावाचिनो भ्वादयो धातुसञ्ज्ञाः स्युः।**

**संस्कृतव्याख्या-** धातुसंज्ञाबोधकं सूत्रमिदम्। अत्र पदद्वयम्। भूवादय इति प्रथमान्तं, धातव इति च प्रथमान्तपदम्। अत्र वृत्तौ क्रियावाचिनो इत्यर्थः कुत इति चेदत्रेदं बोध्यम्- भूवादयः इत्यत्र भूश्च वाश्च इति भूवौ, आदिश्च आदिश्चेति आदी। प्रथमआदिशब्दः प्रभृतिः (इत्यादि) अर्थवाचको द्वितीयआदिशब्दः प्रकार (सादृश्य) वाचकः, भूवौ आदी येषां ते भूवादयः, अर्थात् भू प्रभृतयो वा सदृशाश्च ये सन्ति ते धातुसंज्ञकाः सन्तीत्यर्थः संगच्छते। सादृश्यञ्चात्र क्रियावाचकत्वेन गृह्यते इत्थं, वासदृशानां क्रियावाचकनां भ्वादीनां धातुसंज्ञाः स्युरिति तात्पर्यम्। एतदर्थस्वीकारे विकल्पार्थकस्य वा शब्दस्य पृथ्वीवाचकस्य भू शब्दस्य च धातुसंज्ञा न भवति। अत एवोक्तम् वृत्तौ **क्रियावाचिनो इत्यादिः।** सूत्रे क्रियावाचिकग्रहणं किमर्थमिति चेत् तद्ग्रहणाभावे यत् शब्दस्य स्त्रीत्वे टाप्प्रत्यये या इति जाते द्वितीयाबहुवचने **याः पश्यसि** इत्यादावपि भ्वादिगणे, अदादिगणे च पठितस्य या धातोः सादृश्यात् **आतो धातोः** इति सूत्रेण आकारलोपस्य आपत्तिः। क्रियावाचिग्रहणे तु या सादृश्ये सत्यपि क्रियावाचकत्वाभावात् न धातुसंज्ञा न चाकारलोपप्रसङ्गस्तस्मात् क्रियावाचिग्रहणमिति।

एवमेव भ्वादय इति कथनेन **हिरुक् पृथक्** इत्यादीनाम् अव्ययानां क्रियावाचकत्वेऽपि भ्वादिगणे पाठाभावात् न धातुसंज्ञा। एवमेव शिश्ये इत्यादेरपि तिङन्तस्य क्रियावाचकत्वेऽपि न धातुसंज्ञेति।

**प्रागीश्वरान्निपाताः १.४.५६ इत्यधिकृत्य।**

**संस्कृतव्याख्या-** अधिकारसूत्रमिदम्। अत्र पदत्रयं वर्तते। प्राक् इत्यव्ययम्, रीश्वरात् इति पञ्चम्यन्तं, निपाताः इति प्रथमान्तं पदम्। अस्मिन् सूत्रे रीश्वरशब्दः **अधिरीश्वरे इत्यस्य** सूत्रस्य एकदेशस्य रीश्वर इत्यस्य अनुकरणम्। अनुकरणत्वात् नायमपशब्दः। पञ्चम्यन्तत्वेन अवधित्वं सूच्यते प्राक् पूर्वदेशे पठिता इति तात्पर्यम्। एतेन इतः प्रभृति **अधिरीश्वरे** इति एतत्पादीयोपरितनसूत्रे पठितात् रीश्वरशब्दात् प्राक् निपाता= निपातसंज्ञकाः सन्तीति बोधव्याम्। सूत्रेऽस्मिन् कथं रेफविशिष्टस्य रीश्वर इति ग्रहणम्, ईश्वर इत्येव कुतो नोक्तमिति चेदत्रेदं तत्त्वम्- ईश्वर इति पठितव्ये ईश्वरे तोसुन्कसुनौ इति तृतीयाध्यायस्थसूत्रपर्यन्तमपि अवधित्वं स्यात् तन्माभूत्, तदर्थ रेफविशिष्टग्रहणं बोध्यमिति।

यदि चात्र प्रथमोपस्थितत्वात् अधिरीश्वरे इति सूत्रस्यैवाधित्वं स्यात् कारणाभावात् तथातिक्रमणन्न स्यादित्युच्येत तदा सरेफग्रहणं स्पष्टार्थं बोध्यमिति।

**चादयोऽसत्वे १.४.५७ अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः।**

**प्रादय १.४.५८ अद्रव्यार्थाः प्रादयस्तथा।**

**संस्कृतव्याख्या- चादय......।** संज्ञासूत्रमिदम्। निपातसंज्ञाऽनेन क्रियते। चादयः असत्वे इति सूत्रस्य पदच्छेदः। च आदिर्येषां ते चादयः चादिगणपठिता इति तात्पर्यम्। असत्वे इति सप्तम्यन्तं पदम्, सत्वन्नाम द्रव्यं तच्च लिङ्गसंख्याकारकान्वितम्, न द्रव्यम् अद्रव्यं तस्मिन् अद्रव्ये द्रव्यभिन्ने इत्यर्थः। इत्थम् अद्रव्यवाचिनां चादिगणपठितानां निपातसंज्ञा भवतीति सूत्रार्थः सम्पद्यते। सूत्रे असत्वे इति कथनेन **छागः पशुः** इत्यादौ चादिगणे पठितस्यापि पशुशब्दस्य अत्र द्रव्यवाचित्वात् निपातसंज्ञा न भवति, किन्तु **पुष्टं** पशु मन्यते इत्यत्र पशुशब्दस्य सम्यगर्थे विद्यमानात् अद्रव्यवाचित्वात् निपातसंज्ञा भवत्येवेति।

निपातसंज्ञया **स्वरादिनिपातमव्ययम्** इति सूत्रेण अव्ययसंज्ञायां, सत्यां अव्ययादाप्सुपः इति सूत्रेण सुलोपो भवतीति निपातसंज्ञायाः फलं बोध्यम्।

**प्रादय----।** एकपदात्मकमिदं सूत्रम्। प्र आदिर्येषान्ते प्रादयः। अत्र **चादयोऽसत्वे** इति सूत्रात् असत्वे इत्यस्य प्रागीश्वरान्निपाता इति सूत्रात् निपाता इत्यस्य अधिकारः। एतेन अद्रव्यवाचिनां प्रादीनामपि निपातसंज्ञा भवतीति सूत्रार्थः। यद्यपि अस्य सूत्रस्य चादयोऽसत्वे इत्यत्रैव ग्रहणं कर्तुं शक्यं तथापि **उपसर्गाः क्रियायोगे** इत्यादौ केवलं प्रादयः इत्येतावन्मात्रस्य अनुवृत्तिर्यथा स्यात् तदर्थं पृथक् सूत्रं कृतमिति बोध्यम्। इत्थं सूत्रद्वयमिदं व्याख्यासौकार्याय एकत्रोपस्थापितमिति।

**उपसर्गाः क्रियायोगे १.४.५९**

**गतिश्च १.४.६०**

**प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः।**

**प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादयः।**

**संस्कृतव्याख्या- उपसर्गा.....।** सूत्रेऽस्मिन् पदद्वयम्। उपसर्गा इति संज्ञावाचकं प्रथमान्तं पदम्, क्रियायाः योगः, क्रियायोगः तस्मिन् क्रियायोगे इति सप्तम्यन्तं पदम्, क्रियया अन्वये सतीत्यर्थः। **गतिश्च** इत्यपि संज्ञावाचकं पदम्। प्रादयः इत्यस्य बहुवचनान्तत्वात् गतिश्च इत्यत्रापि बहुत्वमुचितं तथापि एकवचनमार्षं बोध्यम्। इत्थं क्रियायोगे अर्थात् क्रियाया अन्वये सति प्रादीनाम् प्र परा इत्यादिगणपठितानां शब्दानाम् उपसर्गसंज्ञा गतिसंज्ञा च भवतीति सूत्रार्थः सम्पद्यते। अत्र निपाता अपि अनुवर्तते। तेन प्रादयो निपातसंज्ञका एव सन्तो गत्युपसर्गसंज्ञका भवन्तीति तात्पर्यम्।

अत्र उपसर्गसंज्ञा, गतिसंज्ञा निपातसंज्ञा इति संज्ञात्रयस्य सत्वात् **आकडारादेका संज्ञा** इत्यधिकारत्वात् एक एव संज्ञा स्यादिति जिज्ञासायां कथयति- **गतिश्च** इति सूत्रे चकारेण संज्ञात्रयस्यापि समासः क्रियत इति। अथ प्रादीन् पठति **मूले प्र परा इत्यादि।** निस् दुस् निर् दुर् इत्यनयोः पृथक्-पृथक् पाठो **निरयते, दुरयते** इत्यादौ रूत्वस्य असिद्धत्वे लत्वाभावः। निर् दुर् इत्युपसर्ग पूर्वकात् अय् धातौ **उपसर्गस्यायतौ** इति सूत्रेण रेफस्य लत्वे, निलयते, दुलयते इति रूपं सिद्ध्यतीति।

**न वेति विभाषा १.१.४४**

**निषेधविकल्पयोर्विभाषा सञ्ज्ञा स्यात्।**

**संस्कृतव्याख्या-** व्याकरणे निषेधो विकल्पश्च इत्यनयो: द्वयोर्मिलितस्वरूपम् एव विभाषाशब्दार्थ:। तद्बोधनाय सूत्रमिदं प्रारभते। विभाषा संज्ञाबोधकं सूत्रमिदम्। अत्र पदत्रयम्, न, वा इति द्वयमपि अव्ययम्, विभाषा इति प्रथमान्तं पदम्।

एतेन न वा इत्यनयोर्मिलितस्य विभाषासंज्ञा। अत्र सूत्रे इति पदस्योल्लेखेन न इत्यस्य निषेधोऽर्थ:, वा इत्यस्य विकल्पार्थो गृह्यते एतेन निषेधो विकल्पश्च, इत्युभयस्य मिलितस्य विभाषासंज्ञा भवति। यदि इतिशब्दस्य ग्रहणं न स्यात्तदा **स्वं रूपं शब्दस्याशब्दसंज्ञा** इति सूत्रेण न वा इत्यनयो: शब्द स्वरूपस्य न वा इत्यनोर्मिलितस्य विभाषासंज्ञापति: तन्माभूत् तदर्थमिति ग्रहणम्। एतेन न इति शब्दस्य वा इति शब्दस्य (उभयमिलितस्य) विभाषा संज्ञा न भवतीति। इति ग्रहणाभावे न वा इत्यनयो: शब्दयोर्मिलितस्यैव विभाषासंज्ञायां 'विभाषाश्वे' इति सूत्रेण श्वि इत्यस्य स्थाने न वा इत्यादेशौ स्याताम् तन्माभूत् तदर्थम् इति ग्रहणम्। इति ग्रहणेन न वा शब्दाभ्यां न इत्यनेन निषेध:, व इत्यनेन विकल्प: इत्यर्थौ गृह्यते, अनयोर्मिलितस्य च निषेधविकल्पयो: विभाषा संज्ञा भवतीति।

इत्थमत्र बोध्यं विभषास्थलेषु पूर्वं निषेधमुखेन प्रवृत्तिर्भवति तद्नन्तरं स विधि: विकल्पो भवति। एवं विभाषा शब्दस्य विकल्पत्वेन व्यवहारो भवति।

**विभाषा त्रिविधा** भवति- **प्राप्तविभाषा, अप्राप्तविभाषा, प्राप्तप्राप्तविभाषा** (उभयत्रविभाषा)। एतेषु विभाषात्रयेषु उभयत्रविभाषार्थमिदं सूत्रम्।

**प्राप्तविभाषाया उदाहरणं यथा- विभाषा जसि** इति सूत्रेण विकलपविधानम् तथाहि-वर्णाश्रमेतरशब्दात् प्रथमाबहुवचने जस् विभक्तौ **द्वन्द्वे च** इति सूत्रेण सर्वनामसंज्ञाया नित्यनिषेधे प्राप्ते अनेन विकल्पेन सर्वनामसंज्ञायाम् वर्णाश्रमतरे, वर्णाश्रमेतरा इति रूपद्वयं भवति। अत्र प्राप्तस्य निषेधस्य वैकल्पिकत्वं, तस्मात् प्राप्तविभाषा।

**अप्राप्तविभाषाया उदाहरणं यथा- तीयस्य ङित्सु वा** इति वार्तिकम्। तथाहि- तीयप्रत्ययान्तशब्दस्य सर्वादिगणे पाठाभावात् न केनापि सूत्रेण सर्वनामसंज्ञाया: प्राप्ति तत्र अनेन ङित्सु विकल्पेन सर्वनामसंज्ञा क्रियते तेन द्वितीयस्मै, द्वितीयाय, तृतीयस्मै, तृतीयाय इति रूपद्वयं भवति। अत्र अप्राप्तस्य विकल्पेन प्राप्तिविधानं तस्मात् **अप्राप्तविभाषा।**

**उभयत्रविभाषाया उदाहरणं यथा-** पूर्वत: प्राप्तेऽपि अप्राप्तेऽपि विकल्पेन विधि: **प्राप्तप्राप्तविभाषा-** तद्यथा- **विभाषा श्वे इति सूत्रेण विकल्पविधानम्। तथाहि- श्विधातो**: यजादिगणे पाठात् तस्य कितिलिटिपरे, **वचिस्वपि यजादीनां किति** सूत्रेण श्विधातो: सम्प्रासारणं प्राप्तम्, इत्थम् अनेन सूत्रेण अपित्प्रत्ययेषु सम्प्रसारणस्य प्राप्ति:, पित् प्रत्ययेषु सम्प्रसारणस्य अप्राप्ति:, अस्यामवस्थायां **विभाषाश्वे** इति सूत्रेण लिटि, यङि च विकल्पो विधीयते, तेन वकारस्य विकल्पेन सम्प्रसारणसंज्ञायां लिटि शुशाव, शिश्वाय। शुशुवतु:, शिश्वियतु:। शुशुवु:, शिश्वियु: इति प्रत्येकं रूपद्वयं भवति।

**यङि शोशूयते-** एतत् अप्राप्तविभाषाया उदाहरणम् न केनापि प्राप्तत्वात्।

एतदतिरिक्तम् एका व्यवस्थितविभाषाऽपि दृश्यते, यथा **अवङ् स्फोटायनस्य** इत्यादि सूत्रेण अवङादेशविधानम्।

**न वेति विभाषा-** अस्य सूत्रस्य अभावे **अनड्वान् विभाषित:** इत्यादि याज्ञिक प्रयोगे विभाषाशब्द: केवलं विकल्पे दृष्ट: व्याकरणे तथा न स्वीक्रियत इति बोधनाय सूत्रमावश्यकम्। अन्यथा अस्यापि निषेधमुखेन, विधिमुखेनैव वैकल्पिकत्वं स्यात्, तेन **शिश्वाय,** शुशाव इत्यादीनां सिद्धिर्न स्यादिति तात्पर्यम्।

**स्वं रूपं शब्दस्याशब्दसंज्ञा १.१.६८ शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना।**

**संस्कृतव्याख्या- नियमसूत्रमिदम्-** तथाहि **'अग्नेर्ढक्, वाय्वृतुपित्रुषसो यत्'** राज्ञो **यत्** इत्यादौ लौकिक व्युत्पत्या वह्नि वातादीनाम् अर्थानाम् उपस्थितिर्भवति, तेषाम् ढगादिप्रत्ययैः सह पौर्वापर्य्यं न सम्भवं न च प्रातिपदिकात् इत्यनेन सहान्वयसम्भवः तस्मात् व्याकरणे तत्तदर्थवाचकशब्दात् एव प्रत्ययो भवतीति नियमार्थं सूत्रमिदं प्रारभते **स्वं रूपमित्यादि।**

अत्र सूत्रे स्वम् इति प्रथमान्तं, रूपं प्रथमान्तं, शब्दस्य इति षष्ठ्यन्तम्, अशब्दसंज्ञा इति च प्रथमान्तं पदम्। अत्र स्वशब्द अर्थबोधकः रूपशब्दश्च शब्दस्वरूपबोधकः। तेन शब्दस्य स्वम् अर्थः रूपं-शब्दस्वरूपं संज्ञा इति तात्पर्यम्। न शब्दसंज्ञा इति अशब्दसंज्ञा अत्र शब्दपदं व्याकरणशास्त्रबोधकम्। व्याकरणशास्त्रसंज्ञारहितम् इति तात्पर्यम्। इत्थम्-शब्दस्य स्वं स्वरूपं संज्ञी भवति व्याकरणशास्त्रे या संज्ञा कृता तां परित्यज्येति सूत्रार्थः सम्पद्यते।

**इदमत्र बोध्यम्**-लोके शास्त्रे वा कस्यापि शब्दस्योच्चारणे शब्दस्वरूपस्य तदर्थस्य चोपस्थितिर्भवति, लोके शब्दोऽर्थपरः शब्दे कार्यासंभवात् तस्मात् अर्थस्य प्राधान्यं शब्दस्य चाऽप्राधान्यं भवति। शास्त्रे तथा स्वीकर्तुं न शक्यते अर्थे प्रत्यादीनामन्वयासंभवात् तेन शास्त्रीयं सर्वं कार्यं व्यर्थं स्यात्। तस्मात् अनेन सूत्रेण नियम्यते यत् शास्त्रे शब्दस्वरूपस्यैव प्राधान्यम् अर्थस्य च अप्राधान्यमिति। अतः व्याकरणशास्त्रे शब्दः स्वस्वरूपं ग्राहयति व्याकरणे विधीयमानां संज्ञां परित्यज्येति। व्याकरणसंज्ञावाचकेन शब्देन तु तत्पदबोध्यस्य अर्थस्यैव ग्रहणं भवति। यथा-गुणपदेन तत्पदबोध्यानाम् अ ए ओ इत्येतेषां त्रयाणां वर्णानामेव। एवमेवान्यत्रापि। अग्नेर्ढक् इत्यादौ तु अग्निशब्दादेव ढक् प्रत्ययो भवतीति।

**येन विधिस्तदन्तस्य १.१.७२ विशेषणं तदन्तस्य सञ्ज्ञा स्यात्, स्वस्य च रूपस्य। समासप्रत्ययविधौ प्रतिषेधः ( वा. ५४५ )।**

**उगिद्वर्णग्रहणवर्जम् ( वा. ५४६ )**

**संस्कृतव्याख्या-** शब्दस्वरूपमादाय यो विधिः क्रियते स तस्य तदन्तस्य च भवतीति प्रतिपादयितुं सूत्रमिदमाह- **येनविधि इति।** अत्र पदद्वयम्, येन इति तृतीयान्तम्, विधिः इति प्रथमान्तं तदन्तस्य इति षष्ठ्यन्तं पदम्। येन इत्यस्य सर्वनामवाचित्वात् सर्वनाम्नश्च प्रधानपरामर्शकत्वात् विशेषणेन, इत्यर्थस्य ग्रहणं भवति। एतेन येन विशेषणेन, विधिः (विधीयत इति विधि भावे किप्रत्ययान्तः तस्मात् कार्यम् इत्यर्थः) क्रियते तत् कार्यं अन्तस्यापि अर्थात् विशेषणान्तस्य अपि भवति।

**अस्यायम्भावः** शास्त्रकृत्- सूत्रकर्त्ता येन करणभूतेन विशेषणेन विधिः क्रियते तत्कार्यं विशेषणान्तस्य सरूपस्यापि भवति इति। यथा अचो यत् इति सूत्रेण अच इति पदं धातोः विशेषणम् अतः अचो विधीयमानो यत् विधिः अजन्तधातोः भवतीति यथा- चि, जि इत्यादेः अजन्ताद्धातोः यत् प्रत्यये चेयम्, जेयम् इत्यादि।

स्वरूपस्यापि तत्कार्यस्योदाहरणं एरच् इति सूत्रेण विधीयमानोऽच् प्रत्ययः इण् गतौ इत्यस्मात् भवतीति।

**समासप्रत्ययः**- प्रकृतसूत्र पठितमिदं वार्तिकम्- येनविधिरित्यस्य बाधकमिति। तद्यथा-समासविधौ प्रत्ययविधौ येन विशेषणेन विधिः भवति तत्र तदन्तग्रहणं न भवति इति वार्तिकस्य तात्पर्यम्।

**समासविधौ तदन्तविधिनिषेधस्योदाहरणं यथा- द्वितीयाश्रितेत्यादिना** सूत्रेण द्वितीयान्तेन श्रितादिशब्देन विधीयमानः समासः श्रिताद्यन्तस्य परमश्रितमितिद्वितीयान्तेन सह न भवतीति।

**प्रत्ययविधौ तदन्तविधेः निषेधस्योदाहरणं यथा- नडादिभ्यः फक्** इति सूत्रेण नडादिगणपठितैः विधीयमानः फक्प्रत्ययः तदन्तात् नाडायनशब्दात् न भवति। एवमेवान्यत्रापि बोध्यम्।

**उगिद्वर्ण**- उक्तवार्तिकस्यापि प्रतिषेधकं वार्तिकमिदम्- तथाहि पूर्ववार्तिकेन समासविधौ प्रत्ययविधौ च

तदन्तविधेर्निषेध, उगिदवर्णग्रहणं यत्र वर्तते तं परित्यज्यैव भवति अर्थात् उगित् वर्णग्रहणस्थले तदन्तविधिर्भवत्येवेति- तदेवोच्यते अनेन वार्तिकेन उगित्ग्रहणे वर्णग्रहणे च तदन्तविधिर्निषेधो नेति।

उगित्ग्रहणे तदन्तविधिनिषेधाभावस्य-अर्थात् तदन्तविधेरुदाहरणं यथा- **उगितश्च** इति सूत्रेण ङीप्प्रत्ययः भवत्शब्दादपि अतिभवत् इति तदन्तादपि भवति। एवमेवान्यत्रापि।

वर्णग्रहणे तदन्तविधेरुदाहरणं यथा- एरच् इति सूत्रेण विधीयमानः प्रत्ययः इ धातोरपि भवति तेन-अय- इति, तदन्तात् चि धातोरपि भवति येन चय इत्यादिरूपं भवति, एवमेवान्यत्रापि बोध्यम् इति।

**विरामोऽवसानम् १.४.११०**

**वर्णानामाभावोऽवसानसञ्ज्ञः स्यात्।**

**संस्कृतव्याख्या-** सूत्रेऽस्मिन् पदद्वयं वर्तते। विराम इति प्रथमान्तम् अवसानम् इति च प्रथमान्तं पदम्। विरम्यते अस्मिन् इति विरामः, सामीप्येऽधिकरणे घञ् प्रत्ययान्तः। विरमणं क्रियाया अभावः। स चात्र शब्दशास्त्रप्रसङ्गात् वर्णानामुच्चारणाभावात्मक इति लभ्यते। तथा च यस्मिन् वर्णे उच्चारिते सति तदव्यवहितोत्तरकाले वर्णानामुच्चारणाभावः स एव विरामः। एवं भूतो योऽन्त्यवर्णः स अवसानसंज्ञको भवतीति सूत्रार्थः सङ्गच्छते। अवसानसंज्ञानिमित्तकं विसर्गादिकार्यं भवतीति।

**परः सन्निकर्षः संहिता १.४.१०९**

**वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।**

**संस्कृतव्याख्या-** संहितासंज्ञाबोधकं सूत्रमिदम्। अत्र पदत्रयं वर्तते। परः, सन्निकर्षः संहिता इति। त्रयमपि प्रथमान्तं पदम्। सन्निकर्षः सामीप्यम् इत्युच्यते स च अर्धमात्राधिककाल व्यवधानाभावः। पर शब्दस्य अतिशयोऽर्थः। एवं वर्णद्वयोरर्धमात्राकालिक व्यवधानाभाव एव अतिशयसन्निधिः तस्य संहितासंज्ञा भवतीति सूत्रार्थः। एतदेवाभिप्रेत्य मूले वृत्तौ कथयति **वर्णानामतिशयित** इति।

बुद्धिगतं पौर्यापर्येण सामीप्यं सर्वत्र बोध्यत इति विशेषः। संहितायामेव सन्धेर्विधानात् सन्धिज्ञानात्पूर्वं संहितासंज्ञाविधानं कृतमिति।

**सुप्तिङन्तं पदम् १.४.१४ सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।**

**संस्कृतव्याख्या-** पदसंज्ञाबोधकं सूत्रमिदम्। अत्र पदद्वयम्, सुप्तिङन्तम् इत्येकं प्रथमान्तं, पदम् इति द्वितीयं प्रथमान्तं पदम्।

सुप्तिङन्तम् इत्यत्र सुप् च तिङ् चेति सुप्तिङौ, तौ अन्तौ यस्य (शब्दस्वरूपस्य) तत् सुप्तिङन्तमिति बहुव्रीहिसमासघटितं पदम्। अन्तपदस्य सुप्-तिङ् इत्युभाभ्यां सहान्वयः। एतेन सुबन्तं तिङन्तञ्च पदसंज्ञकं भवति। सुबन्ततिङन्तयोः पदसंज्ञा भवतीति तात्पर्यम्।

अत्रेदमाशङ्कते- **प्रत्ययग्रहणे तदन्ता ग्राह्याः** इत्यनया परिभाषया प्रत्ययग्रहणे तदन्तस्य ग्रहणं भवति, एतेन् सुप् इत्यनेन सुबन्तस्य, तिङ् इत्यनेन तिङन्तस्य बोधः स्वतः सिद्धः कथं सूत्रेऽन्तग्रहणमिति। अत्रेदं बोध्यं यत् **अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं** नास्ति इति ज्ञापनार्थम् **अन्तग्रहणमिति।** एतेन **इदूदेद्विवचनं प्रगृह्यम्,** इत्यनेन न द्विवचनान्तस्य प्रगृह्यत्वम् अन्यथा कुमार्यो अगारम् इत्यर्थे कुमारी अगारम् इत्यत्र प्रकृतिभावः स्यात्, तन्माभूत् तदर्थम् अन्तग्रहणम्।

**हलोऽनन्तराः संयोगः १.१.७**

**अज्भिरव्यवहिता हलः संयोगसञ्ज्ञाः स्युः।**

**संस्कृतव्याख्या-** संयोगसंज्ञाबोधकम् इदं सूत्रम्। अत्र पदत्रयमस्ति। हल इति प्रथमान्तं अनन्तरा इति संयोग इति च प्रथमान्तं पदम्। हलः इति। हलौ च हलश्च इति विग्रहे एकशेष हल् इति तस्य प्रथमाबहुवचनान्तं पदम्। अन्तर शब्दस्यात्र **व्यवधानम्** अर्थः, अविद्यमानम् अन्तरं व्यवधानं येषान्ते अनन्तरा व्यवधानरहिता इति तात्पर्यम्। व्यवधानञ्चात्र अज्भिः हल्त्वेन सजातीयत्वादिति। इत्थम् = अज्भिरव्यवहिता हलः संयोगसंज्ञा भवतीति सूत्रार्थः सम्पद्यते। संयुज्यन्तेऽस्मिन् समुदाये वर्णा इति संयोग इति महासंज्ञाकरणात् समुदायस्यैव संयोगसंज्ञा। व्याख्यानाच्चापि एतत् ज्ञायते, तथाहि प्रत्येकं संयोगसंज्ञायां **सुदृषत्प्रासाद** इत्यत्र प्रकारसन्निधौ तकारस्य संयोगसंज्ञायां तस्य संयोगान्तलोपापत्तिः, एवमेव **दृषद्विभर्ति** इत्यत्र वकारसन्निधौ दकारस्य संयोगत्वात् संयोगान्तलोपापत्तिः। सूत्रे हल् इति जातौ बहुवचनम्, **जात्याख्यामेकस्मिन् बहुवचनमन्यतरस्याम् इति** नियमात् एकशेषात् च द्वयोरपि संयोगसंज्ञा भवति, तेन **शिक्षा** इत्यादौ **गुरोश्च हल** इति सूत्रेण अप्रत्ययो भवतीति।

वस्तुतो यत्र बहवो हलः संश्लिष्टा भवन्ति तत्र द्वयोः बहूनाञ्च अविशेषेण संयोग संज्ञा भवतीति स्पष्टम् भाष्यादौ। यदि बहूनामेव संयोगसंज्ञा तर्हि गोमान्करोति इत्यत्र मतुप् प्रत्ययस्य तकारस्य संयोगान्तलोपो न स्यात्। तस्मात् द्वयोः द्वयोरपि संयोगसंज्ञेति।

**ह्रस्वं लघु १.४.१०**

**संयोगे गुरु १.४.११ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्।**

**दीर्घं च १.४.१२ दीर्घं च गुरुसंज्ञं स्यात्।**

**इति संज्ञा प्रकरणम्**

**संस्कृतव्याख्या- ह्रस्व........।** लघुसंज्ञा बोधकं सूत्रमिदम्। एकामात्रिकस्य ह्रस्वसंज्ञकवर्णस्य लघुसंज्ञा अपि भवतीति सूत्रस्यार्थः। स्पष्टत्वान्नाधिकं वक्तव्यमिति।

**संयोगे............।** गुरुसंज्ञाबोधकं सूत्रम्। अत्र पदद्वयम्, संयोगे इति सतिसप्तम्यन्तं पदम्, गुरु इति संज्ञाबोधकं प्रथमान्तं पदम्, **ह्रस्वं लघु** इति सूत्रात् ह्रस्वमिति अनुवर्तते एतेन संयोगे परे ह्रस्वोऽपि वर्णः गुरुसंज्ञको भवतीति सूत्रस्यार्थः। तद्यथा भिक्ष् शिक्ष् इत्यादिधातो संयोगपरत्वात् इकारस्य गुरुसंज्ञायां **गुरोश्च हल** इति सूत्रेण अ प्रत्ययो भवति तस्मात् स्त्रीत्वे टाबादिना भिक्षा शिक्षा इत्यादि रूपं भवति।

**दीर्घं च-** सूत्रे पठितस्य चकारस्य समुच्चयवाचकत्वात् गुरु इति संज्ञाबोधकं पदं गृह्यते। दीर्घम् इत्युद्देश्य वाचकं प्रथमान्तं पदम्। एतेन, द्विमात्रिकाचो दीर्घसंज्ञकस्य वर्णस्य गुरुसंज्ञापि भवतीति सूत्रस्यार्थः संगच्छते। एतेन ईह, ऊह् धातोः लिटि परे **इजादेश्च गुरुमतोऽनृच्छः** इति सूत्रेण आम् प्रत्ययो भवति, ईहाञ्चक्रे, ऊहाञ्चक्रे इत्यादिरूपं सिद्ध्यतीति।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितं संज्ञाप्रकरणं सम्पूर्णम्।**

----

# अथ परिभाषाप्रकरणम्

**अनियमे नियमकारिणी** परिभाषा अर्थात् यत्र विधेर्विधानस्य न कश्चन नियमः तत्र या नियमयति सा परिभाषा। यथा **इको यणचि** इत्यादि विधिसूत्रेण अचि परे इकः स्थाने विधीयमानो यण व्यवहितस्य, अव्यवहितस्य, उभयोः स्थाने वा कुत्र भवेदिति न नियमः, तत्र **तस्मिन्निति निर्दिष्टे पूर्वस्य** इति परिभाषा सूत्रं नियमयति अव्यवहितस्य इकः स्थान एव यण् स्याद् अचि परे। एवमेवान्यत्रापि परिभाषया नियमः क्रियते। इयं परिभाषा द्विविधा-सूत्ररूपेण पठिता परिभाषा, परिभाषानाम्ना पठिता लोकन्यायसिद्धा, वाचनिकी ज्ञापकसिद्धा च।

सूत्ररूपेण पठिता परिभाषा अर्थात् **परिभाषासूत्रं** यद् वर्तते तस्य निरुपणमस्मिन् प्रकरणे क्रियते तस्मात् अस्य प्रकरणस्य नाम **परिभाषा प्रकरणम्** इति।

परिभाषासूत्रं नाम **स्ववाक्यार्थबोधशून्यत्वे सति विध्यादिसूत्रैकवाक्यतयार्थ**बोधकत्वम्। अर्थात् **इको यणचि** इत्यादि विध्यादिसूत्रार्थेण सह सम्मिल्य तस्यार्थबोधं पूरयति। एवमेतादृशानां सूत्राणां निर्वचनमत्र प्रारभते। तद्यथा-

**इको गुणवृद्धी १.१.३ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र ''इकः'' इति षष्ठ्यन्तं पदम् उपतिष्ठते।**

**संस्कृतव्याख्या-** परिभाषासूत्रमिदम्। अत्र पदद्वयम्। इक इति षष्ठ्यन्तस्यानुकृतस्य शब्दस्य लुप्तप्रथमान्तैकवचनान्तं पदम्, गुणश्च वृद्धिश्च तयोरितरेतरयोगद्वन्द्वसमासघटितम् गुणवृद्धी इति प्रथमान्तं पदम्। अत्र **वृद्धिरादैच्** इति सूत्रात् वृद्धिरिति पदम्, अदेङ् गुण इति सूत्रात् गुण इति पदञ्चानुवर्तते। पूर्वसूत्राद् गुणवृद्धीरित्यनयोः पदयोः अनुवृत्तिसत्वे तल्लाभेऽस्मिन् सूत्रे गुणवृद्धी इत्यस्य ग्रहणेन अस्य सूत्रस्यार्थो भवति यत् गुणशब्दमुच्चार्य, वृद्धिशब्दमुच्चार्य यत्र गुणवृद्धी विधीयेते तत्र ''इकः'' इति षष्ठ्यन्तं पदम् उपतिष्ठते।

अत्रेदं तात्पर्यं येन सूत्रेण गुणः स्यात्, वृद्धिः स्यात् इत्येवं प्रकारेण गुणविधानं, वृद्धिविधानं तत्रैव इकः स्थाने आदेश, **यत्र च स्थानिनां निर्देशः** स्यात् तत्र नेदं सूत्रं प्रवर्तते। यथा- **मिदेर्गुणः, मृजेवृद्धिः** इत्यादौ गुणपदम् वृद्धिपदञ्च साक्षात् उच्चार्य गुणवृद्धयोर्विधानम्। अत एतादृशस्थले अनेन परिभाषासूत्रेण इकः स्थाने एवादेशो भवति न तु दिव औत् इत्यादिस्थलेषु यतोहि अत्र अकारविधानम् औकारविधानञ्च। अनयोः गुणवृद्धिवाचकत्वेऽपि साक्षात् गुण वृद्धि इति पदम् उच्चार्य न विधानं वर्तते। एवमेवान्यत्रापि बोध्यमिति।

**अचश्च १.२.२८ ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते।**

**संस्कृतव्याख्या-** इदमपि परिभाषासूत्रम्। अत्र पदद्वयम्। अच इति षष्ठ्यन्तस्यानुकरणस्य लुप्तप्रथमान्तं पदम्, च इत्यव्ययम्। अत्र **ऊकालोऽच् ह्रस्वदीर्घ प्लुतः** इति सूत्रात् अच् इत्यस्य ह्रस्वदीर्घप्लुतः इत्यस्य चानुवृत्तिर्भवति।

तस्य तृतीयान्तत्वेन वचनविपरिणामः क्रियते। एतेन यत्र ह्रस्वदीर्घप्लुतशब्दानाम् उच्चारणं कृत्वा यथाक्रमं ह्रस्वदीर्घप्लुतादिकार्यं विधीयते तत्र अचः इत्यस्य षष्ठ्यन्तस्य पदस्य उपस्थितिर्भवति। अर्थात् अचः स्थाने आदेशो भवतीति। तद्यथा- **ह्रस्वो नपुंसके प्रादिकस्य, अकृतत्सार्वधातुकयोदीर्घः, वाक्यस्य टेः प्लुतः** उदात्तः इत्यादिषु सूत्रेषु साक्षात् ह्रस्वदीर्घप्लुतशब्दाः पठितास्सन्ति। एभिसूत्रैर्विधीयमानो ह्रस्वादेशः, दीर्घादेशः प्लुतादेशश्च अचः स्थाने भवतीति । एवमेवान्यत्रापि बोध्यम्। प्रत्येकम् उदाहरणं यथा- **अतिरि, जीयते, आगच्छ कृष्ण ३ अत्र** गौश्चरति इत्यादि। **दिव उत् अष्टन् आ विभक्तौ** त्यदादीनाम इत्यादिभिः ह्रस्व-दीर्घादिविधानेऽपि न अच उपस्थितिः ह्रस्वादिशब्दमुच्चार्य तेषां विधानाभावादिति।

**आद्यन्तौ टकितौ १.४.४६ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः।**

**संस्कृतव्याख्या-** अत्र पदद्वयम्। आदिश्च अन्तश्च इति आद्यन्तौ प्रथमान्तं पदम्। टश्च कश्च इति टकौ, टकौ इतौ यस्य तौ टकितौ इति द्वन्द्वगर्भबहुव्रीहिसमासघटितं प्रथमान्तं पदम्। अत्र **यथासंख्यमनुदेशः समानाम्** इति सूत्रात् यथासङ्ख्यम् इत्यस्य पदस्य उपस्थितिर्भवति येन क्रमात् इत्यर्थो गृह्यते। इत्थम् टकारेत्संज्ञको यस्य ककारेत्संज्ञको यस्य स आगमी यथाक्रमम् तस्य आदेः अन्तस्य च अवयवो भवतीति सूत्रार्थः सङ्गच्छते। **तद्यथा- छे च** इति सूत्रेण विधीयमाने तुकागमे ककारस्य इत्संज्ञा भवति तुक् इत्यस्यानुबन्ध लोपे ''त्'' इति शिष्यते अयं तुगागमशिष्टतवर्णः कित्वात् शिवत् छाया इत्यादौ ह्रस्वस्य अकारस्य अन्तावयवो भवति शिवत्, छाया श्चुत्वे च शिवच्छाया इति। एवमेव **''ङणोः कुक् टुक्शरि''** इत्यादौ ककास्येत्संज्ञया कुकागमः टुकागमश्च अन्तावयवो भवति। **'ङः सि धुट्'** इत्यादिस्थले टकारस्य इत्संज्ञकत्वात् टित्वात् सकारस्यादौ भवति तस्य च अवयवो भवतीति। किञ्चिदत्रावधेयम्- अत्र सूत्रे आद्यन्तौ इत्यस्य द्वन्द्वसमासोऽनुपपन्नः आद्यन्तपदयोः पृथक्-पृथक् अन्वयात् साहित्याभावात् तथापि टकितौ आद्यन्तौ इत्यर्थे समुदायस्य समुदायेऽन्वयात् साहित्यसत्वात् द्वन्द्वः। भाष्ये शास्त्रस्याभिष्टसिद्धये एवंविधसमासोऽपि स्वीकृतः।

**मिदचोऽन्त्यात्परः १.२.४७**

**अच इति निर्धारणे षष्ठी। अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यै-वान्तावयवो मित् स्यात्**

**संस्कृतव्याख्या-** मित् अचः अन्त्यात् परः इति सूत्रस्य पदविभागः। म इत् यस्य स मित् इति बहुव्रीहिसमासघटितं प्रथमान्तं पदम्, अच इति निर्धारणे षष्ठ्यन्तं पदम्, अन्त्यात् इति दिग्योगपञ्चम्यन्तं पदम् पर इति प्रथमान्तं पदम् अच इत्यत्रैकवचनम् जात्यभिप्रायेण। अच इत्यस्य निर्धारणे षष्ठीविधानात् अचां मध्ये योऽन्त्यः इत्यर्थो लभ्यते। इत्थं सूत्रस्यार्थो भवति यत् अचां (अच्समुदाये) मध्ये योऽन्त्य अच् तस्मात् परस्य अन्तावयस्य मकारेसंज्ञकः (मित) आगमः स्यादिति।

यथा- **पयांसि, पचन्ती, नन्दति** इत्यादौ नुमागमस्य मित्वात् अन्त्यात् अच परे भवति अन्त्यस्य चावयवो भवतीति। एवमेव रूणद्धि इत्यादावपि बोध्यम्।

**षष्ठी स्थानेयोगा १.१.४१**

**अनिर्धारितसम्बन्धविशेषा षष्ठी स्थाने योगा बोध्या। स्थानं च प्रसङ्गः।**

**संस्कृतव्याख्या-** परिभाषासूत्रम् इदम्। सूत्रेऽस्मि् पदद्वयम्। षष्ठी इति प्रथमान्तं पदम्, स्थानेयोगा इति स्थाने प्रसङ्गे वाचकतया योगो यस्याः सा इत्यर्थे निपातनात् सप्तम्या अलुकि प्रथमान्तं पदम्। स्थानमत्र प्रसङ्गः। शब्दस्य शब्देन सह त्रय एव सम्बन्धा भवन्ति आन्तर्यं, सामीप्यं प्रसङ्गश्च। एतेष्वर्थेषु प्रसङ्ग इत्यर्थो गृह्यते। अवयवादिषु अर्थेषु या षष्ठी सा निर्धारणषष्ठीति उच्यते। यत्र तादृशः सम्बन्धविशेषो निर्धारितो न भवति अर्थात् अनिर्धारितसम्बन्धविशेषे यस्या सा षष्ठी स्थानेयोगा बोध्या अर्थात् स्थान शब्द सम्बद्धा भवतीति सूत्रार्थः सम्पद्यते। षष्ठी श्रुतौ स्थाने इति

सप्तम्यन्तं पदम् उपतिष्ठत इति तात्पर्यम् तद्यथा- इको **यणचि** इत्यादौ इक इति षष्ठ्या स्थानमुच्यते। तस्मिन् प्रकृत्यर्थस्य इकः अन्वयो भवति तेन अचि परत इकः प्रसङ्गे यण् स्यादिति सूत्रस्यार्थः फलति।

कथं सूत्रे स्थानं प्रसङ्ग इत्युक्तमिति चेदत्रेदं **बोध्यम्,** स्थानशब्दस्य लोके आधारवाचकत्वे प्रसिद्धे षष्ठ्या स्थानार्थकत्वे प्रकृत्यर्थस्य निरूपकत्वेन अभेदेन वा अन्वये इकोऽधिकरणे यण् स्यात् इति इगधिकरणको यण् स्यादिति वा अर्थः स्यात् तेन इको निवृत्तिर्न स्यात्। एतेन विष्णुस्थानं वैकुण्ठम् इव इक् स्थानं यण् इत्येवार्थः तन्माभूत् तदर्थमिह उच्यते **स्थानमत्र प्रसङ्गः।** इत्थम् यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यम् इत्यादौ शरैर्दर्भा निवर्तन्ते तथैव इको यणचि इत्यादावपि यणादिभिः इगादयो निवर्तन्त इति।

**स्थानेऽन्तरतमः १.१.५० प्रसङ्गे सति सदृशतम आदेशः स्यात्।**

**यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्य बलीयः। ( प. १४ )**

**संस्कृतव्याख्या-** स्थाने अन्तरतम इति सूत्रस्य पदच्छेदः। स्थानं प्रसङ्ग इत्युक्तम् अन्तरशब्दोऽत्र सदृशस्य पर्यायः अतिशयितोऽन्तरः अन्तरतमः तमप् प्रत्ययान्तः। एतेन स्थाने अर्थात् प्रसङ्गे सति सदृशतम आदेशो भवतीति सूत्रार्थः। अस्यायम्भाव एकस्य स्थानिन अनेकादेशप्रसङ्गे सति यः स्थानार्थगुणप्रमाणतः स्थानिना सदृशतमः स एवादेशो भवतीति। प्रत्येकमुदाहरणं यथा- **स्थानमान्तर्यस्योदहरणम् दध्यत्र,** अत्र तालुस्थानकस्य इकारस्य स्थाने तालुस्थानको यकारादेशः।

**अर्थकृतान्तर्यस्योदाहरणम्- तृज्वत्क्रोष्टुः।** अत्र कोष्टुशब्दस्य उकारन्तत्वात् अर्थसाम्यात् तृजन्त एव क्रोष्टु शब्द आदेशो भवति।

**गुण आन्तर्यस्योदाहरणम्-** वाग्घरिः। अत्र हकारस्य घोषनादसंवारमहाप्राण प्रयत्नकत्वात् कवर्गस्य घकार एव वर्ण आदेशो भवति घोषनादसंवारमहा-प्राणप्रयत्नसाम्यात्।

**प्रमाणकृतान्तर्यस्योदाहरणं यथा- अमुष्मै, अमूभ्याम्** इत्यादि, अत्र **अदसोऽसेर्दादुदोमः** इति सूत्रेण ह्रस्वस्य स्थाने ह्रस्य उकार दीर्घस्य च स्थाने दीर्घ ऊकार भवति ह्रस्वदीर्घप्रमाणसाम्यात्।

अत्रेदमाशङ्कते यत् **चेता स्तोता** इत्यादौ **चि तृ स्तु तृ** इत्यवस्थायाम् इकारस्य उकारस्य ह्रस्वप्रमाणात् **सार्वधातुकार्धधातुकयोः** इति सूत्रेण विधीयमानो गुणः प्रमाण अन्तर्यात् अकार एव कथन्न भवतीति। तत्परिहाराय परिभाषाम् उपस्थापयति- **यत्रानेकविधमित्यादिः।**

अस्येदं तात्पर्यं यत् यत्र स्थानार्थगुणप्रमाणान्तर्येषु एकादधिकम् (अनेकविधम्) आन्तर्यं प्राप्नोति तत्र स्थानकृतमान्तर्यं बलवत् भवतीति। एतेन इकारस्य एकारः, उकारस्य ओकारः गुणो भवति न तु अकारः स्थानभेदात्।

**तस्मिन्निति निर्दिष्टे पूर्वस्य १.१.६६ सप्तमी निर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।**

**संस्कृतव्याख्या-** तस्मिन् इति निर्दिष्टे पूर्वस्य इति सूत्रस्य पदविभागः। अत्र तस्मिन् इति पदं सप्तम्यन्तपदस्यानुकरणं विद्यते, इति पदम् पूर्वपदस्यार्थपरकत्वद्योतकम् अव्यय पदम्, निर्दिष्टे इति तस्मिन् इत्यस्य विशेषणं सप्तम्यन्तं पदम्, निःशब्दो नैरन्तर्यपरकः दिशिरुच्चारणक्रियः अर्थात् नैरनन्तर्येण उच्चारितस्य इत्यर्थः। तदेवाव्यवहितोच्चारितस्य इति तात्पर्यम्। इत्थम् **विध्यादिसूत्रे सप्तम्यन्तं पदमुद्दिश्य विधीयमानं कार्यं तत्सप्तम्यन्तपदाद् वर्णान्तरेण अव्यवहितेच्चारितस्य पूर्वस्य स्थाने भवतीति सूत्रार्थः।**

**अस्यायम्भावः- इको यणचि** इत्यादौ अचि इकः यण् स्यादित्यर्थे अचि इत्यत्र सप्तम्या वर्णान्तराधिकरणत्वस्यासंभवात् सति सप्तमी वर्तते। एतेन अचि सति इक यण् इत्यर्थेऽपि व्यवहितेऽव्यवहिते च इक

यण् प्राप्तौ अव्यवहित एव न व्यवहिते, पूर्वस्यैव भवति न परस्य इति नियमयितुं सूत्रमिदं वर्तते एतेन विध्यादि सूत्रेषु निर्दिश्यमानं सप्तम्यन्तपदमुद्दिश्यं विधीयमानं कार्यं तत्सप्तम्यन्तपदात् अव्यवहितपूर्वस्येव स्यादिति सूत्रार्थः। तद्यथा- **इको यणचि** इत्यत्र अचि इति सप्तम्यन्तं पदमुद्दिश्य विधीयमानं यण् कार्यं तदचः अव्यवहित पूर्वस्यैव इकः स्थाने भवतीति।

सूत्रे तस्मिन् इत्यत्र तत् पदं न स्वरूपपरकं तथा स्वीकारे तु ''**तस्मिन्नणि च युष्माकास्माकौ**'' इत्यादावेव प्रवर्तेत, तस्वरूपपठितत्वात् न तु इको यणचि इत्यादौ तन्माभूत् तदर्थमत्र तस्मिन् इति सप्तम्यन्तस्यानुकरणमिति। व्यवधानं चात्र वर्णान्तरकृतमेव न तु कालकृतम्, यतोहि **इको यणचि** इत्यादौ कालकृतस्य व्यवधानस्यापि अनेन सूत्रेणैव निरासे कृते संहिताधिकारस्य वैयर्थ्यत्वं स्यात्। एतत्सर्वं मनसि निधाय एव कथयति **मूले-सप्तमीनिर्देशेन विधीयमानं कार्य वर्णान्तरेण अव्यवहितस्य पूर्वस्य बोध्यम् इति।** इत्थं संहिताधिकारबहिर्भूतविधयः कालव्यवधानेऽपि संभवन्ति। सूत्रे पूर्वस्यैव इति विधाने **दध्युदकम्** इत्यादौ इकारस्यैव यण् भवति न तु उकारस्य स्थाने। अव्यवहितस्यैव (व्यवधानरहित स्यैव) इति कथनेन **अग्निचित्, सोमसुद्** इत्यादौ न भवति। तस्मात् पूर्वस्यैव अव्यवहितस्यैव इति सूत्रेणानेन नियम्यत इति।

**तस्मादित्युत्तरस्य १.१.६७ पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।**

**संस्कृतव्याख्या-** तस्मात् इति उत्तरस्य, इति सूत्रस्य पदविभागः। तस्मात इति पञ्चम्यन्तपदस्यानुकरणम्, इति पदम् स्वरूपार्थबोधकम्। उत्तरस्य इति षष्ठ्यन्तं पदम्। अत्र पूर्वसूत्रात् निर्दिष्टे इत्यनुवर्तते। इत्थं विध्यादिसूत्रे पञ्चम्यन्तं पदमुद्दिश्यं यत्कार्यं विधीयते तत् पञ्चम्यन्तात् वर्णान्तरेणाव्यवहितस्य परस्य स्यादिति सूत्रार्थः सम्पद्यते। तथाहि **उदः स्थास्तम्भोः पूर्वस्य** इत्यादिसूत्रे पूर्वसवर्णः उदः परस्य पूर्वस्य च उभयत्रापि प्राप्नोति, तत्र नियमयति पञ्चम्यन्तात् अव्यवहितस्य परस्यैवेति। सूत्रे परस्यैवेति कथनेन 'तिङ्ङतिङः'' इति सूत्रेण निघात उत्तस्यैव भवति **अग्नि मीले** इत्यादावेव, नतु ईले अग्निम् इत्यादौ। एवमेव अव्यवहितस्यैव भवति इति कथनेन उत्संस्थानम्, उत्संस्तम्भनम् इत्यादौ उदः स्थास्तम्भोः पूर्वस्य इति सूत्रेण पूर्वसवर्णो न भवतीति।

**अलोऽन्त्यस्य १.२.५२ षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात्।**

**संस्कृतव्याख्या-** अल अन्त्यस्य इति सूत्रस्य पदविभागः। अल् इति प्रत्याहारो वर्णपर्यायवाचकं षष्ठ्यन्तं पदम्, अन्त्यस्य इति षष्ठ्यन्तं पदम्। अत्र **षष्ठी स्थाने योगा** इति सूत्रात् षष्ठी, इति स्थाने इति च अनुवर्तते। षष्ठी इत्यस्य प्रथमान्तस्य तृतीयान्ततया विपरिणामः क्रियते। निर्दिष्टस्य इति पदमाक्षिप्यते। स्थाने इत्यन्तरं विधीयमान इति शेषः। इत्थं सूत्रस्यास्य अयमर्थो भवति यत्-

स्थानषष्ठीनिर्दिष्टस्य विधीयमान आदेशः षष्ठीनिर्दिष्टस्य य अन्त्य अल् तस्य स्थाने स्यादिति। एतेन त्यदादीनाम इत्यनेन विधीयमान अकार अन्त्यस्य स्थाने भवति। सूत्रे स्थानषष्ठी इति कथनेन आर्धधातुकस्येड् वलादेः इति सूत्रेण विधीयमान इडागमः तृचः ऋकारात् पूर्वो न भवति। **अलः** इति कथनेन पदस्य इत्यधिकृतत्य **वसुस्त्रंसु-इत्यादि** सूत्रेण विधीयमान दत्वं परमानडुद्भ्याम् इत्यत्र अन्त्यस्य पदस्य स्थाने न भवतीति।

**ङिच्च १.१.५३, अयमप्यन्तस्यैव स्यात् ( सर्वस्य सू. ४५ ) इत्यस्यापवादः**

**संस्कृतव्याख्या-** ङकार इत् यस्य स ङित्। अलोऽन्त्यस्य इति सूत्रमत्रानुवर्तते। **षष्ठी स्थाने योगा** इति सूत्रात् षष्ठी, स्थाने इत्यनयोरनुवृत्तिः। इत्थम् ङकारेत्संज्ञको यो आदेश सोऽपि अन्त्यस्य अलः स्थान एव भवतीति सूत्रार्थः। एतदेवोद्दिश्य उच्यते मूले- **अयमपि तथा।** ङिदपि अन्त्यस्य इत्यर्थः। तद्यथा- अवङ्, तातङ्, अनङ् इत्याद्यादेशा उदाहरणम्। इदं सूत्रम्-अनेकाल् शित्सर्वस्य इत्यस्य अपवादभूतम् वर्तत इति।

अस्येदं तात्पर्यं यत् अनेकाल् ङित् यो आदेशः स ङित् सामर्थ्यात् अन्त्यस्य स्थान एव भवतीति।

**आदेः परस्य १.१.५४ परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। अलोऽन्त्यस्य ( सू.४२ ) इत्यस्यापवादः।**

**संस्कृतव्याख्या-** परिभाषासूत्रमिदम्। अत्र पदद्वयम्। आदेः इति षष्ठ्यन्तं, परस्य इति च षष्ठ्यन्तं पदम्। अत्र षष्ठी इत्यनुवर्तते। **अलोऽन्त्यस्य** इत्यस्मात् अलः इत्यस्यापि अनुवृत्तिर्भवति। एतेन परस्य स्थाने विधीयमानं यत् कार्यं तत् तस्य (परस्य) आदेः अलः स्थाने भवतीति सूत्रार्थः सम्पद्यते। तद्यथा- उदः **स्थास्तम्भोः पूर्वस्य** इति सूत्रेण विधीयमानः पूर्वसवर्णः इत्यत्र तस्मादित्युत्तरस्य इति परिभाषासूत्रेण उदः परस्य स्था इत्यस्य स्थाने प्राप्नोति तत्र इदम् (आदेः परस्य इति) सूत्रं पञ्चम्यन्तात् विहितस्य स्था इत्यस्य आदेः वर्णस्य सकारस्य स्थाने एव पूर्वसवर्णः स्यादिति नियमयति। अतः पूर्वसवर्णः सकारस्यैव भवति। इत्थम् इदं सूत्रं **तस्मात् दित्युत्तरस्य** इत्यस्य शेषभूतं बोध्यम्। एतच्च **अलोऽन्त्यस्य** इत्यस्यापवादसूत्रम्। सूत्रे अलः इत्यनुवृत्या- ''द्विगता आपो यस्मिन्'' इत्यर्थे '**द्व्यन्तरूपसर्गेभ्योऽप ईत्**' इति सूत्रेण द्वि-अप् इति पान्तसमुदायस्य स्थाने ईकारादेशो न भवति अपितु अपः आदे, अलः अकारस्यैव स्थाने तेन द्वीपम् इति रूपं भवति।

**अनेकाल्शित्सर्वस्य १.१.५५ स्पष्टम्। अलोऽन्त्यसूत्रापवादः। अष्टाभ्य औश् ( सू. ३१२ ) इत्यादौ आदेः परस्य ( सू. ४४ ) इत्येतदपि परत्वादनेन बाध्यते।**

**संस्कृतव्याख्या-** अत्र पदद्वयम्। अनेकाल्शित् इत्येकं प्रथमान्तं, सर्वस्य इति षष्ठ्यन्तं द्वितीयं पदम्। न एक अनेक, अनेकोऽल् यस्य स अनेकाल् इति नञ्तत्पुरुषगर्भबहुव्रीहिसमासः। शकार इत् यस्य स शित् अनेकाल् च शित् चेति समाहारद्वन्द्वे एकवचनान्तम् अनेकाल्शित् इति। इत्थम् अनेकाल (अनेकवर्णघटितः) आदेशः शिदादेशश्च सर्वस्य= सम्पूर्णस्य स्थाने भवतीति सूत्रार्थः। अत्र न कस्याप्यनुवृत्तिसंभवात् सूत्रघटितपदादेवार्थबोधात् कथयति मूले **स्पष्टम् इति।** अस्तेर्भू इत्युदाहरणम्। अत्रेदमाशङ्कते अस्तेर्भू इत्यस्य अस् धातोर्भू भवति इत्युक्ते सम्पूर्णस्यैव स्थाने आदेशः प्राप्नोति कथमिदं सूत्रमिति। तत्रोच्यते मूले-**अलोऽत्यसूत्रापवाद** इति। एवमेव ''अतो भिस् ऐस्'' इत्यनेन ऐसादेशोऽपि सम्पूर्णस्य भिस स्थाने भवतीति।

इदं सूत्रम् **अष्टाभ्य औश्** इत्यादौ आदेः परस्य इति परिभाषासूत्रेण प्राप्तस्य परस्य आदेशमपि परत्वात् बाधते। अस्येदं तात्पर्यं यत् '**अष्टाभ्य औश्**' इति सूत्रेण जश् शसोः स्थाने विधीयमान औश् इत्यादेश **अलोऽन्त्यस्य** इति परिभाषासूत्रेण अन्त्यस्य अलः स्थाने प्राप्नोति तं प्रबाध्य **तस्मादित्युत्तरस्य** इति सूत्रेण परस्य स्थाने प्राप्नोति तथा च तत्सूत्रशेषभूतेन आदेः परस्य इति सूत्रेण परस्य आदेः स्थाने प्राप्नोति। औश् इत्यत्र शकारस्य इत्संज्ञया शित्वात्, **आदेः परस्य** इति सूत्रापेक्षया परत्वात् तं प्रबाध्य सर्वादेशो भवति अष्टौ इति रूपं च भवति। एतदेव कथयति मूले **अष्टाभ्य औश् इत्यादौ आदेः परस्य इत्येतदपि परत्वादनेन बाध्यत इति।**

इत्थं निष्कर्षत एवं वक्तुं शक्यते यत् यत्र **आदेः परस्य,** अनेकाल् शित्सर्वस्य च इत्युभयोः प्राप्तिप्रसङ्गः तत्र परत्वात् '**अनेकाल्शित् सर्वस्य**' अस्यैव सूत्रस्य प्रवृत्तिर्भवति, यत्र च अनेकाल् शित्सर्वस्य विषयो न भवति तत्र **आदेः परस्य** इति सूत्रं प्रवर्तत इति।

**स्वरितेनाधिकारः १.३.११**

**स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम्।**

**परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। ( प. ३९ )**

**असिद्धं बहिरङ्गमन्तरङ्गे ( प. ५१ )**

**अकृतव्यूहाः पाणिनीयाः ( प. ५१ ) निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः।**

**इति परिभाषा प्रकरणम्**

**संस्कृतव्याख्या- स्वरि----।** स्वरितेन अधिकारः इति सूत्रस्य पदविभागः। अधिकारो नाम व्यापृतिः, विनियोगः। स्वरितेन इत्यत्र **इत्थं भूतलक्षणे** इति तृतीया, इत्थं स्वरितेन स्वरविशेषेण उत्तरत्रानुवृत्तिरूपव्यापार अधिकारो बोध्य इति सूत्रार्थः। अर्थात् यत्पदं शास्त्रकारेण स्वरितस्वरविशिष्टम् उच्चारितं तत् उत्तरसूत्रेषु अनुवर्तनीयमिति तात्पर्यम्। कियद्दूरमधिकार इति तु व्याख्यानेनैव अवगन्तुं योग्यः।

**परनित्य----।** इयं परिभाषारूपेण पठिता। व्याकरणे पूर्वपरनित्य-अन्तरङ्गअपवादरूपं पञ्चविधं शास्त्रं (सूत्रम्) प्रवर्तते। तत्र परादीनां मध्ये पूर्वपूर्वापेक्षया उत्तरशास्त्रं बलवद् भवतीति परिभाषार्थः। परिभाषायाम्- उत्तरोत्तरम् इत्यत्र **आनुपूर्व्ये द्वे वाच्ये** इति नियमेन द्वित्वम् कर्मधारयवदुत्तरेषु इति नियमेन च कर्मधारयवद्भावात् सुपो लुक्। इत्थम् पूर्वापेक्षया परस्य परापेक्षया नित्यान्तरङ्गपवादा, नित्यापेक्षयापि अन्तरङ्गापवादौ, अन्तरङ्गापेक्षापि अपवाद इत्येवं क्रमेण पूर्वापेक्षया उत्तरोत्तरशास्त्रं बलवत् भवतीति फलितार्थः।

**पूर्वापेक्षया परं बलवत् भवति- विप्रतिषेधे परं कार्यं** मित्यनेन। तथाहि आदेः परस्य इत्यपेक्षया अनेकाल्शित् सर्वस्य बलवत्वम्। अष्टौ इत्युदाहरणम्। एवमेवान्यत्रापि। **परात् नित्यस्य बलवत्त्वस्योदाहरणं तुदति तुदादिभ्यः शः** इत्यस्य एवमेव रूधादिभ्यः श इत्यस्य बलवत्वे रूणद्धि इति। अत्र परमपि लघूपधगुणं प्रबाध्य **कृताकृतप्रसङ्गि नित्यम्** इत्यनेन नित्यत्वात् शश्नमौ भवतः।

**परात् अन्तरङ्ग शास्त्रस्य बलवत्त्वस्योदाहरणं- उभयेदेव मनुष्याः** इत्यादिः। अत्र 'उभये' इत्यत्र '**प्रथमचरम**' इत्यादिना सूत्रेण परमपि विकल्पेन सवर्णसंज्ञां बाधित्वा विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वात् **सर्वादीनि सर्वनामानि** इति सूत्रं प्रवर्तते, नित्यं सर्वनामसंज्ञा च भवति।

**परात् अपवादशास्त्रस्य बलवत्त्वस्योदाहरणम्-** परमपि अनेकाल् शित्सर्वस्य इति सर्वादेशं प्रबाध्य 'ङिच्च' इत्यन्तादेशः। दध्ना दध्ने इत्यादौ **अस्थि दधि** इत्यनेन अनङ्।

**नित्यात्- अन्तरङ्गस्य बलवत्वस्य उदाहरणं यथा- ग्रामणिनी कुले** अत्र नित्यमपि 'इकोऽचि नुम् विभक्तौ इति सूत्रेण नुमं बाधित्वा ''**ह्रस्वो नपुंसके**'' इत्यादिसूत्रेण ह्रस्वो भवति।

**अन्तरङ्गात् अपवादस्योदाहरणं यथा-** दैत्यारः श्रीशः इत्यादौ परमपि सवर्णदीर्घं बाधित्व अन्तरङ्गत्वात् आद्गुण इति सूत्रेण गुणे यणि च प्राप्ते अपवादत्वात् सवर्णदीर्घो भवति। एवमेव उन्नयौ उन्नयः, सुल्वौ, सुल्वः इत्यादौ अन्तरङ्गत्वात् इयङि, उवङि च प्राप्ते अपवादत्वात् **एर**नेकाच इत्यनेन 'ओः सुपिः' इत्यनेन यण् भवति।

इदमत्रावश्यं बोध्यं यत्- **यदि अपवादोऽन्यत्र चरितार्थः** तर्हि अपवादोऽपि परेण **अन्तरङ्गेन च बाध्यत एव।** यथा अयजे इन्द्रम् ग्रामे इह इत्यादौ अन्तरङ्गेण गुणेन सवर्णदीर्घो बाध्यते।

**असिद्धं बहिरङ्ग..........।** अन्तरङ्गनाम अल्पापेक्षम्। तस्य बलवत्वे बीजं बोधयितुम् इयं परिभाषा उपस्थाप्यते। अन्तरङ्गे शास्त्र प्रसक्ते बहिरङ्गशास्त्रम् असिद्धम्। (अविद्यमानम्) बोध्यमिति परिभाषायाः तात्पर्यम्। एतेन पचावेदम् इत्यादौ ''एत ऐ'' इत्यैत्वं न भवति। इयं परिभाषा 'वाह ऊठ्' इति सूत्रे पठिता।

**अकृतव्यूहा-** पाणिनीयाः पाणिनि शास्त्रमधिकृत्य अधीयाना (अध्येतारः) पाणिनिशिष्याः, अकृतव्यूहाः, न कृतोऽकृतः व्यूह (विशिष्टः ऊह तर्कः विनाशात्मको वा तर्कः) प्रकृतप्रत्ययविवेचनं यैः ते भवन्तीति। अर्थात् पाणिनीयशिष्या अकृतव्यूहा भवन्ति। अर्थात् तादृशं किमपि तर्कं न कुर्वन्ति येन लक्ष्यस्य (यन्निमित्तकं कार्यं भवति तस्य) विनाशः स्यात् इति भावः। अस्याः परिभाषाया उदाहरणम्-**सेदुषः इति।** अत्र आर्धधातुकस्येडवलादेः इति सूत्रेण वलादिलक्षण इद् न भवति तथा कृते इडागमनिमित्तस्य वकारस्य **वसोः सम्प्रसारणम्** इति सूत्रेण प्रसारणे कर्त्तव्ये निमित्तस्य विनाशःस्यादिति।

**।। इति राजधरमिकृतया संस्कृतव्याख्ययासहितं परिभाषाप्रकरणं सम्पूर्णम्।।**

# अथाच्सन्धिप्रकरणम्

**इको यणचि ६.२.७७ इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते। स्थानत आन्तर्यादीकारस्य यकारः। सुध्य् उपास्य इति जाते।**

**संस्कृतव्याख्या-** विधिसूत्रमिदम्। अत्र पदत्रयम्, इकः इति षष्ठ्यन्तं, यण् इति प्रथमान्तं अचि इति सप्तम्यन्तं पदम्। संहितायाम् इत्यस्य अधिकारः। इकः इत्यत्र अनिर्धारित सम्बन्धविशेषे षष्ठी, तस्मात् **षष्ठी स्थाने योगा** इति परिभाषासूत्रेण स्थाने इति लभ्यते। यण् इति प्रथमान्तं विधेयं पदम्। अचि इत्यस्य सप्तम्यन्तत्वात् **तस्मिन्निर्तिनिर्दिष्टे पूर्वस्य** इति परिभाषासूत्रेण अव्यवहितपूर्वस्य, इत्यर्थो लभ्यते। इत्थं सर्वेषां पदस्परमन्वयेन सूत्रस्यार्थो भवति यत् अच् प्रत्याहारे परे ततोऽव्यवहितस्य पूर्वस्य इकः स्थाने यण् भवति संहितायां विषये। संहिता च अर्धमात्राधिककालव्यवधानाभावः अर्थात् अर्धमात्राकालपर्यन्तं ततो न्यूनो वा उच्चारणकालः संहिता भवति तस्यां संहिताविषयभूतायाम् इकः स्थाने यण् भवतीति। इकः इति स्थानी, यण् इति आदेशः। इक् इत्यनेन इ उ ऋ लृ इत्येते चत्वारो वर्णाः यण् इत्यनेन च, य व र ल इत्येते चत्वारो वर्णा गृह्यन्ते। अत्र इकः स्थाने स्थान-आन्तर्यात् स्थानसमीप्यात् वा इकारस्य स्थाने यकारः उकारस्य स्थाने वकारः, ऋकारस्य स्थाने रेफ लृकारस्य च स्थाने लकारादेशो भवति । नात्र 'यथासंख्यमनुदेश समानाम्' इति नियमेन यथासंख्यं यणादेशः सवर्णसंज्ञायां सत्यां यण् इत्यनेन सप्तवर्णा इक्इत्यनेन षट्षष्टिवर्णा गृह्यन्ते तस्मान्न यथासंख्यम्, किञ्च प्रत्याहारपठितवर्णानामेव ग्रहणेनापि ऋकारलृकारयोः सवर्णसंज्ञायां ऋकारस्य स्थाने लकारादेशः, लृकारस्य च स्थाने रेफादेशः स्यात्। अतो न यथासंख्येन निर्वाहः। अत एवोक्तम् मूले **स्थानत आन्तर्यादीकारस्य यकार** इति। एवेन सुधी उपास्य इत्यत्र यणादशे यकारे कृते सुध् य् इति स्थिति र्भवति।

**अनचि च ८.४.४७ अच परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वम्।**

**संस्कृतव्याख्या-** अत्र पदद्वयं वर्तते। अनचि इति सप्तम्यन्तं पदम्, च इत्यव्ययं प्रथमान्तम्। अत्र **यरोऽनुनासिकेऽनुनासिको** वा इति सूत्रात् यरः इत्यस्य वा इत्यस्य चानुवृत्तिर्भवति एवम् **अचो रहाभ्यां द्वे** इति सूत्रात् अचः द्वे इत्यनयोरप्यनुवृत्तिः भवति।

सूत्रे अनचि इत्यत्र न अच्, अनच्, तस्मिन् अनचि इति नञ्तपुरुषः। नञ् समासस्य द्विविधोऽर्थः **पर्युदासः प्रसज्यप्रतिषेधश्च,** पर्युदासः सदृशग्राही भवति, पर्युदासस्वीकारे अच् भिन्ने अच् सदृशे वर्णे परे इत्यर्थः स्यात्, तेन हल् वर्णे परे सत्येव इत्यर्थः सम्पद्येत, परं हलिपरे तदभावे च अच्रहिते द्वित्वविधानाय अत्र प्रसज्यप्रतिषेधः स्वीक्रियते। इत्थम् अचः परस्य यरः स्थाने विकल्पेन द्वित्वं भवति अचिभिन्ने परत्वे इति सूत्रार्थः सङ्गच्छते। अत्रेदमाशङ्कते अच्भिन्नइत्युक्ते **हलि** पर इत्यर्थे सत्वे ''**हलि च**'' इत्येव कथं न सूत्रितम्, तदुच्यते तथा **कृते** हलि

परत्व एव द्वित्वं भविष्यति न तु हलि रहिते, एतेन भाष्योदाहृते वाक् वाक्क् इत्यत्र द्वित्वं न स्यात्। अत: अनचि इत्येवोक्तम् न तु 'हलि च' इति।

**स्थानिवदादेशोऽनल्विधौ १.१.५६ आदेश: स्थानिवत्स्यात्, न तु स्थान्यालाश्रयविधौ। अनेनेह यकारस्य स्थानविद्भावेनाच्त्वमाश्रित्य ''अनचि च''( सू. ४८ ) इति द्वित्वनिषेधो न शङ्क्य, अनल्विधौ इति तन्निषेधात्।**

**संस्कृतव्याख्या**- अतिदेशसूत्रमिदम्। स्थानिवत् आदेश: अनल्विधौ इति सूत्रस्य पदविभाग:। स्थानिना तुल्यम् इत्यर्थे वतिप्रत्ययेन निष्पन्नस्य स्थानिवत् इत्यस्य स्थानीसदृशमित्यर्थ:। आदेश: इति प्रथमान्तं पदम्, तेन आदेश: स्थानिसदृशो भवति इत्यर्थो लभ्यते। अला विधि: अलो विधि: (अल परस्य विधि:) अलो विधि: (अल: स्थाने विधि:) अलि विधि: इति चतुर्भिविग्रहैर्निष्पन्न अल्विधि इति, न अल्विधिरिति अनल्विधि: तस्मिन् अनल्विधौ इति। एतेन अलाश्रयभिन्ने विधौ इत्यर्थ:। इत्थं सर्वम् संहृत्य सूत्रस्यार्थो भवति यत् स्थानिभूते, स्थानिसम्बन्धि वा अलाश्रये विधौ कार्ये कर्त्तव्ये आदेश: स्थानिसदृशो भवति इति। एतेन सुध् य् उपास्य: इत्यत्र इकारस्य स्थाने जातस्य यकारस्य स्थानिवद्भावेन यकारेऽच्त्वमाश्रित्य तद् अचि परत्वात् **अनचि** च इति सूत्रेण अत्र द्वित्वनिषेध: स्यादिति न शङ्कनीयम्, सूत्रे अनल्विधि इति ग्रहणात्। तथाहि = अल् इति वर्णपर्याय: तदाश्रयभिन्न एव अनेन स्थनिवद्भावात् इति तात्पर्यम् अत्र अलाश्रय एव विधि: अर्थात् यकारादेशस्थानीभूतो योऽल् ईकार:, तद्गतमच्त्वम् यकारे तदाश्रित्य द्वित्वनिषेधो न इति भाव:। अतो न अनेन सूत्रेणात्र स्थानिभाव इति तात्पर्यं बोध्यम्।

अत्र सूत्रे अनल्विधौ इत्यत्र अल्विधि इत्यस्य चतुर्विधविग्रहस्य सम्भवात् तस्य प्रत्येकं प्रयोजनं कथयति। तद्यथा- **अला विधि** इति तृतीयान्तेन सह विधिशब्दस्य समासे **व्यूढोरस्केन** इत्यत्र नस्य णत्वं न भवति। तथाहि अत्र **विसर्जनीयस्य स** इति सूत्रेण विसर्गस्थानिकस्य सकारस्य स्थानिवद्भावेन विसर्गत्वमादाय, विसर्गस्य च अट्प्रत्याहारे ग्रहणात् अट्त्वमाश्रित्य, अट्कुप्वाङ्नुम्व्यवायेन इति सूत्रेण अडव्यवधानेऽपि विधीयमानं णत्वं न भवति।

**अल: परस्य विधौ** इति विग्रहेण समासे स्वीकारे '**द्यौ:**' इत्यस्य **सिद्धि:**। तथाहि दिव् शब्दात् प्रथमैकवचने सुविभक्तौ सकारस्य **हलङ्‍्यादिना** लोपो न भवति। अन्यथा दिव् सु इत्यवस्थायाम्, '**दिव औत्**' इति सूत्रेण नकारस्य स्थाने औकारदेशे दि औ स् स्थिते वकारस्थानिकस्य औकारस्य स्थानिवद्भावेन हल्त्वात् तत: परस्य स् इत्यस्य लोप: स्यात्। एतद्विग्रहस्वीकारे अल: परस्य हल्त्वपरकस्य सुलोपस्य कार्ये कर्त्तव्ये स्थानिवद्भावो न भवतीति।

**अलो विधि: ( अल स्थाने विधि: )** इति विग्रहे अल्विधिरिति स्वीकारे **द्यु काम:** इत्यत्र **दिव उदिति** वकारस्थानिकस्य उकारस्य स्थानिवद्भावेन वकारातिदेशे **लोपो व्योर्वलि** इति सूत्रेण प्राप्तो लोपो न भवति।

**अलिविधौ** इति सप्तम्यन्तेन सह समासे कृते ''क इष्ट:'' इत्यादौ यज् धातो: स्थाने सम्प्रसारणे इकारादेशस्य स्थानिवद्भावो न भवति, अन्यथा यकारस्थानिकसम्प्रसारणस्य इकारस्य स्थानिवद्भावेन यकारसत्वात् तस्य च हश् प्रत्याहारे सत्वात् **हशि च** इति सूत्रेण क र् इष्ट इत्यवस्थायाम् उत्वं स्यात् तन्न भवतीति।

इत्थं चतुर्विधविग्रहमादाय अल्विधिभिन्न एव स्थानिवद्भावस्य निषेधं बोधयितुं सूत्रे सामान्यरूपेण कथयति न तु स्थान्यलाश्रयविधौ इति।

**अच: परस्मिन् पूर्वविधौ १.१.५४ अल्विध्यर्थमिदम्। परानिमितोऽजादेश: स्थानिवत् स्यात्। स्थानिभूतादच:, पूर्वत्वेन दृष्टस्य विधौ कर्त्तव्ये। इति यण स्थानिवद्भावे प्राप्ते-**

**संस्कृतव्याख्या**- अल्विधौ स्थानिवद्भावं कर्त्तुं सूत्रमिदमारभते। इदमप्यतिदेशसूत्रम्। अच: परस्मिन् पूर्वविधौ इति पदत्रयमत्र वर्तते। अच इति षष्ठयन्तम् षष्ठ्यन्तत्वात् स्थाने इत्यर्थो लभ्यते तेन अच: स्थान इत्यर्थ:। परस्मिन् इति निमित्तेऽर्थे सप्तम्यन्तं पदम्, पूर्वविधौ इति च विषयेऽर्थे सप्तम्यन्तं पदम्। **पूर्वस्य विधि:** पूर्वविधि:,

**पूर्वस्माद् विधिः** पूर्वविधिः, तस्मिन् पूर्वविधौ इति। अत्र पूर्वशब्दः सापेक्षः सावधिकश्च। त्रयं चात्र सन्निहितं, स्थानी, आदेशः निमितञ्च। स्थान्यपेक्ष्यैवात्र पूर्वत्वं विविक्षितं स्थानिन आदेशेन अपहृतत्वेऽपि भूतपूर्वगत्या तत्पूर्वत्वस्य सम्भवात् तेन स्थानी अपेक्ष्यते। इत्थं सूत्रस्यार्थो भवति यत् **परनिमित्तमाश्रित्य** विधीयमानो योऽजादेशः तस्य स्थानिवद्भावो भवति स्थानीभूतात् अचः पूर्वत्वेन दृष्टस्य कार्ये कर्त्तव्ये। अर्थात् अच्निमित्तात् पूर्वस्य कार्यस्य कर्त्तव्ये स्थानिभूतालाश्रये परनिमित्तो अजादेशः स्थानिवत् भवतीति। तद्यथा-सु ध् य् उपास्य इत्यत्र अच् परत्वाभावे ततः पूर्वस्य धकारस्य द्वित्वे कर्त्तव्ये स्थानीभूतस्य ईकारस्य स्थाने विधीयमानस्य यकारस्य स्थानिवद् भावः प्राप्नोति। एतेन स्थानिवद्भावेन अच्त्वे परत्वे **अनचि च** इति सूत्रेण धकारस्य द्वित्वन्न। अतः तन्निषेधाय अग्रिमं सूत्रम् उपस्थाप्यते-

**न पदान्तद्विर्वचन वरे यलोप स्वर सवर्णानुस्वार दीर्घ जश्चर्विधिषु १.१.५८ पदस्य चरमावयवे द्विर्वचनादौ च कर्त्तव्ये परनिमित्तोऽजादेशो न स्थानिवत्। इति स्थानिवद्भावनिषेधः।**

**संस्कृतव्याख्या-** अपवादसूत्रमिदम्- विशेषो विधिरपवादः। पूर्वसूत्रेण प्राप्तस्य स्थानिवद्भावस्य निषेधोऽनेन सूत्रेण भवति।

अत्र सूत्रे पदद्वयम्। न इत्यव्ययम् प्रथमान्तं पदान्तेत्या दिसप्तमीबहुवचनान्तं पदम्। अत्र स्थानिवदादेशोऽनल्विधौ इति सूत्रात् स्थानिवत्, आदेशः इत्यनयोः, अचः परस्मिन्पूर्वविधौ इतिसूत्रस्य च अनुवृत्तिर्भवति। सूत्रे न पदान्तेत्यादिद्वन्द्वसमासघटितस्य विधिशब्दस्य प्रत्येकमन्वयो भवति येन पदान्तविध्याद्यर्थो भवति। इत्थं सर्वमाहत्य सूत्रस्यार्थो भवति यत् **पदान्तविधिः,** द्विर्वचनविधिः वरेप्रत्ययेविधिः यलोपविधि स्वरविधिः सवर्णविधिः **अनुस्वार विधिः दीर्घविधिः जश्विधिः चर्विधिश्च** इत्येतेषु विधिषु कार्ये कर्त्तव्ये परनिमित्तकस्य अजादेशस्य स्थानिवद्भावो न भवतीति। अत्र पदान्तविधि इत्यत्र अन्तशब्दः चरमावयवे रूढ़ो वर्तते। तदुच्यते मूले **वृत्तौ- पदस्य चरमावये द्विर्वचनादौ च कर्त्तव्ये** परनिमित्तोऽजादेशो न स्थानिवत् इति।

**प्रत्येकमुदाहरणं यथा-** पदस्य चरमामावयवे विधौ स्थानिवद्भावनिषेधस्य उदाहरणम्- **कानि सन्ति, कौ स्तः।** तथाहि अस् धातोः लटि प्रथमाबहुवचने **श्नसोरल्लोपः** इति सूत्रेण धातोरकारलोपे **कानि सन्ति इत्यत्र** लुप्तस्य अकारस्य स्थानिवद्भावेन अच्परत्वात् **इको यणचि** इत्यनेन पदस्य चरमावयवस्य इकारस्य स्थाने यण्प्राप्नोति परन्तस्य चरमावयत्वेन कार्ये कर्त्तव्ये स्थानिवद्भावस्य निषेधः। एवमेव कौ स्तः इत्यादावपि स्थानिवद्भावस्य निषेधात् न आवादेशः।

**द्विर्वचनविधिकर्त्तव्यतायां स्थानिवद्भावस्य निषेधस्योदाहरणं यथा-** सुधी+उपास्य इत्यत्र यणि कृते सुध् य् उपास्य इत्यवस्थायाम् **अनचि च** इति सूत्रेण धकारस्य द्वित्वे कर्तव्ये ईकारस्थानिकस्य यकारस्य न स्थानिवद्भावः।

**वरे प्रत्यये परे कर्त्तव्ये स्थानिवद्भावस्योदाहरणं यथा- यायावर** इत्यत्र याधातोः यङ्प्रत्यये **सन्यङोः** इति सूत्रेण द्वित्वे, **दीर्घोऽकित** इति सूत्रेण अभ्यासस्य दीर्घे यायाय इति जाते, धातुसंज्ञायां **यश्च यङः** इति सूत्रेण वर च्प्रत्ययेऽनुन्धलोपे यायाय वर इति जाते **अतो लोप** इति सूत्रेण यकारस्याकर लोपे **लोपोव्योर्वलि** इति सूत्रेण वरच् प्रत्ययस्य वकारस्य परत्वे वल्परत्वात् यलोपो भवति। अत्र वरे परे लुप्ताकारस्य स्थानिवद् भावो न भवति।

**यलोपविधिकर्त्तव्यतायां स्थानिवद्भावनिषेधस्य उदाहरणम्- यातिः** इति। अत्रापि यायाय ति इत्यवस्थायाम् अलोपे, **आतोलोप इटि** च आकारलोपे याय् ति इत्यवस्थायां यलोपो भवति। अत्रापि यलोपकर्त्तव्यतायाम् अल्लोपस्य स्थानिवद्भावो न भवतीति।

**उदात्तादिस्वरविधिकर्त्तव्ये अजादेशस्य स्थानिवद्भावस्य उदाहरणम्= चिकीर्षकः।** अत्र चिकीर्ष

अक इत्यवस्थायाम्, अतो: लोप, इति सूत्रेण अकारलोपो भवति। अत्र **लिति** ६.१.१९३ इति सूत्रेणोदात्तस्वरकर्त्तव्यतायाम् अकारलोपस्य स्थानिवद्भावो न भवति।

**सवर्णविधौ कर्त्तव्यतायां स्थानिवद्भावस्य निषेधस्य उदाहरणम्**- शिण्ढि, इत्यत्र शि न ड् ढि इत्यवस्थायां नकारस्य अकारलोपे नस्यानुस्वारे ययि परे **अनुस्वारस्य ययि परसवर्ण** इति सूत्रेण परसवर्णे कृते शिण्ढि इति रूपं भवति। अत्र परसवर्णविधिकर्त्तव्ये प्राप्तस्य अकारलोपस्य स्थानिवद्भावो निषिध्यते।।

**अनुस्वारविधौ स्थानिवद्भावनिषेधस्योदाहरणं यथा**- शिंषन्ति। शिनष् अन्ति इत्यवस्थायाम् **श्नसोरल्लोप** इति सूत्रेण नकारस्याकारलोपे, **नश्चापदान्तस्य झलि** इति सूत्रेण अनुस्वारे शिंषन्ति इति रूपं भवति। अत्र अनुस्वारविधौ कर्त्तव्ये अकारलोपस्य न स्थानिवद्भावः।

**दीर्घविधिकर्त्तव्यतायां स्थानिवद्भावस्य निषेधस्योदाहरणम्- प्रतिदीव्ना** इति। प्रतिदिवन् शब्दात् तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे प्रतिदिवन् आ इत्यवस्थायां नकारात्परस्य अकारस्य **अल्लोपोऽन** इति सूत्रेण अल्लोपे **हलि च** इति सूत्रेण उपधादीर्घे प्रतिदीव्ना इति रूपं भवति, अत्र उपधादीर्घकर्त्तव्यतायां परनिमित्तकस्य अजादेशरूपस्य अल्लोपस्य स्थानिवद्भावो न भवति।

**जश्त्वविधि कर्त्तव्यतायाम् स्थानिवद्भावस्य निषेधस्योदाहरणम्- सग्धि** इति। समानाग्धि-**अदनं सग्धिरिति।** अद्भक्षणे इत्यस्मात् क्तिन् प्रत्ययेऽनुबन्धलोपे **बहुलं छन्दसीति** सूत्रेण अद: स्थाने घस्लादेशे, **घसिभसोर्हलि** च इति सूत्रेण उपधालोपे, **झलो झलि** इति सूत्रेण सलोपे, तकारस्य धत्वे, ''**झलां जश् झशि**'' इति सूत्रेण धकारस्य दकार:। अत्र जश्त्वे कर्त्तव्ये उपधालोपो न स्थानिवत् भवति।

**चर्विधौ कार्ये कर्त्तव्ये स्थानिवद्भावस्य निषेधस्योदाहरणं यथा- चक्षतुः।** घस् धातो र्लिटि लकारे प्रथमाद्विवचने तत्स: स्थाने अतुस् आदेशे घस् अतुस् ''इत्यवस्थायाम् धातोर्द्वित्वे, हलादिशेषे कुहोश्चु इति सूत्रेण चवर्गादेशे झकारे, तस्य च जश्त्वे ज घ स् अतुस् इत्यवस्थायाम् **गमहनेत्यादिसूत्रेण** उपधालोपे, **खरि च** इति सूत्रेण धकारस्य चर्त्वे जक् स् अतुस् इति जाते, **शासिवसिघसीनां** इति सूत्रेण सस्य षत्वे वर्णसंयोगे सस्य रुत्वे विसर्गे चक्षतु इति रूपं भवति। अत्र चर्त्वे कार्ये उपधालोपस्य स्थानिवद्भावो न भवतीति।

इत्थम्= सु ध् य् इत्यवस्थायाम् **अनचि च** इति सूत्रेण द्वित्वे कार्ये कर्त्तव्ये अनेन स्थानिवद्भावस्य निषेधे धकारस्य द्वित्वे सु ध् ध् य् उपास्य इति स्थितिः। ततोऽग्रिमं सूत्रमुपस्थापयति-

**झलां जश् झशि ८.४.५३ स्पष्टम्। इति धकारस्य दकारः।**

**संस्कृतव्याख्या**- विधिसूत्रमिद्। अत्र झलाम् इति इत्युद्देश्यवाचकं षष्ठ्यन्तं पदम्, जश् इति विधेयं प्रथमान्तं पदम्, झशि इति निमित्तबोधकं सप्तम्यन्तं पदम्। झशि इत्यत्र सप्तत्यन्तत्वात् **तस्मिन्नित्या**दिपरिभाषासूत्रेण अव्यवहितपूर्वस्य इत्यर्थो लभ्यते। एतेन झलां स्थाने जश्वर्णा भवन्ति झश्प्रत्याहारस्थे वर्णे परे झशोऽव्यवहितपूर्वस्य इति सूत्रार्थ: संगच्छते। इत्थं सु ध् य् य् इत्यवस्थायां पूर्वधकारस्य जश्त्वे दकारे कृते सु द् ध् य् उपास्य: इति स्थितिर्भवति।

**अदर्शनं लोप २.२.६० प्रसक्तस्यादर्शनं लोपसञ्ज्ञं स्यात्।**

**संयोगान्तस्य लोप ८.२.२३ संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। इति यलोपे प्राप्ते। यणः प्रतिषेधो वाच्यः ( वा.४८०६ ) यणो मयो द्वे वाच्यः ( वा. ५०१८ ) मय इति पञ्चमी यण इति षष्ठी इति पक्षे यकारस्यापि द्वित्वम्। तदिह धकारयकारयोर्द्वित्वविकल्पत्वाच्चत्वारि रूपाणि। एकधमेकयम्, द्विधं द्वियम्, द्विधमेकयम्, एकधं द्विधम्। सुदूध्युपास्यः। मध्ध्वरिः। यात्त्रंशः। लाकृतिः।**

**संस्कृतव्याख्या-** अदर्शनं...........। सु ध् ध् य् उपास्य इत्यत्र संयोगान्तलोपस्य वक्ष्यमाणत्वात् तत्र च लोपशब्दस्य स्वरूपं विज्ञापययितुमिदं सूत्रमुपस्थापयति- **अदर्शनमित्यादि।** संज्ञासूत्रमिदम्। अत्र पदद्वयम्। न दर्शनम् अदर्शनम्, दर्शनस्य अभावोऽदर्शनमिति वेति प्रथमान्तं पदम्, लोप इति प्रथमान्तं विधेयं पदम्, दर्शनमत्र विशिष्टरूपकं, तथाहि शब्दानुशासनप्रस्तावात् **शब्दविषयकं श्रवणम्** अत्र दर्शनम्, दर्शनस्य अभाव अदर्शनम् इति विग्रहे अर्थाभावेऽव्ययीभावसमासघटितं पदम्। अत्र **स्थानेऽन्तरतम** इति सूत्रात् स्थाने इत्यनुवर्तते तस्य च प्रसङ्ग इत्यर्थः पूर्वं निरूपितम्। इत्थं सर्वम् संहृत्य सूत्रस्यार्थो भवति यत् शास्त्रतः शब्दस्य कस्यचित् प्रसङ्गे सति कस्यचित् अश्रवणं लोपसंज्ञं भवतीति। एतदेवभिप्रेत्य मूल उच्यते **प्रसक्तस्य अदर्शनम्** इति। शास्त्रस्य प्रसक्तौ एव अश्रवणं लोपसंज्ञकम्। अन्यथा प्रसक्तिं विना अश्रवणस्य लोपसंज्ञास्वीकारे दधि शब्दात् क्विपः अभावेऽपि अश्रवणमात्रेण लोपसंज्ञायां **प्रत्ययलोपे प्रत्ययलक्षणेन ''ह्रस्वस्य पिति कृति तुक्''** इत्यनेन तुकागमे 'दधित्' इत्यनिष्टापत्तिः स्यात् तन्माभूत् तदर्थं वृत्तौ प्रसक्त इत्युक्तम्। इत्थं शास्त्रे कस्यचित् प्रसक्तस्य शास्त्रेण उपस्थापितस्य अश्रवणस्य लोपसंज्ञा भवतीति।

**संयोगान्त--------।** अत्र पदद्वयम्। संयोगान्तस्य इति षष्ठ्यन्तं, लोप इति प्रथमान्तं पदम्। अत्र पदस्य अधिकारो वर्तते। संयोगः अन्ते यस्य तत् संयोगान्तं तस्य संयोगान्तस्य। **अलोऽन्त्यस्य** इति सूत्रात् अन्त्यस्य, **षष्ठीस्थाने योगा** इत्यतः स्थाने इत्यस्योपस्थितिर्भवति। इत्थं सूत्रस्यार्थो भवति यत् संयोगान्तं यत्पदं, तस्य पदस्य अन्त्यस्य अलः स्थाने लोपो भवतीति।

तदुच्यते वृत्तौ संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। अत्र संयोगमिति पदस्य विशेषणं, विशेषणत्वाच्च **येन विधिरित्यादिना** तदन्तविधिसम्भवे सूत्रे अन्तग्रहणं त्यक्तुं शक्यम् किञ्च संयोगौ अन्तौ यस्य इति विग्रहेण प्रत्येकं संयोगसंज्ञा। पक्षे दृषत्करोति, सुदृषत्प्रासादः इत्यादौ लोपं वारयितु सूत्रे अन्तग्रहणं कर्त्तव्यमिति कथनमपि नोचितं यतोहि संयोगसंज्ञा व्यासज्यवृत्तिधर्मः, व्यासज्यवृत्तिर्धर्मश्च प्रत्येकवृत्तित्वधर्मः, किञ्च संयोगसंज्ञा इति महासंज्ञाकरणादपि एकस्य संयोगसंज्ञा न भविष्यति अतः सूत्रेऽन्तग्रहणं स्पष्यार्थमिति बोध्यम्।

**यण्------।** वचनरूपेण पठितमिदं वार्तिकम्। यणः संयोगान्तलोपस्य प्रतिषेधो वक्तव्य इति वार्तिकार्थः। अर्थात् **''संयोगान्तस्य लोपः''** इति सूत्रेण संयोगान्तपदस्य अन्ते विधीयमानो लोप यण्वर्णस्य न भवतीति तात्पर्यम्। इत्थम्- सु द् ध् य् उपास्य इत्यत्र संयोगान्तपदस्यान्ते यकारस्य लोपो न भवति, संयोगे च **सुद्ध्युयास्य** इति द्वित्वाभावपक्षे **सुध्युपास्य** इति।

**यणो मयो-----।** यण्प्रत्याहारात् परस्य मय् प्रत्याहारस्य वर्णस्य द्वित्वं भवतीति वार्तिकार्थः। यत्र अचः परे यरो न भवति परं यरः परे अच् भवति तत्र **''अनचि च''** सूत्रस्य प्रवृत्तिर्न भवति, तादृशस्थले अनेन वार्तिकेन द्वित्वं भवति। इत्थमनेन वार्तिकेन धकारस्य द्वित्वमिति। **मय इति पञ्चमी यण् इति षष्ठी** इति पक्षे यकारस्य द्वित्वमिति। अत्रेदं तात्पर्यं यत् भाष्यकारेणात्र द्विविधोऽपि पक्ष स्वीकृतः। **यणो मयो द्वे वाच्य** अस्मिन् वार्तिके यणः इत्यत्र षष्ठी मय इत्यत्र पञ्चमी इत्येकः पक्षः। अस्मिन् पक्षे यण्प्रत्याहारात्परस्य मयस्य द्वित्वं भवतीत्यर्थः। अथ च मय इत्यत्र पञ्चमी यणः इति षष्ठी इति द्वितीयः पक्ष, अस्मिन्पक्षे मय् प्रत्याहारात्परस्य यणः द्वित्वं भवति इत्यर्थः। द्वितीयं पक्षमादाय सु द् ध् य् उपास्य इत्यत्र मय् प्रत्याहारे पठितवर्णः धकारः ततः परस्य धकारस्य द्वित्वम्। इत्थं धकारस्य च द्वित्वविकल्पात् चत्वारि रूपाणि। तथाहि- एकधमेकयम्- **सुध्युपास्य** इति। द्विधं द्वियम्- **सुद्ध्य्युपास्यः** इति। द्विधकमेकयम् **सुद्ध्युपास्य** इति। एकध द्वियम्- **सुध्य्युपास्य** इति।

**सुद्ध्युपास्यः-** सुधी+उपास्य इत्यत्र **स्थानेऽन्तरतमः, तस्मिन्निनितिनिर्दिष्टे पूर्वस्य** इति परिभाषासूत्रद्वयसहाकारेण **इकोयणचि** इति सूत्रेण ईकारस्य स्थाने यणि यकारादेशे सुध् य् उपास्य इति जाते **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण यकारस्य स्थानिवद्भावे प्राप्ते **न पदान्तद्विर्वचनेत्यादिना** सूत्रेण स्थानिवद्भावस्य

निषेधे **अनचि च** इति सूत्रेण विकल्पेन धकारस्य द्वित्वे सु ध् ध् य् उपास्य इति जाते **झलां जश् झशि** इति सूत्रेण धकारस्य जश्त्वे दकारे सु द् ध् य् उपास्य इति जाते **संयोगान्तस्य लोप** इति सूत्रेण यकारस्य लोपे प्राप्ते, **यणः प्रतिषेधो वाच्य** इति वार्तिकेन निषेधे **सुद्ध्युपास्यः** इति धकारस्य द्वित्वाभावपक्षे **सुध्युपास्य** इति रूपं भवति, "**यणो मयो द्वे वाच्यः**" इति वार्तिकेन विकल्पेन यकारस्यापि द्वित्वे **सुद्ध्य्युपास्य, सुध्य्युपास्य** इति रूपं द्वयमपि सिद्ध्यति।

**मध्वरि**= मधुर्नाम असुर विशेषः तस्य अरि मध्वरिः हरि इत्यर्थः। मधु+अरि इत्यत्र, **स्थानेऽन्तरतमः तस्मिन्निति निर्दिष्टे पूर्वस्य** इति परिभषासूत्रद्वयसहकारेण उकारस्य स्थाने यणि वकारादेशे म ध् व् अरि इति जाते वकारस्य **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवद्भावे प्राप्ते **न पदान्ते**त्यादिना सूत्रेण निषेधे, **अनचि च** इति सूत्रेण धकारस्य द्वित्वे म ध् ध् व् अरि इति जाते **झलां जश् झशि** इति सूत्रेण धकारस्य जश्त्वे दकारे म द् ध् व् अरि इति जाते, **संयोगान्तस्यलोप** इति सूत्रेण वकारस्य लोपे प्राप्ते, **यणः प्रतिषेधो वाच्यः** इति वार्तिकेन निषेधे वर्णसम्मेलने मद्ध्वरि इति, धकारस्य द्वित्वाभावपक्षे मध्वरि इति, **यणो मयो द्वे वाच्यः** इति वार्तिकेन वकारस्यापि द्वित्वे मद्ध्व्वरिः, मध्व्वरि इति रूपद्वयमपि सिद्ध्यति।

**धात्त्रंशः**- धातुः अंश, धाता अंशो यस्य सः। धातृ+अंश इत्यत्र "**स्थानेऽन्तरतमः**" **तस्मिन्नित्यादि**परिभाषासूत्रद्वयसहकारेण **इको यणचि** इति सूत्रेण ऋकारस्य स्थाने यणि रेफादेशे धा त् र् अंश इति जाते, स्थानिवद्भावस्य निषेधे, **अनचि च** इति सूत्रेण विकल्पेन तकारस्य द्वित्वे धात्त्रंश इति, द्वित्वाभावे धात्रंश इति रूपं भवति।

**लाकृतिः**= लृ वर्णस्य आकृतिरिवाकृतिर्यस्य स (श्रीकृष्णः) लृ+आकृतिः इत्यत्र '**स्थानेऽन्तरतमः**' **तस्मिन्नित्यादि** परिभाषासूत्रद्वयसहकारेण **इको यणचि** इति सूत्रेण लृकारस्य स्थाने यणि लकारादेशे संयोगे लाकृति इति रूपं भवति।

विशेषार्थपक्षे उदाहरणस्य सार्थक्यमपि **सुधीभिः उपास्य** कः इति चेत् **मध्वरिः** (विष्णुः) कोऽयं विष्णुः धातु अंशः, धातुः शरीरेण वाराह रामकृष्णादिरूपे अवतरति अथवा धाता अंशो यस्य विष्णोः नाभिकमलात् ब्रह्मणोत्पत्तिरिति। कीदृशः स विष्णु लृवर्णस्य आकृतिरिवाकृतिर्यस्य, अर्थात् तस्य प्राप्तिरत्यन्तं कठिनम्, अथवा श्रीकृष्ण एव। इत्थं धर्माचरणसंस्कृतिमपि ज्ञापयत्युदाहरणमुखेन व्याकरणस्य, श्रीमता भट्टोजिदीक्षितेनेति।

**नादिन्याक्रोशे पुत्रस्य ८.४.४८ पुत्रशब्दस्य न द्वे स्तः आदिनीशब्दे पर आक्रोशे गम्यमाने। पुत्रादिनी त्वमसि पापे। आक्रोशे किम्- तत्त्वकथने द्विर्वचनं भवत्येव। पुत्त्रादिनी सर्पिणी।**

**तत्परे च ( वा. ५०२१ ) पुत्र पुत्रादिनी त्वमसि पापे।**

**वा हतजग्धयोः ( वा. ५०.२२ ) पुत्रहती-पुत्त्रहती। पुत्रजग्धी पुत्त्रजग्धी।**

**संस्कृतव्याख्या- नादि**-------। द्वित्वनिषेधकम् अपवादसूत्रमिदम्। न आदिनी आक्रोशे पुत्रस्य इति सूत्रस्य पदच्छेदः। न इत्यव्ययम्। आदिनी इति ङ्यन्तलुप्तसप्तमीविभक्तिकम्, आक्रोशे इति सप्तम्यन्तम् (आक्रोशो= निन्दा) पुत्रस्य इति षष्ठ्यन्तम्। अत्र **अचोरहाभ्यां** द्वे इत्यस्मात् द्वे इति, **यरोऽनुनासिकेऽनुनासिको वा** इत्यस्मात् यरः, इति चानुवर्तते। इत्थं सूत्रस्यार्थो भवति अचः परस्य यरो द्वित्वं न भवति आदिनी शब्दे परे आक्रोशे विषये गम्यमाने सति। तद्यथा **पुत्रादिनी त्वमसि पापे**। पुत्रान् अत्तुम् (भोक्तुम्) शीलम् अस्या इत्यर्थे णिनिप्रत्ययान्तस्य ङीबन्तं पदम् आदिनी इति। **हे पापे त्वं पुत्रादिनी**= **पुत्रधातिनी** इत्यर्थे पुत्र+आदिनी इत्यवस्थायाम् उकारत्परस्य यरः तकारस्य अनचिच इति सूत्रेण प्राप्तस्य द्वित्वस्य अनेन निषेधो भवति। आक्रोशगम्य एवायं निषेधः वास्तविक

(यथार्थ) कथने तु द्वित्वं भवत्येव। यथा- पुत्रादिनी सर्पिणी। यस्याः पुत्राः स्वयमेव म्रियन्ते तां प्रति पुत्रादिनी इति वस्तुस्थितिकथने तु निन्दाया अभावात् न द्वित्वनिषेध इति।

**तत्परे........।** वार्तिकमिदम्। स आदिनी शब्दः परो यस्मात् सः तत्परः तस्मिन् तत्परे, अर्थात् आदिनी शब्दपरके पुत्रशब्दे परे (पुत्रादिनी शब्दके परे) पुत्रशब्दावयवस्य यरो द्वित्वं न भवतीति वार्तिकार्थः। तेन पुत्रपुत्रादिनी त्वमसि पापे इत्यत्र द्वित्वं न। पुत्रस्य पुत्रान् अत्ति। पूर्वसूत्रेण अप्राप्ते द्वित्वनिषेधे इदं वार्तिकम्।

**वा हत.......।** हतशब्दे जग्धशब्दे च परे पुत्रशब्दस्य अचः परस्य यरो विकल्पेन द्वित्वं भवतीति वार्तिकार्थः। **तद्यथा** पुत्त्रहती-पुत्रहती। तकारस्य विकल्पेन द्वित्वम्। पुत्रहतो यया गौरादित्वाङीषि= पुत्रहती इति। एवमेव पुत्त्रजग्धी, पुत्रजग्धति।

**नियमार्थमेतत् वार्तिकम्-** तथाहि **अनचि च** इति सूत्रेण विकल्पेन द्वित्वे सिद्धे पुनवार्तिकविधानेन नियमयति यत्- पुत्रशब्दस्य क्तान्ते चेत् हतजग्धयोरेव, आक्रोश एव द्वित्वं नान्यत्रेति।

**त्रिप्रभृतिषु शाकटायनस्य ८.४.५० त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वम्। इन्द्द्रः, इन्द्रः। राष्ष्ट्रम-राष्ट्रम्।**

**संस्कृतव्याख्या-** पूर्वाचार्यमते द्वित्वप्रसङ्गं बोधयितुम् उपास्थप्यते सूत्रमिदम्। अत्र पदद्वयम्। त्रिप्रभृतिषु इति सप्तम्यन्तं, शाकटायनस्य इति षष्ठ्यन्तम्। शाकटायनग्रहणं पूजार्थम्। सूत्रे प्रभृतिपदेन चतुरपञ्चादिषु हल्षु परेष्वित्यर्थः। इत्थम्- त्रिचतुरादिषु तदधिकेषु वा हल्वर्णेषु संयुक्तेषु परेषु अचः परस्य यरः स्थाने विकल्पेन द्वित्वं भवति शाकटायनमते इति सूत्रार्थः। **तद्यथा** इन्द्र इत्यत्र न् द् र् इत्येतेषां त्रयाणां संयुक्तत्वात् अचः परस्य नकारस्य विकल्पेन द्वित्वे इन्द्रः इन्द्र इति। रा ष् ट् र् इत्यत्रापि षकारस्य विकल्पेन द्वित्वे राष्ष्ट्रम् राष्ट्रम् इति।

**सर्वत्र शाकल्यस्य ८.४.५१ द्वित्वं न। अर्कः। ब्रह्मा।**

**संस्कृतव्याख्या-** अत्र सूत्रे- सर्वत्रपदेन पूर्वोक्तं द्वित्वं तन्निषेधश्च उभयोर्बोधकं पदं परामृश्यते। इत्थं यत्र यत्र द्वित्वं विहितं तत्र तत्र शाकल्यस्य ऋषेर्मते द्वित्वं न भवतीति सूत्रार्थः। **तद्यथा- अर्कः,** इत्यत्र अचोरहाभ्यां द्वे इति सूत्रेण लकारस्य विकल्पेन द्वित्वे अर्क्क, अर्क इति रूपं भवति परं शाकल्यमते द्वित्वनिषेधे **अर्क** इत्येकमेव। एवमेव ब्रह्मा इत्यत्रापि मकारस्य द्वित्वं नेति भावः।

**दीर्घाचार्यणाम् ८.४.५२ द्वित्वं न। दात्रम्। पात्रम्।**

**संस्कृतव्याख्या-** दीर्घात् आचार्याणाम् इति सूत्रस्य पदविभागः। आचार्यपदेन अन्येषां ग्रहणम्, केषाञ्चिदाचार्याणां मते इति तात्पर्यम्। अत्र **नादिन्यादि**सूत्रात् न इत्यस्य **अचोरहाभ्यां द्वे** इत्यस्मात् अचः इत्यस्य, **यरोऽनुनासिके** इत्यस्मात् यरः इत्यस्य चानुवृत्तिर्भवति। दीर्घात् इत्यस्य पञ्चम्यन्तत्वात्, **तस्मादित्युत्तरस्य** इति परिभाषासूत्रेण अव्यवहितपरस्य इत्यर्थो लभ्यते। इत्थम् दीर्घवर्णात् अव्यवहितपरस्य अचः परस्य यरो द्वित्वं न भवति केषाञ्चिदाचार्याणां मते इति सूत्रार्थः सङ्गच्छते। तद्यथा- दात्रम् इत्यत्र आकारस्य अच्त्वात् ततः परस्य तकारस्य **अनचि च** इति सूत्रेण द्वित्वं प्राप्नोति अनेन सूत्रेण तस्य निषेधे कृते दात्रम् इत्येवं रूपं भवति। एवमेव पात्रम् इत्यत्रापि द्वित्वन्नेति।

**अचो रहाभ्यां द्वे ८.४.४६ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। हर्य्यनुभवः। न ह्यस्ति।**

**संस्कृतव्याख्या-** अत्र पदत्रयम्। अच इति पञ्चम्यन्तम्, रश्च हश्च इति रहौ, ताभ्याम् रहाभ्याम् इतरेतरयोगद्वन्द्वसमासघटितं पञ्चम्यन्तम्, द्वे इति विधेयं प्रथमान्तं पदम्। अत्र **यरोऽनुनासिकेऽनुनासिको** वा इति सूत्रात् यरः वा इत्यनयोरनुवृत्तिर्भवति। अचः इत्यस्य पञ्चम्यन्तत्वात् अव्यवहितपरत्वमित्यर्थो लभ्यते। एतेन **अच**

**परस्य यो रेफः हकारश्च ताभ्यां परस्य यरो विकल्पेन द्वित्वं भवतीति सूत्रार्थः सम्पद्यते।** तद्यथा– हर्य्यनुभवः हरेरनुभवः इत्यर्थे हरि+अनुभव इत्यत्र रेफात् परस्य इकारस्य यणि हर्यनुभव इत्यत्र यकारस्य विकल्पेन द्वित्वे हर्य्यनुभवः, हर्यनुभव इति। हकारात्परस्य उदाहरणं यथा– नहि **अस्ति** इति स्थिते इकारस्य यणि यकारस्य विकल्पेन द्वित्वे नह्य्यस्ति नह्यस्ति इति।

**हलो यमां यमि लोपः ८.४.६४ हलः परस्य यमो लोपः स्याद्वा यमि। इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यम्। लोपारम्भफलं तु 'आदित्यो देवतास्येत्यादित्यं हविः' इत्यादौ। 'यमां यमि' इति यथासंख्यविज्ञानान्नेह। माहात्म्यम्। तादात्म्यम्।**

**संस्कृतव्याख्या**– सूत्रे हल इति पञ्चम्यन्तं, यमाम् इति षष्ठीबहुवचनान्तं, यमि इति सप्तम्यन्तं लोप इति च प्रथमान्तं पदम्। यमां यमि इत्यत्र **यथासंख्यमनुदेशः समानाम्** इति परिभषासूत्रबलात् यथासंख्यमन्वयो भवति। **झयो होऽन्यतरस्याम् इत्यतः** अन्यतरस्याम् इत्यस्यानुवृत्तिर्भवति। एतेन हलः परस्य यम्वर्णस्य लोपो भवति समाने यम्वर्णे परे इति सूत्रार्थः सम्पद्यते।

अनेन सूत्रेण प्रकृते उदाहरणद्वये हर्य्यनुभवः, नह्य्यस्ति इत्यत्र विकल्पेन लोपे सति एकयकाररूपं हर्यनुभवः, नह्यस्ति इति, लोपाभावपक्षे तु द्वियकाररूपं हर्य्यनुभवः, नह्य्यस्ति इति रूपं भवति।

अत्रेदमाशङ्कते यत्– **अचोरहाभ्यां द्वे** इति सूत्रेण विकल्पेन द्वित्वे द्वियकारघटितं रूपम्, लोपाभावपक्षे एकयकारघटितं रूपं भवत्येव नास्य सूत्रस्य किमपि प्रयोजनम्– **किमनेन लोपारम्भेन इति।** अत्रोच्यते समाधानमुखेन मूले **लोपारम्भेत्यादि।** अस्येदं तात्पर्यं यत् आदित्यो देवता अस्य इत्यर्थे आदित्यशब्दात् **दित्यदित्यादित्युत्तरपदाण्यः** इति सूत्रेण ण्य प्रत्ययेऽनुबन्धलोप आदित्य य इति जाते यकारस्य अकारस्य भसंज्ञायां लोपे च आदित्य् य इति जाते अनेन सूत्रेण विकल्पेन यकारलोपे आदित्यम् इति, लोपाभावपक्षे आदित्य्यम् इति रूपद्वयस्य सिद्ध्यर्थं सूत्रमिदमावश्यकम्। तस्मादेतत् फलमस्य सूत्रारम्भस्य बोध्यमिति।

यमां यमि इत्यत्र यथासंख्येनान्वये माहात्म्यम्, तादात्म्यम् इत्यादौ मकारलोपो न भवति मकारात्परस्य यमि सत्वेऽपि यथासंख्यम्, मकारस्य अभावात्। अत्र मकारालोपादेव विज्ञायते यत् सूत्रेऽस्मिन् **यमां यमि** इत्यत्र यथा संख्यमन्वय इति भावः।

**एचोऽयवायावः ६.१.७८ एचः क्रमादय् अव् आय् आव् एते स्युरचि।**

**संस्कृतव्याख्या**– विधिसूत्रमिदम्। सूत्रे पदद्वयं वर्तते। एच इति षष्ठ्यन्तं पदम्। अय् च् अव् च आय् च आव् च तेषामितिविग्रहे इतरेतरयोगद्वन्द्वसमासघटितम् अयवायावः इति प्रथमाबहुवचनान्तं पदम्। अत्र **इको यणचि** इत्यस्मात् अचि इत्यनुवर्तते। एचः इत्यस्य षष्ठ्यन्तत्वात् **षष्ठी स्थाने योगा** इत्यनेन स्थाने इत्यर्थो लभ्यते। एच इति स्थानिवाचकं, अयवायाव इति विधेयम् आदेशवाचकं पदम्। स्थान्यादेशयोः समानसंख्याकत्वात् यथासंख्यपरिभाषया यथासंख्यमन्वयो भवति। एतेन एच्प्रत्याहारस्थानां वर्णानां स्थाने क्रमात् एकारस्य स्थाने अय्, ओकारस्य स्थाने अव्, ऐकारस्य स्थाने आय्, औकारस्य च स्थाने आव् इत्यादेशो भवति अचि परे इति, सूत्रार्थः सम्पद्यते। तद्यथा– हरे+ए इत्यवस्थायां हरे इत्यस्य एकारस्य स्थाने अय्आदेशे हर् अय् ए इति स्थितिर्भवति। अत्र यकारस्य **हलन्त्यम्** इति सूत्रेण इत्संज्ञायां प्राप्तायाम् अग्रिमं सूत्रं प्रवर्तते। तथाहि–

**तस्य लोपः १.३.९ तस्येतो लोपः स्यात्। इति यवयोर्लोपो न, उच्चारणसामर्थ्यात्। एवं चेत्संज्ञापीह न भवति। हरये। विष्णवे। नायकः। पावकः।**

**संस्कृतव्याख्या**– इत्संज्ञाबोधकं सूत्रमिदम्। इत्संज्ञाप्रकरणान्ते इदं सूत्रं पठितमस्ति तेन सूत्रे तस्य इत्यनेन

पदेन इत्संज्ञकस्य परामर्शो भवति। एतेन इत्संज्ञकस्य वर्णस्य लोपो भवतीति सूत्रस्यार्थः सङ्गच्छते। इत्थम् अय् अव् आय् आव् इत्येतेषामुपदेशत्वात् यकारवकारयोः हलन्त्यमित्यनेन इत्संज्ञायाम् अनेन सूत्रेण लोपः प्राप्नोति, तं वारयितुं कथयति मूले- **इति यवयोर्लोपो न।** अर्थात् अनेन सूत्रेण यकारवकारयोर्लोपो न भवति। **उच्चारणसामर्थ्यात्।** यद्यत्र लोपः स्यात् तर्हि तयोरुच्चारणमेव न कर्त्तव्यं, कृतं च तत्, तस्मात् उच्चारणसामर्थ्यात् यवयोर्लोपो न भवतीति। किञ्च यदि लोप एव न भवति तर्हि लोपनिमित्तायाः इत्संज्ञाया अपि किमपि प्रयोजनं न, तस्मात् लोपाभावे फलाभावात् इह यकारवकारयोः इत्संज्ञापि न भवतीति।

**हरये** = हरे+ए इत्यवस्थायाम् **यथासंख्यमनुदेशः समानाम्** इति परिभाषासहकारेण **एचोऽयवायावः** इति सूत्रेण यथासंख्यम् एकारस्य स्थाने अयादेशे हर् अय् ए इति जाते यकारस्योच्चारणसामर्थ्यात् लोपाभावे वर्णसंयोगे हरये इति रूपं सिद्ध्यति।

**विष्णवे** = विष्णो+ ए इत्यवस्थायाम् **एचोऽयवायावः** इति सूत्रेण यथासंख्यम् ओकारस्य स्थाने अव् इत्यादेशे वर्णसंयोगे च विष्णवे इति रूपं भवति।

**नायकः** = नै+अकः इत्यत्र **एचोऽयवायावः** इति सूत्रेण यथासंख्यम् ऐकारस्य स्थाने आय् आदेशे वर्णसम्मेलने नायक इति रूपं भवति।

**पावकः**:- पौ+अकः इत्यत्र ''**एचोऽयवायावः**'' इति सूत्रेण यथासंख्यम् औकारस्य स्थाने आव् इत्यादेशे वर्णसंयोगे पावक इति रूपं सिद्ध्यति।

**वान्तो यि प्रत्यये ६.१.७९ यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गोर्विकारो गव्यम्। गोपयसोर्यत् (सू. १५३८) नावा तार्यं नाव्यम्। नौवयोधर्म (सू.१६४३) इत्यादिना यत्। गोर्यूतौ छन्दस्युपसंख्यानम् (वा.३५४३) अध्वपरिमाणे च (वा. ३५४४) गव्यूतिः। ऊतियूति (सू. ३२७४) इत्यादिना यूतिशब्दो निपातितः। वान्तः इत्यत्र वकारात् गोर्यूतौ इत्यत्र छकाराद्वा पूर्वभागे ''लोपो व्योः'' (सू. ८७३) इति लोपेन वकारः प्रश्लिष्यते। तेन श्रूयमाणवकारान्त आदेशः स्यात्। वकारो न लुप्यत इति यावत्।**

**संस्कृतव्याख्या**- वान्तः यि प्रत्यये इति सूत्रस्य पदविभागः। वान्त इति विधेयबोधकं प्रथमान्तं पदम्, प्रत्यये इति सप्तम्यन्तं विशेष्यं पदं, यि इति सप्तम्यन्तं विशेषणं पदम्। ''**यस्मिन्विधिस्तदादावल्ग्रहणे**'' इति परिभाषया तदादिविधिना यकारादिप्रत्यये परे इत्यर्थः। वकारः अन्ते यस्य स वान्तः। वान्त इत्यनेन पूर्वोपातः अव् आव् इत्येतौ गृह्येते। तौ च कयोर्भवत इत्याकाङ्क्षायां पूर्वसूत्रोपात्तयोः ''ओ औ'' इत्यनयोर्ग्रहणम्। इत्थम्- यकारादौ प्रत्यये परे ओ औ इत्यनयोः स्थाने यथासंख्यम् अव् आव् इत्यादेशौ भवत इति सूत्रार्थः सम्पद्यते। तद्यथा- गो यम् इत्यवस्थायाम् ओकारस्य स्थाने अवादेशे वर्णसम्मेलने **गव्यम्।** एवमेव नौ+यम् इत्यत्र आवादेशे **नाव्यम्** इति। यम् इत्यस्य प्रत्ययत्वं बोधयन् कथयति मूले **गोपयसोर्यत्** इति सूत्रेण विकारार्थे यत्प्रत्ययः। एवमेव नौ य इत्यत्र यकारस्य प्रत्ययत्वं ''**नौवयोधर्म**'' इत्यादिसूत्रेण। **गव्यम् नाव्यम्** इत्यत्र वकारस्य, **लोपः शाकल्यस्य, हलि सर्वेषाम्** इति सूत्राभ्यां लोपो न भवति तयोः सूत्रयोः पदान्तविषये एव प्रवृत्तेः, अत्र भसंज्ञया पदसंज्ञाया बाधो भवति।

**गोर्यूतौ........।** छन्दसि (वेदे) यूति शब्दे परे ओकारस्य स्थाने अव् इति वान्तादेशो भवतीति उपसंख्यानं वक्व्यमिति वार्तिकस्यार्थः। एतेन वेदे गो+यूति इत्यवस्थायाम् अवादेशे गव्यूति इति गोप्रचरभूमिः इत्यर्थे प्रयुज्यते। आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् इत्युदाहरणम्।

**अध्वपरि......।** इदमपि वार्तिकम्। पूर्ववार्तिकात् छन्दसिं विहाय गोर्यूतौ उपसंख्यानम् इत्यनुवर्तते। एतेन अध्वपरिमाणे अर्थात् मार्गपरिमाणविशेषे गम्येऽपि यूति शब्दे परे गोशब्दावयवस्य ओकारस्य स्थाने अव् इत्यादेशो भवतीति वक्तव्यमिति वार्तिकार्थः। यु धातो क्तिन्प्रत्ययान्तः युतिः इति तस्य **ऊतियूति**- इत्यादिना यूतिशब्दो

दीर्घनिपातितो वर्तते। इत्थम्- गो+यूति इत्यवस्थायाम् अनेन वार्तिकेन अवादेशे वर्णसंयोगे गव्यूतिः इति। अत्रेदमाशङ्क्यते यत्, **गव्यम् नाव्यम्** इत्यादौ पदसंज्ञाया भसंज्ञया बाधात् **लोपः शाकल्यस्य, हलि सर्वेषाम्** इत्युभाभ्यां लोपाभावेऽपि गो यूति इत्यत्र अन्तवर्तिनीं विभक्तिमाश्रित्य पदत्वे, यूतिशब्दस्य यजादिस्वादिप्रत्ययत्वाभावात् भसंज्ञाया अप्राप्तौ पदसंज्ञाया बाधो न स्यात् तदभावे पदत्वे कथन्न वकारलोपः। अत्रोच्यते समाधानमुखेन मूले **वान्त इत्यत्र वकारात्...... इत्यादिः।** अस्येदं तात्पर्यं यत् **वान्तो यि प्रत्यये** इति सूत्रे वकाराद् पूर्वं, **गोर्यूतौ छन्दस्युपसंख्यानम्** इति वार्तिके छकारात् पूर्वं वकारस्य प्रश्लेषः स्वीकर्त्तव्यः, स कथं न श्रूयत इति चेत् **लोपोव्योर्वलि** इति सूत्रेण वकारस्य लोपो बोध्यः। एतेन श्रूयमाणः वकारान्तादेशो भवति इति फलितार्थः। वकारप्रश्लेषेण **गव्यम् नाव्यम्, गव्यूतिः** इत्यादौ वकारलोपो नेष्ट इति ज्ञाप्यते।

**धातोस्तन्निमित्तस्यैव ६.१.८० यादौ प्रत्यये परे धातोश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव। लव्यम्। अवश्यलाव्यम्। तन्निमित्तस्यैवेति किम्? ओयते, औयत।**

**संस्कृतव्याख्या**- नियमसूत्रमिदम्। तथाहि **ओयते औयत** इत्यत्र यक्प्रत्ययत्वात् **वान्तो यि प्रत्यये** इति सूत्रेण अवादेशे प्राप्ते वान्तादेशं नियमयितुं सूत्रमिदं प्रारभते- **धातोरित्यादि** अत्र सूत्रे पदत्रयं वर्तते, धातोः इति षष्ठ्यन्तं, तन्निमित्तस्य इति षष्ठ्यन्तं एव इत्यव्ययं पदम्। **वान्तो यि प्रत्यये** इति सम्पूर्णसूत्रमावर्तते। एच इत्यपि अनुवर्तते। एवं यादिप्रत्यये परे धातोः एचः स्थाने यदि वान्तादेशः तर्हि यादिप्रत्ययनिमित्तकस्यैव नान्यस्य इति। तद्यथा **लव्यम्** इत्यत्र लू धातोः यत् प्रत्यये ''लू य'' इत्यवस्थायाम् आर्धधातुकत्वात् धातोरुकारस्य गुणे ओकारादेशे लो य इति जाते ओकारस्य धात्वयवत्वात् यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशे **गव्यम्** इति। एवमेव अवश्यलाव्यम् इत्यत्रापि लू धातोः **ओरावश्यके** इति सूत्रेण आवश्यके अर्थे ण्यत्प्रत्ययेऽनुबन्धलोपे ऊकारस्य वृद्धौ अवश्य लौ य इति जाते औकारस्य धात्ववयवत्वात् यादिप्रत्ययनिमित्तकत्वाच्च वान्तादेशे अवश्यलाव्यम् इति रूपं भवति।

सूत्रे **तन्निमित्तस्यैवेति** कथनस्य किं फलमिति चेत् तत्प्रयोजनं कथयति- **ओयत। औयत इति।** अत्र आङ् उपसर्गात् वेञ् तन्तुसन्ताने इत्यस्माद्धातोः **कर्मणि लट्, भावकर्मणोः** इत्यनेन आत्मनेपदे **सार्वधातुके यक्** इति सूत्रेण यक् प्रत्यये वकारस्य सम्प्रसारणे पूर्वरूपे **अकृत सार्वधातुकयोः** इति सूत्रेण उकारस्य दीर्घे ''आ ऊ यत'' इति जाते **आदगुणः,** इति सूत्रेण आकारोकारयोः गुणे **ओयत** इत्यत्र परादिवद्भावेन ओकारस्य धात्वयवत्वेऽपि यादिप्रत्ययनिमित्तकत्वाभावात् न वान्तादेशः, ओयत इत्येव। एवमेव औयत इत्यत्रापि। सूत्रे 'एव' इति कथनेन विपरीतनियमो न भवति। अन्यथा एवकाराभावे हि यादिप्रत्ययनिमित्तकस्य चेत् ऐचो वान्तादेशः तर्हि धातोरेवैचः इत्यपि विपरीतनियमः संभाव्येत तथा सति बभ्रोरपत्यम् इत्यर्थे यञ् प्रत्यये ''बभ्रु य'' इति जाते उकारस्य गुणे ओकारदेशे ओकारस्य यादिप्रत्ययनिमित्तकस्य धात्वयवत्वाभावात् वान्तादेशो न स्यात्, बाभ्रव्य इति रूपस्य असिद्धिः। तस्मात् एवेति कथनेन न विपरीतनियम इति।

**गव्यम्**- गो+यम् इत्यत्र **वान्तो यि प्रत्यये** इति सूत्रेण यादिप्रत्यये परे ओकारस्य स्थाने अवादेशे वर्णसम्मेलने गव्यम् इति रूपं सिद्ध्यति।

**नाव्यम्**- नावा तार्यम् इत्यर्थे नौ+यम् इत्यत्र **वान्तो यि प्रत्यये** इति सूत्रेण औकारस्य स्थाने आवादेशे वर्णसम्मेलने नाव्यम् इति।

**गव्यूतिः**- गो+यूति इत्यत्र यादिप्रत्ययत्वाभावात् **वान्तोयि** इत्यादेरप्राप्तौ अध्वपरिमाणेऽर्थे **अध्वपरिमाणे** च इति वार्तिकेन ओकारस्य स्थाने अवादेशे वर्णसम्मेलने गव्यूतिः इति रूपं सिद्ध्यति।

**लव्यम्**- लूञ् धातो यत्प्रत्यये उकारस्य गुणे लो यम् इत्यत्र '**धातोस्तन्निमित्तस्यैव**' इति नियमेन **वान्तो यि प्रत्यये** इति सूत्रेण अवादेशे वर्णसम्मेलने लव्यम् इति रूपं भवति।

**क्षय्यजय्यौ शक्यार्थे ६.२.८१ यान्तादेशनिपातनार्थमिदम्। क्षेतुं शक्यं क्षय्यम्। जेतुं शक्यं जय्यम्। शक्यार्थे किम्? क्षेतुं योग्यं क्षेयं पापम्। जेतुं योग्यं जेयं मनः।**

**संस्कृतव्याख्या-** निपातनार्थं सूत्रमिदम्। यान्तादेशोऽनेन निपात्यते। निपातनं नाम प्रकृतिप्रत्ययागमादेशादिविधानं विना सिद्धरूपस्य कथनं निर्देशनं, यथोक्तं साधुत्वबोधनं वा। तथाहि सूत्रे पदद्वयं वर्तते। क्षय्यश्च जय्यश्चेति तौ क्षय्यजय्यौ इत्येकं प्रथमान्तं पदम्, शक्यार्थः, तस्मिन् इति सप्तम्यन्तं पदम्, अत्र **वान्तो यि प्रत्यये** इति सूत्रात् यि, इति, प्रत्यये इति, **धातोस्तन्निमित्तस्यैव इत्यतः** धातो इति चानुवर्तते। एतेन शक्यार्थे गम्ये यादौ प्रत्यये परे क्षि क्षये, जि जये इत्युभयोः धात्वयोः एचः स्थाने अय् इति यान्तादेशो निपात्यत इति सूत्रार्थः। एतेन क्षि धातोः यत्प्रत्यये इकारस्य गुणे क्षे य इति जाते एकारस्य स्थाने अय् इति जाते वर्णसम्मेलने क्षय्यम् इति। एवमेव जि धातोः यत् प्रत्यये जय्यम् इति।

सूत्रे शक्यार्थ एव निपातनात् अयादेशः तद्भिन्ने क्षेतुं योग्यं पापमित्यर्थे क्षेयम्, जेतुं योग्यं मन इत्यर्थे जेयम् इत्येवं रूपं भवति।

**क्रय्यस्तदर्थे ६.१.८२ तस्मै प्रकृत्यर्थायेदं तदर्थम्। क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम्। क्रेयमन्यत् क्रयणार्हमित्यर्थः।**

**संस्कृतव्याख्या-** इदमपि सूत्रं यान्तादेशनिपातनार्थम्। सूत्रे तदर्थे इत्यस्य क्रय्यशब्दे यः क्रीञ्धातुः यत्प्रत्ययप्रकृतिभूतः तस्य योऽर्थ अभिधेयः (वाच्य) द्रव्यविनिमयरूपः क्रयः स प्रकृत्यर्थतच्छब्देनात्र विक्षितः तस्मिन् अर्थे तदर्थे इति। तस्मै इदं तदर्थं क्रयार्थं वस्तु इति। एतेन क्रयार्थे वस्तुनि गम्ये क्रीञ्धातोः यादौ प्रत्यये परे अय् इति निपात्यत इति फलितार्थः। इत्थम् = क्री धातो यत्प्रत्यये ईकारस्य गुणे क्रे य इति जाते एकारस्य अनेन सूत्रेण निपातनात् अय् इत्यादेशे वर्णसम्मेलने क्रय्यम् इति। एतच्च **क्रेतारो मम वस्तु क्रीणीयुः** इति मनसि निधाय यत् प्रसारितं तद्वस्तु **क्रय्यम्** इति। अन्यत्र यन्न प्रसारितं केवलं क्रेतु योग्यम् तत् क्रेयम् इति भवति।

**लोपः शाकल्यस्य ८.३.१९ अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धम् ( सू. ९२ ) इति लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिः। हर एहि हरयेहि। हर इह हरयिह-विष्ण इह विष्णविह। श्रिया उद्यतः, श्रियायुद्यतः। गुरा उत्कः गुरावुत्कः। कानि सन्ति। कौ स्तः इत्यत्रास्तेरल्लोपस्य स्थानिवद्भावेन यणावादेशौ प्राप्तौ, न पदान्त ( सू. ५१ ) इति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः।**

**संस्कृतव्याख्या-** हरे+एहि, विष्णो इह, श्रियै उद्यतः, गुरौ उत्कः इत्यत्र एचां क्रमेण **एचोऽयवायावः** इति सूत्रेण **अय् अव् आय् आव् इत्यादेशे कृते हरय् एहि, विष्णव् इह श्रियाय् उद्यतः गुराव् उत्कः** इत्यवस्थायां यकारवकारयोः विकल्पेन लोपं विधातुं सूत्रमिदमारभते- **लोप शाकल्यस्येति।**

अत्र सूत्रे पदद्वयं वर्तते। लोप इति प्रथमान्तं, शाकल्यस्य इति षष्ठ्यन्तं पदम् अत्र **'व्योर्लघुप्रयत्नतरः शाकटायनस्य** इति सूत्रात् **व्योः** इति **भो भगोअधोऽपूर्वस्य योऽशि** इति सूत्रात् अपूर्वस्य, अशि इत्यनयोश्चानुवृत्तिर्भवति। **पदस्य** अधिकारः यस्य द्विवचनान्ततया विपरिणामो भवति। **शाकल्यस्य** इति आचार्यस्य नामग्रहणेन एतेषां मत एव लोप नान्यस्य मत इत्यर्थः। सूत्रे अनुवृत्तम् **अपूर्वस्य** इति पदं व्योरित्यस्य विशेषणम्, अवर्णः पूर्वः यस्मात् स अपूर्वः तस्य अपूर्वस्य वस्य यस्य चेति अर्थः।

अधिकृतं पदस्य इति पदं यकारवकारयोः (व्योःइत्यस्य) विशेष्यं, व्योरित्यस्य विशेषणत्वाच्च तदन्तग्रहणम्। एतेन अवर्णपूर्वकयोः पदान्तयोः विकल्पेन यवयोर्लोपो भवति अशि परे इति सूत्रार्थः सम्पद्यते।

अत्रेदमाशङ्कते यत्, हरे एहि इत्यत्र अयादेशे कृते हरय् एहि इत्यवस्थायां यकारलोपे सति **ओमाङोश्च** इति सूत्रेण पररूपं, प्राप्नोति, विष्ण इह, श्रिया उद्यतः गुरा उत्कः इत्यत्र वकार लोपे सति **आद्गुण** इति सूत्रेण गुणः

प्राप्नोति तत्कथन्न भवति, अतस्तत्परिहाराय कथयति मूले– **पूर्वत्रासिद्धम्** इति सूत्रेण **लोपशास्त्रस्य असिद्धत्वान्न स्वरसन्धिः।** असिद्धत्वे हि वकारयकारयोः इष्टत्वादिति तात्पर्यम्।

कानि सन्ति, कौ स्तः इत्यत्र अकारलोपस्य **अचः परस्मिन् पूर्वविधौ** इति सूत्रेण स्थानिवत्वेन अकारबुद्धौ यथाक्रमम्, **इको यणचि**, इत्यनेन यणः प्राप्तिः, **एचोऽयवायाव** इत्यनेन आवादेशस्य प्राप्तिः परं, **न पदान्तद्विर्वचनेत्यादि**सूत्रेण स्थानिवद्भावस्य निषेधात् अच्परत्वाभावे न यण्, अवादेशश्च भवति इति तात्पर्यम्।

**हर इहि हरयेहि–** हरे+एहि इत्यत्र **एचोऽयवायाव** इति सूत्रेण एकारस्य स्थाने यथासङ्ख्यम् अयादेशे हरय् एहि इति जाते **लोपः शाकल्यस्य** इति सूत्रेण यकारलोपे हर एहि इति रूपं भवति। अत्र **आद गुणः** इति सूत्रेण गुणादेशो न भवति, **पूर्वत्रासिद्धम्** इति सूत्रेण यकारलोपस्य असिद्धत्वात्। विकल्पपक्षे हरय् एहि इति जाते वर्णसम्मेलने हरयेहि इति रूपं भवति।

**विष्ण इह, विष्णविह–** विष्णो+इह इत्यत्र **एचोऽयवायाव** इति सूत्रेण ओकारस्य स्थाने अवादेशे विष्णव् इह इति जाते **लोपः शाकल्यस्य** इति सूत्रेण विकल्पेन वकारलोपे विष्ण इह इति विकल्पपक्षे वर्णसम्मेलने विष्णविह इति रूपं भवति। विष्ण इह इत्यवस्थायाम् **आद्गुणः** इति सूत्रेण गुणादेशो न भवति वलोपस्य असिद्धत्वादिति।

**श्रिया उद्यत, श्रियायुद्यतः–** श्रियै उद्यतः इत्यत्र **एचोऽयवायावः** इति सूत्रेण यथासंख्यम् ऐकारस्य स्थाने आय् इत्यादेशे श्रियाय् उद्यत इति जाते **लोपः शाकल्यस्य** इति सूत्रेण विकल्पेन यकारलोपे श्रिया उद्यतः विकल्पपक्षे वर्णसम्मेलने श्रियायुद्यत इत्यपि रूपं भवति।

**गुरा उत्कः, गुरावुत्कः–** गुरौ+उत्कः इत्यत्र **एचोऽयवायाव** इति सूत्रेण यथासंख्यम् आव् आदेशे गुराव् उत्कः इति जाते **लोपः शाकल्यस्य** इति सूत्रेण विकल्पेन वकारलोपे, गुरा उक्तः, विकल्पपक्षे च गुरावुत्क इति रूपं भवति।

**एकः पूर्वपरयो ६.१.८४ इत्यधिकृत्य।**

**संस्कृतव्याख्या–** अधिकारसूत्रमिदम्। एकादेशसन्धिं निरूपयितुम् एतत्सूत्रमारभते। अत्र पदद्वयम्। एक इति प्रथमान्तम्, पूर्वश्च परश्च तयोः इति पूर्वपरौ तयोः पूर्वपरयोः इति षष्ठीद्विवचनान्तं पदम्। **ऋत् उत्** (६.२.१०९) इति सूत्रपर्यन्तमस्याधिकारः। इत्थं पूर्वपरयोः स्थाने एक एव आदेश इति सूत्रार्थः सम्पद्यते। अर्थात् यत्र स्थानिद्वयं वर्तते तत्र द्वयोः स्थानिनोः स्थाने एक एवादेश इति तात्पर्यम्।

**आद् गुणः ६.१.८७ अवर्णादचि पूर्वपरयोरेको गुण आदेशः स्यात्संहितायाम्। उपेन्द्रः। रमेशः। गङ्गोदकम्।**

**संस्कृतव्याख्या–** विधिसूत्रमिदम्। अत्र पदद्वयं वर्तते। आत् इति पञ्चम्यन्तं पदम्, गुणः इति प्रथमान्तं पदम्। **इको यणचि** इति सूत्रात् अचि इति अनुवर्तते। **एकः पूर्वपरयोः** इत्यस्य अधिकारः। आत् इति अशब्दस्य पञ्चमी एकवचनान्तं, तस्मात् अकारेण तस्य सर्वे भेदा गृह्यन्ते अर्थात् आकारादीनामपि ग्रहणं भवति। इत्थं सूत्रस्यार्थो भवति यत् अवर्णात् अचि वर्णे परे सति पूर्वपरयोः स्थाने गुणसंज्ञक एक आदेशः स्यादिति। **तद्यथा–** उप+इन्द्रः इत्यत्र अकारात् अचि परत्वे अकारेकारयोः स्थाने गुण एकादेशे वर्णसंयोगे **उपेन्द्र** इति। एवमेव रमेश इत्यत्र रमा+ ईशः इत्यवस्थायाम् अकारात् ईकारे परे पूर्वपरयोः स्थाने गुणे एकारादेशे **रमेश** इति। गङ्गा+उदकम् इत्यत्र अकारोकारयोः स्थाने गुणे ओकारादेशे **गङ्गोदकम्** इति।

**उपेन्द्रः–** उप+इन्द्र इत्यत्र **स्थानेऽन्तरतमः** इति परिभाषासूत्रसहाकारेण **आद्गुणः** इति सूत्रेण अकारात् इकारे परे पूर्वपरयोः स्थाने स्थानान्तरर्यात् एकारादेशे वर्णसम्मेलने **उपेन्द्र** इति सिद्ध्यति।

**रमेशः**– रमा+ईशः इत्यत्र **स्थानेऽन्तरतम** इति परिभषासूत्रसहकारेण **आद्गुणः** इति सूत्रेण आकारात् ईकारे परे पूर्वपरयोः स्थाने स्थानान्तर्यात् एकारादेशे वर्णसम्मेलने **रमेशः** इति रूपं भवति।

**गङ्गोदकम्**– गङ्गा+उदकम् इत्यत्र **स्थानेऽन्तरतम** इति परिभाषासूत्रसहाकारेण **आद्गुणः** इति सूत्रेण अकारात् उकारे परे स्थानान्तर्यात् अकारोकारयोः स्थाने गुणे ओकारादेशे वर्णसम्मेलने **गङ्गोदकम्** इति रूपं भवति।

**उरण् रपरः १.१.५१ ऋ. इति त्रिंशतः संज्ञा इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। तत्रान्तरतम्यात् कृष्णर्द्धिः इत्यत्र अर्। तवल्कार इत्यत्र अल्। अचो रहाभ्याम् ( सू.५९ ) इति पक्ष द्वित्वम्।**

**संस्कृतव्याख्या**– सूत्रे पदत्रयं वर्तते। उः अण् रपरः इति। उः इति ऋशब्दस्य षष्ठ्येकवचनान्तं पदम्, अण् इति प्रथमान्तं पदम्, रपरः इति प्रथमान्तं पदम्। उः इत्यस्य षष्ठ्यन्तत्वात् **षष्ठी स्थाने योगा** इति सूत्रात् स्थाने इति पदम् उपतिष्ठते। रपर इति रपरो यस्मात् स रपरः। अण् इति अइउण् णकार घटितः प्रत्याहारः। इत्थम्– ऋकारस्य स्थाने योऽण् स रपरतया, अर्थात् रपरत्वेन प्रवर्तत इति। रपर इत्यत्र **र** इति प्रत्याहारः तेन र्, ल् इत्यनयोर्ग्रहणम्। **स्थानेऽन्तरतमः** इति सूत्रात् स्थाने इति पदस्यानुवृत्या ऋकास्य स्थाने अण् प्रत्याहारस्थो वर्ण रेफपरविशिष्टः, लृकारस्य स्थाने यो अण् स लकारपरविशिष्ट एव प्रवर्तत इति सूत्रतात्पर्यम्। तदेव कथयति मूले– **तत्रान्तरतम्यात्, कृष्णर्द्धिः इत्यत्र अर्, तवल्कारः इत्यत्र अल्** इति। एतेन कृष्ण+ऋद्धि इत्यत्र अकारऋकारयोः स्थाने आदगुण इति सूत्रेण गुणे, अनेन सूत्रेण च रपरत्वे कृते अर् इत्यादेशे कृष्णर् द्धिः इति जाते **अचोरहाभ्यां द्वे** इति सूत्रेण विकल्पेन धकारस्य द्वित्वे कृते कृष्णर् ध् ध् इ जाते अग्रिमं सूत्रं प्रवर्तते।

**झरो झरि सवर्णे ८.४.६५ झरः परस्य झरो लोपो वा स्यात् सवर्णे झरि। द्वित्वाभावे लोपे सत्येकधम्। असति लोपे, द्वित्वलोपयोर्वा द्विधम्। सति द्वित्वे लोपे चासति त्रिधम्। कृष्णर्धिः, कृष्णर्द्धिः, कृष्णर्द्द्धिः। यणः इति पञ्चमी मय इति षष्ठी इति पक्षे लकारस्य द्वित्वम्। लस्य तु अनचि च ( सूत्र.४८ ) इति। तेन तवल्कार इत्यत्र रूपचतुष्टयम्।**

**द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि।**

**तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम्।।**

**संस्कृतव्याख्या**– सूत्रे पदत्रयं वर्तते। झरः इति षष्ठ्यन्तं झरि इति सप्तम्यन्तं सवर्णे इति च सप्तम्यन्तं पदम्। अत्र **झयो होऽन्यतरस्याम्** इत्यतः अन्यतरस्याम् इत्यनुवर्तते, **हलो यमाम्** इत्यादितो हल इति लोप इति चानुवर्तते। हलः इत्यस्य पञ्चम्यन्तत्वात् **तस्मादित्युत्तरस्य** इति परिभाषासूत्रेण अव्यवहितोत्तरस्य इत्यर्थो लभ्यते। झरि इत्यस्य सप्तम्यन्तत्वात् **तस्मिन्निति निर्दिष्टे** पूर्वस्य इत्यनेन अव्यवहितपूर्वत्वस्य इत्यर्थो लभ्यते, अन्यतरस्याम् इति विकल्पवाचकं, इत्थं सर्वेषामन्वयं कृत्वा सूत्रार्थो भवति यत्– हल अव्यवहितपरस्य झरो लोपो वा भवति झरि परे। अर्थात् झरः अव्यवहितपूर्वत्वविशिष्टस्य झरो लोपो भवति विकल्पेनेति। इत्थम् कृष्णर् ध् ध् इ इत्यवस्थायां पूर्वधकारस्य लोपे वर्णसम्मेलने कृष्णर्धि इति, विकल्पपक्षे पूर्वधकारस्य **झलां जश् झशि** इति सूत्रेण जश्त्वे दकारे वर्ण सम्मेलने कृष्णर्द्धिः इति। द्वित्वं लोपाभावे च कृष्णर्द्द्धिः इति त्रिधकारघटितं रूपं भवति। **तवल्कार** इत्यत्र तव+लृकार इत्यवस्थायां गुणे अल् कृते तव् अल् कार इत्यत्र **यणो मयो द्वे वाच्ये** इति वार्तिके यण् इति पञ्चमी, मय् इति षष्ठी इत्यस्मिन् पक्षे लकारस्य द्वित्वे, लकारस्यापि द्वित्वे चतुष्टयं रूपं भवति।

तदुच्यते कारिकामाध्यमेन **द्वित्व लस्यैवेत्यादि।** अस्यायम्भावः लकारस्य द्वित्वे ककारस्य द्वित्वाभावे च सति द्विलकारमेकककारघटितं रूपं **तवल्लकार** इति। ककारस्य द्वित्वे लकारस्य च द्वित्वाभावे **तवल्क्कार** इति लकारककारयोरूभयोरपि द्वित्वाभावे तवल्कार इति। लकारककारयोरुभयो द्वित्वे **तवल्लक्कार** इति रूप चतुष्टयं बोध्यम्।

**कृष्णर्द्धिः**– कृष्ण+ऋद्धि इत्यवस्थायाम् **आदगुणः** इति सूत्रेण स्थान आन्तर्यात् गुणे **उरण् रपर** इति सूत्रेण अकार+ऋकारयोः स्थाने अर् इत्यादेशे कृष्णर्धिः इति जाते **अनचि च** इति सूत्रेण धकारस्य विकल्पेन द्वित्वे, **झलां जश् झशि** इति सूत्रेण पूर्वधकारस्य जशत्वे वर्णसंयोगे कृष्णर्द्धिः इति, विकल्पपक्षे द्वित्वे पूर्वधकारस्य लोपे कृष्णर्धिः, लोपाभावे च पूर्वधकारस्य जश्त्वे कृष्णर्द्द्धि इति त्रिधकारघटितं रूपं भवति।

**तवल्कारः**– तव+लृकार इत्यत्र **आद्गुण** इति सूत्रेण गुणे, **उरण् रपरः** इति सूत्रेण रपरत्वे अल् कृते तवल्कार इति, लकारस्य विकल्पेन द्वित्वे **तवल्ल्कार** इति, लकारस्यद्वित्वाभावे ककारस्य द्वित्वे **तवल्क्कार** इति, लकारककारयोरुभयोरपि द्वित्वे तवल्ल्क्कार इति रूपचतुष्टयं भवतीति।

**वृद्धिरेचि ६.१.८६ आदेचि परे वृद्धिरेकादेश स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः। देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्।**

**संस्कृतव्याख्या**– वृद्धिः एचि इति सूत्रस्य पदविभागः। अत्र पदद्वयं वर्तते। **आद् गुणः** इति सूत्रात् आत् इत्यनुवर्तते। **एकः पूर्वपरयोः** इत्यस्य अधिकारः। **आद्गुण** इति सूत्रस्य प्राप्तौ अस्य सूत्रस्यारम्भात् गुणस्य अयमपवादः। इत्थं सूत्रस्यार्थो भवति यत्– अवर्णात् एचि अर्थात् एच् प्रत्याहारस्थे वर्णे परे सति पूर्वपरयोः स्थाने वृद्धिरूप एकादेशो भवतीति। **तद्यथा**– कृष्ण+एकत्वम् **कृष्णैकत्वम्**। देव+ऐश्वर्यम् **देवैश्वर्यम्**। गङ्गा+ओघ, **गङ्गौघ**, कृष्ण+ओत्कण्ठ्यम्, **कृष्णौत्कण्ठ्यम्** इति।

**कृष्णैकत्वम्**– कृष्ण+एकत्वम् इत्यत्र **आद्गुणः** इति सूत्रेण अवर्णात् अचि परे गुणे प्राप्ते तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण अकारात् एचि परे पूर्वपरयोः स्थाने स्थानआन्तर्यात् कण्ठतालुस्थानकस्य स्थाने तथाविध ऐकारादेशे वर्णसम्मेलने **कृष्णैकत्वम्** इति रूपं भवति।

**गङ्गौघः**– गङ्गा+ओघ इत्यत्र **आद् गुण** इति सूत्रेण अवर्णात् अचि परे गुणे प्राप्ते तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण अकारओकारयोः कण्ठोष्ठस्थानकस्य स्थाने स्थानआन्तर्यात् औकारे वृद्ध्यादेशे वर्णसम्मेलने **गङ्गौघ** इति रूपं सिद्ध्यति।

**देवैश्वर्यम्**– देव+ऐश्वर्यम् इत्यत्र **आद्गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण अकार–ऐकारयोः स्थाने कण्ठतालुस्थानसाम्यात् ऐकारादेशे वर्णसम्मेलने **देवैश्वर्यम्** इति रूपं भवति।

**कृष्णौत्कण्ठ्यम्**– कृष्ण+ओत्कण्ठ्यम् इत्यत्र **आद्गुण** इति सूत्रेण प्राप्तं गुणं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण अकार–औकारयोः स्थाने कण्ठओष्ठस्थानसाम्यात् औकारादेशे वर्णसम्मेलने **कृष्णौत्कण्ठ्यम्** इति रूपं सिद्ध्यति।

**एतेधत्यूठ्सु ६.१.८९ अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम्, उपेतः। मा भवान्प्रेदिधत्। पुरस्तादपवादन्यायेनेयं वृद्धिः एङि पररूपम् ( सू. ७८ ) इत्यस्यैव बाधिका, न तु ओमाङोश्च ( सू. ८० ) इत्यस्य। तेन अवैहि इति वृद्धिरसाधुरेव।**

**संस्कृतव्याख्या**– विधिसूत्रम् एकपदात्मकम् इदं सूत्रम्। एतिश्च एधतिश्च ऊठ् च तेषां इतरेतरयोगद्वन्द्वसमासघटितं सप्तम्यन्तं पदम्, एतेधत्यूठ्सु इति। अत्र **आद् गुणः** इति सूत्रात् आत् इति, **वृद्धिरेचि** इति च सम्पूर्णं सूत्रम् अनुवर्तते। अत्र सूत्रे एति इति, एधति इति च इकश्तिपौ धातुनिर्देशे श्तिपानिर्देशः। तेन इण् गतौ एध् वृद्धौ च धातू विवक्षितौ वर्तेते। अनुवृत्ते अचि इत्यत्र सप्तमीनिर्देशात् **यस्मिन्विधिस्तदादावल्ग्रहणे** इति परिभाषया तदादिग्रहणं भवति। एतेन एजादौ इति लभ्यते। तच्च एतेधत्योरेव विशेषणं भवति न तु ऊठ् इत्यस्य असंभवात्। **एकः पूर्वपरयोः** इत्यस्य अधिकारः। इत्थं सूत्रस्यार्थो भवति यत्– अवर्णात् एजादि इण् धातोः एध् धातोः उठ् धातोश्च परत्वे पूर्वपरयोः स्थाने वृद्धिसंज्ञकः एकादेशो भवतीति।

इदं सूत्रम् पररूपस्य गुणस्य च अपवादभूतम्। तथाहि उप एति, इत्यत्र **आद् गुण** इति सूत्रेण गुणस्य प्राप्तिः **एङि पररूपम्** इत्यनेन पररूपस्य च प्राप्तिः, तं प्रबाध्य अस्य प्रवृत्तेरिदं तयोरपवाद इति। सूत्रे एजाद्योः इति कथनेन इण् धातोः तसि शपो लुकि **सार्वधातुकमपित्** इति सूत्रेण तसो ङित्वाद् गुणाभावे इतः इति जाते उप इत इत्यवस्थायाम् इण् धातोः सत्वेऽपि एजाद्यभवात् न वृद्धिः, गुणे कृते उपेतः इत्येव। एवमेव एध् धातोर्णिचि इदिधत् इति जाते प्र+इदिधत् इत्यवस्थायाम् एजाद्यभवात् न वृद्धिरपितु गुणे कृते **मा भवान् प्रेदिधत्** इत्येवं रूपं भवति।

अत्रेदमाशङ्कते **अव आ इहि** इत्यत्र **आद् गुण** इति सूत्रेण आकार–इकारयोः गुणे एकारादेशे अव एहि इत्यवस्थायाम्, एकादेशस्य गुणस्य एकारस्य **अन्तादिवच्च** इति सूत्रेण परादिवद्भावेन **आद्यन्तवदेकस्मिन्,** इति सूत्रेण व्यपदेशिद्भावेन च इण्धातो एजादित्वात् **एङि पररूपम्** इति सूत्रेण प्राप्तं पररूपं प्रबाध्य **एतेधत्यूठ्सु** इति सूत्रेण वृद्धौ अवैहि इति वृद्धिघटितं रूपं स्यात् न तु अवेहि इति। न चात्र **ओमाङोश्च** इति सूत्रेण वृद्धिः यथा **एङि पररूपम्** इत्यस्य अपवादः एवमेव **ओमाङोश्च** इत्यस्याप्यवादः। **येन नाप्राप्ति** न्यायसाम्यात्। एतद् मनसि निधाय मूले कथयति– **पुरस्तादपवादेत्यादि।** अस्यायम्भावः– **पुरस्तादापवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्** इति न्यायः। अस्य अर्थः पूर्वपठिता अपवादा अव्यवहितान् एवोत्तरान् विधीन् बाधन्ते न तु व्यवहितोत्तरान् विधीन्। अत्र **एतेधत्यूठ्सू** इत्यस्मात् उत्तरं कानिचित् सूत्राणि पठित्वा, **एङि पररूपम्** इति सूत्रं पठितम्। अतः अनेन न्यायेन **एतेधत्यूठ्सू** इत्यनेन वृद्ध्या **एङि पररूपम्** इत्येव बाध्यते, न तु **ओमाङोश्च** इति पररूपमपि। अत **ओमाङोश्च** इति सूत्रेण पररूपे कृते अवेहि इत्येव साधु न तु अवैहि इति। तदेव मूले उक्तम् तेन **अवैहि इति वृद्धिरसाधुरेवेति।**

**उपैति**– उप+एति इत्यत्र **आद्गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण वृद्धौ प्राप्तायां तामपि प्रबाध्य **एतेधत्यूठ्सु** इति सूत्रेण पूर्वपरयोः अकार एकारयोः स्थाने स्थानसाम्यात् वृद्धौ ऐकारादेशे वर्णसम्मेलने उपैति इति रूपं सिद्ध्यति।

**उपैधते**– उप+एधते इत्यत्र **आद् गुण** इति सूत्रेण प्राप्तं गुणं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण वृद्धिः प्राप्नोति तामपि प्रबाध्य **एतेधत्यूठ्सु** इति सूत्रेण अकार ऐकारयोः स्थाने स्थानसाम्यात् वृद्धौ ऐकारादेशे वर्णसम्मेलने **उपैधते** इति रूपं भवति।

**प्रष्ठौह**– प्रष्ठ+ऊह इत्यत्र **आद् गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **एतेधत्यूठ्सु** इति सूत्रेण **अकार–उकारयोः** स्थाने स्थानआन्तर्यात् वृद्धौ औकारादेशे वर्णसम्मेलने प्रष्ठौह इति रूपं सिद्ध्यति।

**अक्षादूहिन्यामुपसंख्यानम् ( वा. ३६०४ ) अक्षौहिणी सेना। स्वादीरेरिणो ( ३६०६ ) स्वैरः। स्वेनेरितुं शीलमस्येति स्वैरी। स्वैरिणी। प्रादूहोढोढ्येषैष्येषु ( वा ३६०५ ) प्रौहः। प्रौढः। अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ( प. १५ ) व्रश्च ( सू. २९४ ) इति सूत्रे राजेः पृथऽभ्राजिग्रहणज्ञापकात्। तेनोढग्रहणेन क्तान्तमेव गृह्यते, न तु क्तवत्वन्तस्यैकदेशः प्रोढवान्। प्रौढिः। इष इच्छायाम् तुदादि, इष गतौ दिवादिः, इष आभीक्ष्ण्ये क्र्यादिः, तेषां घञि ण्यति च एषः एष्य इति रूपं, तत्र पररूपे प्राप्ते अनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु ईष उञ्छ, ईष गतिहिंसादर्शनेषु तयोदीर्घोपधत्वात् ईष ईष्यः। तत्राद्गुणे प्रेषः, प्रेष्यः।**

**संस्कृतव्याख्या– अक्षाद्......।** वार्तिकमिदम्। अत्र पूर्वसूत्रात् आत् इति, अचि इति, वृद्धिरिति च अनुवर्तते। **एकः पूर्वपरयोः** इत्यस्य अधिकारः। अक्षात् ऊहिन्याम् उपसंख्यानम् इति वार्तिकस्य पदविभाग। ऊहः–तर्कः सोऽस्या अस्ति इति ऊहिनी तस्य सप्तम्येकवचने ऊहिन्याम् इति। इत्थम् अक्षशब्दात् ऊहिनी शब्दे परे पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यादिति वार्तिकार्थः। तथाहि अक्ष ऊहिनी इति स्थिते गुणे प्राप्ते तं प्रबाध्य अनेक वार्तिकेन वृद्धौ–अक्षौहिनी इति। **पूर्वपदासंज्ञायाम्** इत्यनेन णत्वे अक्षौहिणी इति रूपं भवति।

**अक्षौहिणी सेना** – अक्ष+ ऊहिणी इत्यत्र **आद्गुणः**– इति सूत्रेण गुणे प्राप्ते **अक्षादूहिन्याम् उपसंख्यानम्** इति वार्तिकेन पूर्वपरयोः स्थाने वृद्धौ औकारादेशे **अक्षौहिणी** इति रूपं भवति।

**स्वादी.....।** इदमपि वर्तिकम्। स्व शब्दात् ईरशब्दे ईरिन् शब्दे च परे पूर्वपरयोः अचि वृद्धिरेकादेशो भवतीति वार्तिकार्थः। तद्यथा– स्वेन छन्देन इर इति विग्रहे समासे स्व ईर इत्यत्र **आद्गुणः** इति सूत्रेण गुणे प्राप्ते, तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण वृद्धौ स्वैरः इति रूपं सिद्ध्यति। एवमेव स्वेन छन्देन ईरितुं संचरितुम् शीलमस्य इत्यर्थे स्व ईरिन् इति स्थिते गुणं प्रबाध्य वृद्धौ स्वैरिणी इति।

**स्वैरी**– स्व+ईरी इत्यत्र आद्गुणः इति सूत्रेण प्राप्ते तं प्रबाध्य **स्वादीरेरिणोः** इति वार्तिकेन वृद्धौ ऐकारादेशे वर्णसम्मेलने स्वैरी इति रूपं सिद्धयति।

**स्वैरिणी** – स्व+ईरिणी इत्यत्र **आद्गुणः** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य स्वादीरेरिणो इति वार्तिकेन वृद्धौ स्वैरिणी इति रूपं भवति।

**प्रादूहो.....।** इदमपि वार्तिकम्। अत्र पदद्वयम् प्रात् इति पञ्चम्येकवचनान्तं पदम् ऊहोढ़ोढ्यैषैष्येषु इति सप्तम्यन्तं पदम्। प्र उपसर्गात् ऊह, ऊढ़, ऊढ़ि एष, एष्य इत्येतेषु शब्देषु परेषु पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यादिति वार्तिकार्थः। तेन **प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्य** इत्यादीनि रूपाणि भवन्ति इति।

अत्रेदमाशङ्कते प्र+ऊढ़वान् इत्यत्रापि ऊढ़शब्दस्य परत्वेन श्रवणात् वृद्धिः स्यादिति तत्रेमां शङ्कां परिहर्तुं परिभाषामुपस्थापयति मूले **अर्थवद्ग्रहणे इत्यादि।** इयं परिभाषा वर्तते। अस्या अयमर्थः– अर्थवतः शब्दस्य ग्रहणसम्भवे अनर्थकस्य शब्दस्य ग्रहणं न भवतीति। तेन अर्थवतः ग्रहणनियमेन **प्रादूहोढ़** इत्यत्र क्तप्रत्ययान्तस्य ऊढ़ इत्यस्यैव ग्रहणं भवति तत्रैव वृद्धिः न तु क्तवतुप्रत्ययान्तस्य। अतस्तत्र प्रोढ़वान् इत्येवरूपम्। प्रैषः प्रैष्य इत्यादौ, इष इच्छायाम्, इष गतौ, इष आभीक्ष्ण्ये इति गणत्रयेऽपि ह्रस्वोपधा एव एते धातवः गृह्यन्ते। ये तु दीर्घोपधत्वेन ईष धातुं स्वीकुर्वन्ति तेषां मते गुण एव, प्रेषः प्रेष्यः इति।

**प्रौहः**– प्र+ऊहः इत्यत्र **आद्गुणः** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **प्रादूहोढ़ोढ्यै षैष्येषु** इति वार्तिकेन अकार–ऊकारयोः स्थाने वृद्धौ औकारादेशे प्रौहः इति रूपं सिद्धयति।

**प्रौढ़ः**– प्र+ऊढः इत्यत्र **आद्गुण** इति सूत्रेण गुणे प्रापते तं प्रबाध्य **प्रादूहोढो ढ्यैषैष्येषु** इति सूत्रेण वृद्धौ औकारादेशे **प्रौढः** इति रूपं सिद्धयति।

**प्रौढिः**– प्र+ऊढिः इत्यत्र **आद्गुणः** इति सूत्रेण प्राप्तं गुणं प्रबाध्य **प्रादूहोढ़ोढ्यैषैष्यैष्येषु** इति वार्तिकेन वृद्धौ **प्रौढिः** इति रूपं भवति।

**प्रैषः**– प्र+एष इत्यत्र इत्यत्र **आद्गुण** इति सूत्रेण प्राप्तं गुणं प्रबाध्य **प्रादूहोढोढ्यैषैष्येषु** इति सूत्रेण वृद्धौ **प्रैषः** इति।

**प्रैष्यः**– प्र+एष्य इत्यत्र **आद्गुणः** इति सूत्रेण गुणं प्राप्तं प्रबाध्य **प्रादूहोढ़ोढ्यैषैष्येषु** इति वार्तिकेन वृद्धौ **प्रैष्य** इति रूपं सिद्धयति।

**ऋते च तृतीयासमासे (वा ३६०७) सुखेन ऋतः सुखार्तः। तृतीया इति किम्। परमर्तः। प्रवत्सतरकम्बलवसनदशार्णानामृणे (वा.३६०८.९) प्रार्णम्। वत्सतरार्णम् इत्यादि। ऋणस्यापनयनाय यदन्यद् ऋणं क्रियते तद् ऋणार्णम्। दशार्णो देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च।**

**संस्कृतव्याख्या– ऋते.......।** इदमपि वार्तिकम्। अत्र ऋते इति सप्तम्यन्तं पदम् तृतीयासमासे इति निमित्तवाचकं सप्तम्यन्तम्। अत्र आत् इति वृद्धिरिति चानुवर्तते। **एकः पूर्वपरयोरित्यस्य** अधिकारः। एतेन अवर्णात् ऋतशब्दे परे

तृतीयासमासे पूर्वपरयोः स्थाने वृद्धि एकादेशो भवतीति। **आद्गुण** इति सूत्रेण प्राप्तं गुणं बाधते वार्तिकमिदम्। तद्यथा सुखेन ऋतः इत्यर्थे तृतीयातत्पुरुषे समासे विभक्ति लोपे सुख+ऋत इत्यत्र अनेन वृद्धौ सुखार्त इति।

अस्मिन् वार्तिके तृतीयासमासे इति कथनेन **परमश्चासौ ऋतः** इत्यत्र कर्मधारय समासे विभक्तिलोपे परम ऋतः इत्यवस्थायां न वृद्धिर्भवति, अपितु गुणे कृते परमर्त इत्येव।

**सुखार्तः**- सुख+ऋत इत्यत्र सुखेन ऋत इति तृतीयासमासविधानात् **आद्गुण** इति सूत्रेण प्राप्तं गुणं प्रबाध्य, **ऋते च तृतीयासमासे** इति वार्तिके अकारऋकारयोः स्थाने वृद्धौ **उरण् रपरः** इति सूत्रेण रपरत्वे आर् इति जाते वर्णसम्मेलने सुखार्त इति रूपं सिद्ध्यति।

**प्रवत्सतर.......।** इदमपि वार्तिकम्। प्रश्च वत्सतरश्च कम्बलश्च वसनं च ऋणं च दश चेति प्रवत्सतरकम्बलसनार्णदशा तेषां प्रवत्सतरकम्बलवसनार्णदशनाम् इत्येकं षष्ठ्यन्तं पदम्। ऋणे इति निमित्तवाचकं सप्तम्यन्तं पदम्। अत्र आत् वृद्धि इत्यनयोरनुवृत्ति र्भवति। **एकपूर्वपरयोः** इत्यस्य अधिकारः। इत्थं प्रवत्सतर-कम्बल-वसन-ऋण-दश इत्येभ्यः परे ऋणशब्दे जाते पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवतीति वार्तिकार्थः। तद्यथा **प्रार्णम्। वत्सतरार्णम्। कम्बलार्णम्।** वसनार्णम्। ऋणस्य अपनयनाय यदन्यद्दणं क्रियते तद् ऋणार्णम्। **दशार्णः**- देशः।

**प्रार्णम्**- प्र+ऋणम् इत्यत्र **आद् गुणः** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **''प्रवत्सतर कम्बलवसनार्णदशनामृणे''** इति वार्तिकेन वृद्धौ **उरण् रपरः** इति सूत्रेण रपरत्वे पूर्वपरयोः स्थाने **आद् गुणः** इत्यनेन गुणे कृते वर्णसम्मेलने प्रार्णम् इति रूपं भवति।

**वत्सतरार्णम्**- वत्सतर+ऋणम् इत्यवस्थायाम् **आद्गुणः** इति सूत्रेण प्राप्तं गुणं प्रबाध्य **प्रवत्सतरेत्या**दिवार्तिकेन वृद्धौ रपरत्वे वर्ण सम्मेलने वत्सतरार्णम् इति।

**ऋणार्णम्**- ऋण+ऋणम् इत्यवस्थायाम् **आद् गुणः** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **प्रवत्सतरेत्यादिवार्तिकेन** वृद्धौ रपरत्वे वर्णसम्मेलने **ऋणार्णम्** इति। एवमेव **वसनार्णम्, दशार्णम्** इत्यादीनि रूपाणि बोध्यानि।

**उपसर्गादृति धातौ ६.१.९१ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेका देशः स्यात्। प्रार्च्छति। उपार्च्छति।**

**संस्कृतव्याख्या**- विधिसूत्रमिदम्। उपसर्गात् ऋति धातौ इति सूत्रस्य पदविभागः। अत्र **आद्गुण** इति सूत्रात् आत् इति पञ्चम्यन्तं पदम् अनुवर्तते तच्च उपसर्गात् इत्यस्य विशेषणत्वेन प्रयुज्यते, विशेषणत्वाच्च तदन्तविधिः, एतेन अवर्णान्तात् उपसर्गात् इत्यर्थो लभ्यते। ऋति इत्यस्य यस्मिन्विधिरित्यादिपरिभाषया तदादिविधिना ऋकारादौ इत्यर्थः, तस्य धातौ इत्यनेन सप्तम्यन्तेन पदेन सहान्वये ऋकारादौ धातौ परे इत्यर्थः। अत्र वृद्धिरेचि इत्यतो वृद्धिरित्यनुवर्तते। **एकः पूर्वपरयोः** इत्यस्य अधिकारः।

इत्थम्- अवर्णान्तात् उपसर्गात् परे ऋकारादौ धातौ सति पूर्वपरयोः स्थाने वृद्धिरिति सूत्रार्थः सङ्गच्छते। इदमपि गुणं बाधते। **तद्यथा- प्रार्च्छति। उपार्च्छति।** प्र ऋच्छति इत्यत्र अनेन वृद्धौ रपरत्वे पार् च्छति इत्यवस्थायां रेफस्य पदान्ते विसर्गमाशङ्कितुं तत्र पदान्तत्वमुपपादयितुम् अग्रिमं सूत्रम् उपस्थापयति तथाहि-

**अन्तादिवच्च ६.१.८५ योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात् इति रेफस्य पदान्तत्वे।**

**संस्कृतव्याख्या**- अतिदेशसूत्रमिदम्। अन्तादिवत् च इति सूत्रस्य पदविभागः। अन्तश्च आदिश्च इति अन्तादी, अन्तादिभ्यां तुल्यम् इत्यर्थे तेन **तुल्यं क्रिया चेद्वति** इति सूत्रेण वतिप्रत्यये अन्तादिवत् इत्यव्ययपदं प्रथमान्तम्, **एकः पूर्वपरयोरित्यस्य** अधिकारः। **यथासंख्यमनुदेशः समानाम्** इति परिभाषया अन्तादिवत् इत्यस्य

क्रमेणान्वयो भवति। इत्थम् पूर्वपरयोः स्थाने भवन् एकादेशः पूर्वस्य अन्तवत्- अन्तसदृशः, परस्य आदिवत्- आदिसदृशः भवति इति सूत्रार्थः सम्पद्यते। तत्र पूर्वान्तवद्भावस्योदाहरणं यथा- **क्षीरेपेण** इति। अत्र क्षीरप शब्दात् तृतीयैकवचने टा प्रत्यये तत्स्थाने इनादेशे क्षीरप इन इत्यवस्थायाम् **आद् गुण** इति सूत्रेण अकारेकारयोः स्थाने गुणे क्षीरपेन इति जाते, अत्र पूर्वान्तवत्वेन ''पे'' इत्यनुत्तरपदस्य एकाच्त्वात् **एकाजुत्तर पदे णः** इति सूत्रेण णत्वं भवति। अस्यायं भावः अनेन सूत्रेण णत्वविधानाय उत्तरेपदेऽच्त्वमावश्यकं परम् अकार-इकारयो स्थाने गुणे एकादेशे एकाच् उत्तरपदत्वाभावे णत्वस्याप्राप्तौ अनेन सूत्रेण पूर्वान्तवद्भावेन उत्तरपदे अकारान्तत्वे णत्वं भवति।

**परादिवद्भावस्योदाहरणं- खट्वा** इति। अत्र खट्व शब्दात् शप् प्रत्ययेऽनुबन्धलोपे खट्व आ इत्यवस्थायाम् सवर्णदीर्घे खट्वा इति जाते एकादेशत्वात् टाप्त्वाभावे आबन्तत्वाभावात् **हलङ्याब्भ्यि** इत्यादिसूत्रेण सलोपस्य अप्राप्तौ अनेन परादिवद्भावेन आकारस्य आवन्तत्वात् सकारलोपो भवति।

इत्थम् अनेन सूत्रेण प्रार्च्छति इत्यत्र रेपस्य पूर्वान्तवद्भावेन पदान्तत्वं सिद्धम्, पदान्तत्वे च उत्तर सूत्रेण प्राप्तं विसर्गविधायकं सूत्रम् उपस्थापयति। तथाहि-

**खरवसानयोर्विसर्जनीयः ८.३.१५ खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते। अन्तवद्भावेन पदान्तरेफस्य न विसर्गः। उभयथर्क्षु ( सू.३६३० ), कर्तरि चर्षिदेवतयोः ( सू. ३१६७ ) इत्यादिनिर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे धातो इति योग विभागेन पुनर्वृद्धिविधानार्थम्। तेन ऋत्यक ( सू. ९२ ) इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति।**

**संस्कृतव्याख्या- खर.........।** विधिसूत्रमिदम्। अत्र पदद्वयं वर्तते। खर् च अवसानं च इति खरवसाने तयोः खरवसानयोः इति सप्तम्यन्तं पदम्, विसर्जनीयः इति प्रथमान्तं पदम्। **रोरि** इत्यतः र इति षष्ठयन्तं पदमनुवर्तते। तच्च अधिकृतस्य पदस्य इत्यस्य विशेषणत्वेन प्रयुज्यते। विशेषणत्वात् तदन्तग्रहणेन रेफान्तस्येत्यर्थो लभ्यते। इत्थं खरि अवसाने च परतः रेफान्तस्य पदस्य इत्यर्थः। **अलोऽन्त्यस्य** इति परिभाषासूत्रबलात् अन्त्यग्रहणेन पदान्तस्य रेफस्य स्थाने इत्यर्थः। खरि, अवसाने इत्यनयोः सप्तम्यन्तत्वात् खरि परे अवसाने च इत्यर्थः। अवसानञ्चात्र अभावरूपं बुद्धिकृतं, तस्य परत्वम्।

एवं सर्वमादाय सूत्रस्यार्थो भवति यत्- खरि परे अवसाने च सति पदान्तस्य रेफस्य स्थाने विसर्गो भवति इति। इत्थम् उपार् छति इत्यत्र रेफस्य स्थाने विसर्गः प्राप्नोति पद्म् अन्तवद्भावेन पदान्तत्वं प्राप्तस्य रेफस्य विसर्गो न भवतीति तत्कथमिति चेत् प्रमाणमुपस्थापयन् कथयति मूले- **उभयथर्क्षुरित्यादिः।** अर्थात् अन्तवद्भावेन पदान्तत्वे विसर्गे कर्त्तव्ये उभयथर्क्षुरित्यादौ अपि विसर्गस्य निर्देशः कर्तव्य आसीत् तथा न कृतन्तेन ज्ञायते यद् अन्तवद्भावेन पदान्तत्वे रेफस्य न विसर्ग इति। अत्रेदमाशङ्कते- सूत्रे धातौ इति ग्रहणं व्यर्थम्, उपसर्गात् इति कथनेनैव तस्य क्रियायोगे एव विधानात् आक्षेपेणैव धातोर्ग्रहणं सिद्धम्। कथं धातुग्रहणम् इति। अत्रोच्यते मूले **योगविभागेनेत्यादि।** योगशब्दोऽत्र सूत्रपर्यायः तस्य विभागात्। अर्थात् **उपसर्गादृति** धातौ इति च विभागं कृत्वा इत्यस्यानुवृत्तिः। उसर्गात् इत्येकं सूत्रं धातौ इत्यपरं सूत्रं भविष्यति एतेन उपसर्गादृतिसूत्रं प्रबाध्य प्रकृतिभावविधायकं सूत्रमपि यदि प्रवर्तेत तदा तस्यापि ''धातौ'' इत्यनेन सूत्रेण बाधो भविष्यति। फलतः तत्र वृद्धिरेवन प्रकृतिभाव इति।

**प्रार्च्छति-** प्र+ऋच्छति इत्यत्र **आद्गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **उपसर्गादृति धातौ** इति सूत्रेण अकारऋकारयोः स्थाने वृद्धौ, **उरण् रपर** इति सूत्रेण रपरत्वे आर् कृते प्रार्च्छति इत्यवस्थायाम्, **अन्तादिवच्च** इति सूत्रेण अन्तवद्भावे पदान्तत्वे रेफस्य स्थाने **खरवसानयोर्विसर्जनीय** इति सूत्रेण विसर्गे प्राप्ते, **उभयर्थक्षु, कर्तरि चर्षिदेवतयोः** इत्यादि निर्देशात् विसर्गाभावे वर्णसम्मेलने च प्रार्च्छति इति रूपं सिद्धयति।

**उपार्च्छत्**= उप+ऋच्छत्= पूर्ववदेवसिद्धिः।

**वा सुप्यापिशले ६.१.९२ अवर्णान्तादुपसर्गात् ऋकारादौ सुब्धातौ परे वृद्धिरेकादेशो वा स्यात्। आपिशलिग्रहणं पूजार्थम्। प्रार्षभीयति। प्रर्षभीयति। सावर्ण्याद् लृवर्णस्य ग्रहणम्, उपाल्कारीयति, उपल्कारीयति। तपत्वाद्दीर्घे न- उप ॠकारीयति- उपर्कारीयति।**

**संस्कृतव्याख्या-** वा सुपि आपिशले इति सूत्रस्य पदविभागः। अत्र **आद् गुणः** इति सूत्रात् आत् इत्यस्य **वृद्धिरेचि** इति सूत्रात् वृद्धिः इत्यस्य चानुवत्तिर्भवति **उपसर्गादृतिधातौ** इति सम्पूर्णं सूत्रमनुवर्तते। **एकः पूर्वपरयोः** इत्यस्याधिकारः। सुपि इति ऋति, धातौ इत्यनयोर्विशेषणम्। आपिशलिग्रहणं पूजार्थम्, अर्थात् सम्मानार्थम्। एतेन अवर्णान्तात् उपसर्गात् ऋकारादौ सुप्प्रकृतिकधातौ परे पूर्वपरयोः स्थाने विकल्पेन वृद्धिरेकादेशो भवतीति सूत्रार्थः सङ्गच्छते। आपिशल आचार्यस्याप्ययमर्थः संमत इत्यादरलाभार्थम्, आपिशलिग्रहणम् इति। **प्रार्षभीयति, पर्षभीयति** प्र+ऋषभीयति इत्यर्थे **आद्गुणः** इति गुणे प्राप्ते तं प्रबाध्य **वा सुप्यापिशलेः** इति सूत्रेण विकल्पेन वृद्धौ रपरत्वे अकारऋकारयोः स्थाने आर् कृते वर्णसम्मेलने **प्रार्षभीयति** विकल्पपक्षे **आद्गुण** इति सूत्रेण गुणे प्रर्षभीयति इति रूपं सिद्ध्यति।

ऋकार लृकारयोः सावर्ण्यात् लृवर्णस्यापि ग्रहणं तेन **प्राल्कारीयति प्रल्कारीयति** इति रूपं भवति।

उप ॠकारयति इत्यत्र दीर्घ ऋकारे परे न वृद्धिः, ऋति इत्यत्र तपरकरणात्। एतेन उपर्कारीयति इत्येव रूपं भवति।

**एङि पररूपम् ६.१.९४ अवर्णान्तादुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपोषति। इह वा सुपि इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेनेङादौ सुब्धातौ वा, उपेडकीयति, उपैडकीयति। प्रोधीयति, प्रौधीयति। एवे चानियोगे ( वा ३६३१ ) नियोगोऽवधारणम्। क्वेव भोक्ष्यसे। अनवक्लृप्तावेवशब्दः। अनियोगे किम्- तवैव।**

**संस्कृतव्याख्या-** विधिसूत्रमिदम्। अत्र पदद्वयम्। एङि इति सप्तम्यन्तं निमित्तवाचकं पदम्, पररूपम् इति प्रथमान्तं विधेयं पदम्। अस्मिन् सूत्रे **उपसर्गादृति धातौ** इत्यतः उपसर्गात् इति धातौ इति च अनुवर्तते। **आद्गुण** इत्यतश्च आत् इत्यप्यनुवर्तते, आत् इति पदम् उपसर्गात् इत्यस्य विशेषणम्, विशेषणत्वाच्च तदन्तविधिः। एङ् इति प्रत्याहारः तस्य वर्णविधित्वाद्, **यस्मिन्विधिस्तादावल्ग्रहणे** इति परिभाषया तदादिविधिः। इत्थं सर्वमादाय सूत्रस्यार्थो भवति यत्- अवर्णान्ताद् उपसर्गादेङादिधातौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यादिति। इदं सूत्रं **वृद्धिरेचि** इति सूत्रस्य बाधकम्। तथाहि प्र+एजते= **प्रेजते,** उप+ओषति = **उपोषति** इति।

अत्रेदमाशङ्कते यत् एडको मेषः तमात्मन इच्छति इत्यर्थे **एडकीयति** इत्यत्र एङादिधातोः सत्वाद् नित्यं पररूपमेव स्यात् **उपेडकीयति** इत्येकमेवरूपं, इष्यते च उपैडकीयति इति वृद्धिघटितमपि रूपं तत्कथं स्यादिति- अत्रोच्यते समाधानमुखेन मूले- **इह ''वा सुपि'' इत्यनुवर्त्येत्यादि।** अस्यायम्भाव इह-प्रकृतसूत्रे, **एङि पररूपम्** इत्यत्र पूर्वसूत्रात् **'वा सुपि'** इत्यस्यानुवृत्तिं विधाय वाक्यभेदेन पृथक् पृथक् वाक्यं कृत्वा सूत्रार्थः कर्तव्यः। तथाहि- एङादिसुब्धातौ परे विकल्पेन पररूपं स्यात् इत्यर्थोऽपि द्वितीयेन वाक्येन भविष्यति। तेन सुप्प्रकृतिक-एङादिधातौ विकल्पविधानात् उपेडकीयति, उपैडकीयति इत्युभयमपि रूपं भवतीति। एवमेव आत्मन ओधमिच्छति इत्यर्थेऽपि **ओधीयति** इत्यस्य सुप्प्रकृतिकएङादिधातुत्वात् विकल्पेन वृद्धौ **प्रोधीयति प्रौधीयति** इत्युमयमपि।

**एवे चानियोगे।** इदं वार्तिकं वर्तते। अत्रापि आत्, **एकः पूर्वपरयोः** पररूपम् इत्येतेषामन्वयः। अनियोगे इति वैषयिकं सप्तम्यन्तं पदम्। इत्थम् अवर्णान्तात् अनियोगे अर्थे एवशब्दे परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यादिति वार्तिकार्थो भवति। कस्तावद् अनियोग इति चेत् तस्य विवेचनं कुर्वन्नाह मूले- **नियोगोऽवधारणम्।** अवधारणं नाम-अन्ययोगव्यवच्छेदः एतेन अवधारणात् भिन्नेऽर्थे एवशब्दे परे पररूपमिति तात्पर्यम्। तत्र **क्वेव**

**भोक्ष्यसे?** इत्यादौ क्व एव इत्यत्र न निश्चिनुम इत्यर्थे वृद्धिं बाधित्वा पररूपे कृते क्वेव इति। अनवधारणम् इत्यर्थः। अवधारणे अर्थे तु वृद्धिर्भवत्येव। यथा **तवैव**= तव एव नान्यस्य इत्यर्थे वृद्धिरेव।

**प्रेजते**– प्र+एजते इत्यत्र गुणं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण प्राप्तां वृद्धिं प्रबाध्य **एङि पररूपम्** इति सूत्रेण अकारएकारयोः स्थाने पररूपे कृते वर्णसम्मेलने **प्रेजते** इति रूपं भवति।

**उपोषति**– उप ओषति इत्यत्र **आद् गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **वृद्धिरेचि** इति सूत्रेण वृद्धौ प्राप्तायां तामपि प्रबाध्य **एङि पररूपम्** इति सूत्रेण पररूपे वर्णसम्मेलने **उपोषति** इति रूपं सिद्ध्यति।

**उपेडकीयति, उपैडकीयति** उप+एडकीयति इत्यत्र, वृद्धिं बाधित्वा, **एङि पररूपम्** इत्यस्मिन् सूत्रे **वा सुपि** इत्यस्यानुवृत्तित्वाद् वाक्यभेदेन अनेन सूत्रेण सुप्प्रकृतिकएङादि धातौ परे विकल्पेन पररूपे उपेडकीयति विकल्पपक्षे वृद्धौ उपैडकीयति इति द्वयमपि रूपं भवति।

एवमेव प्र+ओधीयति इत्यत्र विकल्पेन पररूपे **प्रोधीयति, प्रौधीयति** इति रूपद्वयमपि सिद्ध्यति।

**क्वेव भोक्ष्यसे**– क्व+एव भोक्ष्यसे इत्यत्र **एवे चानियोगे** इति वार्तिकेन अनवधारणे (अनिश्चिते) अर्थे पररूपे अकारएकारयोः सकारदेशे वर्णसम्मेलने क्वेव इति रूपं भवति।

क्लृप्तेऽर्थे तु तय+एव इत्यवस्थायां वृद्धौ कृतायां **तवैव** इति रूपं भवति।

**अचोऽन्त्यादि टि १.१.६४ अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकन्ध्वादिषु पररूपं वाच्यम् ( वा. ३६३२ )। तच्च टेः। शकन्धुः। कर्कन्धुः। कुलटा। सीमन्तः केशवेशे ( वा. ३६३३ ) सीमान्तोऽन्यः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। सारङ्गपशुपक्षिणोः ( ग. १३६ ) साराङ्गोऽन्यः। आकृतिगणोऽयम्। मार्तण्डः। ओत्वोष्ठयोः समासे वा ( वा. ३६३४ ) स्थूलोतुः, स्थूलौतु। बिम्बोष्ठः, बिम्बौष्ठः। समासे किम्- तवौष्ठः।**

**संस्कृतव्याख्या- अचो......।** संज्ञासूत्रमिदम्। टिसंज्ञा अनेन क्रियते। अचः अन्त्यादि टि'' इति सूत्रस्य पदच्छेदः। अन्तेभव अन्त्यः, अन्त्य आदिर्यस्य सह अन्त्यादिः। अचः इत्यत्र निर्धारणे षष्ठी तत्र च जातौ एकवचनं तेन अच्त्वजातौ अर्थात् अचां मध्ये इति फलितार्थः। इत्थं सूत्रस्यार्थो भवति यत् अचां (अचसमुदायस्य) मध्ये योऽन्त्योऽच् स आदौ यस्य तत्समुदायस्य टिसंज्ञा भवतीति। तद्यथा– मनस् इत्यत्र अच्समुदायः मनघटकौ अकारौ तयोऽन्त्यः नकारघटितोऽकारः सः सकारस्यादौ वर्तते तत्समुदाय अस् इति तस्य टिसंज्ञा।

**शकन्ध्वा**– इदं वार्तिकम्। अत्र **एकः पूर्वपरयोः** पररूपम् इत्यनयोरन्वयः। इत्थं शकन्ध्वादिषु तत्सिद्ध्यर्थं पूर्वपरयोः स्थाने पररूपं वक्तव्यम् इति वार्तिकार्थः। एतेन शकन्ध्वादिशब्दानां टेः अचि परे, टे परस्य अचश्च स्थाने पररूपं भवतीति। शकन्ध्वादिगणं पठति– **शकन्धुः कर्कन्धु** इत्यादिः।

**सीमन्त..........।** गणान्तर्गतवार्तिकम् एतत् पठितमस्ति। केशानां वेशः सन्निवेश विशेषः तस्मिन् गम्ये (बोध्ये) सीमन् शब्दस्य टेः अन् इत्यस्य अन्तशब्दस्य पूर्वाकारस्य च स्थाने पररूपं भवतीति वार्तिकार्थः। **सीमन्तः** इति। अन्यत्र तु सीमन् अन्त इत्यवस्थायां समासत्वात् नकारलोपे सीम अन्त इत्यवस्थायां दीर्घे सीमान्त इति ग्रामान्तप्रदेश इत्यर्थः।

**सारङ्ग.........।** इदमपि गणान्तर्गतपठितं वार्तिकम्। सारशब्द उत्कृष्टे। साराणि अङ्गानि यस्य इति विग्रहे ''सार अङ्ग'' इति जाते पशुपक्षिणोरर्थविशेषे पररूपं भवतीति वार्तिकार्थः। तेन सारङ्गः **चातकः, हरिण** इति। अन्यत्र साराङ्गः।

**आकृतिगणोऽयम्**– आकृत्या एव जातीयकतया निर्णेतव्योऽयं गण इत्यर्थः। अस्याम्भावः लोकप्रयोगानुसारेण

एतादृशा अन्येऽपि शब्दा अत्र निवेशनीया इति। तद्यथा– **मार्तण्ड** इति। मृतम् अण्डं यस्य स इति विग्रहे मृत अण्ड इत्यवस्थायां सवर्णदीर्घं बाधित्वा अनेन पररूपम् ततः अपत्ये मृतण्ड शब्दात् अण् प्रत्यये मार्तण्ड इति।

**ओत्वोष्ठयो.....।** अवर्णात् ओतु शब्दे ओष्ठशब्दे च परे पूर्वपरयोः एचः स्थाने समासे विकल्पेन पररूपं वक्तव्यमिति वार्तिकार्थः। स्थूल ओतुः स्थूलोतुः, विकल्पपक्षे स्थूलौतुः इति– (ओतु, विडालः, मार्जारः) एवमेव बिम्बफलवत् रक्तवर्णौ ओष्ठौ यस्य स इति विग्रहे बिम्ब ओष्ठ इत्यवस्थायां **बिम्बोष्ठः, बिम्बौष्ठ** इति रूपद्वयमपि। समासाभावे तु वृद्धिरेव तव ओष्ठः– तवौष्ठ इति।

**शकन्धुः**– शक+अन्धु इत्यत्र **अचोऽन्त्यादि** टि इति सूत्रेण शक इत्यस्य अकारस्य टिसंज्ञायां, **शकन्ध्वादिषुपररूपं वाच्यम्,** इति वार्तिकेन पररूपे कृते शकन्धुः इति रूपं सिद्ध्यति।

**कर्कन्धुः**– कर्क+अन्धु इत्यत्र टिसंज्ञायां शकन्ध्वादिषु पररूपं वाच्यम् इति वार्तिकेन पररूपे **कर्कन्धुः** इति।

**कुलटा**– कुल+अटा इत्यत्र दीर्घं प्रबाध्य **अचोऽन्त्यादि टि** इति सूत्रेण टिसंज्ञायां **शकन्ध्वादिषुपररूपं वाच्यम्** इति वार्तिकेन पररूपे कुलटा इति रूपं सिद्ध्यति।

**सीमन्तः**– केशवेशे अर्थे सीमन् अन्त इत्यवस्थायाम्, **अचोऽन्त्यादि टि** इति सूत्रेण अन् इत्यस्य टिसंज्ञायां **सीमन्तः केशवेशे** इति वार्तिकेन टेः पररूपे वर्णसम्मेलने सीमन्त इति रूपं भवति।

**मनीषा**– मनस्+ईषा इत्यत्र **अचोऽन्त्यादि टि** इति सूत्रेण अस् इत्यस्य टिसंज्ञायां **शकन्ध्वादिषु पररूपं वाच्यम्** इति वार्तिकेन पररूपे मनीषा इति रूपं सिद्ध्यति।

**हलीषा**– हल+ईषा इत्यत्र **आद्गुण** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य टिसंज्ञायां **शकन्ध्वादिषु पररूपं वाच्यम्** इति वार्तिकेन पररूपे हलीषा इति रूपं सिद्ध्यति।

**पतञ्जलिः**– पतत्+अञ्जलि इत्यवस्थायाम् **अचोऽन्त्यादि** टि इति सूत्रेण अत् इत्यस्य टिसंज्ञायां **शकन्ध्वादिषु पररूपं वाच्यम्** इति वार्तिकेन टेः पररूपे कृते वर्णसम्मेलने पतञ्जलि इति रूपं भवति।

**मार्तण्डः**– मृत+अण्ड इत्यवस्थायां दीर्घं प्रबाध्य शकन्ध्वादिगणस्य आकृतिगणत्वात् **शकन्ध्वादिषु पररूपं वाच्यम्** इति वार्तिकेन पररूपे इति मृतण्ड इति जाते मृतण्डस्य अपत्यम् इत्यर्थे अण् प्रत्यये मार्तण्ड इति रूपं भवति।

**स्थूलोतुः, स्थूलौतुः**– स्थूल+ओतुः इत्यत्र वृद्धिं बाधित्वा टिसंज्ञायां **शकन्ध्वादिगण**पठितेन **ओत्वष्ठयोः समासे** वा इति वार्तिकेन विकल्पेन पररूपे स्थूलोतुः इति विकल्पपक्षे वृद्धौ च स्थूलौतुः इति रूपं सिद्ध्यति।

**बिम्बोष्ठः, बिम्बौष्ठः**– बिम्ब+ओष्ठ इत्यत्र वृद्धिं बाधित्वा, टिसंज्ञायां, शकन्ध्वादि गणपठितेन **ओत्वोष्ठयोः समासे** वा इति वार्तिकेन विकल्पेन पररूपे कृते बिम्बोष्ठः विकल्पपक्षे वृद्धौ बिम्बौष्ठः इति रूपं सिद्ध्यति।

**ओमाङोश्च ६.१.९५ ओमि आङि च चात्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि– शिवेहि।**

**संस्कृतव्याख्या**– वृद्धेः दीर्घस्य च बाधकं सूत्रमिदम्। अत्र पदद्वयमस्ति। ओमाङो इति ओम् च आङ् च तयोः इत्यर्थे सप्तमीद्विवचनान्तं पदम्। च इत्यव्ययपदम्। अत्र **आद्गुण** इति सूत्रात् आत् इत्यस्य **एङि पररूपम्** इत्यतः पररूपस्य चानुवृत्तिर्भवति। **एक पूर्वपरयोः** इत्यस्याधिकारः। इत्थम् अवर्णात् ओमि आङि च परे पूर्वपरयोः स्थाने पररूपमेकादेशो भवतीति सूत्रार्थः सम्पद्यते। **तद्यथा** शिवाय ओं नमः इत्यत्र वृद्धिं बाधित्वा अनेन पररूपे शिवायों नमः। एवमेव शिव एहि इत्यत्र पररूपे शिवेहि इति।

**शिवायों नमः**– शिवाय+ओं नमः इत्यत्र **वृद्धिरेचि** इति सूत्रेण वृद्धौ प्राप्तायाम् **ओमाङोश्च** इति सूत्रेण ओकारोकारयोः स्थाने पररूपे कृते शिवायों नमः इति रूपं सिद्ध्यति।

**शिवेहि**– शिव आ इहि इत्यत्र अन्तरङ्गत्वात् पूर्वम् **आदगुण** इति सूत्रेण आकारेकारयोः स्थाने गुणे कृते शिव एहि इति जाते, **अन्तादिवच्च** इति सूत्रेण पूर्वान्तवद्भावे **ओमाङोश्च** इति सूत्रेण अकारस्य एकारस्य च स्थाने पररूपे इति शिवेहि इति रूपं सिद्ध्यति।

**अव्यक्तानुकरणस्यात इतौ ६.१.९८ ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति पटिति। एकाचो न ( वा. ३६३७ ) श्रदिति।**

**संस्कृतव्याख्या**– अत्र सूत्रे पदत्रयं विद्यते। अव्यक्तानुकरणस्य इति षष्ठयन्तं, अतः इति पञ्चम्यन्तम्, इतौ इति सप्तम्यन्तं पदम्। न व्यक्तम् अव्यक्तम् तस्य अनुकरणम् अव्यक्तानुकरणं, तस्य इत्यर्थे नञ्गर्भषष्ठीतत्पुरुषसमासघटितं पदम्। अव्यक्तः= अस्फुटवर्णविभागः। अतः इत्यस्य पञ्चम्यन्तत्वात् अव्यवहितपरस्य इत्यर्थो, इतौ इत्यस्य सप्तम्यन्तत्वात् इति परे इत्यर्थः। **एङि पररूपम्** इति सूत्रात् पररूपम् इत्यनुवर्तते। इत्थम् अव्यक्तअनुकरणवाचकस्य शब्दस्य अवयवस्य अत् इत्यस्मात् इति परे पररूपमेकादेशः स्यादिति सूत्रार्थः सङ्गच्छते। तद्यथा पटत् इति इत्यत्र अव्यक्तानुकरणशब्दावयव अत् इति तस्मात् इकारे परे अत् इत्यस्य पररूपे पटिति इति।

**एकाचो न......।** एक अच् यस्य स एकाच् तथाभूतस्यानुकरणस्य उक्तपररूपं न भवतीति वार्तिकार्थः। तद्यथा– श्रत् इति इत्यत्र एकाच्त्वात् अव्यक्तानुकरणस्य इति सूत्रेण प्राप्तं पररूपम् अनेन बाध्यते, ततः जश्त्वे कृते श्रदिति रूपं भवति।

**नाम्रेडितस्यान्त्यस्य तु वा ६.१.९९ आम्रेडितस्य प्रागुक्तं न स्यात्। अन्त्यस्य तु तकारमात्रस्य वा स्यात्। डाचि बहुलं द्वे भवतः ( वा. ४६९१ ) इति बहुलवचनाद् द्वित्वम्।**

**संस्कृतव्याख्या**– अव्यक्तस्यानुकरणस्यापवादभूतं सूत्रमिदम्। तथाहि **पत्पटत् इति** इत्यत्र **अव्यक्तानुकरणस्य** इत्यनेन पररूपे पटत्पटिति रूपं स्यात् इष्यते च पटत्पटेति तस्मात् सूत्रमिदमुपस्थापयति **नाम्रेडितेत्यादि।**

न आम्रेडितस्य अन्त्यस्य तु वा इति सूत्रस्य पदविभागः। अत्र अव्यक्तानुकरणस्यात इतौ इति पररूपम् इति **एकः पूर्वरूपयोः** इति चानुवर्तते। एतेन सर्वेषामन्वयेन आम्रेडितस्य अव्यक्तानुकरणस्य अवयवो य अत् शब्दः, तस्य इति शब्दे परे पररूपं न स्यात्, अन्त्यस्य तु वा। अर्थात् अत् शब्दान्तस्य तकारस्यैव इकारस्य च पररूपं वा स्यात् न तु अकारस्यापि इति सूत्रार्थो भवति। तद्यथा पटत् पटत् इत्यवस्थायाम्

पटत् इत्यत्र कथं द्वित्वमिति जिज्ञासायां वार्तिकमुपस्थापयति **डाचि बहुलमित्यादि।** अस्येदं तात्पर्यं यत् डाचि प्रत्यये परे बहुलं द्वित्वं भवतीति। अत्र बहुलग्रहणात् क्वचित् डाच् प्रत्ययाभावेऽपि द्वित्वे न दोषः। पटत् पटत् इत्यवस्थायाम्

**तस्य परमाम्रेडितम् ८.१.२ द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्। पटत्पटेति।**

**संस्कृतव्याख्या**– संज्ञासूत्रमिदम्। अत्र पदत्रयं वर्तते। तस्य इति षष्ठयन्तं परम् इति प्रथमान्तम्, आम्रेडितम् इति च प्रथमान्तं विधेयं पदम्। इदं सूत्रं **सर्वस्य** द्वे इत्यस्मात् अनन्तरं पठितं वर्तते। अतः तस्य इति पदेन द्विरूक्तस्य इत्यर्थो लभ्यते। इत्थं द्विरूक्तस्य परं रूपम् आम्रेडितसंज्ञकं भवतीति सूत्रार्थः। तद्यथा पटत् पटत् इति अत्र परस्य आम्रेडितसंज्ञायाम् पररूपे पटत्पट इति जाते आद्गुण इति सूत्रेण गुणे पटत्पटेति भवति।

पररूपाभावपक्षे पटत्पटत् इति, इत्यवस्थायाम् तकारस्य दकारं विधातुमग्रिमं सूत्रमुपस्थापयति–

**झलां जशोऽन्ते ८.२.३९ पदान्ते झलां जशः स्युः। पटत्पटदिति।**

**संस्कृतव्याख्या**– झलां जश अन्ते इति सूत्रस्य पदविभागः। झलाम् इत्यस्य षष्ठ्यन्तत्वात् ''**षष्ठीस्थाने**

**योगा बोध्या''** इति परिभाषया स्थाने इत्यर्थो लभ्यते जश इति प्रथमान्तं विधेयं पदम्, अन्ते इति सप्तम्यन्तं पदम्। अत्र पदस्य अधिकारः एतेन पदान्ते झल्प्रत्याहास्थानां वर्णानां स्थाने जश् भवति इति सूत्रार्थः। स्थनसाम्यात् तकारस्य जश्त्वे दकारे कृते तटत्पटदिति।

**पटत्पटेति**- पटत्पटदिति अव्यक्तानुकरणवाचकात् पटत् इत्यस्मात् इति शब्दे परे, **पटत् इति** इत्यवस्थायाम् **डाचि बहुलं द्वे भवतः** इति वार्तिकेन बहुलग्रहणात् द्वित्वे ''पटत् पटत्'' इति जाते **तस्य परमाम्रेडितम्** इति सूत्रेण परस्य आम्रेडितसंज्ञायाम् **अव्यक्तानुकरणस्यात् इतौ** इति सूत्रेण पररूपे प्राप्ते, **नाम्रेडितस्य तु वा** इति सूत्रेण अत् भागस्य पररूपस्य निषेधे तकारमात्रस्य पररूपे पटत्पट इति जाते **आद्गुण** इति सूत्रेण गुणे पटत्पटेति इति रूपं सिद्ध्यति पररूपाभावपक्षे पटत्पटत् इति इत्यवस्थायां **झलां जशोऽन्ते** इति सूत्रेण तकारस्य स्थानसाम्यात् जश्त्वे दकारे कृते वर्णसम्मेलने पटत्पटदिति रूपं भवतीति।

**अकः सवर्णे दीर्घ ६.१.१०१ अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। अचि किम्। कुमारी शेते। नाज्झलौ ( सू. १३ ) इति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः, ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः। अकः- किम् हरये। 'अकोऽकि दीर्घः' इत्येव सुवचम्। ''ॠति सवर्णे ॠ वा'' ( वा. ३६४० ) होतॄकारः, होतृकारः। ऌति सवर्णे ॡ वा होतॣकारः। पक्ष ॠकार सावर्ण्यात् होतृकारः। ॠति ॠ वा ऌति वा ''इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफौ, तयोरेका मात्रा अभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ, शेषं प्राग्वत्। इहोभयत्रापि ''ॠत्यकः'' ( सू. ९२ ) इति पाक्षिकः प्रकृतिभावो वक्ष्यते।**

**संस्कृतव्याख्या- अक.......**। सूत्रे पदत्रयं वर्तते। अकः इति पञ्चम्यन्तं पदं, सवर्णे इति सप्तम्यन्तं दीर्घ इति प्रथमान्तं विधेयं पदम् **इको यणचि** इत्यतः अचि इत्यनुवर्तते। तस्य च सवर्णे इत्यनेन सहान्वयो भवति। **एकः पूर्वपरयोः** इत्यस्याधिकारः। अक इत्यस्य पञ्चम्यन्तत्वात् **अकः अव्यवहितोत्तरस्य** इत्यर्थो लभ्यते। एतेन अकः अव्यवहितोत्तरे सवर्णे अचि परे पूर्वपरयोः स्थाने सवर्णदीर्घएकादेशो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा- दैत्य अरि इत्यवस्थायाम् द्वयोरकारयोरेको दीर्घ आकारादेशो भवति स्थानसाम्यात् । श्री ईश इत्यत्र ईकारादेशः। विष्णु उदय इति स्थिते ऊकारादेश इति। सूत्रे अचि इत्यस्यानुवृत्तिः तस्य किं प्रयोजनम् इति जिज्ञासायामुत्तरति मूले **अचि किम्**- कुमारी शेते। अस्यायं भावः अचि इत्यस्यानुवृत्तेरभावात् अकः सवर्णे दीर्घः इत्यर्थे कुमारी शेते इत्यादौ ईकारशकारयोः स्थानप्रयत्नसाम्यात् सवर्णसंज्ञायां सवर्णेपरे दीर्घ ईकारः एकादेशः स्यात् तन्निवृत्यर्थम् अचि इत्यस्यानुवृत्तिरिति।

अत्र पुनरिदमाशङ्कते यत् ईकारशकारयोः स्थानप्रयत्नसाम्येऽपि न सावर्ण्यं **नाज्झलौ इति सूत्रनिषेधात्।** अतः ''कुमारी शेते'' इत्यादौ अकः सवर्णे इत्यस्याप्रवृत्तौ अचि इत्यस्यानुवृत्तिर्व्यथा इति। तत्समाधातुं मूले कथयति- **नाज्झलौ इत्यादि।** अर्थात् नाज्झलौ इति सूत्रेण सावर्ण्यनिषेधो वर्णसमाम्नायिकानामेव, न तु दीर्घप्लुतादीनाम्, अतः दीर्घ ईकारशकारयोः सावर्ण्यात् कुमारी शेते इत्यादौ सावर्ण्यसम्भवात् अच् परत्वे दीर्घादिवारणाय अचि इत्यस्यानुवृत्तिः कर्त्तव्येति। किञ्च नाज्झलौ इति सूत्रप्रवृत्तिदशायां ग्रहणकशास्त्रस्य **अणुदित्सवर्णस्य चाप्रत्ययः** इत्यस्य अभावात् न दीर्घादीनां ग्रहणम्। अतः सावर्ण्यनिषेधाभावेन तद्वारणाय अचि इत्यनुवृत्तिः कर्त्तव्येति।

एवमेव सूत्रे अकः इति ग्रहणाभावे हरे ए इत्यत्रापि सवर्णदीर्घः स्यात् तद्वारणारय अक्ग्रहणमावश्यकम्।

**अकोऽकि इत्येव सुवचम्** ''अकः सवर्णे दीर्घः'' इत्यस्य सूत्रस्य स्थाने अकोऽकि दीर्घः ''इति कथनेनैव दीर्घे सिद्धे तदेव वक्तव्यम्। ''अकः अकि'' इत्यनयोः यथासंख्यमन्वयः। सवर्णग्रहणं न कर्त्तव्यमिति लाघवम्, अच् इत्यनुवृत्तिरपि न कर्त्तव्येति भट्टोजिदीक्षितस्य तात्पर्यमिति।

**ॠति सवर्णे......**। वार्तिकमिदम्। **अकः सवर्णे दीर्घ** इति सूत्रात् अनुवृत्तेन सवर्णपदेन सह योजयित्वा

वार्तिकम् इदं पठितम्। अक इत्यनुवर्तते। **एकः पूर्वपरयोः** इत्यस्य अधिकार। ऋति इति सप्तम्यन्तं पदं तेन ऋति परे इत्यर्थ। ॠ इति विधेयं पदम्, वा इति विकल्पबोधकम्, इत्थम् अकः सवर्णे ऋति परे पूर्वपरयोः स्थाने विकल्पेन ॠ इत्येकादेशः स्यादिति वार्तिकार्थः। होतॄकारः, होतृकार इति।

**लृति सवर्णे......।** इदमपि वार्तिकम्। सवर्णे लृकारे परे पूर्वपरयोः स्थाने विकल्पेन ॡ इत्येकादेशो भवति। होत्लृकारः पक्षे ऋकारस्य लृकारस्य च स्थाने **अकः सवर्णे दीर्घ** इति सूत्रेण सवर्णदीर्घे ऋकार एव तेन होतृकार इत्येव।

''ऋति ॠ वा लृति ॡ वा'' इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्, मूलोक्तस्य अस्यायम्भावो यत् **ऋति सवर्णे ॠ वा लृति ॡ वा** इत्युभयोः वार्तिकयोः विधेयात्मके प्रत्येकं द्विमात्रिकम्। अर्थात् ॠ वर्णे रेफद्वयम्। व्यञ्जनवर्णः अर्धमात्रात्मकः, द्वौ अर्धमात्रात्मकौ वर्णौ संयोज्य एकमात्रात्मको भवति, ततो अज्भक्ति (अचवर्णात्मक) ॠ वर्णस्य एकमात्रा। इत्थम् रेफद्वयस्य ह्रस्वः अकारश्चेति द्विमात्रिकः आदेशो भवतीति। द्वितीयस्य मध्ये द्वौ लकारौ शेषं प्राग्वत्। अर्थात् द्वितीये वार्तिके विधेयो ॡ वर्णः, तत्रापि लकारद्वयं शेषं प्राग्वत्। इत्थम् होतॄकार, होतृकार। होत्लृकार होतृकार इति रूपं भवति।

इह उभयत्रापि पाक्षिकः प्रकृतिभावोऽपि अग्रे वक्ष्यते। तत्र होतृ ऋकारः, होतृ लृकार इत्येवं रूपं भवति।

**दैत्यारिः**– दैत्य+अरि इत्यत्र **अकः सवर्णे दीर्घः** इति सूत्रेण पूर्वपरयोः स्थाने दीर्घे वर्णसम्मेलने **दैत्यारि** इति रूपं सिद्ध्यति।

**श्रीशः**– श्री+ईश इत्यत्र **इको यणचि** इति सूत्रेण प्राप्तं यणं प्रबाध्य **अकः सवर्णे दीर्घ** इति सूत्रेण सवर्णदीर्घे श्रीशः इति रूपं सिद्ध्यति।

**विष्णूदयः**= विष्णु+उदय इत्यत्र **अकः सवर्णेदीर्घः** इति सूत्रेण सवर्णदीर्घे विष्णूदय इति।

**होतॄकार, होतृकारः**= होतृ+ऋकारः इत्यत्र **अकः सवर्णेदीर्घः** इति सूत्रेण नित्यं दीर्घे प्राप्ते तं प्रबाध्य **ऋति सवर्णे ॠ वा** इति वार्तिकेन विकल्पेन पूर्वपरयोः स्थाने ॠकारादेशे वर्णसम्मेलने होतॄकार इति विकल्पपक्षे **अकः सवर्णे दीर्घ** इति सूत्रेण सवर्णदीर्घे होतृकार इति रूपं सिद्ध्यति।

**होत्लृकार= होतृकारः** होतृ+लृकार इति स्थिते **लृति ल वा** इति वार्तिकेन विकल्पेन लृकारादेशे वर्णसम्मेलने होत्लृकारः, विकल्पपक्षे **अकः सवर्णे दीर्घः** इति सूत्रेण सावर्ण्यात् सवर्णदीर्घे ऋकारादेशे होतृकार इति रूपं भवति।

**एङः पदान्तादति ६.१.१०९ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।**

**संस्कृतव्याख्या**– एङः पदान्तात् अति इति सूत्रस्य पदविभागः। एङ इति पञ्चम्यन्तं पदम्, पदान्तात् इति पञ्चम्यन्तम्, अति इति सप्तम्यन्तं पदम्। अत्र **अमि पूर्वः** इत्यतः पूर्व इत्यस्य अनुवृत्तिर्भवति। **एकः पूर्वपरयोः** इत्यस्य अधिकारः। इत्थं पदान्तात् एङात् ह्रस्वे अकारे परे पूर्वपरयोः स्थाने पूर्वरूप एकादेशो भवतीति सूत्रार्थः सङ्गच्छते। तद्यथा– हरे अव इत्यत्र अयादेशं बाधित्वा पूर्वरूपमेकारः। ''विष्णो अव'' इत्यत्र अवादेशं बाधित्वा पूर्वरूपमोकारः। **हरेऽव। विष्णोऽव** इति।

**हरेऽव**– हरे अव इत्यवस्थायाम् **एचोऽयवायावः** इति सूत्रेण अयादेशे प्राप्ते तं प्रबाध्य **एङः पदान्तादति** इति सूत्रेण पूर्वरूपे वर्णसम्मेलने हरेऽव इति रूपं सिद्ध्यति।

**विष्णोऽव** विष्णो अव इत्यत्र **एचोऽयवायाव** इति सूत्रेण अवादेशे प्राप्ते तं प्रबाध्य ''**एङः पदान्तादति**'' इति सूत्रेण पूर्वरूपे वर्णसम्मेलने विष्णोऽव इति रूपं सिद्धम्।

**सर्वत्र विभाषा गो ६.१.१२२ लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते। गो अग्रम्, गोऽग्रम्। एङन्तस्य किम्? चित्रग्वग्रम्। पदान्ते किम्? गोः।**

**संस्कृतव्याख्या-** सूत्रे पदत्रयं वर्तते। सर्वत्रेति त्रलप्रत्ययान्तम् अव्ययम्, विभाषा इति प्रथमान्तं गोः इति षष्ठ्यन्तं पदम्। अत्र **एङः पदान्तादति** इत्यतः पदान्तात् इत्यनुवर्त्य तस्य सप्तम्यां विपरिणामः क्रियते तेन पदान्ते इति लभ्यते। एङः अति इत्यनयोरप्यनुवृत्तिः **प्रकृत्यान्तः पादम्** इत्यतः प्रकृत्येत्यनुवर्तते। पूर्वसूत्रात् यजुषि इति क्रयप्राप्तस्यार्थस्य निवृत्तिः तत्सूचनाय सूत्रे सर्वत्र इत्युपात्तम्, एतेन लोके वेदे च इत्यर्थो लभ्यते। इत्थं सूत्रस्यार्थो भवति यत्- लोके वेदे च पदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य विकल्पेन प्रकृतिभावो भवति ह्रस्वे अकारे परे इति। तद्यथा- **गो** अग्रम्, **गोऽग्रम्** इति। सूत्रे एङन्तस्य ग्रहणं कथमिति चेत् कथयति- एङन्तस्य ग्रहणाभावे, **चित्रा गावो यस्य** इत्यर्थे समासे विभक्तिलोपे **चित्रगो** इत्यवस्थायां **गोस्त्रियो** इत्यादिना ह्रस्वे **चित्रगु** इति जाते ततः परे अग्रम् इति शब्दे सति चित्रगु अग्रम् इत्यवस्थायाम् **एकदेशविकृतमनन्यवत्** इति परिभाषया गो शब्दत्वेनैव ग्रहणात् प्रकृतिभावः स्यात् तद्वारणाय एङ्ग्रहणमावश्यकम् इति। एवमेव पदान्ते इति कथनेन **गोः** इत्यत्र **गो अस्** इत्यवस्थायाम् अपदान्तत्वात् प्रकृतिभावो न भवति इति।

**गो अग्रम्, गोऽग्रम्-** गो+अग्रम् इत्यत्र **एचोऽयवायाव** इति सूत्रेण अवादेशे प्राप्ते, तं प्रबाध्य **एङः पदान्तादति** इति सूत्रेण नित्यं पूर्वरूपे प्राप्ते तमपि प्रबाध्य **सर्वत्र विभाषा गो** इति सूत्रेण विकल्पेन प्रकृतिभावे गो अग्रम्, विकल्पपक्षे पूर्वरूपे कृते गोऽग्रम् इति रूपं सिद्ध्यति।

**अवङ् स्फोटायनस्य ६.१.१२३ अति इति निवृत्तम्। अचि परे पदान्ते गोरवङ् वा स्यात्। गवाग्रम्। पदान्ते किम् गवि। व्यवस्थितविभाषया गवाक्षः।**

**संस्कृतव्याख्या-** अत्र पदद्वयं वर्तते। अवङ् इति प्रथमान्तं विधेयं पदम्। स्फोटायनस्य इति षष्ठ्यन्तम् आचार्यस्य नामवाचकः (तस्य मते इतिशेषः। अत्र एङ्ः पदान्तादति इत्यस्मात् पदान्तात् इत्यस्य अनुवृत्तिस्तस्य षष्ठ्यन्ततया विभक्तिविपरिणामः। पूर्वतः अनुवृत्तस्य अति इत्यस्य निवृत्तिः। अवङ् इत्यस्य ङित्वात् अन्त्यस्य स्थाने विधीयते। इत्थं पदान्ते एङ्न्तात् गोशब्दात् अचि परे विकल्पेन अवङादेशो भवतीति सूत्रार्थः सङ्गच्छते। गवाग्रम् इति। गो अग्रम् इति स्थिते गकारादोकारस्यावङ्। सूत्रे पदान्ते इति कथनेन सप्तम्येकवचने गोशब्दात् ङि विभक्तौ, अनुबन्धलोपे गो इ इत्यवस्थायाम्, अपदान्तत्वात् न अवङादेशः अवादेशे च गवि इति रूपं निष्पद्यते।

**व्यवस्थितविभाषया गवाक्ष** इति। अस्यायम्भावः क्वचित् भवति इत्यंश एव प्रवर्तते, क्वचितु न भवतीत्यंश एव क्वचित्तु उभयम् इत्येवं प्रकारेण लक्ष्यानुसारं प्रवृत्ता व्यवस्था **व्यवस्थितविभाषा** इत्युच्यते। इयं विभाषा ''**सर्वत्रविभाषा गोः**'' इत्यत्राश्रीयते। तेन **गवां किरणानाम्** अक्षीव इति विग्रहे गो अक्ष इत्यवस्थायाम् अवङादेशे गवाक्षः इति भवति।

**गवाग्रम्-** गो अग्रम् इत्यत्र **एङः पदान्तादति** इति सूत्रेण पूर्वरूपे प्राप्ते तं प्रबाध्य **सर्वत्र विभाषा** गोः इति सूत्रेण प्रकृतिभावे प्राप्ते, तमपि प्रबाध्य **अवङ् स्फोटायनस्य** इति सूत्रेण विकल्पेन ओकारस्य स्थाने अवङादेशेऽनुबन्धलोपे गव अग्रम् इति जाते, **अकः सवर्णे दीर्घः** इति सूत्रेण सवर्णदीर्घे **गवाग्रम्** इति रूपं भवति।

**गवाक्ष-** गवाम् अक्षि इव इत्यर्थे समासे, समासान्तअच्प्रत्यये गो अक्ष इति जाते व्यवस्थितविभाषया **सर्वत्र विभाषा गोः** इत्यस्य अप्राप्तौ **अवङ् स्फोटायनस्य** इति सूत्रेण अवङादेशेऽनुबन्धलोपे गव अक्ष इति जाते **अकः सवर्णे दीर्घः** इति सूत्रेण सवर्णदीर्घे गवाक्ष इति रूपं भवति।

**इन्द्रे च ६.२.१२४ गोरवङ् स्यादिन्द्रे। गवेन्द्रः।**

**संस्कृतव्याख्या**– पूर्वसूत्रबाधकमिदं सूत्रम्। अनेन नित्यम् अवङादेशः। अत्र **सर्वत्र विभाषा गोः** इत्यस्मात् गोः इत्यस्य, **अवङ् स्फोटायनस्य** इत्यतः अवङ् इत्यस्यानुवृत्तिर्भवति। एतेन इन्द्रशब्दे परे गो शब्दस्य ओकारस्य अवङादेशो भवतीति सूत्रार्थः सङ्गच्छते। तद्यथा **गवेन्द्रः** गो+इन्द्र इत्यत्र **अवङ् स्फोटायनस्य** इति सूत्रेण विकल्पेन अवङादेशे प्राप्ते तं प्रबाध्य इन्द्रे च इति सूत्रेण नित्ये अवङादेशेऽनुबन्धलोपे गव इन्द्र इत्यवस्थायाम् **आद्गुणः** इति सूत्रेण गुणे वर्णसम्मेलने च गवेन्द्र इति।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितम् अच्सन्धिप्रकरणं सम्पूर्णम्**

----

# अथ प्रकृतिभावसन्धिप्रकरणम्

**प्लुतप्रगृह्या अचि नित्यम् ६.१.१२५ प्लुताः प्रगृह्याश्च वक्ष्यन्ते, तेऽचि परे नित्यं प्रकृत्या स्युः। एहि कृष्ण ३ अत्र गौश्चरति। हरी एतौ। नित्यम् इति किम्? हरी एतौ इत्यादावयमेव प्रकृतिभावो यथा स्यात्, इकोऽसवर्णे ( सू. ९१ ) इति ह्रस्व समुच्चितो मा भूत्।**

**संस्कृतव्याख्या**– प्रकृतिभावविधायकम् इदं सूत्रम्। अत्र पदत्रयम्। प्लुताश्च प्रगृह्याश्च इति प्लुतप्रगृह्या इति प्रथमान्तं पदम्, अचि इति सप्तम्यन्तं, नित्यमिति प्रथमान्तं पदम्। **प्रकृत्यान्तः पादम्** इत्यतः प्रकृत्या इत्यनुवर्तते। एतेन अचि परे प्लुतसंज्ञकाः प्रगृह्यसंज्ञकाश्च प्रकृत्या स्युः अर्थात् स्वभावेनावस्थिताः स्युः, यथाप्रयुक्तं तथैव साधवो भवन्तीति तात्पर्यम्। तद्यथा– आगच्छ कृष्ण ३ अत्र गौश्चरति। **हरी एतौ** इति।

सूत्रे नित्यग्रहणं किमर्थम् इति जिज्ञासायां कथयति मूले **हरी एतौ इत्यादावयमेवेत्यादिरिति।** अस्यायम्भावः नित्यग्रहणेन हरी एतौ इत्यादौ **प्लुतप्रगृह्या अचि** नित्यम् इति सूत्रेण हरी एतौ इत्येव प्रकृतिभावो भवति, **इकोऽसवर्णे** इत्यादिसूत्रविहित ह्रस्व समुचित प्रकृतिभावो न भवतीति बोधनाय नित्यग्रहणमिति।

नित्यग्रहणाभावे परत्वात् शाकल ह्रस्वसहितः प्रकृति भावः प्रसज्येत। नित्यग्रहणे कृते तु तत्सामर्थ्यादेव परमपि शाकलं ह्रस्वसमुच्चितप्रकृतिभावं प्रबाध्य प्लुतप्रगृह्या इत्यादि सूत्रं केवलः प्रकृतिभावो बाधत इत्यर्थः।

**आगच्छ कृष्ण ३ अत्र गौश्चरति** इत्यत्र **दूराद्धूते च** इति सूत्रेण णकारात्परस्य अकारस्य प्लुतसंज्ञायां, **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे ''**कृष्ण ३ अत्र**'' इति रूपं सिद्ध्यति।

**हरी एतौ** हरी एतौ इत्यत्र **ईदूदेद्विवचनं प्रगृह्यम्** इति सूत्रेण द्विवचनस्य हरी इत्यस्य प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे हरी एतौ इति रूपं भवति।

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६.१.१२७ पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा। अत्र ह्रस्व विधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनु कर्षणार्थश्चकारो न कर्त्तव्य इति भाष्ये स्थितम्। चक्रि अत्र चक्र्यत्र। पदान्ता इति किम्- गौर्यौ।**

**न समासे ( वा. ३६८४ ) वाप्यश्वः।**

**सिति च ( वा. ३६८४ ) पार्श्वम्।**

**संस्कृतव्याख्या- इकोऽ**........। इकः असवर्णे शाकल्यस्य ह्रस्वश्च इति सूत्रस्य पदविभागः।

इकः इति षष्ठ्यन्तं पदम्। **एङः पदान्तादति** इति सूत्रात् पदान्तात् इत्यनुवर्तते, तस्य षष्ठ्यन्ततया विपरिणामः क्रियते: एतेन पदान्तस्य इकः इत्यर्थो भवति। **इको यणचि** इत्यस्मात् अचि इत्यनुवर्तते। ततः पदान्तस्य इकः स्थाने ह्रस्वो भवति असवर्णेऽचि परे इति सूत्रार्थः। सूत्रे चकारात् ''**प्रकृत्यान्तः पादम्**'' इत्यतः प्रकृत्या इत्यनुकृष्यते ह्रस्वस्य च तत्र सम्बन्धो भवति। ततश्च उक्तो ह्रस्वः प्रकृत्या भवति इति वाक्यान्तरं संपद्यते। तत्फलितार्थमेव मूले कथयति **पदान्ता इक इत्यादि।** सूत्रे चकारग्रहणाभावे पदान्तस्य इकः असवर्णेऽचि ह्रस्वः स्यादित्येवार्थो लभ्येत ततश्च ह्रस्वस्य प्रकृतिभावो न भविष्यति। अस्यामवस्थायाम् चक्री अत्र इति स्थिते ह्रस्वे सत्यपि यणादेशे चक्र्यत्र इत्येव स्यात्, **चक्रि अत्र** इति रूपं न स्यात्, इष्यते च तत् तस्मात् चकारग्रहणमिति। अत्र भाष्यकारमतमुपस्थापयन् कथयति मूले **अत्र ह्रस्वविधिरित्यादि।** अत्रेदं तात्पर्यं यत् अस्मिन्सूत्रे चकारो न कर्त्तव्यः, प्रकृत्या इत्यस्याप्यनुकर्षणं व्यर्थम्। ह्रस्वविधानसामर्थ्यादेव यण् न स्यात्, अन्यथा यण् इत्येव कर्त्तव्ये ह्रस्वविधानेन न किमपि फलम्, कृतञ्च ह्रस्वविधानं तत्सामर्थ्यादेव यण् न भविष्यति। इत्थं प्रकृतिभावपक्षे **चक्रि अत्र** इति रूपं तदभावपक्षे यणि चक्र्यत्र इति। सूत्रे पदान्तग्रहणेन गौरी औ इत्यादौ न प्रकृतिभावः अपदान्तत्वात्।

**चक्रि अत्र, चक्र्यत्र** चक्री अत्र इत्यत्यवस्थायाम् **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** इति सूत्रेण विकल्पेन ह्रस्वसमुच्चितप्रकृतिभावे चक्रि अत्र, विकल्पपक्षे इको यणचि इति सूत्रेण यणि कृते वर्णसम्मेलने चक्र्यत्र इति रूपं भवति।

**न समासे**- वार्तिकमेतत्। समासे **इकोऽसवर्णे शाकल्य ह्रस्वश्च** इति सूत्रेण विधीयमानो ह्रस्वसमुचितप्रकृतिभावो न भवतीति तात्पर्यम्। अत एव ''वाप्याम् अश्व'' इति विग्रहे समासे वापी अश्व इत्यवस्थायाम् असवर्णेऽचि सत्यपि न ह्रस्वसमुच्चितः प्रकृतिभावोऽपितु यणि एव कृते **वाप्यश्व** इति रूपं भवति।

**सिति च.....।** इदमपि वार्तिकम्। सकार इत् यस्य स सित् तस्मिन् परेऽपि उक्तो ह्रस्वसमुच्चितप्रकृतिभावो न भवतीति। यथा ''पर्शु णस्'' इति तद्धिते प्रत्यये परे अनुबन्धलोपे पर्शु अ इत्यवस्थायाम् अ इत्यस्य सित्वात् न प्रकृतिभावः, आदिवृद्धौ यणादेशे वर्णसम्मेलने च पार्श्वम् इति।

**वाप्यश्वः**- ''वाप्याम् अश्व'' इति विग्रहे समासे विभक्तिलोपे ''वापी अश्व'' इति जाते **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** इति सूत्रेण ह्रस्वसमुच्चितप्रकृतिभावे प्राप्ते **न समासे** इति वार्तिकेन निषेधे **इको यणचि** इति सूत्रेण निषेधे **वाप्पश्व** इति रूपं सिद्ध्यति।

**पार्श्वम्**- पर्शु अ इति जाते **इकोऽसवर्णे** इत्यादिसूत्रेण प्रकृतिभावे प्राप्ते **सिति च** इति वार्तिकेन निषेधे तद्धितान्तत्वाद् आदिवृद्धिः, यणि च पार्श्वम् इति रूपं भवति।

**ऋत्यकः ६.१.१२८ ऋते परेऽकः प्राग्वत्। ब्रह्म ऋषि, ब्रह्मर्षिः। पदान्ता इत्येव। आर्च्छत्। समासेऽप्ययं प्रतिभावः सप्त ऋषीणाम्- सप्तर्षीणाम्।**

**संस्कृतव्याख्या**- ऋति अक इति सूत्रस्य पदविभागः। ऋति इत्यस्य सप्तम्यन्तत्वात् ऋकारे परे इत्यर्थ। **इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च** इति सूत्रात् ह्रस्व इत्यस्य शाकल्यस्य इत्यस्य चानुवृत्तिर्भवति। एङ्ःपदान्तादति इत्यतः पदान्तात् इत्यनुवर्त्य प्रथमान्ततया विपरिणामः। एतेन ह्रस्वे ऋकारे परे पदान्ते विद्यमानस्य

अको विकल्पेन ह्रस्वसमुचितप्रकृतिभावो भवतीत्यर्थः सम्पद्यते। तद्यथा- प्रकृतिभावे **ब्रह्म ऋषि,** तदभावे गुणे **ब्रह्मर्षि** इति। इदमपि सूत्रं पदान्त एव विकल्पेन प्रकृतिभावं करोति अन्यथा आ ऋच्छत् इत्यत्रापि अकः परे ऋकारस्य सत्वात् विकल्पेन प्रकृतिभावः स्यात् तन्माभूत् तदर्थं मूले **पदान्ता इत्येवोक्तम्,** तेन आ ऋच्छत् इत्यत्र **आटश्च** इति सूत्रेण वृद्धौ आर्च्छत् इति रूपं भवति।

इदं सूत्रं समासेऽपि प्रवर्तते तद्बोधनाय मूले लिखति- **समासेऽप्ययं प्रकृतिभावः सप्त ऋषीणाम्, सप्तर्षीणाम्।** अत्र **सप्त च ते ऋषयः** इति कर्मधारयसमासे विभक्तिलोपे तेषामित्यर्थे षष्ठी बहुवचने **सप्त ऋषीणाम्** इत्यवस्थायाम् **ऋत्यकः** इति सूत्रेण विकल्पेन प्रकृतिभावे **सप्त ऋषीणाम्,** विकल्पपक्षे **आद्गुणः** इति सूत्रेण गुणे **सप्तर्षीणाम्** इति रूपं भवति।

**वाक्यस्य टेः प्लुत उदात्तः ८.२.८२ इत्यधिकृत्य**

**संस्कृतव्याख्या- प्लुतप्रगृह्या अचि नित्यम् इति** सूत्रान्तर्गत प्लुत-प्रगृह्यसंज्ञा काङ्क्षितत्वात् प्रथमोपात्तप्लुतविधानमारभयते- **वाक्य टेरित्यादि सूत्रेण।** इदमधिकारसूत्रम्। अधिकारो नाम **स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थबोधकत्वम्।** अर्थात् स्वपठितादुत्तरसूत्रे यस्यार्थो गच्छति तत्सूत्रमधिकारसूत्रम्। अत्र पदस्येत्यधिकृतम् तेन वाक्यस्य टेः पदावयवस्य प्लुतो भवति, स च उदात्त इति सूत्रार्थः। इतः प्लुतविषय आरभ्यत इति तात्पर्यम्।

**प्रत्यभिवादेऽशूद्रे ८.२.८३ अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात्, स चोदात्तः। अभिवादये देवदत्तोऽहम्। भो आयुष्मानेधि देवदत्त ३।**

**स्त्रियां न ( वा ४८६४ ) अभिवादये गार्ग्यहम्। भो आयुष्मती भव गार्गि। नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते। नेह- आयुष्मानेधि।**

**भो राजन्यविशां वेति वाच्यम् ( वा. ४८६५ ) आयुष्मानोधि भोः ३। आयुष्मानेधीन्द्रवर्म३न्। आयुष्मानेधीन्द्रपालित ३।**

**संस्कृतव्याख्या**- प्रत्यभि.......। विधिसूत्रमिदम्। अत्र पदद्वयम्। प्रत्यभिवादे अशूद्रे इति द्वयमपि सप्तम्यन्तं पदम्। वाक्यस्य टेः प्लुत उदात्त इत्यस्य अधिकारः। अशूद्र इति पदविभागः। न शूद्रः अशूद्रः द्विजातिः तद्विषयः, प्रत्यभिवादो नाम विधिवद् अभिवाद्यमानं प्रति विधिवद्आशीर्वचनदानम्। एतेन अशूद्रे प्रत्यभिवादविषये वाक्यस्य टेः प्लुतः स च उदात्त इति सूत्रस्यार्थो भवति।

शूद्रविषय एव प्लुतप्रतिषेधो न भवति, किन्तु शूद्रवत् स्त्रीविषये असूयकविषयेऽपि प्लुतप्रतिषेधो भवतीति वक्तव्यम्। स्त्रीविषये वार्तिकं विभज्य अर्थतः संगृह्णाति मूले **स्त्रियाम् इति।** स्त्रीविषयके प्रत्यभिवादवाक्ये टेः प्लुतः च उदात्तः इति विधिर्न भवतीति तात्पर्यम्। तत्र **''अभिवादये गार्ग्यहम्''** इति अभिवादवाक्यम्, **''आयुष्मती भव गार्गीति''** प्रत्यभिवादवाक्यम्, अत्र प्लुतो न। गाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुतस्य इष्टत्वात् आयुष्मानेधीत्यत्र न भवति।

**भो राजन्य......।** भो शब्दस्य राजन्यवैश्यवाचकनाम्नोश्च टेः प्लुतो विकल्पेन वक्तव्यमिति वार्तिकार्थः। **राजन्ये यथा**- आयुष्मानेधि इन्द्रवर्म ३न्, इन्द्रवर्मन इति द्वयमपि। एवमेव **वैश्ये यथा**- आयुष्मानेधि इन्द्रपालित३, इन्द्रपालित इति द्वयमपि।

**दूराद्धूते च ८.२.८४ दूरात् सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्। सक्तून् पिब देवदत्त ३।**

**संस्कृतव्याख्या**– दूरात आहूते च इति सूत्रस्य पदच्छेदः। यत्र स्थितस्य प्रयत्नोच्चारितं शब्दं बोध्यमानो न शृणोति, किन्तु अधिकं प्रयत्नम् अपेक्षते तद् दूरम्, हूतम्–आह्वानम् सम्बोधनम् इति विवक्षितम्। अत्र वाक्यस्य टेः प्लुतः उदात्तः इत्यस्याधिकारः। इत्थं– दूरात् सम्बोधने प्रयुक्तस्य वाक्यस्य टेः विकल्पेन प्लुतः स च उदात्तो भवती सूत्रार्थः। यथा सक्तून् पिबदेवदत्त३ इत्यत्र सम्बोधनवाक्यम् देवदत्त इति तस्य टेः अकारस्य विकल्पेन प्लुतत्वे देवदत्त३ इति।

**हैहेप्रयोगे हैहयोः ८.२.८५ एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र है हयोरेव प्लुतः स्यात्। है ३ राम। राम है ३।**

**संस्कृतव्याख्या**– नियमार्थमिदं सूत्रम्। तथाहि पूर्वसूत्रेण **गुरोरनृतः** इति सूत्रेणैव सम्बोधने टेः प्लुतस्य च उदात्तत्वे सिद्धे पुनरस्य सूत्रस्य विधानेन नियमयति मूले– **है** हे इत्यव्यये सम्बोधनद्योतके है हे इत्यनयोरेव प्लुतः। पाहि है ३ राम, पाहि हे३ रामेत्यत्र हैहयोरेव प्लुतः, न तु गुरोरनृत इत्ययस्यापि।

**गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८.२.८६ दूरात्धूते यद् वाक्यं तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद ३त्त। देवदत्त ३। गुरोः किम्। वकारात्परस्याकारस्य मा भूत्। अनृत किम्। कृष्ण ३। एकैकग्रहणं पर्यायार्थम्। इह प्राचाम् इति योगो विभज्यते। तेन सर्वः प्लुतो विकल्प्यते।**

**संस्कृतव्याख्या**– गुरोः अनृते अनन्त्यस्य अपि एकैकस्य प्राचाम् इति सूत्रस्य पदविभागः। अनृतोः न ऋत अनृतः तस्य, अन्ते भव अन्त्यः, न अन्त्य अनन्त्यः। एकम् एकम् इति वीप्सायां द्वित्वम्। अत्र दूराद्धूते इत्यनुवर्तते। वाक्यस्य टेः प्लुत उदात्त इत्यस्याधिकारः। इत्थं दूरात् सम्बोधने यद्वाक्यं तत्र सम्बोध्यमानवाचकं यत् पदं तदवयवस्य ऋकारभिन्नस्य अन्त्यभिन्नस्य च गुरोः प्लुतः स्यात्। अन्त्यस्य तु टेः गुरोः अगुरोश्च प्लुतः स्यादिति सूत्रार्थः। एतेन दे३ वदत्त देवद ३त्त। देवदत्त ३ इति रूपत्रयमपि। सूत्रे गुरोः इति कथनेन देवदत्त इत्यत्र वकारात्परस्य अकारस्य प्लुतत्वं न भवति। ऋत् भिन्नस्य अनृत इति कथनेन कृष्ण इत्यत्र न भवति। अत्र एकैकग्रहणं पर्यायार्थं वर्तते। अन्यथा सर्वेषां गुरूणां युगपत् प्लुतः स्यात् तन्माभूत् तदर्थम् एकैकग्रहणं पर्यार्यार्थं बोध्यम्। इह प्राचाम् इति योगविभागेन प्राचां मते प्लुतः स्यात् नान्यमते इति फलितार्थः तेन सर्वः प्लुतो विकल्प्यत इति।

**अप्लुतवदुपस्थिते ६.२.१२९ उपस्थितोऽनार्ष इति शब्दः, तस्मिन् परे प्लुतोऽप्लुतवद्भवति अप्लुतकार्यं प्रकृतिभावं ( यणादिकं ) न करोति सुश्लोक ३ इति सुश्लोकेति। वत् किम्। अप्लुत इत्युक्तेऽप्लुत एव विधीयेत, प्लुतश्च निषिध्येत। तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी ३ इति।**

**संस्कृतव्याख्या**– प्लुतवद् उपस्थिते इति सूत्रस्य पदच्छेदः। अप्लुतेन तुल्यम् इत्यर्थे वतिप्रत्ययान्तम् अप्लुवत् इत्यव्ययम्, उपस्थितशब्दोऽत्र अनार्ष (लौकिक) इत्यर्थवाचकः तस्मिन्, उपस्थिते इति सप्तम्यन्तं पदम्, लौकिके इत्यर्थः। प्लुत इति अध्याहार्यम् एतेन अवैदिक (लौकिके) इति शब्दे परे प्लुतः

अप्लुतवद्भवतीति सूत्रार्थः। अप्लुतवद्भावस्य प्रयोजनं कथयति मूले– **प्लुतकार्यं प्रकृतिभावं यणादिकं वा कार्यं न करोतीति तात्पर्यम्।** तेन **सुश्लोक ३** इति स्थिते अप्लुतवद्भावेन प्रकृतिभवाभावे **सति आद् गुणः** इति सूत्रेण गुणे सुश्लोकेति रूपं भवति।

सूत्रे वत्ग्रहणेन प्लुतस्य स्थाने अप्लुत एव विधीयेत। अत प्लुत एव निवर्तेत ततश्च अग्नी ३ इत्यत्र प्रगृह्यईकारः त्रिमात्रो न श्रूयेत। वत्करणे तु प्लुतकार्यस्य प्रकृतिभावस्यैव निवृत्तिर्भवति, न तु प्लुतस्यापि तेन नोक्तदोष इति।

**ई ३ चाक्रवर्मणस्य ६.१.१३० ई ३कारः प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनुहि ३ इति-चिनुहीति। चिनुहि ३ इदम्-चिनुहीदम्। उभयत्रविभाषेयम्।**

**संस्कृतव्याख्या**– सूत्रे ई ३ इति प्लुतस्य लुप्तप्रथमाविभक्तिको निर्देश। अत्र अप्लुतवत् इत्यस्य, **इको यणचि** इत्यतश्च अचि इत्यस्य चानुवृत्तिर्भवति। प्लुतशब्दस्य अध्याहारः। एतेन प्लुत ई ३ इति विकल्पेन अप्लुवद् भवति अचि परे चाक्रवर्मणआचार्यस्य मते इति सूत्रार्थः। **चिनु हीति, चिनु हि ३ इति** रूपद्वयमपि भवति।

उभयत्र विभाषेयम्। अस्यायम्भावः इदं सूत्रं प्राप्ताप्राप्तविभाषाबोधकम्। इति शब्दे परे नित्यतया प्लुतप्राप्तौ, चिनु हि इदम् इत्यत्र प्लुतस्य अप्राप्तौ अप्यस्य प्रवृत्तेः प्राप्तेऽप्राप्ते विकल्पविधानात् प्राप्ताप्राप्तविभाषेति।

तेन चिनु हि ३ इदम्, चिनु हीदम्, उभयमपि रूपं सङ्गच्छते।

**ईदूदेद् द्विवचनं प्रगृह्यम् १.१.११ इदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू। पचेते इमौ।**

**मणीवोष्ट्रस्य लम्बेते प्रिया वत्सतरौ मम।**

**इत्यत्र त्विवार्थे वा शब्दो वा बोध्यः।**

**संस्कृतव्याख्या**– प्रगृह्यसंज्ञाविधायकं सूत्रमिदम्। ईदूदेत् द्विवचनं प्रगृह्यम् इति पदत्रयात्मकं सूत्रम्। तत्र ईच्च ऊच्च, एच्च इति समाहारद्वन्द्वघटितं प्रथमैकवचनान्तम्, द्विवचनम् इति प्रथमान्तं विशेष्यं पदं, ईदूदेत् इति विशेषणम्, विशेषणत्वात्तदन्तविधिः। द्विवचनम् इत्यत्र न तदन्तविधिः **संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति** परिभाषया निषेधात्। इत्थम्– दीर्घेकारान्तम्, दीर्घोकारान्तम् एकारान्तं च द्विवचनं यत्पदं तस्य प्रगृह्यसंज्ञा भवतीति सूत्रार्थः। प्रगृह्यत्वे सति **प्लुतप्रगृह्या अचि नित्यम्** इत्यनेन प्रकृतिभावे यणादिकं न भवतीति। तद्यथा– **हरी एतौ** इत्यत्र न यण्। एवमेव **विष्णू इमौ, गङ्गे अमू, पचेते इमौ,** इत्यादीनि रूपाणि भवन्ति।

अत्रेदमाशङ्कते यत् ''**मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम**'' इति भारतश्लोके मणी इवेति ईकारस्य प्रगृह्यत्वे सति प्रकृतिभावे दीर्घो न स्यात् कथं मणीव प्रयोग इति चेदुच्यत मूले– **मणीवोष्ट्रस्येत्यादिः।** अस्यायम्भावः मणीव इत्यत्र इवार्थक वा इति शब्दो न तु इव इति तस्मान्न प्रकृतिभावावसरः। तदुक्तम्– ''**व वा यथा तथैवैवं साम्ये**'' इत्यमरः।

**हरी एतौ**– हरी+ एतौ इत्यत्र **ईदूदेद्द्विवचनं प्रगृह्यम्** इति सूत्रेण हरी इत्यस्य प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे **हरी एतौ** इति रूपं सिद्ध्यति।

**विष्णू इमौ**– विष्णू इमौ इत्यत्र **ईदूदेद्विवचनं प्रगृह्यम्** इति सूत्रेण विष्णू इत्यस्य प्रगृह्यसंज्ञायां, **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे विष्णू इमौ इति।

**गङ्गे अमू**– गङ्गे अमू इत्यत्र **एचोऽयवायाव** इति सूत्रेण अयादेशे प्राप्ते तं प्रबाध्य **ईदूदेद्विवचनं प्रगृह्यम्** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे गङ्गे अमू इति रूपं भवति।

**पचेते इमौ**– पचेते इमौ इत्यत्र अयादेशं बाधित्वा ईदूदेद्विवचनं प्रगृह्यम् इति सूत्रेण प्रगृह्यसंज्ञायां, **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे ''**पचेते इमौ**'' इति रूपं भवति।

**अदसो मात् १.१.१२० अस्मात्परावीदूतौ प्रगृह्यौ स्तः।**

**अमी ईशाः। रामकृष्णावमू आसाते। मात् किम्? अमुकेऽत्र। असति माद्ग्रहणे एकारोऽप्यनुवर्तेत।**

**संस्कृतव्याख्या**– अत्र पदद्वयम्। अदस इत्यत्रावयवषष्ठी, मात् इति दिग्योग पञ्चम्यन्तं पदम्। अत्र ईदूद् इति प्रगृह्य इति चानुवर्तते। पर शब्दोऽध्याहियते। अत्र एत् इति द्विवचनम् इति न अनुवर्तते। अदसशब्दे मकारात्परस्य एकारस्य असंभवात्। अदश्शब्दे मकारात् परस्य ईकारस्य रूपम् **अमी** इति ऊकारस्य च **अमू** इति रूपम्। इत्थम् अदस् शब्दात् परस्य ईकारान्तस्य ऊकारान्तस्य च प्रगृह्यस्य संज्ञा भवतीति सूत्रार्थः। यथा– **अमी ईशाः,** रामकृष्णावमू **आसाते** इति। सूत्रे मात् ग्रहणेन एकारान्ते अमुके अत्र इत्यादौ प्रगृह्य संज्ञा पूर्वरूपे च कृते आमुकेऽत्र इति रूपं भवति।

**अमी ईशाः**– अमी ईशा इत्यत्र **अदसो मात्** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे अमी ईशा इति रूपं भवति।

**रामकृष्णावमू आसाते**– पुल्लिङ्गे उदाहर्तुम् रामकृष्णौ इत्युपात्तम्। रामकृष्णौ अमू इत्यत्र **अदसो मात्** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे रामकृष्णावमू आसाते इति रूपं भवतीति।

**शे १.१.१३ अयं प्रगृह्यः स्यात्। अस्मै इन्द्राबृहस्पति।**

**संस्कृतव्याख्या**– एकपदात्मकं सूत्रम्। अत्र प्रगृह्यम् इत्यनुवर्तते। छन्दसि इत्यनुवृत्तौ **सुपां सुलुक्पूर्णसवर्णाच्छेयाडाड्याजालः''** इति सूत्रेण वेदे चतुर्थीबहुवचने भ्यस्थाने शे आदशो भवति। सूत्रे तदेव शे इति लुप्तविभक्तिको निर्देशः। इत्थं शे इति सुबादेशस्य प्रगृह्यसंज्ञा स्यादिति। तद्यथा– अस्मे इन्द्राबृहस्पति इत्यवस्थायां प्रगृह्यसंज्ञायां प्रकृतिभावे च रूपं सिद्ध्यति।

**निपात एकाजनाङ् १.१.१४ एकोऽज्निपात आङ्वर्ज प्रगृह्यः स्यात्। इ विस्मये। उ वितर्के। इ इन्द्रः। उ उमेशः। अनाङ् इत्युक्तेरङिदाकारः प्रगृह्य एव। आ एवं नु मन्यसे। आ एवं किल तत्। ङित्तु न प्रगृह्यः। ईषदुष्णम् ओष्णम्। वाक्यस्मरणयोरङित्। अन्यत्र ङित् इति विवेकः।**

**संस्कृतव्याख्या**– प्रगृह्यसंज्ञाविधायकं सूत्रमेतत्। निपात एकाजनाङ् इति सूत्रस्य पदविभागः। एकश्चासौ अच् इति एकाच्, न आङ् इति अनाङ् आङवर्ज्य एकोऽच इति तात्पर्यम्। ''**ईदूदेद्विवचनं प्रगृह्यम्**'' इति सूत्रात् प्रगृह्यम् इत्यनुवर्तते। तस्य च पुल्लिङ्गतया विपरिणामः। एतेन आङं परिवर्ज्य एकोऽच्

निपातः प्रगृह्यसंज्ञको भवतीति सूत्रार्थः सम्पद्यते। ''इ'', इति निपातो विस्मये अर्थे, उ इति वितर्के। एकाच्त्वात् ''इ इन्द्र'' इत्यत्रानेन सूत्रेण प्रगृह्यसंज्ञायां प्रकृतिभावे **इ इन्द्र, उ उमश** इत्यादिरूपाणि भवन्ति।

सूत्रे अनाङ् इत्यत्र ङकारनुबन्धस्य प्रयोजनं कथयति मूले- अनाङ् **इत्युक्तेरित्यादि।** अस्यायम्भावः चादिगणे आ इति पठितमस्ति, प्रादिगणे आङ् इति चादिगणे प्रादिगणे च पठितयोः आआङोरुभयोरपि निपातसंज्ञा प्राप्नोति। उभयोः आ इत्यस्य प्रगृह्यसंज्ञा न तु आङ् इत्यस्य।

तद्यथा- आ एवं नु मन्यसे, आ एव किल तत् इत्यादौ वाक्यस्मरणयोः अङितत्वात् प्रगृह्यसंज्ञायां प्रकृतिभाव इति।

**इ इन्द्रः**- इ इन्द्रः इत्यत्र **निपात एकाजनाङ्** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे इ इन्द्र इति रूपं सिद्ध्यति।

**उ उमेशः**- उ उमेश इत्यवस्थायां **निपात एकाजनाङ्** इति सूत्रेण प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे उ उमेशः इति।

**ओत् १.१.१५ ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।**

**संस्कृतव्याख्या**- अत्र निपात इत्यनुवर्तते, ओत् इति निपातस्य विशेषणम् विशेषणत्वात् **येनविधिस्तदन्तस्य** इति सूत्रेण तदन्तविधिः। प्रगृह्यम् इत्यपि अनुवर्तते तस्य पुल्लिङ्गत्वेन विभक्तिविपरिणामः। इत्थम्- ओदन्तो निपातः प्रगृह्यसंज्ञको भवतीति सूत्रार्थः सम्पद्यते। तद्यथा- अहो ईशा इत्यत्र अहो इति चादिगणे पठितो निपातः, तस्य प्रगृह्यसंज्ञायां प्रकृतिभावे च अहो ईशा इति रूपम्।

**अहो ईशा**- अहो ईशा इत्यत्र अहो इत्यस्य **चादयोऽसत्वे** इति सूत्रेण निपातसंज्ञायां, **ओत्** इति सूत्रेण प्रगृह्यसंज्ञा, ततः प्लुतप्रगृह्याअचि नित्यम् इति सूत्रेण प्रकृतिभावे **अहो ईशा** इति रूपं सिद्ध्यति।

**सम्बुद्धौ शाकल्यस्येतावनार्षे १.१.१६ सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिक इतौ परे। विष्णो इति, विष्ण इति, विष्णाविति। अनार्षे इति किम्। ब्रह्मबन्धवित्यब्रवीत्।**

**संस्कृतव्याख्या**- प्रगृह्यसंज्ञाबोधकं सूत्रमिदम्। सम्बुद्धौ शाकल्यस्य इतौ अनार्षे इति सूत्रस्य पदच्छेदः। सम्बुद्धौ इत्यत्र निमित्तार्थे सप्तमी **ओत्** इत्यनुवर्तते तेन सह सम्बुद्धौ इत्यस्यान्वयः। इतौ इत्यत्र सप्तमी तेन इति परे इत्यर्थः, ऋषौ भव आर्षः, न आर्ष अनार्षः तस्मिन् अनार्षे अवैदिके इत्यर्थः। प्रगृह्यम् इत्यनुवर्त्य पुल्लिङ्गतया तस्य विपरिणामः। एतेन सम्बुद्धिनिमित्तात् ओकारात् अवैदिके इति परे विकल्पेन प्रगृह्यसंज्ञा भवतीति सूत्रार्थः सङ्गच्छते, शाकल्यमते। तद्यथा- विष्णुशब्दस्य सम्बुद्ध्येकवचने उकारस्य गुणे ओकारे कृते विष्णो इति इत्यवस्थायां सम्बुद्धिनिमित्तात् ओकारात् इति शब्दे परे विकल्पेन प्रगृह्यसंज्ञायां प्रकृतिभावे च विष्णो इति, विकल्पपक्षे **एचोऽयवायावः** इति सूत्रेण अवादेशे विष्णविति, **लोपः शाकल्यस्य** इति सूत्रेण विकल्पेन वलोपे **विष्ण इति** रूपत्रयं भवति।

सूत्रे अनार्ष इति कथनेन ब्रह्मसबन्धो इत्यब्रवीत् इत्यत्र न प्रगृह्यसंज्ञा न च प्रकृतिभावः ''ब्रह्मबन्धवित्यब्रवीत्'' इत्येकमेव रूपं भवति।

**विष्णो इति, विष्ण इति, विष्णाविति**- विष्णो इति इत्यत्र **''सम्बुद्धौ शाकल्यस्येतावनार्षे''**

इति सूत्रेण विकल्पेन प्रगृह्यसंज्ञायां **प्लुतप्रगृह्या अचि नित्यम्** इति सूत्रेण प्रकृतिभावे विष्णो इति विकल्पपक्षे **एचोऽयवायावः** इति सूत्रेण अवादेशे विष्णव् इति इत्यवस्थायां **लोपः शाकल्यस्य** इति सूत्रेण विकल्पेन व लोपे **विष्ण इति** विकल्पपक्षे **विष्णविति** इति रूपं भवति।

**उञः १.१.१७ उञ् इतौ वा प्रागुक्तम्। उ इति विति।**

**ऊँ १.१.१८ उञ् इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति, विति।**

**संस्कृतव्याख्या- उञः........।** एकपदात्मकमिदं सूत्रम्। अत्र **सम्बद्धौ शाकल्यस्येतावनार्षे** इति सूत्रात् शाकल्यस्य, इतौ इत्यस्य चानुवृत्तिर्भवति। **ईदूदेद्विवचनं प्रगृह्यम्** इत्यतः प्रगृह्यमित्यनुवर्तते। एतेन इतिशब्दे परे उञः प्रगृह्यसंज्ञा भवति शाकल्यमते इति सूत्रार्थो भवति। **निपात एकाजनाङ्** इति सूत्रेण नित्ये प्राप्ते वैकल्पिकोऽनेन विधीयते। तद्यथा- उ इति इत्यत्र प्रगृह्यसंज्ञायां प्रकृतिभावे, विकल्पपक्षे ''विति'' इति रूपम्।

**ऊँ.......।** इदमपि पूर्वसूत्रवदेव प्रगृह्यसंज्ञाबोधकम्। पूर्वसूत्रात् उञः इति षष्ठ्यन्तपदस्यानुवृत्तिर्भवति। शाकल्यस्य इतौ, प्रगृह्यम् इत्येतानि पदानि अनुवर्तन्ते। तेन उञः स्थाने अनुनासिकघटितदीर्घोकार **ऊँ** इत्यादेशो भवति, ततः इति परे प्रगृह्यसंज्ञा भवतीति सूत्रार्थः सम्पद्यते। तद्यथा उ इति इत्यत्र ऊँ इत्यादेशे प्रगृह्यसंज्ञायां प्रकृतिभावे च **ऊँ इति,** विकल्पपक्षे **विति** इति रूपं भवति।

**मय उञो वो वा ६.३.३३ मञः परस्य उञो वो वा स्यादचि। किमु उक्तम्, किम्वुक्तम्। वस्यासिद्धत्वान्नानुस्वारः।**

**संस्कृतव्याख्या**- सूत्रे मयः इति पञ्चम्यन्तं, उञः इति षष्ठ्यन्तं व इति प्रथमान्तं विधेयं पदम् वा इत्यव्ययम्। मयः इत्यस्य पञ्चम्यन्तत्वात् मयः परस्य इत्यर्थः, उञ इत्यस्य षष्ठयन्तत्वात् उञः स्थाने इत्यर्थः, व इति विधेयत्वात् व इत्यादेशो भवति, वा इति पदेन विकल्पेन इत्यर्थः। अत्र **ङमोह्रस्वादचि ङमुण्णित्यम्** इति सूत्रात् अचि इत्यनुवर्तते। एतेन मयः परस्य उञः उकारस्य स्थाने विकल्पेन व इत्यादेशो भवति अचि परं इति सूत्रार्थो भवति। **तद्यथा** किमु उक्तम् इत्यत्र मय्प्रत्याहारस्य वर्णः मकारः ततः परस्य उकारस्य स्थाने विकल्पेन वकारादेश किम्वुक्तम् इति, विकल्पपक्षे मकारात् परस्य उञो निपातनत्वात् निपात एकाजनाङ् इत्यनेन प्रगृह्यसंज्ञायां, प्रकृतिभावे च किमु उक्तम् इति रूपं भवति।

**किमु उक्तम्, किम्वुक्तम्**- किमु उक्तम् इत्यत्र **मयः उञो वो वा** इति सूत्रेण विकल्पेन उकारस्य स्थाने वकारादेशे वर्णसंयोगे **किम्वुक्तम्** इति विकल्पपक्षे किम् उ इत्यस्य एकाच्त्वात् **निपात एकाजनाङ्** इति सूत्रेण प्रगृह्यसंज्ञायां प्रकृतिभावे च किमु उक्तम् इति रूपं भवति।

अत्रेदमाशङ्कते यत् किम् व् उक्तम् इत्यत्र मकारस्य पदान्तत्वात् **मोऽनुस्वारः** इति सूत्रेण अनुस्वारः स्यादिति। तत्रोच्यते मूले-**वत्वस्य असिद्धत्वात् नानुस्वार** इति। अर्थात् **मयः उञो** इत्यादेः त्रिपाद्यां पाठात् असिद्धत्वात् हल्परत्वाभावे न मकारस्यानुस्वारः इति।

**ईदूतौ च सप्तम्यर्थे १.१.१९ सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधिश्रितः। मामकी तनू इति। सुपां सुलुक् (सू. ३५६१) इति सप्तम्या लुक्। अर्थग्रहणं किमर्थम्- वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्। वाप्यामश्वो वाप्यश्वः।**

**संस्कृतव्याख्या**– प्रगृह्यसंज्ञाबोधकं सूत्रमिदम्। ईत् च ऊत् च तयोरितरेतरयोग–द्वन्द्वसमासघटितं प्रथमाद्विवचनान्तं पदम् ईदूतौ इति। च इत्यव्ययम्। सप्तम्याः अर्थ सप्तम्यर्थः तस्मिन् सप्तम्यर्थे इति सप्तम्यन्तं पदम्। अत्र प्रगृह्यमित्यनुवर्तते तच्च द्विवचनान्ततया विपरिणम्यते, ''**ईदूतौ**'' इत्यस्य विशेषणत्वात् तदन्तविधिः। अत्र **ईदूतौ च सप्तम्यौ** इति कथनेनैवेष्टसिद्धेः सूत्रे अर्थग्रहणेन यत्र सप्तम्या लुकि **यः शिष्यते** स **लुप्यमानार्थाभिधायी** इति न्यायेन प्रकृतेरेव सप्तत्यर्थे पर्यवसानं तथाविधमीदन्तोदन्तयोर्गम्यते। इत्थं सप्तम्यर्थे पर्यवसन्नमीदूदन्तौ शब्दौ प्रगृह्यौ स्तः इति सूत्रार्थो भवति। तदेवोच्यत मूले **सप्तम्यर्थे** इत्यादि।

**तद्यथा**– सोमो गौरी अधिश्रितः **गौर्याश्रित सोम** इत्यर्थे गौरी ङि इत्यत्र **सुपां सु लुक्** इति सप्तम्या लुकि गौरी इत्येवमवशिष्यते ततो गौरी अधिश्रित इत्यत्र सप्तम्यर्थे पर्यवसितस्य **गौरी** इत्यस्य प्रगृह्यसंज्ञायां प्रकृतिभावे यण् न भवति। एवमेव ''**मामकी तनू**'' इति इत्यत्र मामक्याम् तन्वाम् इत्यर्थे तनू ङि इत्यत्र सप्तम्या लुकि **मामकी तनू** इति इत्यवस्थायां सप्तम्यर्थे ऊदन्तस्य तनू इत्यस्य प्रगृह्यसंज्ञायां प्रकृतिभावे **मामकी तनू** इति रूपं भवति। सूत्रेऽर्थग्रहणं किमर्थमिति चेत् कथयति– **वृत्तौ अर्थान्तरोपसङ्क्रान्ते मा भूत्। वाप्यश्वः।** अत्रेदं तात्पर्यं यत् समासादिना वृत्या अर्थान्तरस्य सङ्क्रमितत्वे प्रगृह्यसंज्ञा यथा न स्यात् तदर्थम् अर्थग्रहणम्। तेन **वाप्याम् अश्व** इति विग्रहे समासवृत्या वाप्या अश्व एवमर्थान्तरे षष्ठ्याः सङ्क्रमितत्वात् न केवलं सप्तम्या अर्थो गम्यते सम्बन्धस्याप्यर्थः संक्रान्तः तस्मादत्र प्रगृह्यसंज्ञा न भवति यणि च कृते वाप्यश्वः इति।

**अणोऽप्रगृह्यस्यानुनासिकः ८.४.५७ अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधिँ, दधि। अप्रगृह्यस्य किम् अग्नी।। इत्यच्सन्धिप्रकरणम्।**

**संस्कृतव्याख्या**– अणः अप्रगृह्यस्य अनुनासिक इति सूत्रस्य पदच्छेदः। अणः इति षष्ठ्यन्तम्, अप्रगृह्यस्य इति षष्ठ्यन्तम्, अनुनासिक इति प्रथमान्तं पदम्।। **वाऽवसाने** इति सूत्रम् अनुवर्तते। न प्रगृह्यम् अप्रगृह्यम्। अण्प्रत्याहारः पूर्वेणैव णकारेण गृह्यते। इत्थम् अवसानस्य अप्रगृह्यस्य अणः स्थाने विकल्पेन अनुनासिको भवतीति सूत्रार्थः सम्पद्यते। तद्यथा दधि इत्यत्र न केनापि सूत्रेण प्रगृह्यसंज्ञा अवसानत्वमपि, इकारः अण् प्रत्याहारेऽपि वर्तते। तस्मात् विकल्पेन अनुनासिके दधिँ विकल्पपक्षे दधि इति रूपं भवति।

सूत्रे अप्रगृह्यस्य इति कथनेन यस्य प्रगृह्यसंज्ञा भवति तत्रेदं सूत्रं न प्रवर्तत इति तद्यथा– **अग्नी** इत्यत्र **ईदूदेद्विवचन**मित्यनेन प्रगृह्यसंज्ञा तस्मात् न अनुनासिकत्वम् इति।

**इति राजधरमिश्रकृतया व्याख्यया सहितं प्रकृतिभावसन्धिसमन्वितम् अच्सन्धिप्रकरणं सम्पूर्णम्।**

-----

,

# अथ हल्सन्धिप्रकरणम्

**स्तोः श्चुना श्चुः ८.४.४० सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकार चवर्गौ स्तः। ( रामश्शेते ) हरिश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जय।**

**संस्कृतव्याख्या**– सूत्रे पदत्रयम्। स च तुश्चेति तयोः स्तोरिति समाहारद्वन्द्वघटितं पदम्, समाहारद्वन्द्वस्य नपुंसकत्वेऽपि पुंस्त्वमत्र सौत्रत्वात्। एवं श्चुना इत्यत्रापि पुंस्त्वं बोध्यम्। श्चुना इत्यत्र सहार्थे तृतीया। योग इत्यस्य अध्याहारः। स्तोः इत्यस्य षष्ठयन्तत्वात् स्थाने इत्यस्योपस्थिततत्वात् सकारतवर्गयोः स्थाने इत्यर्थः। शश्च चुश्चेति श्चुः समाहारद्वन्द्वघटितं प्रथमान्तं विधेयं पदम्। अत्र स्थान्यादेशयोः समानसङ्ख्याकत्वात् यथासङ्ख्यमन्वयः। एतेन सकारस्य तवर्गस्य च स्थाने यथासङ्ख्यं शकारचवर्गौ भवतः शकारचवर्गाभ्यां योगे इति सूत्रार्थः सङ्गच्छते। तत्रापि त ध द धन न इत्येतेषां स्थाने यथाक्रमं च छ ज झ ञ् इत्यादेशा इति फलितम्। अत्र सूत्रे स्थानीनिमित्तयोः अर्थात् स्तो श्चुना इत्यनयोर्न यथासङ्ख्यमन्वयः शात् इति सूत्र निषेधात् इत्यपि बोध्यम्। सूत्रोदाहरणं यथा–

**रामश्शेते**– अत्र रामस् शेते इति स्थिते शकारेण योगात् सकारस्य शकार इति। एवमेव **हरिः** शेते इत्यन **वा शरि** इत्यनेन पक्षिके **विसर्जनीयस्य स** इत्यनेन सकारादेशे शकारेण योगे श इति जाते **हरिश्शेते** इति। रामश्चिनोति इत्यत्र चवर्गयोगात् शकारः। सत् चित् इत्यत्र श्चुत्वस्यासिद्धत्वात् तकारस्य जश्त्वे दकारे, श्चुत्वे जकारे, चर्त्वे च सच्चित् इति। शार्ङ्गिन् जय इत्यत्र चवर्गयोगात् नकारस्य ञकारे शार्ङ्गिञ्जय इति।

**रामश्शते** – रामस्+शते इत्यत्र **'स्तोः श्चुना श्चुः'** इति सूत्रेण शकारयोगे यथासंख्यं सकारस्य स्थाने शकारे वर्णसम्मेलने **रामश्शेते** इति रूपं भवति।

**रामश्चिोति**– रामस् चिनेति इत्यत्र **'स्तोः श्चुना श्चुः'** इति सूत्रेण चवर्गयोगे सकारस्य स्थाने शकारे वर्णसम्मेलने रामश्चिनोति इति रूपं सिद्ध्यति।

**सच्चित्**– सत् चित् इत्यत्र **झलां जशोऽन्ते** इति सूत्रदृष्ट्या श्चुत्वस्य असिद्धत्वात् पूर्वं जश्त्वे सद् चित् इति जाते **'स्तोः श्चुना श्चुः'** इति सूत्रेण चवर्गयोगे दकारस्य श्चुत्वे जकारे, **खरि च** इति सूत्रेण जकारस्य चर्त्वे चकारे वर्णसम्मेलने सच्चित् इति रूपं भवति।

**शर्ङ्गिञ्जय**– शार्ङ्गिन्+जय इत्यत्र **'स्तोः श्चुना श्चुः'** इति सूत्रेण चवर्गस्य योगे नकारस्य श्चुत्वे ञकारे कृते वर्णसम्मेलने शार्ङ्गिञ्जय इति रूपं भवति।

**शात् ८.४.४४ शात्परस्य तवर्गस्य श्चुत्वं न स्यात्। विश्नः। प्रश्नः।**

**संस्कृतव्याख्या**– एकपदात्मकमिदं सूत्रम्। शात् इति दिग्योगपञ्चम्यन्तं पदम्, अत्र **नपदान्ताट्टोरनाम्** इति

सूत्रात् न इत्यस्य **'स्तोः श्चुना श्चुः इत्यतः तोः'** इत्यस्य चु इत्यस्य चानुवृतिर्भवति। शात् इत्यस्य पञ्चम्यन्तत्वात्, **तस्मादित्युत्तरस्य** इति सूत्रात् अव्यवहितपरस्य इत्यर्थो लभ्यते। एतेन शकारात् परस्य तवर्गस्य श्चुत्वं न भवतीति सूत्रार्थः सङ्गच्छते। तद्यथा–विश्नः विच्छ् गतौ इत्यस्माद्धातोः **'यजयाचविच्छप्रक्षरक्षो नङ्'** इति सूत्रात् नङ् प्रत्ययेऽनुबन्धलोपे **'छ्वोशूड'** इत्यादिसूत्रेण छस्य स्थाने शकारादेशे विश्+नः इत्यवस्थायां **'स्तोः श्चुना श्चुः'** इति सूत्रेण प्राप्तस्य श्चुत्वस्य अनेन निषेधे विश्नः इति। एवमेव प्रच्छ् धातोः नङ् प्रत्यये प्रश्न् इत्यवस्थायां श्चुत्वस्य निषेधे प्रश्नः इति।

**विश्नः**– विश्+नः इत्यवस्थायां **'स्तोः श्चुना श्चुः'** इति सूत्रेण नकारस्य श्चुत्वे प्राप्ते **शात्** इति सूत्रेण निषेधे विश्नः इति रूपं सिद्धम्।

**प्रश्न** :– प्रश्+नः इत्यत्र **'स्तोः श्चुना श्चुः'** इति सूत्रेण श्चुत्वे प्राप्ते शात् इति सूत्रेण निषेधे वर्णसम्मेलने **प्रश्नः** इति।

**ष्टुना ष्टुः ८.४.४१ स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।**

**संस्कृतव्याख्या**– पदद्वयमत्र सूत्रे वर्तते। ष च टुश्च इति ष्टुः इति समाहारद्वन्द्वघटितं प्रथमान्तं पदम्, सौत्रत्वात् पुंस्त्वम्। ष्टुना इति सहार्थे तृतीयान्तं पदम्। **'स्तोः श्चुना श्चुः'** इति सूत्रात् 'स्तोः' इत्यनुवर्तते। योगे इत्यध्याह्रियते। स्तो ष्टुः इत्यनयोः यथासंख्यमन्वयः। एतेन सकारस्य तवर्गस्य च स्थाने यथाक्रमं षकारः टवर्गश्च इत्यादेशो भवति षकार टवर्गाभ्यां योग इति सूत्रार्थः। तद्यथा– रामस्+षष्ठ इत्यत्र सस्य षकारादशे **रामष्षष्ठः** इति। सकारस्य टवर्गयोगे उदाहरणं यथा– रामस् टीकते इत्यत्र सस्य षत्वे रामष्टीकते इति। पेष्+ता इत्यत्र षकारयोगे तवर्ग ष्टुत्वे टकारे कृते पेष्टा इति। तद्+टीका इत्यत्र ष्टुत्वेन दस्य डकारे, चर्त्वे च तट्टीका इति। चक्रिन् ढौकसे इत्यत्र टवर्गयोग नकारस्य ष्टुत्व णकारे चक्रिण्ढौकसे इति रूपं भवति।

**रामष्षष्ठः**– रामस्+षष्ठः इत्यत्र **'ष्टुना ष्टुः'** इति सूत्रेण षकारयोगे सकारस्य षत्वे वर्णसम्मेलने **रामष्षष्ठः** इति।

**रामष्टीकते** – रामस्+टीके इत्यत्र **'ष्टुना ष्टुः'** इति सूत्रेण टकारयोगे सकारस्य षत्वे **रामष्टीकते** इति।

**पेष्टा** – पेष्+ता इत्यत्र षकारयोगे **'ष्टुना ष्टुः'** इति सूत्रेण तकारस्य ष्टुत्वे टकारे कृते वर्णसम्मेलने **पेष्टा** इति।

**तट्टीका** – तद्+टीका इत्यत्र **ष्टुना ष्टुः** इति सूत्रेण दकारस्य ष्टुत्वे डकारे कृत तड् टीका इति जाते **'खरि च'** इति सूत्रेण डकारस्य चर्त्वे टकारे कृते वर्णसम्मेलने तट्टीका इति रूपं भवति।

**चक्रिण्ढौकसे**– चक्रिन्+ढौकसे इत्यत्र 'ष्टुना ष्टुः' इति सूत्रेण टवर्गयोगे नकारस्य ष्टुत्वे णकारदेशे वर्णसम्मेलने चक्रिण्ढौकसे इति रूपं भवति।

**न पदान्ताट्टोरनाम् ८.४.४२ अनाम् इति लुप्तषष्ठीकं पदम्।**

**पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते।**

**पदान्तात् किम् ईट्टे। टोः किम् सर्पिष्टमम्।**

**अनाम्नवतिगरीणामिति वाच्यम् ( वा. ५०१६ ) षण्णाम्। षण्णवतिः। षण्णगर्यः।**

**संस्कृतव्याख्या**– पदन्तात् टोः अनाम् इति सूत्रस्य पदविभागः। अनाम् इति लुप्तषष्ठीकं पदं तोः इत्यस्य विशेषणं वर्तते। न नाम् इति अनाम् तस्य इति, एतेन नामवयवभिन्नस्य इत्यर्थः। सूत्रे पदान्तात् इति पञ्चम्यन्तं पदं तेन

अव्यवहितोत्तरस्य इत्यर्थः, टो इति पञ्चम्यन्तम्। अत्र '**स्तोः श्चुना श्चुः**' इति सूत्रेण स्तोः इत्यस्य 'ष्टुना ष्टुः' इति सूत्रेण ष्टु इत्यस्य चानुवृत्तिर्भवति।

इत्थं पदान्तात् टवर्गात् अव्यवहितोत्तरनाम्नः नकारं परिवर्ज्य (नामभिन्नस्य) तवर्गस्य सकारस्य च ष्टुत्वं न भवतीति सूत्रार्थः। तद्यथा षट् सन्तः, षट् ते इत्यादे प्रथमाबहुवचने रूपस्य षट् इत्यस्य टकारस्य पदान्तत्वात् ततः परस्य तकारस्य **ष्टुना ष्टुः** इति सूत्रेण प्राप्तस्य ष्टुत्वस्य निषेधो भवति।

सूत्रे पदान्तात् इति कथनेन ईड् स्तुतौ इत्यस्माद्धातोः आत्मनेपद प्रथमपुरुषैकवचने त प्रत्यये, शपि तस्य लुकि, टेरेत्वे **ईट् ते** इत्यवस्थायां ष्टुत्वन्न भवति टकारस्य अपदान्तत्वात्। एवमेव टवर्गात् परस्य इति कथनेन सर्पिष्+तमम् इत्यत्र न ष्टुत्वनिषेधः षकारात् परत्वात् इति।

**षट् सन्तः**– षट् सन्तः इत्यत्र '**ष्टुना ष्टुः**' इति सूत्रेण टकारयोगे सकारस्य ष्टुत्वे षकारे प्राप्ते '**न पदान्ताट्टोरनाम्**' इति सूत्रेण निषेधे **षट् सन्त** इति।

**षट् ते** – षट् ते इत्यत्र '**ष्टुना ष्टुः**' इति सूत्रेण टकारात् परस्य तकारस्य ष्टुत्वे टकारे प्राप्ते '**न पदान्ताट्टोरनाम्**' इति सूत्रेण ष्टुत्वनिषेधे **षट् ते** इति रूपं भवति।

**अनाम्नवति**– । वार्तिकमिदम्। पदान्तात् टवर्गात् परस्य न केवलं नाम परिवर्ज्य एव ष्टुत्व निषेधः अर्थात् ष्टुत्वप्रतिषेधे नामातिरिक्तं, नवति, नगरी इत्यनयोः नकारं परिवर्ज्य एव ष्टुत्वनिषेधो वक्तव्य इति वार्तिकार्थः। इत्थं न **पदन्तेतिसूत्र** प्रतिषेधपूरणार्थकमिदं वार्तिकम्। तद्यथा– **षण्णाम्। षण्णवतिः,** षण्णगर्यः इत्याक्षै ष्टुत्वं भवत्येव।

**षण्णाम्**– षड्+नाम् इत्यत्र '**न पदान्ताट्टोरनाम्**' इति सूत्रेण न ष्टुत्वस्य प्रतिषेधात् **ष्टुना ष्टुः** इति सूत्रेण टवर्गात् परस्य नस्य ष्टुत्वे षड् णाम् **प्रत्ययेभाषायां नित्यम्** इत्यनेन डकारस्य अनुनासिके णकारे षण्णाम् इति।

**षण्णवति**– षडधिकानवति इति विग्रहे षड् नवति इत्यत्र न **पदान्तेत्यादिसूत्रेण** ष्टुत्वनिषेधाभावात्, **ष्टुना ष्टुः** इति सूत्रेण ष्टुत्वे, डकारस्य अनुनासिके णकारे च कृते षण्णवति इति।

**षण्णगर्यः** षड्+नगर्यः इत्यत्रापि न पदान्तेत्यादिना ष्टुत्वनिषेधाभावात् **ष्टुना ष्टुः** इति सूत्रेण ष्टुत्वे, डकारस्य णकारे च कृते षण्णगर्यः इति।

**तोः षि ८.४.४३ तवर्गस्य षकारे परे न ष्टुत्वम्। सन्षष्ठः।**

**झलां जशोऽन्ते ( सू. ८४ ) वागीशः। चिद्रूपम्।**

**संस्कृतव्याख्या**– इदमपि सूत्रं ष्टुत्वनिषेधकम्। सूत्रे पदद्वयम्। तोः इति षष्ठ्यन्तं तेन स्थाने इत्यर्थो लभ्यते, षि इति सप्तम्यन्तं तेन षकारे परे इत्यर्थः। अत्र न, ष्टु इत्यनयोरनुवृत्तिर्भवति। इत्थं षकारे परे तवर्गस्य स्थाने ष्टुत्वं न भवतीति सूत्रार्थः सम्पद्यते। तद्यथा– सन्+षष्ठ इत्यत्र षकारस्य योगे तवर्गस्य स्थाने **ष्टुना ष्टुः** इति सूत्रेण प्राप्त ष्टुत्वं न भवति अनेन निषेधात्।

**झलां** जशोऽन्ते इति सूत्रम् अच्सन्धौ पठितं तथापि तस्य हल्सन्धिस्थसूत्रत्वात् प्रसङ्गात् अत्र स्मारितम्– **वागीशः वाक् ईशः चिद्रूपम्** इत्यादिः।

**यरोऽनुनासिकेऽनुनासिको वा ८.४.४५ यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः, एतद् मुरारिः। स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते। चतुर्मुखः।**

**प्रत्यये भाषायां नित्यम् ( वा. ५०१७ ) तन्मात्रम्। चिन्मयम्। कथं तर्हि मदोदग्राः ककुदमन्तः इति? यवादि ( ग. २५० ) गणे दकारनिपातनात्।**

**संस्कृतव्याख्या**– यरः अनुनासिके अनुनासिकः वा इति सूत्रस्य पदविभागः। यरः इत्यस्य षष्ठ्यन्तत्वात् यरः स्थाने इत्यर्थः, अनुनासिके इत्यस्य सप्तम्यन्तत्वात् अनुनासिके वर्णे परे इत्यर्थः, अनुनासिकः इति प्रथमान्तं विधेयं पदम् तेन, अनुनासिको भवति इत्यर्थः, वा इत्यनेन विकल्पेनेति तात्पर्यम्। अत्र न **पदान्तात् टोरनाम्** इति सूत्रात् पदान्तात् इत्यनुवर्तते तस्य च षष्ठ्यन्ततया विभक्तिविपरिणामः। इत्थं सूत्रस्यार्थो भवति यत् अनुनासिके वर्णे परे यरः स्थाने विकल्पेन अनुनासिको भवतीति। तद्यथा– एतद् मुरारिः इत्यत्र दस्य अनुनासिको नकारो भवति दन्तस्थानस्पृष्टप्रयत्नसाम्यात्। विकल्पपक्षे एतद् मुरारि इति।

**अत्रेदमाशङ्कते** यत् चतुर् मुखः इत्यत्र पदान्तरेफेऽत्र चतुर् इत्यस्य रेफः तस्मात् परे अनुनासिको वर्णः मकारः, अत्रापि रेफस्य स्थानेऽनुनासिकः स्यादिति। अत्रोच्यते समाधानमुखेन मूले– **स्थानप्रयानाभ्यामन्तरतमे इत्यादिः।** अस्यायम्भावो यत्, एतन्मुरारि इत्यादौ स्थानतः प्रयत्नतश्च अन्तरतमे चरितार्थोऽयम् अनुनासिकविधिः केवलं स्थानसाम्यात् चतुर् मुख इत्यादौ रेफे न प्रवर्तते। 'यूनि लब्धे तु युवतिर्जरठे रमते कथम्' इति न्यायात्। अतः चतुर्मुखः इत्यादौ नानुनासिको भवतीति।

**प्रत्यये...।** वार्तिकमेतत्। भाषापदेनात्र लौकिकप्रयोग इति। **यरोऽनुनासिके** इत्यादि–सूत्रेण वैकल्पिकम् अनुनासिकादेशम्, अनुनासिकादिप्रत्यये परे नित्यत्वेन विधातुम् इदं वार्तिकम् उपस्थापितम्। एतेन अनुनासिको वर्णः यस्य प्रत्ययस्य आदौ, तादृशे अनुनासिके प्रत्यये परे यरः स्थाने नित्यम् अनुनासिको भवतीति वार्तिकार्थः। तद्यथा– तद् मात्रम् इत्यत्र मात्रचः प्रत्ययत्वात् दकारस्य नित्येऽनुनासिके नकारे कृते तन्मात्रम् इत्येव, एवमेव चिन्मयम् अपि।

अत्रेदमाशङ्कते यदि यादिप्रत्यये नित्यम् अनुनासिकस्तदा '**मदोदग्राः ककुद्मन्तः**' इति **कालिदासप्रयोगे** कथन्न दकारस्यानुनासिकः, तदुच्यते मूले– यवादिगणे ककुद्मच्छब्दे दकारस्य निर्देशात् न तस्यानुनासिकः। यदि तत्र दकारस्य नकार एव इष्टः स्यात् तर्हि लाघवात् नकार एव निर्देशः कर्त्तव्य आसीत्। तस्मातत्र दकारनिपातनात् नानुनासिक इति।

**एतद् मुरारिः, एतन्मुरारिः.....** एतद्–मुरारि इत्यत्र **यरोऽनुनासिकेऽनुनासिको वा** इति सूत्रेण विकल्पेन दकारस्य स्थानप्रयत्नसाम्यात् अनुनासिके नकारे कृते **एतन्मुरारि,** विकल्पपक्षे **एतद् मुरारि** इति रूपं भवति।

**तन्मात्रम्**– तद् मात्रम् इत्यत्र **यरोऽनुनासिकेऽनुनासिको वा** इति सूत्रेण विकल्पेन अनुनासिके प्राप्ते तं प्रबाध्य **प्रत्यये भाषायां नित्यम्** इति वार्तिकेन नित्ये अनुनासिके **तन्मात्रम्** इति।

**चिन्मयम्**– चिद्+मयम् इत्यत्र मयट्प्रत्ययत्वात् **यरोऽनुनासिकेत्यादिसूत्रेण** विकल्पेन प्राप्तम् अनुनासिकादेशं प्रबाध्य **प्रत्यये भाषायां नित्यम्** इति वार्तिकेन नित्येऽनुनासिके **चिन्मयम्** इति रूपं भवति।

**तोर्लिः ८.४.६० तवर्गस्य लकारे परसवर्णः स्यात्। तल्लयः। विद्वाँल्लिखति। नकारस्यानुनासिको लकारः।**

**संस्कृतव्याख्या**– तोः लि इति सूत्रस्य पदच्छेदः, तोः इति षष्ठ्यन्तं पदं तेन तवर्गस्य स्थान इत्यर्थः, लि इति सप्तम्यन्तं पदम् एतेन लकारे परे इत्यर्थः। अत्र **अनुस्वारस्य ययि परसवर्णः** इति सूत्रात् 'परसवर्णः' इति प्रथमान्तविधेयपदस्यानुवृत्तिर्भवति। इत्थम् लकारे परे तवर्गस्य स्थाने परसवर्णो भवतीति सूत्रार्थः। अत्र परिनिमित्तभूतसवर्णः लकार एव भवति सावर्ण्यात्। तद्यथा **तस्य लयः** इत्यर्थे तद्+लय इत्यवस्थायां दकारस्य स्थाने परसवर्णे लकारे कृते तल्लय इति। विद्वान्+लिखति इत्यत्र नकार अनुनासिकः तस्य स्थाने परसवर्णो लकार आन्तर्यात् अनुनासिक एव। **विद्वाँल्लिखति** इति रूपम्।

**तल्लयः**– तद्+लयः इत्यत्र **तोर्लिः** इति सूत्रेण दकारस्य स्थाने परसवर्णे लकारे वर्णसम्मेलने **तल्लयः** इति रूपं भवति।

**विद्वाँल्लिखति**– विद्वान् लिखति इत्यत्र **तोर्लिः** इति सूत्रेण परसवर्णे स्थानसाम्यात् अनुनासिकस्य लकारस्य स्थाने अनुनासिक एव लकारे कृते वर्णसम्मेलने विद्वाँल्लिखति इति।

**उदः स्थास्तम्भोः पूर्वस्य ८.४.६१ उदः परयोः स्थानस्तम्भोः पूर्वसवर्णः स्यात्। आदेः परस्य ( सू. ४४ ) उत्थानम्। उत्तम्भनम्। अत्राघोषस्य महाप्राणस्य सस्य तादृश एव थकारः। तस्य झरो झरि ( सू. ७१ ) इति पाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणम्। न तु खरि च ( सू. १२१ ) इति चर्त्वम्। चर्त्वं प्रति थकारस्यासिद्धत्वात्।**

**संस्कृतव्याख्या**– विधिसूत्रमिदम्। अत्र पदत्रयं वर्तते। उदः इति पञ्चम्यन्तं पदं तस्मात् **तस्मादित्युत्तरस्य** इति परिभाषासूत्रेण उदः परयोः इत्यर्थो लभ्यते। स्थास्तम्भोः इति षष्ठ्यन्तं पदं तेन स्थास्तम्भोः स्थाने इत्यर्थः, षष्ठ्यन्तत्वात् अयमादेशः **'अलोऽन्त्यस्य'** इति परिभाषासूत्रेण अन्त्यस्य स्थाने **न भवति, अपितु** आदे परस्य इति परिभाषासूत्रेण स्थास्तम्भोराद्यवयवस्य सकारस्यैव भवति। अत्र **अनुस्वारस्य ययि परसवर्णः** इति सूत्रात् सवर्णग्रहणं निष्कृष्य सम्बध्यते। इत्थम्– उदः परस्य स्था स्तम्भ इत्यनयोः सकारस्य स्थाने पूर्वसवर्णो भवतीति सूत्रार्थः सम्पद्यते।

अत्र पूर्वसवर्णः अघोषस्य महाप्राणस्य सकारस्य स्थाने तादृश एव वर्णः थकारो भवति। तस्य **झरो झरि सवर्णे** इति सूत्रेण विकल्पेन लोपो भवति। यदा लोपाभावस्तदा थकारस्यैव श्रवणं न तु तत्र **खरि च** इति सूत्रेण चर्त्वं भवति, चर्त्वं प्रति थकारस्य असिद्धत्वात्। अतः विकल्पपक्षे उत्थ्थानम् इत्येव रूपं बोध्यम्। एवमेव उत्तम्भनम् **झरोझरि** इत्यनेन लोपाभावे **उत्थ्तम्भनम्** इति।

**उत्थानम्**– उद्+स्थानम् इत्यत्र **आदेः परस्य** इति परिभाषासहकारेण **'उदःस्थास्तम्भोः पूर्वस्य'** इति सूत्रेण स्थानम् इत्यस्य सकारस्य स्थाने तादृश एव अघोषमहाप्राणप्रयत्नवतः परसवर्णे थकारे कृते उद् थ् थानम्। इति जाते **'झरो झरि सवर्णे'** इति सूत्रेण विकल्पेन पूर्वथकारस्य लोपे, **खरि च** इति सूत्रेण दकारस्य चर्त्वे तकारे कृते वर्णसम्मेलने उत्थानम् इति लोपाभावपक्षे उत्थ्थाम् इति रूपं सिद्ध्यति।

**उत्तम्भनम्**– उद्+स्तम्भनम् इत्यत्र **आदेः परस्य** इति सूत्र सहकारेण **उदः स्थास्तम्भोः पूर्वस्य** इति सूत्रेण स्तम्भ इत्यस्य सकारस्य स्थाने पूर्वसवर्णे थकारे कृते 'उद् थ् तम्भनम्' इति जाते **'झरो झरि सवर्णे'** इति सूत्रेण विकल्पेन पूर्व थकारस्य लोपे, खरि च इति सूत्रेण दकारस्य चर्त्वे तकारे वर्णसम्मेलने उत्तम्भम् इति, विकल्पपक्षे उत्थ्तम्भनम् इति भवति।

भाष्यकारमते उत्तम्भनम् इत्येवरूपमिष्टम्।

**झयो होऽन्यतरस्याम् ८.४.६२ झयः परस्य हस्य पूर्वसवर्णो वा स्यात्।**

**घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थः एवादेशः। वाग्घरि, वाग्हरिः।**

**संस्कृतव्याख्या**– झयः हः अन्यतरस्याम् इति सूत्रस्य पदविभागः। झयः इत्यत्र पञ्चमी तस्मात् 'परस्य' इत्यध्याह्रियते, हः इति षष्ठी, तेन हस्य स्थाने इत्यर्थः। अन्यतरस्याम् इति सप्तम्यन्तं विकल्पवाचकं पदम्। अत्र **उदः स्थास्तम्भोः** इत्यतः पूर्वस्य, **अनुस्वारस्य ययि** इत्यादिसूत्रात् सवर्णः इत्यनुवर्तते। इत्थं झय् प्रत्याहारात्परस्य हकारस्य स्थाने विकल्पेन पूर्वसवर्णो भवतीति सूत्रार्थो भवति।

**यथा**– वाग्घरि इति। चकारान्तवाच्शब्दान्ते पदान्ते चकारस्य कुत्वे जश्त्वे गकारे कृते वाग् हरिः इत्यवस्थायाम् झय् प्रत्याहारे गकारस्य पाठात् ततः परस्य हकारस्य पूर्वसवर्णः। अयं पूर्वसवर्णः कवर्गाणां हकारेण सह आभ्यन्तरप्रयत्नस्य साम्यत्वाभावात् बाह्यप्रयत्नत आन्तर्यमादाय स्थानीभूतस्य हकारस्य घोषनादसंवादमहाप्राणप्रयत्नत्वात् तादृश एव कवर्गस्य घकारो वर्णो भवति तेन **वाग्घरि** इति विकल्पक्षे वाग्हरिः इति रूपं भवति।

**वाग्घरि**– वाग् हरिः इत्यत्र **झयो होऽन्यतरस्याम्** इति सूत्रेण हकारस्य स्थाने बाह्यप्रयत्नसाम्यात् घोषनादसंवारमाहप्राणप्रयत्नवतः हकारस्य स्थाने तादृश एव कवर्गस्य चतुर्थे वर्णे घकारे कृते वर्णसम्मेलने वाग्घरि इति, विकल्पपक्षे वग्हरिः इति रूपं भवति।

**शश्छोऽटि ८.४.६३ पदान्ताज्झयः परस्य शस्य छो वा स्यादटि।**

**दस्य श्चुत्वेन जकारे कृते।**

**संस्कृतव्याख्या**– शः छः अटि इति सूत्रस्य पदच्छेदः। अत्र **झयो होऽन्यतरस्याम्** इति सूत्रात् पञ्चम्यन्तस्य झयः इत्यस्य, अन्यतरस्याम् इत्यस्य चानुवृत्तिर्भवति। एतेन झयप्रत्याहारात् परस्य शकारस्य स्थाने छ इत्यादेशो भवति अट् प्रत्याहारस्थे वर्णे परे विकल्पेनेति सूत्रस्यार्थः सङ्गच्छते। तद्यथा तद्+शिव इत्यत्र शकारस्य छकारे कृते तद् छिव इति जाते, **स्तोः श्चुना श्चुः** इति सूत्रेण दस्य श्चुत्वेन जकारे कृते तज् छिव इति जाते–

**खरि च ८.४.५५ खरि परे झलां चरः स्युः। इति जकारस्य चकारः।**

**तच्छिवः, तच्शिवः। छत्वममीति वाच्यम् ( वा. ५०२५ ) तच्छ्लोकेन, तच्श्लोकेन। अमि किम्– वाक् श्चोतति।**

**संस्कृतव्याख्या**– सूत्रे पदद्वयम्। खरि इति सप्तम्यन्तं पदम्, च इत्यव्ययम्। खरि इत्यस्य सप्तम्यन्तत्वात् खरोऽव्यवहितपूर्वस्य इत्यर्थो लभ्यते। अत्र **झलां जश् झशि** इत्यतो झलाम् इति, **अभ्यासे चर्च** इत्यतः चर् इति चानुवर्तते। इत्थम् खरि परे झल्प्रत्याहारस्थानां वर्णानां स्थाने चर्त्वं (चर्प्रत्याहारास्थवर्णाः) स्यादिति सूत्रार्थः। तज् शिवः इति स्थिते **खरि च** इति चर्त्वे कृते तच्छिवः इति छत्वाभावे तच् शिवः इति।

**छत्वममीति**---। इदं वार्तिकम्। शश्छोऽटि इत्यस्मिन् सूत्रे 'अटि इत्यस्य स्थाने अमि' इति वक्तव्यमिति वार्तिकस्य तात्पर्यम्। अर्थात् झयः परस्य शकारस्य स्थाने छकारादेशो भवति अमि परे इति वक्तव्यम्, एतेन तद्+श्लोकेन इत्यादावपि छत्वे कते तच्छ्लोकेन इति।

सूत्रे अमि इति कथनेन **तच्छिव** तच्छ्लोकेन इत्यादौ श्चुत्वं भवति **वाक्** श्चोतति इत्यादौ न। अतः अमि इति वक्तव्यमिति। पक्षे शश्छोऽटि इत्यत्र पदान्तात् इत्यस्यानवृत्तौ विरप् शम् इत्यादौ छत्वं न भवतीति।

**तच्छिवः, तच्शिवः**– तद्+शिवः इत्यत्र **शश्छोऽटि** इति सूत्रेण विकल्पेन शकारस्य स्थाने छकारे तद् छिव इति जाते, '**स्तोः श्चुना श्चुः**' इति सूत्रेण दकारस्य जश्त्वे जकारे कृते तज् छिव इत्यवस्थायां **खरि च** इति सूत्रेण जकारस्य चर्त्वे वर्णसम्मेलने तच्छिव इति, विकल्पपक्षे छत्वाभावे तच्शिव इति रूपं सिद्ध्यतीति।

**तच्छ्लोकेन** – तद्+श्लोकेन इत्यत्र '**छत्वममीति वाच्यम्**' इति वार्तिकसहकारेण '**शश्छोऽटि**' इति सूत्रेण शकारस्य स्थाने विकल्पेन छकारे, दकारस्य श्चुत्वे जकारे तज् शिव इत्यवस्थायां **खरि च** इति सूत्रेण चर्त्वे तच्छ्लोकेन इति विकल्पपक्षे तच्छश्लोकेन इति रूपं भवतीति।

**मोऽनुस्वारः ८.३.२३ मान्तस्य पदस्यानुस्वारः स्याद्धलि। अलोऽन्त्यस्य। हरिं वन्दे। पदस्य किम्? गम्यते।**

**संस्कृतव्याख्या**– विधिसूत्रमिदम्। मः अुस्वार इति सूत्रस्य पदच्छेदः। मः इति षष्ठ्यन्तं, सूत्रेऽधिकृतस्य पदस्य विशेषणम्, विशेषणत्वात् तदन्तविधिना मान्तस्य पदस्य स्थाने इत्यर्थः। मः इति प्रथमान्तं विधेयं पदम्, तेन मः स्यात् इत्यर्थः, अत्र '**हलि सर्वेषाम्**' इति सूत्रात् 'हलि' इत्यनुवर्तते, तस्य च सप्तम्यन्तत्वात् हलि परे इत्यर्थः। **अलोऽन्त्य परिभाषया** अन्त्यस्य इत्यर्थः। इत्थं मान्तस्य पदस्य योऽन्त्याल् मकारः तस्य स्थाने अनुस्वारो भवति हलि

परे इति सूत्रार्थः सङ्गच्छते। तद्यथा हरिम् वन्दे, इत्यत्र द्वितीयैकवचने निष्पन्नस्य हरिम् इत्यस्य मकारस्य पदान्तत्वात् हलि वकारे परे अुस्वारादेशे हरिं वन्दे इति।

सूत्रे पदान्त इति कथनेन गम् धातोः भावकर्मणि यक्प्रत्यये आत्मनेपदे गम्यते इत्यादौ मकारस्यानुस्वारो न भवति अपदान्तत्वात्। तस्मात् पदान्तग्रहणमावश्यकम्।

**हरिं वन्दे** – हरिम् वन्दे इत्यत्र **मोऽनुस्वार** इति सूत्रेण मकारस्य स्थोऽनुस्वारे कृते **हरिं वन्दे** इति रूपं भवतीति।

**नश्चापदान्तस्य झलि ८.३.३४ नस्य मस्य च अपदान्तस्य झल्युस्वारः। यशांसि। आक्रंस्यते। झलि किम्- नम्यते।**

**संस्कृतव्याख्या**– नः च अपदान्तस्य झलि इति सूत्रस्य पदविभागः। अत्र **मोऽनुस्वारः** इत्यतः मः इत्यनुवर्तते। मः नः इत्यनयोः षष्ठ्यन्तत्वात् मकारस्य नकारस्य स्थाने इत्यर्थः। अपदान्तस्य, पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य इति अपदान्तस्य इत्यस्य मः नः इत्युभाभ्यामन्वयः। एतेन अपदान्तस्य मस्य नस्य स्थाने इत्यर्थः। झलि इत्यस्य सप्तम्यन्तत्वात् झलि परे इत्यर्थः। एतेन पदन्तभिन्नस्य मकारस्य नकारस्य च स्थानेऽनुस्वारो भवति झलि परे इति सूत्रार्थः सङ्गच्छते। तद्यथा– यशान् सि इत्यत्र अपदान्तत्वात् नस्यानुस्वारे यशांसि इति। एवमेव आक्रम् स्यते इत्यत्र मकारस्य अनुस्वारे आक्रस्यत इति। सूत्रे झलि इति कथनेन **नम्यते** इत्यत्र अपदान्तत्वेऽपि मकारस्यानुस्वारो न भवति यकारस्य झल्त्वाभावात्।

**यशांसि**– यशान् सि इत्यवस्थायां नकारस्य अपदान्तत्वात् **नश्चापदान्तस्य झलि** इति सूत्रेण अनुस्वारे यशांसि इति रूपं भवति।

**आक्रंस्यते**– आक्रम्+स्यते इत्यत्र मकारस्य अपदान्तत्वात् '**नश्चापदान्तस्य झलि**' इति सूत्रेण अनुस्वरे वर्णसम्मेलने आक्रंस्यते इति रूपं भवति।

**अनुस्वारस्य ययि परसवर्णः ८.४.५८ स्पष्टम्। अङ्कितः। अञ्चित। कुण्ठितः। शान्तः। गुम्फितः। कुर्वन्ति इत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे च कृते तस्यासिद्धत्वान्न णत्वम्।**

**संस्कृतव्याख्या**– अत्र पदत्रयम्। अस्मि् सूत्रेऽन्यत् पदं नानुवर्तते। तस्मात् अर्थः स्पष्ट एव। तथाहि अनुस्वारस्य षष्ठ्यन्तत्वात् अनुस्वारस्य स्थाने, ययि इत्यस्य सप्तम्यन्तत्वात् ययि प्रत्याहारे परे, परसवर्णः इत्यस्य प्रथमान्तविधेयत्वात् परसवर्णः स्यादित्यर्थः। इत्थम् अनुस्वारस्य स्थाने परसवर्णो भवति ययि प्रत्याहारे परे इति सूत्रार्थः सम्पद्यते। तद्यथा– अङ्कितः, इत्यत्र **अन्क पदेलक्षणे** च इत्यस्माद्धातोः **नश्चापदन्तस्य झलि** इति सूत्रेण नस्यानुस्वारे अंक इत्यवस्थायां ककारस्य ययि परत्वात् परसवर्णे ङकारे कृते अङ्कित इति। एवमेव **अन्च्** धातोः क्त प्रत्यये **अञ्चित** इति। **कुठि धातो** इदित्वान्नुमागमेऽबन्धलापे कुन्ठ् इति जाते क्त प्रत्यये इडागमे नस्यानुस्वारे परसवर्णे च कुण्ठित इति। शम् इत्यस्मात् क्त प्रत्यये, उपधादीर्घे शाम् त इत्यवस्थायां मकारस्यानुस्वारे परसवर्णे च शान्त इति। गुम्फित इत्यत्र **गुन्फ** ग्रन्थे इत्यस्मात् क्त प्रत्यये नस्यानुस्वारे परसवर्णे **गुम्फित** इति। **कुर्वन्ति** इत्यत्र रेफोत्तरवर्तिन नकारस्य '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' इति सूत्रेण णत्वे प्राप्ते **नश्चापदान्तस्य झलि** इत्यनेन च अनुस्वारे प्राप्ते परत्वात् णत्वं प्राप्नोति परं णत्वस्य परत्रिपादीस्थत्वात् असिद्धत्वे **नश्चापदान्तस्य झलि** इति सूत्रेण अनुस्वारे परपरसवर्णे च कुर्वन्ति इति।

**अङ्कितः**– अन्क् धातोः क्त प्रत्यये अन् क् इत इत्यवस्थायाम् इडागमे **नश्चापदान्तस्य झलि** इति सूत्रेण नस्य अनुस्वारे, **अनुस्वारस्य ययि परसवर्ण,** इति सूत्रेण परसवर्णे **अङ्कित** इति।

एवमेव **अञ्चित, कुण्ठितः, शान्तः, गुम्फितः, कुर्वन्ति** इत्याद्युदाहरणान्यपि बोध्यानि।

**वा पदान्तस्य ८.४.५९ पदान्तस्यानुस्वारस्य ययि परसवर्णो वा स्यात्।**

**त्वङ्करोषि, त्वं करोषि। सय्यँन्ता, संयन्ता, सँव्वत्सरः, संवत्सरः। यॅल्लोकम्, यं लोकम्। अत्रानुस्वारस्य पक्षेऽनुासिका यवलाः।**

**संस्कृतव्याख्या**– सूत्रे वा इत्यव्ययम्, पदान्तस्य इति षष्ठ्यन्तं पदम्। अनुस्वारस्य ययि परसवर्ण; इति सूत्रमनुवर्तते। इत्थम् पदान्तस्य अनुस्वारस्य स्थाने विकल्पे परसवर्णो भवति ययि परे इति सूत्रार्थः सम्पद्यते। **तद्यथा त्वम् करोषि** इत्यत्र मकारस्य पदान्तत्वात् **मोऽनुस्वार** इति सूत्रेण अनुस्वारे अनेन सूत्रेण विकल्पेन परसवर्णे त्वङ्करोषि इति विकल्पपक्षे त्वंकरोषि इति रूपं भवति।

**सम् यन्ता** इत्यत्र मकारस्य अनुस्वारे **संयन्ता** इत्यवस्थायां परनिमित्तभूतो यकारसवर्णः अनुनासिक यकारो भवति सँय्यन्ता, विकल्पपक्षे संयन्ता इति। एवमेव **सँव्वत्सरः, संवत्सर** इति, यॅल्लोकम् यं **लोकम्** इत्यादीनि रूपाणि भवति।

**त्वङ्करोषि, त्वं करोषि**– त्वम् करोषि इत्यत्र **मोऽनुस्वारः** इति सूत्रेण मकारस्य स्थाने अनुस्वारे **वा पदान्तस्य** इति सूत्रेण विकल्पेन परसवर्णे **त्वङ्करोषि** विकल्पपक्षे त्वं करोषि इति।

**सय्यँन्ता, संयन्ता**– सम्+यन्ता इत्यत्र **मोऽनुस्वरः** इति सूत्रेण मकारस्य अनुस्वारे संयन्ता इति जाते **वा पदान्तस्य** इति सूत्रेण विकल्पेन परसवर्णे यकारे परे अुनासिकये कारे कृते सय्यँन्ता इति, विकल्पपक्षे संयन्ता इति।

एवमेव **सँव्वत्सरः यल्ँलोकम्,** इत्यादीनि रूपाणि भवन्ति।

**मो राजि समः क्वौ ८.३.२५ क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।**

**संस्कृतव्याख्या**– मः राजि सम क्वौ इति सूत्रस्य पदच्छेद। समः इत्यवयवषष्ठी तेन समः मकारस्य स्थाने इत्यर्थः। मः इति प्रथमान्तं तेन म आदेश इत्यर्थः। क्विप् इति प्रत्ययस्य तदन्तग्रहणेन क्विबन्त इत्यर्थः, तस्य सप्तम्यन्तत्वात् क्विबन्ते प्रत्यये परे इत्यर्थः। **राजि क्वौ** इत्यनयोरन्वयात् क्विबन्तराज्धातौ परे इत्यर्थः। इत्थम्– क्विबन्ते राज्धातौ परे समः मस्य स्थाने मकार एवादेशः इति सूत्रार्थः। यथा– सम्+राट् इत्यत्र राट् इत्यस्य क्विबन्तराज्धातुत्वात्, **मोऽनुस्वारस्य** इति सूत्रेण मकारस्य अनुस्वारे प्राप्तेऽनेन सूत्रेण तं प्रबाध्य मकारादेशे सम्राड्, सम्राट् इति सिद्ध्यति।

**सम्राट्**– सम्+राट् इत्यत्र क्विबन्तराज्धातौ परे सम् इत्यस्य मकारस्य **मोऽनुस्वारः** इति सूत्रेण अनुस्वारे प्राप्ते तं प्रबाध्य **'मो राजि समः क्वौ'** इति सूत्रेण मकारस्य मकारादेश एव कृते वर्णसम्मेलने **सम्राट्** इति रूपं सिद्ध्यति।

**हे मपरे वा ८.३.२६ मपरे हकारे परे मस्य म एव स्याद्वा। ह्मल, ह्मल चलने किम् ह्मलयति, किं ह्मलयति। यवलपरे यवला वेति वक्तव्यम् ( वा. ४९०२ )**

**संस्कृतव्याख्या**– सूत्रेऽस्मिन् हे इति सप्तम्यन्तं पदम्, मपरे इति तु म परो यस्मात् तस्मिन् इत्यर्थे सप्तम्यन्तं पदम्, वा इति विकल्पबोधकम्। अत्र मोऽनुस्वारः इत्यतः मः इति षष्ठ्यन्तं पदम्, **मो राजि समः क्वौ** इति सूत्राच्च मः इति प्रथमान्तं पदमपि अनुवर्तते। इत्थम् मपरो यस्मात् तादृशे हकारे परे, मपरके हकारे परे सति मकारस्य स्थाने विकल्पेन म एव भवति इति सूत्रार्थः सम्पद्यते।

**तद्यथा**– किम् ह्मलयति इत्यत्र मोऽनुस्वरः इति सूत्रेण नित्येऽनुस्वारे प्राप्ते अनेन विकल्पेन मकारादेशे किम् ह्मलयति, विकल्पपक्षे च किं ह्मलयति इति।

**यवलपरे यवला वा---। वार्तिकमिदम्**- हे मपरे वा इति सूत्रपूरकं मिदम्। यवलाः पराः यस्मात् तादृशे हकारे परे मकारस्य स्थाने विकल्पेन यवला भवन्तीति वार्तिकार्थः। अर्थात् यकारपरके हकारे वकारपरके हकारे लकारपरके हकारे परे सति मकारस्य स्थाने विकल्पेन य व ल इत्यादेशो भवतीति तात्पर्यम्।

**यथासंख्यमनुदेशः समानाम् १.३.१० समसम्बन्धी विधिर्यथासंख्यं स्यात्। कियँ ह्य, किं ह्यः। किवँ ह्वलयति, किंह्वलयति। किलँ ह्लादयति, किं ह्लादयति।**

**संस्कृतव्याख्या**- यथासंख्यम्, अनुदेशः समानाम् इति सूत्रस्य पदच्छेदः। संख्यामनतिक्रम्य यथासंख्यम्, संख्यानुसारम् इत्यर्थः, अनुद्दिश्यते इति अनुदेश पश्चादुच्चार्यते विधानम् इति तात्पर्यम्। समानाम् इत्यत्र सम्बन्धसामान्ये षष्ठी। साम्यं च इह संख्यातो विधानम्। इत्थम् यत्र समानसम्बन्धीविधिः= सङ्ख्याक्रमानुसारं भवति। अर्थात् स्थान्यादेशयोः, उद्देश्यविधेययोः समानसङ्ख्या भवति तत्र यथाक्रमम् एव विधिर्भवतीति। तद्यथा यथा **एचोऽयवायाव** इत्यादौ प्रथमस्य स्थानिनः प्रथमः आदेशः, द्वितीयस्य द्वितीयः तथैव यपरके हकारे परे मकारस्य यकारः, वपरके हकारे मकारस्य वकारः, लपरके हकारे परे मकारस्य लकारः आदेशः स्यादिति।

कियँ ह्य, किं ह्यः। किवँ ह्वलयति, किं ह्वलयति। किलँ ह्लादयति, किं ह्लादयति इति।

**किं ह्मलयति, किम् ह्मलयति**- किम्+ह्मलयति इत्यत्र '**हे मपरे वा**' इति सूत्रेण विकल्पेन मकारस्य स्थाने मकारादेशे **किम् ह्मलयति,** विकल्पपक्षे **मोऽनुस्वारः** इति सूत्रेण मकारस्यानुस्वारे **किं ह्मलयति** इति रूपं भवति।

**कियँ ह्यः, किं ह्यः**- किम् ह्यः इत्यवस्थायां **हे मपरे वा** इति वार्तिकेन यपरकेहकारे सति मकारस्य स्थने विकल्पेन अनुनासिके यँकारे कृते **कियँ ह्यः,** विकल्पपक्षे **मोऽनुस्वार** इति सूत्रेण मस्यनुस्वारे **किं ह्य** इति रूपं भवति।

एवमेव **किवँ ह्वलयति, किलँ ह्लादयति** इत्यादीनि रूपाणि बोध्यम्।

**नपरे नः ८.३.२७ नपरे हकारे परे मस्य नः स्याद्वा। किन् ह्नुते, किं ह्नुते।**

**संस्कृतव्याख्या**- अत्र सूत्रे हे परे वा इत्यतः वा इत्यनुवर्तते, **मोऽनुस्वारः** इति सूत्राच्च मः इत्यनुवर्तते। एतेन मपरके हकारे सति मकारस्य स्थाने विकल्पेन नकारादेशः स्यादिति सूत्रार्थः सम्पद्यते। तद्यथा- किम् ह्नुते, किं ह्नुते।

**किन् ह्नुते, किं ह्नुते**- किम् ह्नुते इत्यत्र '**नपरे नः**' इति सूत्रेण नपरे हकारे परे मकारस्य स्थाने विकल्पेन नकारादेशे किन् ह्नुते, विकल्पपक्षे किं ह्नुते इति रूपं सिद्ध्यति।

**ङणोः कुक्टुक् शरि ८.३.२८ ङकारणकारयोः कुक्टुकावागमौ वा स्तः। कुक्टुकोरसिद्धत्वाज्जश्त्वं न। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् ( वा. ५०२३ ) पौष्करसादिराचार्यः। प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः। सुगण्ठ्षष्ठः, सुगण्ट् षष्ठः, सुगण् षष्ठः।**

**संस्कृतव्याख्या**- सूत्रेऽस्मिन् पदत्रयमस्ति। ङ् ण चेति ङणौ तयोः ङणोः इति षष्ठ्यन्तं पदम्, कुक् च टुक् चेति तयोः समहारद्वन्द्वघटितं प्रथमान्तं पदं कुक्टुक् इति। शरि इति सप्तम्यन्तं पदम्। अत्र **हे मपरे** वा इत्यतो वा इत्यनुवर्तते। कुक् टुक् इत्यनयोः कित्वात् **आद्यन्तौ टकितौ** इति सूत्रेण स्थानिनोऽन्तावयवः। **यथासंख्यमनुदेशः समानाम्** इति सूत्रेण ङकारस्य कुकागमः, णकारस्य टुकागमश्चेत्यन्वयः। इत्थं सूत्रस्यार्थो भवति यत्-शर् प्रत्याहारे परे ङकारस्य णकारस्य च यथाक्रमं कुक् टुक् इत्यागमौ स्तः इति। तद्यथा- प्राङ् षष्ठः, सुगण् षष्ठः- इत्यत्र ङकाणकारयोः कुक्टुकागमे प्राङ्क् षष्ठः, सुगण् ट् षष्ठः इत्यवस्थायां ककारटकारयोः पूर्वावयवत्वेन पदान्तत्वं स्वीकृत्य झलां जशोऽन्ते इति सूत्रेण जश्त्वमाशङ्क्य मूले कथयति- **कुक्टुकोरसिद्धत्वाज्जश्त्वं नेति।** अर्थात् **झलां जशोऽन्ते** (८.२.३९) इति सूत्र दृष्ट्या अस्य सूत्रस्य असिद्धत्वाज्जश्त्वं न भवतीति।

**( चयो पौष्क----- )**– इदं वार्तिकम्। पौष्करसादिराचार्यः, तस्य मत इत्यर्थः। शरप्रत्याहारे परे चय् प्रत्याहारस्य वर्णस्य स्थाने तस्यैव वर्गस्य द्वितीयो वर्णो भवति इति वार्तिकार्थः। तथा च विकल्पेनेदं भवतीति फलितार्थः। तथाहि– प्राङ्क् षष्ठः इत्यवस्थायां द्वितीयवर्णे कृते प्राङ् ख् षष्ठ इति, कुकागमाभावे च प्राङ् षष्ठ इति।

एवमेव सुगण् षष्ठः इत्यत्र विकल्पेन टुकागमे सुगण् ट् षष्ठः, **चयोद्वितीयादिना** द्वितीये वर्णे कृते **सुगणठ्** षष्ठ, विकल्पपक्षे **सुगण्** षष्ठ इति रूपं भवतीति।

अत्रेदमाशाङ्कते यत् प्राङ् ख् षष्ठ इत्यत्र **खरि च** इत्यनेन चर्त्वे पुनः ककारादेशः स्यादिति। तत्रेदं बोध्यं यत् खकारारम्भविधिसामर्थ्यात् चर्त्वन्न भवतीति। अर्थात् एतत् वार्तिकारम्भ तत्पर्यात् इति भावः।

**डः सि धुट् ८.३.२९ डात्परस्य सस्य धुड् वा स्यात्। षट्त् सन्तः, षट् सन्तः।**

**संस्कृतव्याख्या**– सूत्रे पदत्रयम्। डः इति पञ्चम्यन्तं पदं तेन **तस्मादित्युतरस्येत्यादि** परिभाषया परस्येत्यर्थो लभ्यते। एतेन डात्परस्य सस्य इत्यर्थः। धुट् इति प्रथमान्तं विधेयं पदम् तेन धुट् स्यादित्यर्थः। **हे मपरे** वा इत्यतो वा इत्यनुवर्तते। इत्थं डकारात्परस्य सस्य विकल्पेन धुडागमो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा– षड् सन्तः इत्यत्र धुडागमेऽनुबन्धलोपे षड् ध् सन्तः, लक्ष्यभेदात् डकारधकारयो चर्त्वात् **षट्त्सन्तः**, विकल्पपक्षे **षट् सन्त** इति।

**षट् सन्तः, षट्त्सन्तः**– षट् सन्त इत्यत्र डः सि धुट् इति सूत्रेण डात्परस्य सस्य धुडागमेऽनुबन्धलोपे षड् ध् सन्तः इति जाते **खरि च** इति सूत्रेण धकारस्य डकारस्य च प्रथमद्वितीय क्रमेण चर्त्वे वर्णसम्मेलने **षट्त्सन्तः**, विकल्पपक्षे धुडागमाभावे चर्त्वे **षट् सन्त** इति रूपं भवति।

**नश्च ८.३.३० नकारान्तात्परस्य सस्य धुड् वा स्यात्। सन्त्सः, सत्सः।**

**संस्कृतव्याख्या**– पूर्वसूत्रादत्र सि धुट् इति, वा इति चानुवर्तते। अत्र नः इति पञ्चमी तेन तस्मादित्युत्तरस्य इति परिभाषया नान्तात् परस्य इत्यर्थोलभ्यते तेन नकारात् परस्य सस्य विकल्पेन धुडागमः स्यादिति सूत्रार्थो भवति। तद्यथा सन् स इति स्थितौ नकारात्परस्य धुडागमेऽनुबन्धः सन् ध् सन्तः धस्य चर्त्वे **सन्त्सः** विकल्पपक्षे सन्सः इति रूपं भवतीति।

**शि तुक ८.३.३१ पदान्तस्य नस्य शे परे तुग्वा स्यात्। शश्छोऽटि ( सू. १२० ) इति छत्वविकल्पः। पक्षे झरो झरि ( सू. ७१ ) इति चलोपः। सञ्छम्भुः, सञ्च्छम्भुः, सञ्च् शम्भुः, सञ् शम्भुः।**

**ञछौ अचछा ञचशा ञशावति चतुष्टयम्।**

**रूपाणामिह तुक् छत्वचलोपानां विकल्पनाद्।।**

**संस्कृतव्याख्या**– सूत्रेऽस्मिन् पदद्वयं वर्तते। शि इति सप्तम्यन्तं, तुक् इति प्रथमान्तं विधेयं पदम्। पूर्वसूत्रात् नः इति पञ्चम्यन्तं पदमनुवर्तते तच्चात्र षष्ठ्यन्ततयाश्रीयते **पदस्य** अधिकारः तत्रावयवषष्ठीविधानात् पदान्तवयस्य इत्यर्थः। **हे मपरे** वा इति सूत्रात् वा इत्यनुवर्तते। **आद्यन्तौ टकितौ** इति सूत्रेण तुकागमः कित्वादन्ते भवति। इत्थम्– शकारे परे सति पदान्तावयवस्य नकारस्य विकल्पेन तुकागमो भवतीति सूत्रार्थः। **तद्यथा– सन् शम्भुः**, अत्र विकल्पेन तुकागमे सन् त शम्भु, शकारस्य विकल्पेन छत्वे सन् त् छम्भु, अत्र तकारस्य श्चुत्वे स न् च् छम्भु इत्यवस्थायां **झरो झरि सवर्णे** इति सूत्रेण विकल्पेन चकारलोपे, श्चुत्वे च सञ् छम्भुः। इत्थम्– तुगागमस्य छत्वस्य चलोपस्य वैकल्पिकत्वात् ञकारछकारघटितमेकं सञ्छम्भु इति, ञ च छ इति वर्णत्रयघटितं सञ्च्छम्भु इति, छत्वाभावे ञ्च्श्घटितं सञ्च्शम्भु इति ञकारशकारघटितं रूपं **सञ्शम्भु** इति चत्वारि रूपाणि भवन्ति।

**सञ्छम्भुः, सञ्च्छम्भुः, सञ्चशम्भुः, सञ्शम्भुः**– सन् शम्भु इत्यत्र **शि तुक्** इति सूत्रेण विकल्पेन तुकागमेऽनुबन्धलोपे सन् त् शम्भु इति जाते **'स्तोः श्चुना श्चुः'**, इति सूत्रेण तकारस्य पूर्वं श्चुत्वे च, ततः नकारस्य

ञकारे कृते **सञ्च्शम्भु** इति **'शश्छोऽटि'** इति सूत्रेण विकल्पेन शकारस्य छत्वे **सञ्च्छम्भु** इति, **'झरो झरि सवर्णे'** इति सूत्रेण विकल्पेन चकारस्य लोपे **सञ्छम्भु** इति, 'तुगागमाभावपक्षे' नकारस्य श्चुत्वे ञकारे कृते **सञ्शम्भु** इति रूप चतुष्टयं भवति।

**ङमो ह्रस्वादचि ङमुण् नित्यम् ८.३.३२**

**ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः।**

**संस्कृतव्याख्या–** सूत्रे ङम् इति प्रत्यहारः। ङमः इति पञ्चम्यन्तं पदम्। पदस्यात्र अधिकारः तच्च ङम् इत्यस्य विशेषणत्वात् पञ्चम्यन्तया विपरिणम्यते। ह्रस्वात् इति पञ्चम्यन्तं तेन तस्मादित्युत्तरस्येत्यादिना परस्य इत्यर्थे लाभे ह्रस्वात् परस्य इत्यर्थः। ङमुड् इति प्रथमान्तं विधेयं पदं तेन ङमुट् स्यात् इत्यर्थः। नित्यम् इति क्रियाविशेषणं पदम्। ङम इति ह्रस्वात् विशेषणसम्बन्धमनुभूय पदविशेषणत्वं भवति तस्मात् तदन्तपरम्। इत्थम् ह्रस्वात् परो यो ङम् तदन्तात् परस्य अचो नित्यं ङमुडागमो भवतीति सूत्रार्थः सम्पद्यते। अत्र ङमुट् इत्यत्र टकार इत्, उकार उच्चारणार्थः। संज्ञायां कृतं टित्वं संज्ञिभिः सह सम्बध्यते ततः ङुट्, णुट् नुट् इति त्रय आगमाः। यथासंख्यमन्वयः। एतेन ङकारात्परस्य अचो ङुट्, णकारात्परस्य अचो णुट्, नकारत्परस्याचो नुडागमः। तद्यथा– **प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युत** इति।

**प्रत्यङ्ङात्मा–** प्रत्यङ् आत्मा इत्यत्र ह्रस्वात् परस्य ङमन्तपदस्य प्रत्यङ् इत्यस्य **'ङमो ह्रस्वादचि ङमुण् नित्यम्'** इति सूत्रेण ङमुडागमेऽनुबन्धलोपे वर्णसम्मेलने च **प्रत्यङ्ङात्मा** इति।

**सुगण्णीशः---** सुगण् ईश इत्यत्र **'ङमो ह्रस्वादचि ङमुण्'** नित्यम् इति सूत्रेण ईकारात् प्राग् णुडागमेऽनुबन्धलेपे वर्णसम्मेलने **सुगण्णीशः** इति रूपं भवति।

**सन्नच्युतः–** सन्+ अच्युतः इति स्थितेः **'ङमो ह्रस्वादचि ङमुण् नित्यम्'** इति सूत्रेण अकारात् प्राग् नुडागमेऽनुबन्धलोपे वर्णसम्मेलने **सन्नच्युतः** इति रूपं भवति।

**समः सुटि ८.३.५ समो रुः स्यात्सुटि। अलोऽन्त्यस्य ( सू. ४२ )**

**संस्कृतव्याख्या–** अत्र पदद्वयम्। समः इति षष्ठ्यन्तं सुटि इति सप्तम्यन्तं पदम्। अत्र **'मतुवसो रु सम्बुद्धौ छन्दसि'** इत्यस्मात् स इत्यस्यानुवृत्तिर्भवति। **षष्ठीस्थाने योगा** इति सूत्रेण स्थाने इत्यस्योपस्थितिः सुटि इत्यस्य सप्तम्यन्तत्वात् **तस्मिन्नित्यादिसूत्रेण** 'अव्यवहितपूर्वस्य' इत्यर्थो लभ्यते। **अलोऽन्त्यस्य** परिभाषया अन्त्यस्य अल स्थाने इत्यर्थो लभ्यते। इत्थं समः मकारस्य स्थाने रुः इत्यादेशो भवति सुटि परे इति सूत्रार्थो भवति। **तद्यथा–** सम् स्कर्त्ता इत्यत्र सुटः सकारपरत्वात् मकारस्य स्थाने रु इत्यादेशेऽनुबन्धलोपे सम् र् स्कर्त्ता इति स्थिते–

**अत्रानुनासिकः पूर्वस्य तु वा ८.३.२ अत्र रु प्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्।**

**संस्कृतव्याख्या–** अत्र अनुनासिकः पूर्वस्य तु वा इति सूत्रस्य पदच्छेदः। सूत्रे अत्र इति पदेन **'मतु वसौ रु सम्बुद्धौ'** इति रुत्वविध्यनन्तरमस्य सूत्रस्य पाठात् रु प्रकरणमिति गृह्यते। पूर्वत्वं तु रु इत्यपेक्षया। सूत्रेऽनुनासिकः इति प्रथमान्तं विधेयं पदम्, तु वा इत्यव्ययम्। इत्थम् अत्र रु प्रकरणे रोः पूर्ववर्णस्य विकल्पेन अनुनासिकादेशो भवतीति सूत्रार्थः सङ्गच्छते। अस्मिन् सूत्रे तु ग्रहणं वा ग्रहणं च स्पष्टार्थम्। तथाहि– उत्तरसूत्रे अनुनासिकाभावपक्षानुवादादेव विकल्पस्य सिद्धत्वात्। एवं परस्य नित्यं रुत्वं पूर्वस्य तु अनुनासिकः विकल्प इति वैषम्यस्य सिद्धत्वात् एव द्योतनार्थस्तु शब्दोऽपि स्पष्टार्थ एव। इत्थं सर् स्कर्त्ता इत्यत्र सकारादकारस्य अनुनासिके कृते सँर् स्कर्त्ता इति जाते–

**अनुनासिकात्परोऽनुस्वारः ८.३.४ अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात्। खरवसानयोर्विसर्जनीयः ( सू. ७६ )**

**संस्कृतव्याख्या**– अस्मिन् सूत्रे पदत्रयम्। अनुनासिकात् इति ल्यप् लोपे पञ्चम्यन्तं पदम्, तेन अनुनासिकं विहाय इत्यर्थः। परः इति प्रथमान्तं पदं परत्वञ्च रोर्यः पूर्ववर्णस्तदपेक्षया। अनुस्वार इति प्रथमान्तं विधेय पदम्, एतेन अनुस्वारः स्यादिति। अत्र सूत्रे 'पूर्वस्य' इत्युनवर्तते तस्य पञ्चम्यन्ततया विपरिणामो भवति। पूर्वत्वञ्च रु प्रकृतेरेफापेक्षया। आगमत्वं परशब्दलभ्यम्। इत्थं सूत्रस्यार्थो भवति यत्– यत्रानुनासिको भवति तत्पक्षं विहाय, अर्थात् अनुनासिकाभावपक्षे रु इत्यस्मात् यः पूर्ववर्णः तस्मात् परे अनुस्वारागमो भवतीति। एतेन सर् स्कर्त्ता इत्यत्र सकारादकारस्य अनुनासिकाभावपक्षे अकारात्परे अनुस्वारागमे संर् स्कर्त्ता इति स्थिते– रेफस्य विधिं स्मारयति मूल– **खरवसानयोरिति** तेन रेफस्य विसर्गे कृते सं: स्कर्त्ता इति जाते–

**विसर्जनीयस्य सः ८.३.३४ खरि विसर्जनीयस्य सः स्यात्।**

**एतदपवादेन 'वा शरि ( सू. १५१ ) इति पाक्षिके, विसर्गे प्राप्ते–**

**संपुंकानां सो वक्तव्यः ( वा. ४८९२ ) सँस्स्कर्त्ता संस्स्कर्ता।**

**समो वा लोपमेके इति भाष्यम्। लोपस्यापि रु प्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयम्। द्विसकारं तूक्तमेव। तत्र 'अनचि च' ( सू. ४८ ) इति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्यातत्वेनानुस्वारस्याप्यच्त्वात्। अनुनासिकवतां त्रयाणां 'शरः खयः' ( वा. ५०१९ ) इति क द्वित्वे षट्। अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश। एषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे चैकतं द्वितं त्रितमिति चतुष्पञ्चाशत्। अणोऽनुनासिकत्वेऽष्टोत्तरं शतम्।**

**संस्कृतव्याख्या**– पदद्वयमत्र वर्तते। विसर्जनीयस्य इति षष्ठ्यन्तं पदम्, स इति प्रथमान्तम्। विसर्जनीयस्य षष्ठ्यन्तत्वात् 'स्थाने' इति पदमनुवर्तते स इति प्रथमान्तं विधेयं पदम्। अत्र **खरवसानयोः** इत्यतः मण्डूकप्लुतिन्यायेन खरि इत्यनुवर्तते। खरि इत्यस्य सप्तम्यन्तत्वात् तदव्यवहितस्य पूर्वस्य विसर्जनीयस्य स्थाने आदेशो भवति। इत्थम् खरि परे तदव्यवहितस्य पूर्वस्य विसर्जनीयस्य स्थाने सकारादेशो भवतीति सूत्रार्थः सम्पद्यते।

अत्र **विसर्जनीयस्य** सः इत्यनेनैव सिद्धे **''संपुंकानाम्''** इति पुनर्विधानं व्यर्थमित्याशङ्कायां कथयन्ति मूले– **एतदपवादेन 'वा शरि'** इति सूत्रेण विकल्पेन विसर्गस्य स्थाने नित्यं सकारं विधातु वार्तिकम् उपन्यस्तमिति।

**सम्पुंकानां सो वक्तव्यः**– इदं वार्तिकम्– सम् पुम् कान् इत्येतस्य सम्बद्धितस्य विसर्गस्य स्थाने सकारादेशः स्यादिति वर्तिकार्थः। सॅः स्कर्त्ता इत्यत्र विसर्गस्य स्थाने सकारादेशे सँस्स्कर्ता: अनुनासिकाभावपक्षे संस्सकर्ता इति।

भष्यकारानुसारं केषाञ्चन आचार्याणां समो मकारस्य लोपः। एतस्मिन् पक्षे एकसकारघटितं सॅस्कर्ता संस्कर्ता इति रूपद्वयम्। यद्यपि अनुस्वारादिविसर्गजिह्वामू–लीयोपध्मानीयानां वर्णसामाम्नाये पाठो नास्ति तथा तेषां पाठः अकारेण सह शर्प्रत्याहारे पाठः कर्त्तव्यः। एतत्स्वीकारे अनुस्वारस्यापि अच्त्वात् सकारस्य द्वित्वम्। इत्थम् अनुनासिकपक्षे अनुस्वारपक्षे च एकसकारघटितं द्विसकारघटितं त्रिसकारघटितं द्वयं द्वयं रूपं भवति।

किञ्च अनुनासिकपक्षे त्रयाणां 'शरः खयः' इति नियमेन ककारस्य द्वित्वे त्रीणि रूपाणि अतिरिक्तान्यपि भवन्ति। इत्थम्– अनुनासिकपक्षे ककारस्य द्वित्वे षड्रूपाणि। अनुस्वारयुक्तेषुरूपत्रयेषु अनुस्वारस्य द्वित्वे षट्, ककारस्यापि द्वित्वे च षट् आहत्य अनुस्वारपक्षे द्वादश रूपाणि।

अन्यदपि अनुस्वारादीनां शर्षु पाठात् शरश्च यर् प्रत्याहारेऽपि पाठात् अनुस्वारस्य यरत्वेनापि **अनचि च** इति

सूत्रेण द्वित्वे अनुनासिकपक्षे द्वादश रूपाणि, अनुस्वारपक्षे षड्रूपाणि, आहत्य अष्टादश रूपाणि सिद्ध्यन्ति। एतेषामष्टादशानां तकारस्य द्वित्वे वचनान्तरेण अर्थात् 'यणो मयो द्वे वाच्ये' इति वार्तिकेन पुनर्द्वित्वे तकारत्रयघटितानि अष्टादश रूपाणि। इत्थम् एकतकारघटितानि अष्टादश, तकारद्वयघटितम् अष्टादश तकारत्रयघटितञ्च अष्टादश इति। एतत्सर्वमाहत्य चतुः पञ्चाशत् रूपाणि। उक्तप्रयोगेषु– **अणोऽप्रगृह्यस्यानुनासिकः** सूत्रेण विकल्पे अनुनासिकादेशे अनुनासिकाननुनासिकभेदेन अष्टोत्तरशतं (१०८) रूपाणि भवन्ति इति।

**सँस्कर्ता, संस्कर्त्ता**– सम्+स्कर्त्ता इत्यत्र **समः सुटि** इति सूत्रेण समो मकारस्य रुत्वे अनुबन्धलोपे सर् स्कर्ता इति जाते '**अत्रानुनासिकपूर्वस्य तु वा** इति सूत्रेण रेफात् पूर्वस्य अकारस्य अनुनासिके सँ र् स्कर्ता इति जाते विकल्पपक्षे च **अनुनासिकात्परोऽनुस्वार** इति सूत्रेण अनुस्वारागमे संर्स्कर्ता इति जाते '**खरवसानयोर्विसजनीयः**' इति सूत्रेण रेफस्य विसर्गे सँः स्कर्ता, संः स्कर्ता इति जाते '**विसर्जनीयस्य सः**' इति सूत्रेण नित्यं विसर्गस्य सकारादेशे प्राप्ते तं प्रबाध्य **वा शरि** इति सूत्रेण विकल्पेन प्राप्ते तमपि प्रबाध्य **सम्पुंकानां सो वक्तव्यः** इति वार्तिकेन विसर्गस्य सकारादेश **सँस्स्कर्ता, संस्स्कर्ता** इति '**समो वा लोपमित्येके**' इत्यस्मिन् पक्षे मकारलोपे एकसकारघटितम् सँस्कर्ता, संस्कर्ता इति रूपं सिद्ध्यति।

**पुमः खय्यम्परे ८.३.६ अम्परे खयि पुम् शब्दस्य रुः स्यात्।**

**व्युत्पत्तिपक्षे अप्रत्ययस्य ( सू. १५५ ) इति षत्वपर्युदासात् ≍ क ≍ पयोः प्राप्तौ, अव्युत्पत्तिपक्षे तु षत्वप्राप्तौ, संपुकानाम् ( वा. ४८९२ ) इति सः। पुँस्कोकिलः पुंस्कोकिलः। पुँस्पुत्रः– पुंस्पुत्रः। अम्परे किम्? पुंक्षीरम्। खयि किम्– पुंदासः। ख्याञादेशे न ( वा. १५९१ ) पुंख्यानम्।**

**संस्कृतव्याख्या**– सूत्रेऽस्मिन् पदत्रयम्। पुमः इति षष्ठ्यन्तं, खयि इति सप्तम्यन्तम् अपरे इति सप्तम्यन्तम्। अम् परो यस्मात् सः अम्परः तस्मिन् इति। अत्र मतुवसो रु सम्बुद्धौ **छन्दसि** इत्यतः रु इत्यस्यानुवृत्तिर्भवति। एतेन अम्परके खय् प्रत्याहारे परे पुम्शब्दस्य मकारस्य स्थाने रु इत्यादेशो भवतीति सूत्रार्थः सङ्गच्छते। तद्यथा– पुमान् कोकिल इति विग्रहे समासे विभक्तिलोपे संयोगान्तसकारलोपे पुम् कोकिल इति जाते मकारस्य रुत्वे अनुनासिकानुस्वारविकल्पे, विसर्गे **संपुंकानां सो वक्तव्य** इत्यनेन विसर्गस्य सकारादेश **पुँस्कोकिलः पुंस्कोकिल** इति। अत्रेदमाशङ्कते **विसर्जनीयस्य स** इति सूत्रेणैव सिद्धे **संपुंकानामिति** पुम्ग्रहणं व्यर्थमिति। अत्रोच्यते उत्तरमुखेन मूले– **व्युत्पत्तिपक्षे अप्रत्ययेत्यादि।** अस्येदं तात्पर्यम्, व्युत्पत्तिपक्षे पुम् इत्यस्य प्रत्ययत्वात् **इदुदुपधस्य चाप्रत्ययस्य'** इत्यस्य सूत्रस्य अप्राप्तौ पुँःकोकिलः, पुंःकोकिलः इत्यवस्थायां कुप्वो ≍ क ≍ पौ च इति सूत्रेण जिह्वामूलीयः प्राप्नोति, पुँः पुत्रः, पुं पुत्रः इत्यत्र उपध्मानीयः प्राप्नोति। अव्युत्पत्तिपक्षे **सम्पुङ्कानाम्** इति सः इदुदुपधस्य चेत्यादिना षः प्राप्नोति तं प्रबाध्य **सम्पुंकानां सो वक्तव्य** इति वार्तिकेन सः इति।

**पुँस्कोकिलः, पुंस्कोकिलः**– पुम्+कोकिलः इत्यत्र **पुमः खय्यम्परे** इति सूत्रेण मकारस्य रुत्वेऽनुबन्धलोपे पुर् कोकिल इति जाते **अत्रानुनासिकपूर्वस्य** तु वा इति सूत्रेण रेफात्पूर्वस्य उकारस्य अनुनासिकागमे पुँर् कोकिल इति जाते विकल्पपक्षे च '**अनुनासिकात्परोऽनुस्वार**' इति सूत्रेण अनुस्वारागमे पुंर् कोकिल इति जाते '**खरवसानयोर्विसर्जनीयः** इति सूत्रेण रेफस्य विसर्गे पुँः कोकिलः, पुंः कोकिलः इति जाते **सम्पुंकानां सो वक्तव्यः** इति वार्तिकेन विसर्गस्य सकारादेशे **पुँस्कोकिलः, पुंस्कोकिल** इति रूपद्वयं भवति।

सूत्रे अम्परे इति कथनेन पुंक्षीरम् इत्यत्र पुम् शब्दस्य मकारस्य रुत्वं न भवति। एवमेव खयि कथनेन पुम् दासः इत्यत्र मकारस्य रुत्वं न भवति, मकारस्य अनुसारे पुंदास इति।

**ख्याञादेशे न----।** वार्तिकमिदम्। चक्षिङ् धातोः स्थाने ख्याञादेशे कृते अम्परके खयि सत्वेऽपि तत्परे पुम् शब्दस्य मकारस्य रुत्वं न भवति मकारस्य अनुस्वारे कृते पुंख्यानम् इत्येव रूपं भवतीति।

**नश्छव्यप्रशान् ८.३.१ अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान् शब्दस्य। विसर्गः। सत्वम्। श्चुत्वम्। शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि। चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व। पदस्य किम्? हन्ति। अम्परे किम्- सन्त्सरुः। त्सरुः। खड्गमुष्टिः। अप्रशान् किम्- प्रशान्तनोति।**

**संस्कृतव्याख्या**- पदत्रयमत्र वर्तते। नः इति षष्ठ्यन्तं पदं तच्च पदस्य इत्यधिकृतस्य विशेषणम्, विशेषणाच्च तदन्तविधिः। **मतुवसो रु छन्दसि** इत्यतो 'रु' इत्यस्य '**पुमः खय्यम्परे**' इत्यत 'अम्परे' इत्यस्य चानुवृत्तिर्भवति। एतेन अम्परके छव् परे सति नकारान्तस्य पदस्य नस्य स्थाने रु इत्यादेशो भवति प्रशान् शब्दं विहायेति सूत्रार्थः सम्पद्यते। **तद्यथा** शार्ङ्गिन्+छिन्धि इत्यत्र नकारस्य रुत्वे शार्ङ्गिर् छिन्धि, इत्यवस्थायां, अनुनासिके, अनुस्वारागमे, रेफस्य विसर्गे, **विसर्जनीयस्य** स इति सूत्रेण विसर्गस्य स्थाने सत्वे, **स्तोः श्चुना श्चुः** इति सूत्रेण श्चुत्वे शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि इति रूपं भवति। एवमेव चक्रिँस्त्रायस्व, चक्रिंस्यायस्व इति।

**सूत्रे पदस्य इति ग्रहणेन** 'हन्ति' इत्यत्र **नश्छव्यप्रशान्** इत्यनेन नकारस्य रुत्वं न भवति। **अम्परे इति कथनेन** सन्त्सरुः इत्यत्र नकारस्य रुत्वं न।

**अप्रशान् इति ग्रहणेन प्रशान्तनोति** इत्यत्र नकारस्य रुत्वं न भवतीति।

**शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि**- शार्ङ्गिन्+छिन्धि इत्यत्र '**नश्छव्यप्रशान्**' इति सूत्रेण नकारस्य रुत्वे शार्ङ्गिर् छिन्धि इत्यवस्थायाम्, **अत्रानुनासिक पूर्वस्य तु वा** इति सूत्रेण विकल्पेन अुनासिकागमे शार्ङ्गिँर् छिन्धि, विकल्पपक्षे **अनुनासिकात्परोऽनुस्वारः** इति सूत्रेण अनुस्वारागमे शार्ङ्गिँर् छिन्धि इत्यवस्थायाम् '**खरवसानयोर्विसर्जनीयः**' इति सूत्रेण रेफस्य विसर्गे, **विसर्जनीयस्य स** इति सूत्रेण विसर्गस्य सकारादेशे शार्ङ्गिँश्छिन्धि, शार्ङ्गिंश्छिन्धि इति रूपं भवति।

**चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व**- चक्रिन्+त्रायस्य इत्यत्र नश्छव्यप्रशान् इति सूत्रेण नकारस्य रुत्वे, **अत्रानुनासिकपूर्वस्य तु वा** इति सूत्रेण अनुनासिकागमे चक्रिँर् त्रायस्व इति जाते अनुस्वारागमे, **खरवसानयोर्विसर्जनीयः** इति सूत्रेण रेफस्य विसर्गे **विसर्जनीयस्य सः** इति सूत्रेण विसर्गस्य सकारादेशे **चक्रिँस्त्रायस्व,** विकल्पपक्षे अुस्वारागमे **चक्रिँस्त्रायस्व** इति रूपं सिद्ध्यति।

**नृपे ८.३.१० नृन् इत्यस्य रुः स्याद्वा पकारे परे।**

**संस्कृतव्याख्या**- सूत्रे पदद्वयम्। नृन् इति लुप्तषष्ठीकं द्वितीयान्तानुकरणं पदम्, पे इति सप्तम्यन्तं पदम्। षष्ठ्याः सौत्रत्वाल्लुक्। नलोपाभावोऽपि सौत्रत्वादेव। अत्र मतुवसो **रु छन्दसि** इत्यतः 'रुः' इत्यस्य, उभयर्थर्क्षु इत्यतः उभयथा इत्यपि अनुवर्तते। एतेन पकारे परे नृन् इत्यस्य नकारस्य रु कदाचिद् भवति कदाचिन्नेति सूत्रार्थः सम्पद्यते। तद्यथा- नृन् पाहि इत्यत्र नकारस्य रुत्वे नृर् पाहि इति जाते-

**कुप्वो क पौ च ८.३.३७ कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मीयौ स्तः। चाद्विसर्गः। येन नाप्राप्तयायेन ''विसर्जनीयस्य सः''( १३८ ) इत्यस्यापवादोऽयम्। न तु शर्परे विसर्जनीयः ( सू. १५० ) इत्यस्य। तेन वासः क्षौमम् इत्यादौ विसर्ग एव। नॄँ पाहिः, नॄँः पाहि, नंः पाहि, नृन्पाहि।**

**संस्कृतव्याख्या**- कुप्वोः क पौ इति सूत्रस्य पदविभागः, कुश्च पुश्च इति कुपू तयोः कुप्वोः इति सप्तम्यन्तं पदम् क पौ इति प्रथमान्तं विधेयं पदम् अत्र विसर्जनीयस्य स इत्यतो विसर्जनीयस्य इत्यनुवर्तते। एतेन कवर्गे पवर्गे च परे विसर्जनीयस्य (विसर्गस्य) स्थाने जिह्वामूलीयः, उपध्मानीयश्च विसर्गादेशो भवति **पक्षे** विसर्गोऽपि इति सूत्रार्थः सम्पद्यते।

अत्रेदमाशङ्कते यत् कुप्वोः इति जिह्वामूलीयोपध्मानीयविसर्गविधिना यथा विसर्जनीयस्य सत्वं वाधते

तथैव **शर्परे विसर्जनीय** इति केवलविसर्गविधिरपि बाध्यते। तथा च **वासः क्षौमम्** इत्यत्रापि **'कुप्वोः'** इत्यादिना कदाचिद् जिह्वामूलीयः कदाचिद् विसर्गश्च स्याताम् इति। इष्यते च केवलं विसर्ग एव। तदुच्यते मूले– **येन नाप्राप्तेत्यादिः।** अर्थात् अनेन न्यायेन कुप्वो इति विधिः **विसर्जनीयस्य स** इत्यस्यैपवादः। सत्वे प्राप्त एव तदारम्भात्। शर्परे विसर्गनीयस्य तु न, कः करोति इत्यादौ शर्परे खरि इत्यप्राप्तेऽपि **कुप्वो** इत्स्यास्यारम्भात् इति। तेन वासः क्षौमम् इत्यादौ कुप्वोः इति सूत्रेण शर्परे इत्यस्य बाधाभावेन **'शर्परे खरि'** इति केवल विसर्ग एव भवति। इत्थम् नृँः पाहि, नृंः पाहि इति स्थिते विसर्गपक्षे अनुनासिकानुस्वाराभ्यां रूपद्वयम्। नृन्पाहि इति रुत्वाभावे। तथा च पञ्च रूपाणि भवन्तीति।

**नॄँ≍पाहि, नृं ≍ पाहि, नॄँः पाहि, नृंःपाहि, नृन्पाहि – नृन्+पाहि** इत्यत्र **नृन् पे** इति सूत्रेण नकारस्य रुत्वेऽनुबन्ध लोपे नृर् पाहि इति जाते, **अत्रानुनासिक पूर्वस्य तु वा** इति सूत्रेण विकल्पेन अनुनासिकागमे **नॄँर् पाहि** इति जाते विकल्पपक्षे, अनुस्वारागमे नृंर् पाहि इति जाते **'खरवसानयोर्विसर्जनीय'** इति सूत्रेण रेफस्य विसर्गे **नॄँः पाहि नृंः पाहि** इति जाते, कुप्वो ≍ क ≍ पौ च इति सूत्रेण विकल्पेन विसर्गस्य उपध्मानीय कृते नॄँ ≍ पाहि, नृं पाहि इति, विकल्पपक्षे नॄँः पाहि नृंः पाहि इति रूत्वाभावपक्षे नृन्पाहि इति पञ्च रूपाणि सिद्ध्यन्ति।

**कानाम्रेडिते ८.३.१२ कान्नकारस्य सः स्यादाम्रेडिते परे। संपुंकानाम् ( वा ४८९१ ) इति सः। यद्वा।**

**संस्कृतव्याख्या**– कान् आम्रेडिते इति सूत्रस्य पदच्छेदः। कान् इति द्वितीयान्तशब्दस्वरूपपरं षष्ठ्यन्तं पदम्, षष्ठ्याः सौत्रत्वाल्लुक् नलोपाभावोऽपि। **अलोऽन्त्यस्य** इति परिभाषया कान्शब्दान्तस्य इति लभ्यते। स इत्यनुवर्तते। ऐन आम्रेडिते परे कान् शब्दस्य नकारस्य रु इत्यादेशो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा कान् कान् इत्यवस्थायां नकारस्य रुत्वे अनुनासिकागमे, अनुस्वारागमे रेफस्य विसर्गे काँः कान् इति स्थिते, **सम्पुंकानां सो वक्तव्य** इति वार्तिके विसर्गस्य सत्वे काँस्कान्, विकल्पपक्षे कांस्कान् इति। यद्वा= अर्थात् अथवा उक्तवार्तिकेण सकारादेशम् अकृत्वा अग्रिमेन सूत्रेणापि रुत्वं कर्त्तुं शक्यत इति तात्पर्येण अग्रिमं सूत्रम् उपस्थापयति। तथाहि–

**कस्कादिषु च ८.३.४८ ≍ क ≍ पयोरपवादः। एष्विण उत्तरस्य विसर्गस्य षः स्यात् अन्यस्य तु सः। काँस्कान्, कांस्कान्। कौतस्कुतः। सर्पिष्कुण्डिका। धुष्कपालम्। आकृतिगणोऽयम्।**

**संस्कृतव्याख्या**– कस्क आदिर्येषां ते कस्कादयस्तेषु कस्कादिषु इति वैषयिकं सप्तम्यन्तं पदम् च इत्यव्ययम्। अत्र संहितायाम्, पदस्य च अधिकारः। विसर्जनीयस्य सः इत्यतः विसर्जनीयस्य, कुप्वो ≍ क ≍ पौ च इत्यतः कुप्वोः, **इणः षः** इत्यतः इणः इति **सोऽपदादौ** इत्यतः स इति चानुवर्तते। इत्थम् – कस्कादिगणे पठितेषु इणः उत्तरस्य विसर्गस्य स्थाने षकारादेशो भवति अन्यस्य च सकारादेश इति सूत्रार्थः सम्पद्यते।

**काँस्कान्, कांस्कान्**– कान् कान् इत्यत्र **'तस्य परमाम्रेडितम्'** इति सूत्रेण उत्तरस्य कान्शब्दस्य आम्रेडितसंज्ञायां, **कानाम्रेडिते** इति सूत्रेण का पूर्वकाशब्दस्य नकारस्य रुत्वे, कार् कान् इति जाते **अत्रानुनासिकपूर्वस्य तु वा** इति सूत्रेण रेफात्पूर्वस्य विकल्पेन अनुनासिकगमे काँर् कान् इति जाते, विकल्पपक्षे, अनुस्वारागमे कांर् कान् इति जाते, **खरवसानयोर्विसर्जनीयः** इति सूत्रेण रेफस्य स्थाने विसर्गे काँः कान्, कांः कान् इति जाते **सम्पुकानां सो वक्तव्यः**, अथवा **'कस्कादिषु च'** इति सूत्रेण विसर्गस्य सत्वे **काँस्कान्, कांस्कान्** इति। एवमेव कस्+कस् इति स्थिते **ससजषोःरु** इति रुत्वेऽनुबन्धलोपे कर् कः इति स्थिते पूर्ववदेव कस्कः इति।

**कौतुस् कुतः** इति जाते सस्य रुत्वे पूर्ववदेव **कौतुस्कुतः** इति।

**सर्पिस् कुण्डिका** इत्यत्र सकारस्य रुत्वे, पूर्ववदेव **सर्पिष्कुण्डिका** इति रूपं बोध्यम्।

**संहितायाम् ६.१.७२ इत्यधिकृत्य।**

**संस्कृतव्याख्या**– अधिकारसूत्रमिदम्, इत आरभ्य अष्टाध्यायीक्रमानुसारम् अनुदात्तं **पदमेकवर्जम्** ६.१.५७ इति सूत्रपर्यन्तम् अस्य अधिकारः। एतदन्तर्गतानि यानि कार्याणि तत्सर्वाणि संहिताविषये भवन्तीति तात्पर्यम्।

**छे च ६.१.७३ ह्रस्वस्य छे परे तुगागमः स्यात्संहितायाम्। श्चुत्वस्यासिद्धत्वाज्ज श्त्वेन दः। ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः। तस्य चर्त्वेन चः।**

**श्चुत्वस्य असिद्धत्वात्, चोः कुः ( सू. ३७८ ) इति कुत्वं न। स्वच्छाया। शिवच्छाया।**

**संस्कृतव्याख्या**– अत्र पदद्वयम्। छे इति सप्तम्यन्तं पदं तेन छकारे परे इत्यर्थः। च इत्यव्ययम्। अत्र **ह्रस्वस्य पिति कृति तुक्** इत्यस्मात् सूत्रात् ह्रस्वस्य, तुक् इत्यस्य चानुवृत्तिर्भवति। इत्थं छकारे परे ह्रस्वस्य तुकागमो भवति इति सूत्रार्थः सम्पद्यते। तद्यथा स्वस्य छाया इति विग्रहे समासे च **स्व छाया** इत्यत्र तुकागमेऽनुबन्धलोपे च स्व त् छाया इत्यवस्थायां **स्तोः श्चुना श्चुः,** झलां जशोऽन्ते इति सूत्रद्वयस्य युगपत्प्राप्तौ जश्त्वदृष्ट्या श्चुत्वस्य असिद्धत्वात् पूर्वं जश्त्वे कृते स्वद् छाया इति **खरि च** इति सूत्रेण चर्त्वे, **स्तोः श्चुना श्चुः** इति सूत्रेण च श्चुत्वे प्राप्ते चर्त्वस्य असिद्धत्वात् पूर्वं दकारस्य श्चुत्वे जकारे कृते स्व ज् छाया इति स्थिते **खरि च** इति सूत्रेण चर्त्वे **स्वच्छाया** इति। एवमेव शिवच्छाया अपि भवति। अत्र श्चुत्वस्याप्यसिद्धत्वात् 'चोः कुः' इति सूत्रेण कुत्वं न भवति।

**स्वच्छाया** – स्व+छाया इत्यत्र '**छे च**' इति सूत्रेण तुकागमेऽनुबन्धलोपे स्व त् छाया इति जाते श्चुत्वस्य असिद्धत्वात् **झलां जशोऽन्ते** इति सूत्रेण तकारस्य जश्त्वे स्वद् छाया इति जाते, चर्त्वस्य असिद्धत्वात् पूर्वं '**स्तोः श्चुना श्चुः**' इति सूत्रेण दकारस्य श्चुत्वे जकारे कृते स्वज् छाया इति जाते **खरि च** इति सूत्रेण जकारस्य चर्त्वे चकारे कृते स्वच्छाया इति रूपं भवति।

**शिवच्छाया**– शिव+छाया इत्यत्र **छे च** इति सूत्रेण तुकागमेऽनुबन्धलोपे शिव त् छाया इति जाते तकारस्य जश्त्वे दकारे शिव द् छाया इति जाते '**स्तोः श्चुना श्चुः**' इति सूत्रण दकारस्य श्चुत्वे जकारे '**खरि च**' इति सूत्रेण चर्त्वे चकारे वर्णसम्मेलने च शिवच्छाया इति रूपं सिद्ध्यति।

**आङ्माङोश्च ६.१.७४ एतयोश्छे परे तुक् स्यात्। पदान्ताद्वा ( सू. ) इति विकल्पापवादः।**

**संस्कृतव्याख्या**– आङ् च माङ् च तयोः आङमाङोः इति षष्ठी द्विवचनान्तं पदम्, च इत्यव्ययम्। अत्र **ह्रस्वस्य पिति कृति तुक्** इति सूत्रात् तुक् इत्यस्य, **छे च** इति सूत्रात् छे इत्यस्य च अनुवृत्तिर्भवति। एतेन छकारे परे आङ्माङ् इत्यनयोः तुकागमो भवतीति सूत्रार्थः। दीर्घात् इत्येव सिद्धे किमर्थमिदं सूत्रमिति जिज्ञासायां कथयति मूले–

**पदान्ताद्वा** इति वैकल्पिकेन तुकं बाधितुं सूत्रमिदमिति। तद्यथा– आ+छादयति इत्यत्र तुकागमेऽनुबन्धलोपे पूर्ववदेव आच्छादयति इति रूपं भवति। एवमेव मा छिदत् इत्यत्र तुकागमे माच्छिदत् इति।

**दीर्घात् ६.१.७५ दीर्घाच्छे परे तुक् स्यात्। दीर्घस्यायं तुक्, न तु घस्य। सेनासुराच्छाया ( सू. ८२८ ) इति ज्ञापकात्। चेच्छिद्यते।**

**संस्कृतव्याख्या**– अत्रापि संहितायाम् इत्यस्य अधिकारः। अत्र छे इत्यस्य तुक् इत्यस्य चानुवृत्तिर्भवति। एतेन छकारे परे दीर्घवर्णस्य तुकागमो भवति संहितायां विषय इति सूत्रार्थः सम्पद्यते। अयं तुक् दीर्घस्य भवति न तु छस्य **विभाषा सेनासुराच्छाया** इत्यादिसूत्रज्ञापकात्। अत्र दीर्घस्यैवायं तुक् इति। तद्यथा– चेच्छिद्यते इत्यत्र छिदिर् धातो यङि, धातोर्द्वित्वे अभ्यासंज्ञायां हलादिशेषे अभ्यासस्य इकारस्य गुणे चे छिद्यते इत्यत्र तुकागमेऽनुबन्धलोपे जश्त्वे, श्चुत्वे चर्त्वे च **चेच्छिद्यते** इति रूपं भवति।

**पदान्ताद्वा ६.१.७६ दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीच्छाया, लक्ष्मीछाया।**

**इतिहल्सन्धिप्रकरणम्**

**संस्कृतव्याख्या**- पदान्तात् वा इति सूत्रस्य पदच्छेदः। अत्र दीर्घात् इति, तुक् इति चानुवर्तते। वा इति विकल्पबोधकम्। एतेन पदान्तदीर्घात् छकारे परे विकल्पेन तुकागमो भवतीति सूत्रार्थः। तद्यथा- **लक्ष्मीच्छाया लक्ष्मीछाया** इति।

**लक्ष्मीच्छाया-लक्ष्मीछाया**- लक्ष्मी छाया इति स्थिते 'पदान्ताद्वा' इति सूत्रेण विकल्पेन तुकागमेऽनुबन्धलोपे लक्ष्मीत् छाया इति जाते तकारस्य जश्त्वे '**स्तोः श्चुना श्चुः**' इति सूत्रेण श्चुत्वे जकारे लक्ष्मीज् छाया इति जाते **खरि च** इति सूत्रेण जकारस्य चर्त्वे लक्ष्मीच्छाया इति विकल्पपक्षे तुकागमाभावे लक्ष्मीछाया इति रूपं सिद्ध्यति।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितं हल्सन्धिप्रकरणं सम्पूर्णम्।**

-----

# अथ विसर्गसन्धिप्रकरणम्

**विसर्जनीयस्य सः ( सू. 138 ) विष्णुस्त्राता।**

**संस्कृतव्याख्या** – खरि परे विसर्जनीयस्य स्थाने सः स्यादिति हल्सन्धिनिरूपणे इदं व्याख्यातं तथापि प्रकरणानुरोधात् स्मार्यते, विजर्सनीयपदानुवृत्तिप्रदर्शनार्थम्। तथाहि प्रातिपदिकाधिकारात् 'स्वौजस्मौट्....' इत्यादिना सुप्रत्यये तस्य रुत्वे '**खरवसानयोः....**' इति विसर्गे च कृते इदं सूत्रं प्रवर्तते। तद्यथा– 'विष्णुः त्राता' इत्यत्र खरि तकारे परे विसर्गस्य स्थाने सकारादेशे विष्णुस्त्राता इति।

**विष्णुस्त्राता** = विष्णुः+त्राता इत्यत्र '**विसर्जनीयस्य सः**' इति सूत्रेण विसर्गस्य स्थाने सकारादेशे वर्णसम्मेलने विष्णुस्त्राता इति रूपं सिद्ध्यति।

**शर्परे विसर्जनीयः 8.3.35 शर्परे खरि विसर्जनीयस्य विसर्जनीयः, न त्वन्यत्। कः त्सरु :। घनाघनः क्षोभणः। इह यथायथं सत्वं जिह्वामूलीयश्च न।**

**संस्कृतव्याख्या** – अत्र पदद्वयं वर्तते। शर् परो यस्मात् सः शर्परस्तस्मिन् शर्परे इति सप्तम्यन्तं पदम्, विसर्जनीयः इति प्रथमान्तं विधेयं पदम्। अत्र **विसर्जनीयस्य सः** इति सूत्रात् विसर्जनीयस्य, '**खरवसानयोर्विसनीयः**' इति सूत्रात् खरि इत्यस्य चानुवृत्तिर्भवति। खरि इति विशेष्यं तस्मात् शर् परके खरि परे इत्यर्थः। एतेन सूत्रस्यार्थो भवति यत् शर् परके खरि परे विसर्जनीयस्य स्थाने विसर्जनीय एवादेशो भवतीति।

विसर्गस्य विसर्गविधानात् फलं भवति – **न त्वन्यत्** इति। अर्थात् अन्यः कश्चन आदेशो न भवतीति। **अन्यत् किम्** इति **जिज्ञासायां कथयति मूले यथायथम्** = यथासम्भवं सत्वं जिह्वामूलीयश्च न। यथा कः त्सरु इत्यत्र विसर्जनीयस्य सः इति सूत्रेण सत्वं न भवति, घनाघनः क्षोभनः इत्यत्र '**कुप्वोःᳵकᳶपौ च**' इति सूत्रेण जिह्वामूलीयो न भवति।

**कः त्सरुः** = कः+त्सरु इत्यत्र 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य स्थाने सकारादेशे प्राप्ते तं प्रबाध्य 'शर्परे विसर्जनीयः' इति सूत्रेण विसर्गस्य स्थाने विसर्ग एवादेशे कःत्सरु इति रूपं भवति।

**घनाघनः क्षोभणः** = घनाघनः क्षोभणः इत्यत्र 'कुप्वोः  क  पौ च' इति सूत्रेण विसर्गस्य स्थाने जिह्वामूलीये वर्णे प्राप्ते तं प्रबाध्य 'शर्परे विसर्जनीयः' इति सूत्रेण विसर्जनीयस्य स्थाने विसर्जनीय एवादेशे **घनाः घनः क्षोभणः** इति रूपं भवति।

**वा शरि 8.3.36 शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते, हरिश्शेते। 'खर्परे शरि वा विसर्गलोपो वक्तव्यः ( वा. 4906 ) रामस्स्थाता, रामः स्थाता। हरिस्फुरति, हरिः स्फुरति। पक्षे विसर्गे सत्वे च त्रैरूप्यम्। 'कुप्वोः  क  पौ च'( सू.142 ) क  करोति, कः करोति। क  खनति, कः खनति। क  पचति, कः पचति। क  फलति, कः फलति।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्, वा इति विकल्पार्थबोधकं पदम्, शरि इति सप्तम्यन्तं पदं तेन शर्परे इत्यर्थः। अत्र विसर्जनीयस्य सः इति सूत्रात् विसर्जनीयस्य, '**शर्परे विसर्जनीयः**' इति सूत्रात् विसर्जनीयः इत्यस्य चानुवृत्तिर्भवति। एतेन शर् परे विसर्गस्य स्थाने विकल्पेन विसर्ग इत्यादेशो भवतीति सूत्रार्थः। यथा हरिः शेते इत्यत्र **विसर्जनीयस्य सः** इति सूत्रेण नित्यं सकारे प्राप्ते तं प्रबाध्य विकल्पेन विसर्गादेशे हरिः शेते, विकल्पपक्षे सत्वे च हरिश्शेते इति।

**शर्परे खरि......।** इदं वार्तिकम्। खर् परो यस्मात् इति बहुव्रीहिः। शर् इति विशेष्यम्, खर्परके शरि परे विसर्गस्य लोपो वक्तव्य इति वार्तिकार्थः। एतेन विकल्पपक्षे वा शरि इति सूत्रेण विसर्गो भवति। यथा **रामः स्थाता** इत्यवस्थायां विसर्गलोपे राम स्थाता, तदभावे रामः स्थाता इति। एवमेव हरिः स्फुरति, इत्यत्र हरिस्फुरति, विकल्पपक्षे हरिः स्फुरति इति। एतद्विकल्पपक्षे '**विसर्जनीयस्य सः**' इति सूत्रेण सत्वे रामस्थाता, हरिस्स्फुरति इत्येवं रूपत्रयं भवति।

जिह्वामूलीयपक्षे '**कुप्वोः ≍ क ≍ पौ च**' इति सूत्रेण विकल्पेन जिह्वामूलीये कृते क ≍ करोति, कः करोति। क ≍ खनति, कः खनति। क ≍ पचति, कः पचति। क ≍ फलति, कः फलति। इत्यादीनि रूपाणि भवन्ति।

**हरिः शेते, हरिश्शेते** = हरिः शेते इत्यत्र '**विसर्जनीयस्य सः**' इति सूत्रेण नित्ये सत्वे प्राप्ते तं प्रबाध्य '**वा शरि**' इति सूत्रेण विकल्पेन विसर्गस्य स्थाने विसर्गादेशे हरिः शेते, विकल्पपक्षे सकारादेशे, हरिस् शेते इत्यवस्थायां '**स्तोः श्चुना श्चुः**' इति सूत्रेण श्चुत्वे सकारस्य शकारादेशे वर्णसम्मेलने हरिश्शेते इति।

**सोऽपदादौ 8.3.38 विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः।**

**पाशकल्पककाम्येष्विति वाच्यम् ( वा.5033 ) पयस्पाशम्। यशस्कल्पम्। यशस्कम्। यशस्काम्यति।**

**अनव्ययस्येति वाच्यम् ( वा. 4901 ) प्रातः कल्पम्।**

**काम्ये रोरेवेति वाच्यम् ( वा.4902 ) नेह गीः काम्यति।**

**संस्कृतव्याख्या – सोऽपदा...।** सः अपदादौ इति सूत्रस्य पदविभागः। पदस्यादिः पदादिः, न पदादिः अपदादिः तस्मिन् इत्यर्थे सप्तम्यन्तं पदम्। सः इति प्रथमान्तं विधेयं पदम्। अत्र '**विसर्जनीयस्य सः**' इति सूत्रात् विसर्जनीयस्य, 'कुप्वोः ≍ क ≍ पौ च' इति सूत्रात् कुप्वोः इत्यस्य चानुवृत्तिर्भवति। अपदादौ तद् विशेषणम्। एतेन अपदादिकवर्गे पवर्गे च परे विसर्जनीयस्य स्थाने सकारादेशो भवतीति सूत्रार्थः सङ्गच्छते। अत्र वार्तिकेन नियमयति – **पाशकल्पककाम्येष्विति वाच्यम्** इति। अस्यायम्भावः पाश कल्प काम्य इत्येतेषु परेषु एव विसर्जनीयस्य स्थाने सकारादेशः, स्यादिति। तद्यथा पयस्+पाशम् इत्यत्र सकारस्य रुत्वे विसर्गे पयःपाशम् इत्यवस्थायां कुप्वोः इत्यादिसूत्रं प्रबाध्य '**पाशकल्पककाम्येष्विति वाच्यम्**' इति वार्तिकसहकारेण सोऽपदादौ इति सूत्रेण विसर्गस्य सकारादेशे पयस्पाशम् इति। एवमेव यशः कल्पम् इत्यस्य यशस्कल्पम्। यशः कम् इत्यस्य यशस्कम्। यशः काम्यति इत्यस्य यशस्काम्यति इति।

**अनव्ययस्येति वाच्यम्** – इदमपि वार्तिकम् तच्च प्रतिषेधार्थम्। तथाहि अव्ययभिन्नशब्दावयवभूतस्य विसर्जनीयस्य स्थाने सकारादेशो भवति न तु अव्ययस्य इति तात्पर्यम्। तद्यथा – प्रातः कल्पम् इत्यत्र कल्पप्रत्ययत्वात् न सत्वम्, अपितु विसर्ग एव।

**काम्ये रोरेवेति वाच्यम्** – इदमपि शेषपूर्णाकं वार्तिकम् – तथाहि काम्यशब्दे परे रुः इत्यस्य स्थाने निष्पन्नस्यैव विसर्गस्य सकारादेशः षकारादेशः, नान्यस्य निष्पन्नस्य विसर्गस्य स्थाने इति तात्पर्यम्। तद्यथा – गीः काम्यति इत्यत्र गीर् काम्यति इत्यत्र विसर्गस्य स्थाने न सकारादेशः गीः काम्यति इत्येव।

**पयस्पाशम्** = **कुत्सितं पयः** इत्यर्थे पयस् शब्दात् पाशप् प्रत्यये **पयस् पाशम्** इत्यवस्थायां सस्य रुत्वे

विसर्गे पयः पाशम्, इति स्थितौ 'कुप्वोः ≍क ≍पौ च' इति सूत्रेण विसर्गस्य स्थाने जिह्वामूलीये प्राप्ते तं प्रबाध्य '**पाशकल्पककाम्येष्विति वाच्यम्**' इति वार्तिकसहकारेण 'सोऽपदादौ' इति सूत्रेण सकारादेशे वर्णसम्मेलने पयस्पाशम् इति रूपं भवति।

**यशस्कल्पम्** = ईषद् यशः इत्यर्थे यशस् शब्दात् कल्पप्रत्यये यशस् कल्पम् इत्यवस्थायां '**ससजुषो: रुः**' इति सूत्रेण सस्य रुत्वे विसर्गे यशःकल्पम् इत्यवस्थायां 'कुप्वोः ≍क ≍पौ च' इत्यादिना प्राप्तं जिह्वामूलीयं प्रबाध्य '**पाशकल्पककाम्येष्विति वाच्यम्**' इति वार्तिकसहकारेण '**सोऽपदादौ**' इति सूत्रेण विसर्गे सकारादेशे वर्णसम्मेलने यशस्कल्पम् इति रूपं भवति।

**यशस्काम्यति**= यशः काम्यति इत्यर्थे यशस् अम् इत्यस्मात् काम्यच् प्रत्ययेऽनुबन्धलोपे सुपो लुकि यशस् काम्य इत्यवस्थायां सस्य रुत्वे विसर्गे, यशः काम्यति इति स्थितौ कुप्वोरित्यादिसूत्रे जिह्वामूलीये प्राप्ते तं प्रबाध्य 'पाशकल्पककाम्येष्विति वाच्यम्' इति वार्तिकसहकारेण 'सोऽपदादौ' इति सूत्रेण विसर्गस्य सत्वे यशस्काम्य इति जाते लटि प्रथमपुरुषैकवचने तिवादिना यशस्काम्यति इति।

**प्रातःकल्पम्** = प्रातर् इत्यव्ययात् कल्पप्रत्यये प्रातर् कल्प इत्यवस्थायां रेफस्य विसर्गे प्रातः कल्पम् इति स्थितौ, '**विसर्जनीयस्य सः**' इति सूत्रं प्रबाध्य कुप्वोरित्यादिसूत्रेण जिह्वामूलीये प्राप्ते तमपि प्रबाध्य 'सोऽपदादौ' इति सूत्रेण सकारादेशे प्राप्ते '**अनव्ययस्येति वक्तव्यम्**' इति वार्तिकेन अव्ययस्य भिन्न एव सकारादेशात् अस्य च अव्ययत्वात् निषेधे विसर्ग एव जाते प्रातः कल्पम् इति रूपं भवति।

**गीः काम्यति** = इत्यत्र '**काम्ये रोरेवेति वाच्यम्**' इति वार्तिकेन गीः काम्यति इत्यत्रापि सकारादेशस्य निषेधे विसर्ग एव जाते गीः काम्यति इति रूपं भवति।

**इणः षः 8.3.39 इणः परस्य विसर्गस्य षकारः स्यात् पूर्वविषये। सर्पिष्पाशम्। सर्पिष्कल्पम्। सर्पिष्कम्। सर्पिष्काम्यति।**

**संस्कृतव्याख्या** = सूत्रे पदद्वयं वर्तते। इणः इति पञ्चम्यन्तं, तस्मात् परस्य इत्यध्याहार्यम्, षः इति प्रथमान्तं विधेयं पदम्। अत्र **विसर्जनीयस्य सः** इत्यस्मात् विसर्जनीयस्य **कुप्वोरित्यादितः** कुप्वोरित्यस्य, **सोऽपदादौ** इत्यतः अपदादौ इत्यस्य चानुवृत्तिर्भवति। इत्थम् इणः परस्य विसर्गस्य स्थाने षकारादेशो भवति अपदादौ कवर्गे पवर्गे च वर्णे पर इति सूत्रार्थः। अत्र 'कुप्वोः ≍क ≍पौ च' इति अपदादौ इति, अनव्ययस्य इति काम्ये रोरेव इति च सम्बद्ध्यते। तदेवोच्यते मूले वृत्तौ - पूर्वविषये इति। एतेन उच्चैः कल्पम्, दोः पाशम्, गीः काम्यतीत्यादौ न षत्वमिति तात्पर्यम्। सूत्रोदाहरणं यथा - सर्पिष्पाशम् इत्यादि।

**सर्पिष्पाशम्** = कुत्सितं सर्पिः इत्यर्थे सर्पिस् शब्दात् पाशप् प्रत्यये सर्पिस् पाशम् इत्यवस्थायां सस्य रुत्वे विसर्गे 'सर्पिः पाशम्' इति जाते, 'कुप्वोः ≍क ≍पौ च' इति सूत्रेण जिह्वामूलीये प्राप्ते तं प्रबाध्य '**पाशकल्पककाम्येष्विति वाच्यम्**' इति वार्तिकसहकारेण '**इणः षः**' इति सूत्रेण विसर्गस्य षत्वे पयष्पाशम् इति रूपं भवति। एवमेव सर्पिष्कल्पम्, सर्पिष्कम्, सर्पिष्काम्यति इत्येतानि रूपाणि सिद्ध्यन्तीति बोध्यम्।

**नमस्पुरसोर्गत्योः 8.3.40 गतिसञ्ज्ञयोरनयोर्विसर्गस्य सः कुप्वोः परयोः। नमस्करोति। साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा। तदभावे नमः करोति। पुरोऽव्ययम् ( सू. 768 ) इति नित्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः पुरौ पुरः प्रवेष्टव्याः।**

**संस्कृतव्याख्या** - 'नमस्पुरसोः गत्योः' इति सूत्रस्य पदविभागः। **अत्र विसर्जनीयस्य सः** इति सम्पूर्णसूत्रमनुवर्तते, कुप्वोरित्यतः कुप्वोः इत्यस्य चानुवृत्तिर्भवति। अत्र उत्तरपदादौ इति संबध्यते। इत्थं सूत्रस्यार्थो भवति यत् गतिसंज्ञकस्य नमस् शब्दस्य, पुरस् शब्दस्य च विसर्गस्य स्थाने सकारादेशो भवति कवर्गे पवर्गे च वर्णे परे इति। तद्यथाः नमस् इत्यव्ययात् करोति इति क्रियया अन्वये नमस् इत्यस्य सस्य रुत्वे विसर्गे नमः करोति इत्यत्र नमः

शब्दस्य **साक्षात् प्रभृतीनि** च इति सूत्रेण गतिसंज्ञायाम् अनेन सूत्रेण सकारादेशे **नमस्करोति** इति। गतिसंज्ञाभावे **नमः करोति** इति।

**पुरोऽव्ययम्** इति सूत्रेण अव्ययसंज्ञकस्य पुरस् शब्दस्य नित्यं गतिसंज्ञा भवति तेन पुरस्करोतीति एकमेव रूपं भवति। पूः पुरौ इत्यत्र गतिसंज्ञाया अभावात् सकारादेशो न भवतीति बोध्यम्।

**नमस्करोति** = नमस् इत्यव्यस्य कृधातुना सह प्रयोगे साक्षाप्रभृतित्वात् विभाषया गतिसंज्ञायां नमः करोति इत्यत्र नमस्पुरसोर्गत्योः इति सूत्रेण विसर्गस्य स्थाने सकारादेशो **नमस्करोति** इति, गतिसंज्ञाभावे **नमः करोति इति**। अत्र 'कुप्वोः ≍ क ≍ पौ च' इत्यनेन जिह्वामूलीये कृते नमः ≍ करोति इत्यपि रूपं सिद्ध्यति।

**पुरस्करोति** = पुरस् शब्दात् कृधातुप्रयोगे **'पुरोऽव्ययम्'** इतिसूत्रेण नित्यं गतिसंज्ञायाम् पुरः करोति इत्यत्र **'नमस्पुरसोर्गत्योः'** इति सूत्रेण विसर्गस्य सकारादेशे पुरस्करोति इत्येकमेव रूपं भवतीति।

**इदुदुपधस्य चाप्रत्ययस्य 8.3.41 इकारोकारोपधस्याप्रत्ययस्य विसर्गस्य षः स्यात् कुप्वोः। निष्प्रत्यूहम्। आविष्कृतम्। दुष्कृतम्। अप्रत्ययस्य किम्? अग्निः करोति। वायुः करोति। एकदेशशास्त्रनिमित्तकस्य न षत्वम्। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात् ( वा. 4915 ) तेनेह न मातुः कृपा। मुहुसः प्रतिषेधः ( वा.4911 ) मुहुः कामा।**

**संस्कृतव्याख्या** = अत्र इदुदुपधस्य च अप्रत्ययस्य इति सूत्रस्य पदच्छेदः। इत् च उत् च तयोरितरेतरयोगद्वन्द्वसमासे इदुदौ, तौ उपधे यस्य स इदुदुपधः तस्य इत्यर्थे उपधायाम् इकारः उकारः यस्य तादृशस्य शब्दस्य इत्यर्थः। न प्रत्ययोऽप्रत्ययः तस्य अर्थात् प्रत्ययभिन्नस्य इत्यर्थः। अत्र सूत्रे **विसर्जनीयस्य** इति पदम्, **कुप्वोः** इति पदस्य चानुवृत्तिर्भवति। एतेन इकारोपधस्य उकारोपधस्य च प्रत्ययावयवभिन्नस्य विसर्गस्य स्थाने षकारादेशो भवति कवर्गे पवर्गे च वर्णे परे इति सूत्रार्थः सङ्गच्छते। तद्यथा – **निष्प्रत्यूहम्। आविष्कृतमित्यादि।** सूत्रेऽप्रत्यय इति कथनेन **अग्निः करोति** इत्यत्र इदुपधत्वेऽपि विसर्गस्य षकारादेशो न भवति अग्निः इत्यस्य विसर्गस्य प्रत्ययावयवत्वादिति भावः। एवमेव **वायुः करोति** इत्यत्रापि।

**एकादेशशास्त्रनिमित्तकस्य न षत्वम् – भ्रातुष्पुत्रशब्दस्य पाठात्** = इति मूलोक्तस्य अयं भावो यत् वर्णद्वयघटितस्य स्थाने एकादेशे कृते यो विसर्गः तस्य स्थाने **इदुदुपधेत्यादि** सूत्रेण षत्वं न भवति इति कस्कादिगणे भ्रातुष्पुत्रशब्दस्य पाठात् ज्ञायते। यदि एकादेशस्य विसर्गस्यापि अनेन सूत्रेण आदेशः स्यात्तदा भ्रातृशब्दात् ङसिविभक्तौ ऋकारस्य अकारस्य च स्थाने उकारादेशे रपरत्वे भ्रातुः इत्यत्रापि विसर्गस्य इदुदुपधत्वात् विसर्गे सिद्धे, कस्कादिगणे भ्रातुष्पुत्रस्य पाठो न कर्त्तव्यः, कृतश्च तस्मात्सिद्ध्यति एकादेशशास्त्रनिमित्तकस्य न षत्वमिति। एतत्फलं यत् **मातुः कृपा** इत्यादौ एकादेशस्य विसर्गस्य सत्वात् न षत्वम्।

**मुहुसः प्रतिषेधः** = इदं वार्तिकम्, अत्र **इदुदुपधस्य, विसर्जनीयस्य**, षः, **कुप्वोः** इत्येतेषां सम्बन्धस्तेन – ह्रस्वोकारयस्योपाधायां तादृशप्रत्ययभिन्नस्य मुहुस् शब्दस्य विसर्गस्य स्थाने षकारादेशस्य प्रतिषेधो वक्तव्यः।

अर्थात् षकारादेशो न भवतीति। अत एव **मुहुः कामा** इत्येवं रूपं भवति परं पुंस्कामा इत्यादौ भवति।

**निष्प्रत्यूहम्** – प्रत्यूहानाम् (विघ्नानाम्) अभावः इत्यर्थे निस् प्रत्यूह इति जाते सस्य **'ससजुषोः रुः'** इति सूत्रेण रुत्वे, **'खरवसानयोर्विसर्जनीयः'** इत्यनेन विसर्गे निःप्रत्यूह इति जाते, **'इदुदुपधस्य चाप्रत्ययस्य'** इति सूत्रेण विसर्गस्य षकारादेशे वर्णसम्मेलने निष्प्रत्यूहम् इति रूपं भवति।

**आविष्कृतम्** = **प्रकाशे प्रादुरावि स्यादिति कोशशब्दात्** आविस् कृतम् इत्यवस्थायां सकारस्य रुत्वे विसर्गे आविः कृतम् इत्यत्र **'इदुदुपधस्य चाप्रत्ययस्य'** इति सूत्रेण विसर्गस्य स्थाने षकारादेशे वर्णसम्मेलने आविष्कृतम् इति रूपं भवति।

एवमेव दुष्कृतम् इत्येवं रूपमपि बोध्यम्।

**तिरसोऽन्यतरस्याम् 8.3.42 तिरसो विसर्गस्य सो वा स्यात् कुप्वोः। तिरस्कर्ता, तिरः कर्ता।**

**संस्कृतव्याख्या** = तिरसः अन्यतरस्याम् इति सूत्रस्य पदच्छेदः। अत्र **विसर्जनीयस्य कुप्वोः** इत्यस्य, '**सोऽपदादौ**' इत्यतः स इत्यस्य चानुवृत्तिर्भवति। अत्र इणः इति निवृत्तम्, तत्संन्नियोगात् 'ष' इत्यस्यापि निवृत्तिः। इत्थं सूत्रस्यार्थो भवति यत् – तिरस् शब्दावयवस्य विसर्गस्य स्थाने सकारादेशो भवति विकल्पेन कवर्गे पवर्गे च परे इति सूत्रार्थः। तद्यथा – **तिरस्कर्ता**, तिरः कर्त्ता।

**तिरस्कर्ताः, तिरः कर्ता** =तिरस् कर्त्ता इत्यत्र सकारस्य रुत्वे विसर्गे तिरः कर्ता इत्यवस्थायां '**तिरसोऽन्यतरस्याम्**' इति सूत्रेण विकल्पेन स्थाने सकारादेशे तिरस्कर्ता इति विकल्पपक्षे तिरः कर्ता इति रूपं भवतीति।

**द्विस्त्रिश्चतुरिति कृत्वोऽर्थे 8.3.43 कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात् कुप्वोः। द्विष्करोति, द्विःकरोति इत्यादि। कृत्वोऽर्थे किम्? चतुष्कपालः।**

**संस्कृतव्याख्या** – द्विस्त्रिचतुः इति कृत्वोऽर्थे इति सूत्रस्य पदविभागः। द्विश्च त्रिश्च चतुश्च तेषां समाहारद्वन्द्वः द्वित्रिचतु इत्यनुकरणात्मकम् अविभक्तिं पदम्। कृत्वोऽर्थः तस्मिन् कृत्वोऽर्थे इत्यव्ययम्। इति करणानन्तरं शब्दानाम् इति। अत्र विसर्जनीयस्य, कुप्वोरिति, अन्यतरस्याम् इति इणः षः इति चानुवर्तते। कृत्वोऽर्थो नाम संख्यायाः क्रियाभ्यां वृत्तिगणे कृत्वसुच् इति प्रत्ययः। इत्थं सूत्रस्यार्थो भवति यत् **कृत्वसुच्प्रत्ययेऽर्थे** विद्यमानस्य द्विस्, त्रिस् चतुस् इत्येतस्य शब्दस्य विसर्गस्य स्थाने विकल्पेन षकारादेशो भवति कवर्गे पवर्गे च परे इति। तद्यथा –

**द्विष्करोति** = द्विवारं करोति इत्यर्थे कृत्वसुच् प्रत्ययान्तः, द्विस् करोति इत्यवस्थायां सस्य रुत्वे, विसर्गे द्विः करोति इत्यत्र '**विसर्जनीयस्य सः**' इति सूत्रेण विसर्गस्य स्थाने सकारे प्राप्ते तं प्रबाध्य '**कुप्वोःᳲकᳲपौ च**' इति सूत्रेण जिह्वामूलीये प्राप्ते तमपि प्रबाध्य '**द्विस्त्रिश्चतुरिति कृत्वोऽर्थे**' इति सूत्रेण विकल्पेन षकारादेशे द्विष्करोति, जिह्वामूलीये पक्षे द्विᳵकरोति विकल्पपक्षे द्विः करोति इति रूपं भवति।

सूत्रे कृत्वोऽर्थे इति कथनेन **चतुष्कपालः** इत्यत्र चतुर्षु कपालेषु संस्कृत (पुरोडाशः) इति विग्रहे '**तद्धितार्थोत्तरपदसमाहारे च**' इति सूत्रेण समासे अण्प्रत्यये लोपे च चतुर् कपाल इत्यत्र रेफस्य चतुः कपाल इत्यत्र कृत्वोऽर्थस्य अभावात् नेदं सूत्रं प्रवर्तते। अन्यथा अत्रापि विकल्पापत्तिः स्यात् तन्माभूत् तदर्थं कृत्वोऽर्थग्रहणम्। एतेन चतुः कपाल इत्यत्र इदुदुपधेत्यादिना नित्यं षः भवति **चतुष्कपालः** इत्येकमेव रूपं सिद्ध्यति।

**इसुसोः सामर्थ्ये 8.3.44 एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः।**

**सर्पिष्करोति, सर्पिः करोति। धनुष्करोति, धनुः करोति। सामर्थ्यमिह व्यपेक्षा, सामर्थ्ये किम्? तिष्ठतु सर्पिः, पिब त्वमुदकम्।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्, इस् च उस् च तयोः इसुसोः इति षष्ठ्यन्तं पदम्, सामर्थ्ये इति वैषयिकं सप्तम्यन्तं पदम्। अत्र **विसर्जनीयस्य** इति, षः इति, कुप्वोः इति अन्यतरस्याम् इति चानुवर्तते। एतेन सामर्थ्यशब्देषु परस्परम् एकवाक्यतायाम् इस् उस् इत्यनयोः विसर्गस्य स्थाने विकल्पेन षकारादेशो भवति कवर्गे पवर्गे च परे इति सूत्रार्थः। तद्यथा **सर्पिष्करोति** इति।

अत्र सूत्रे सामर्थ्यपदेन व्यपेक्षा गृह्यते। **विशिष्टा अपेक्षा व्यपेक्षा। पदानामाकाङ्क्षायोग्यतासन्निधिवशाद् यः परस्परान्वयः सा व्यपेक्षा।** एवं सामर्थ्यम् एकस्मिन् वाक्ये पदेषु भवति। इदं सामर्थ्यं वाक्येषु विद्यते। यथा राज्ञः पुरुषोऽश्वश्च, राज्ञो देवदत्तस्य च पुरुष इत्यादौ। एतादृशव्यपेक्षालक्षणगतं सामर्थ्यमाश्रित्य एव **सर्पिष्करोति** इत्याद्युदाहरणं सङ्गच्छते। अतो नात्र एकार्थीभावलक्षणं सामर्थ्यं स्वीक्रियते तस्य वृत्तौ एव स्वीकृतत्वात् न तु वाक्ये यथा समर्थसूत्रभाष्ये कैयटादौ स्पष्टम्। तस्मात् **आकांक्षादियोग्यतावशाद्** परम्परान्वयाकाङ्क्षा एव व्यपेक्षा अत्र बोध्या। सूत्रे सामर्थ्यग्रहणं किमर्थम् इति चेत् कथयति – **तिष्ठतु सर्पिः पिब त्वमुदकम्** इति। अत्रेदं तात्पर्यं यत् तिष्ठतु सर्पिः इत्येकं वाक्यम्। पिब त्वमुदकम् इति अन्यत्वाक्यम्। तत्र सर्पिरित्यस्य पिब इत्यत्रान्वयाभावाच्च सामर्थ्यन्नास्ति। सूत्रे सामर्थ्यग्रहणाभावे

सामर्थ्येऽसामर्थ्ये च षत्वसम्भवात् **सर्पिः पिब** इत्यत्रापि षत्वापत्तिः तन्माभूत् तदर्थं सामर्थ्यग्रहणम्। एतेन नात्र षत्वविकल्पः, नापि इदुदुधपस्येत्यादिनापि षः प्रत्ययावयत्वादिति बोध्यम्।

**सर्पिष्करोति सर्पिः करोति** – सर्पिः करोति इत्यत्र '**इसुसोः सामर्थ्ये**' इति सूत्रेण विकल्पेन विसर्गस्य स्थाने षकारादेशे सर्पिष्करोति इति, विकल्पपक्षे '**कुप्वोः ≍ क ≍ पौ च**' इत्यनेन जिह्वामूलीये कृते सपि ≍ करोति इति, तदभावे विसर्गे च सर्पिः करोति इति रूपं सिद्ध्यतीति।

**धनुष्करोति, धनुः करोति** = धनुः करोति इत्यत्र 'इसुसोः सामर्थ्ये' इति सूत्रेण विकल्पेन विसर्गस्य षकारादेशे धनुष्करोति, जिह्वामूलीये पक्षे धनु ≍ करोति, तदभावे धनुः करोति इति रूपत्रयं सिद्ध्यति।

**नित्यं समासेऽनुत्तरपदस्थस्य 8.3.35 इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्कुप्वोः परयोः। सर्पिष्कुण्डिका। अनुत्तरपदस्थस्य इति किम् – परमसर्पिः कुण्डिका। कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थो व्यपेक्षायां नित्यार्थश्च।**

**संस्कृतव्याख्या** – नित्यं समासे अनुत्तरपदस्थस्य इति सूत्रस्य पदविभागः। उत्तरपदे तिष्ठति इति उत्तरपदस्थः, न उत्तरपदस्थ इति अनुत्तरपदस्थः तस्य अनुत्तरपदस्थस्य इति षष्ठ्यन्तं पदम्, नित्यम् इति द्वितीयैकवचनान्तम्, समासे इति वैषयिकं सप्तम्यन्तं पदम्। अत्र इसुसोः इत्यनुवर्तते, कुप्वोरिति, विसर्जनीयस्य च इत्यप्यनुवर्तते। **इणः षः** इत्यस्याप्यनुवृत्तिः। एतेन समासे अनुत्तरपदस्थस्य (उत्तरपदस्थभिन्नस्य) इस् उस् इत्यस्य विसर्जनीयस्य (विसर्गस्य) स्थाने नित्यं षकारादेशो भवति कवर्गे पवर्गे च परे इति सूत्रार्थः सङ्गच्छते। समासे व्यपेक्षालक्षणसामर्थ्यस्यापि सत्वे '**इसुसोः सामर्थ्ये**' इति सूत्रेण षत्वविकल्पे प्राप्ते एतत्सूत्रमिति बोध्यम्। तद्यथा सर्पिषः कुण्डिका इत्यर्थे सर्पिः कुण्डिका इत्यवस्थायां विसर्गस्य स्थाने नित्यं षकारादेशे सर्पिष्कुण्डिका इति। सूत्रे अनुत्तरपदस्थस्य इति कथनेन 'परमसर्पिः कुण्डिका' इत्यत्र विसर्गस्य न षत्वम्, प्रत्ययावयवत्वात् इदुदुपधेत्यादिना अपि न षः।

अत्रेदमाशङ्कते एवं स्वीकारे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इति। अत्रोच्यते समाधानमुखेन मूले – **कस्कादिषु इत्यादि**। अत्रायम्भावः एकवाक्यतापन्नान्वययोग्यताविरहेऽपि षत्वं यथा स्यादिति। इत्थं व्यपेक्षायां पूर्वसूत्रेण प्राप्तं वैकल्पिकं षत्वं प्रबाध्य प्रकृतसूत्रेण नित्यं षकारादेशो भवतीति।

**सर्पिष्कुण्डिका** = सर्पिषः कुण्डिका इत्यर्थे सर्पिः कुण्डिका इत्यवस्थायां '**नित्यं समासेऽनुत्तरपदस्थस्य**' इति सूत्रेण विसर्गस्य स्थाने नित्यं षकारादेशे सर्पिष्कुण्डिका इति रूपं सिद्ध्यति।

**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य 8.3.46 अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात्करोत्यादिषु परेषु। न तूत्तरपदस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्पात्रम्। अयस्सहिता कुशा अयस्कुशा। अयस्कर्णी। अतः किम् – गीः कारः। अनव्ययस्य किम् – स्वः कामः। समासे किम् – यशः करोति। अनूत्तरपदस्थस्य किम् – परमयशः कारः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयमस्ति। अत इति पञ्चम्यन्तं पदम्, कृकमिकंसकुम्भपात्रकुशाकर्णीषु इति द्वन्द्वसमासघटितं सप्तम्यन्तं पदम्, न अव्ययम् इति अनव्ययं तस्य – अनव्ययस्य इति षष्ठ्यन्तं पदम्। अत्र विसर्जनीयस्य इति, सः इति नित्यं समासेऽनुत्तरपदस्थस्य इति सूत्रं चानुवर्तते।

अतः इत्यस्य पञ्चम्यन्तत्वात् अकारादव्यवहितोत्तरस्य इत्यर्थो लभ्यते। एतेन कृ कम् कंस कुम्भ पात्र कुशा कर्णी इत्येतेषु परेषु अनव्ययस्थस्य (अव्ययभिन्नस्य) विसर्गस्य स्थाने नित्यं सकारादेशः स्यात् समासे उत्तरपदस्थस्य विसर्गस्य स्थाने तु न भवतीति सूत्रार्थः। तद्यथा अयः कारः इत्यत्र 'कुप्वोः ≍ क ≍ पौ च' इति सूत्रं प्रबाध्य अनेन सत्वे अयस्कार इति। एवमेव अयस्कामः अयस्कंस इत्यादीनि रूपाणि बोध्यानि। सूत्रे अनव्ययस्य इति कथनेन **स्वः काम** इत्यत्र स्वर् शब्दस्य अव्ययत्वात् न विसर्गस्य सत्वम्। समासे इति कथनेन **यशः करोति** इत्यादिवाक्ये विसर्गस्य स्थाने सकारादेशो न भवति। एवमेव अनुत्तरपदस्थस्य इति कथनेन **परमयशः करोति** इत्यत्र यश इत्यस्योत्तरपदत्वात् तस्य विसर्गस्य न सत्वमिति।

**अयस्कारः** = अयः करोति इत्यर्थे अयस् कार इत्यवस्थायां सकारस्य रुत्वे विसर्गे अयः कार इत्यवस्थायां कृ धातोः परे '**अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य**' इति सूत्रेण विसर्गस्य स्थाने नित्यं सकारादेशे अयस्कार इति रूपं भवति।

एवमेव अयः कामः इत्यत्र अयस्कामः, अयः कंस इत्यत्र अयस्कंसः, अयः कुम्भः इत्यत्र अयस्कुम्भः, अयः पात्रम् इत्यस्य अयस्पात्रम्, अयः सहिता इत्यत्र अयस्सहिता, अयः कर्णी इत्यस्य अयस्कर्णी इत्येतानि रूपाणि भवन्ति इति।

**अधश्शिरसी पदे 8.3.47 एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे। अधस्पदम्। शिरस्पदम्। समास इत्येव। अधः पदम्। शिरः पदम्। अनुत्तरपदस्थस्येव। परमशिरः पदम्। कस्कादिषु च। भास्करः।**

**संस्कृतव्याख्या** – सूत्रे पदद्वयम्। अधश्च शिरश्च इति अधश्शिरसी इति षष्ठ्यर्थे प्रथमान्तं पदम्। पदे इति सप्तम्यन्तं पदम्। अत्र विसर्जनीयस्य, सः इत्यस्य समासे इत्यस्य, अनुत्तरपदस्थस्य इत्यस्य चानुवृत्तिर्भवति। एतेन पदशब्दे परे अधस् शिरस् इत्यनयोः पदयोः विसर्गस्य स्थाने सकारादेशो भवति समासे इति सूत्रस्यार्थः सम्पद्यते। सूत्रोदाहरणं यथा – **अधस्पदम्। शिरस्पदम्।** सूत्रस्य समास एव विधानात् **अधः पदम्** इति वाक्ये न सत्वम्, एवमेव **अनुत्तरपदस्थस्य** इति कथनेन परमशिरः पदम् इत्यत्र न सकारादेशः। सौत्रमनुरुन्ध्य कथयति – कस्कादिषु च **भास्करः** इति। अर्थात् अतः कृकमि इत्यादिसूत्रे तपरकरणात् भाः करः इत्यस्य अप्राप्तौ सत्वविधानार्थं कस्कादिषु पाठात् सत्वे भास्कर इति।

**अधस्पदम्** – पदस्य अधः इत्यर्थे **मयूरव्यंसकादयश्च** इत्यनेन समासे अधः पदस्य पूर्वनिपाते अधस् पदम् इत्यवस्थायां सकारस्य रुत्वे विसर्गे अधः पदम् इति जाते '**अधश्शिरसी पदे**' इति सूत्रेण विसर्गस्य स्थाने सकारादेशे वर्णसम्मेलने अधस्पदम् इति रूपं सिद्ध्यतीति।

**शिरस्पदम्** – शिरश्च पदं चेति विग्रहे द्वन्द्वसमासे शिरस् पदम् इत्यवस्थायां सकारस्य रुत्वे विसर्गे शिरः पदम् इत्यत्र '**अधश्शिरसी पदे**' इति सूत्रेण विसर्गस्य स्थाने सकारादेशे वर्णसम्मेलने शिरस्पदम् इति रूपं भवति।

**भास्करः** – भाः करोति इत्यर्थे भाः करः इत्यवस्थायां 'कस्कादिषु च' इति सूत्रेण कस्कादिगणे पाठात् विसर्गस्य स्थाने नित्यं सकारादेशे भास्करः इति रूपं भवति।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितं विसर्गसन्धिप्रकरणं सम्पूर्णम्**

# अथ स्वादिसन्धिप्रकरणम्

**स्वौजसमौट् ( सू.183 ) इति सुप्रत्यये 'शिवस् अर्च्यः' इति स्थिते। ससजुषोः रुः 82.66 पदान्तस्य सस्य 'सजुष् शब्दस्य च रुः स्यात्। जश्त्वापवादः।**

**संस्कृतव्याख्या** – 'शिवः'इत्यस्य अवसाने विसर्गस्तस्य 'अर्च्य' इत्यनेन सह प्रयोगे सस्य अभावात् रुत्वं कथं भविष्यति इत्याशङ्कायां कथयति **'स्वौजसमौट्'** इत्यादिसूत्रेण सुप्रत्ययेऽनुबन्धलोपे शिवस् अर्च्य इत्यादौ रुत्वादिकं भविष्यत्येव तस्मात् रुत्वविधायकं सूत्रमुपस्थापयति –

**ससजु......।** ससजुषोः रुः इति सूत्रस्य पदच्छेदः। सश्च सजूष इति सजुषौ तयोः ससजुषोः इति षष्ठ्यन्तं पदम्। रुः इति प्रथमान्तं विधेयं पदम्। रुविधौ उकार इत्संज्ञकः, स इति सकारो विवक्षितः। अकार उच्चारणार्थः। अत्र पदस्य अधिकारः तच्चविशेष्यम्, सकारः सजूष् शब्दश्च पदस्य विशेषणम्। तेन तदन्तविधिः। सकारान्तस्य सजुषान्तस्य च इत्यर्थो लभ्यते। पदस्य इत्यस्य षष्ठ्यन्तत्वात् अलोऽन्त्यस्य इति परिभाषया अन्त्यस्य भवति। इत्थम् सकारान्तं सजुषशब्दान्तं च यत् पदं तदन्तस्य सकारस्य, सजुष् इत्यस्य षकारस्य च रुत्वं भवतीति सूत्रार्थः सङ्गच्छते।

अत्रेदमाशङ्कते शिवस् इत्यत्र सकारस्य झलां जशोऽन्ते इति सूत्रेण जश्त्वं स्यादिति। अत्रोच्यते **जश्त्वापवादः** इति। अर्थात् जश्त्वं प्रति रुत्वस्य परत्वेऽपि असिद्धत्वात् इति न वक्तव्यम् रत्वस्य निरवकाशत्वान्नासिद्धत्वम् इति भावः। इत्थं शिवर् अर्च्य इति स्थितौ –

**अतोरोरप्लुतादप्लुते 6.1.113 अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। भोभगोअघो ( सू.167 ) इति प्राप्तस्य यत्वस्यापवादः। उत्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति, रुत्वमनूद्योत्वविधेः सामर्थ्यात्।**

**सस्कृतव्याख्या** – अतः रोः अप्लुतात् अप्लुते इति सूत्रस्य पदविभागः। अतः इति पञ्चमयन्तं पदं तेन तदव्यवहितपरस्य इत्यर्थो लभ्यते। रुशब्दस्य षष्ठ्येकवचने रोः इत्यस्य षष्ठ्यन्तत्वात् 'स्थाने' इति पदमुपतिष्ठते। अत्र **'ऋत उत्'** इति उत् इत्यस्य **'एङः पदान्तादति'** इति सूत्रात् अति इत्यस्यानुवृत्तिः भवति तस्य च सूत्रे पठितेन अप्लुते इति सप्तम्यन्तेन पदेन सहान्वयो भवति। इत्थम् – प्लुतभिन्नात् ह्रस्व-अकारात् परस्य रुसम्बन्धिनो रेफस्य स्थाने उकारादेशो भवति प्लुतभिन्ने ह्रस्वे अकारे परे इति सूत्रार्थः सङ्गच्छते। शिवर् अर्च्यः इत्यत्र उत्वं बाधित्वा **'भोभगोऽघो'** इत्यादि सूत्रेण परत्वात् यत्वं स्यादित्याशङ्कायां कथयति **यत्वस्यापवादः** इति। अर्थात् परत्वेऽपि यत्वस्य अपवादत्वात् रुत्वमेव भवति। ननु उत्वं प्रति रोरसिद्धत्वात् कथमत्र उत्वम् इति चेत् कथयति, रुत्वस्य असिद्धत्वं न भवति रुत्वम् उच्चार्य उत्वविधेः विधानसामर्थ्यात्। यदि रुत्वमसिद्धं स्यात्तदा उत्वविधानं व्यर्थं स्यात्। तस्मात् उत्वं प्रति रुः इति नासिद्धमिति। तथाहि उत्वे कृते शिव उ अर्च्य इति स्थिते –

**प्रथमयोः पूर्वसवर्णः 6.1.102 अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात्। इति प्राप्ते –**

**संस्कृतव्याख्या** – अत्र पदद्वयम्। प्रथमा च द्वितीया च तयोरेकशेषे द्विवचने प्रथमे इति तयोः प्रथमयोः इति षष्ठी द्विवचनान्तं पदम्, पूर्वसवर्णः इति प्रथमान्तं विधेयं पदम्। अत्र **'अकः सवर्णे दीर्घः'** इति सूत्रात् अक इति, **'इको यणचि'** इत्यतः अचि इति चानुवर्तते। **'एकः पूर्वपरयोः'** इत्यस्याधिकारः। अत्र प्रथमाद्वितीये सुविभक्ती विवक्षिते स्तः। एतेन अक्प्रत्याहारात् परे प्रथमाद्वितीययो अचि सत्वे पूर्वपरयोः स्थाने दीर्घ एकादेशः स्यादिति सूत्रार्थो भवति। एतेन शिव उ इत्यत्र अकारस्य उकारस्य च स्थाने पूर्वसवर्णे आकारे प्राप्ते अग्रिमं सूत्रं प्रवर्तते। तथाहि –

**नादिचि 6.1.104 अवर्णादचि परे न पूर्वसवर्णदीर्घः। आद्गुणः ( सू.69 ) 'एङः पदान्तादति ( सू.86 ) शिवोऽर्च्यः। अतः इति तपरः किम् – देवा अत्र। अति इति तपरः किम् – श्व आगन्ता। अप्लुतात् किम् – एहि सुस्रोत३अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परोऽयम्। 'अप्लुतात्' इति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्या चरितार्थत्वात्। 'अप्लुते' इति किम् – तिष्ठतु पय अ३ग्नि दत्त। 'गुरोरनृत...' ( सू.97 ) इति प्लुतः।**

**संस्कृतव्याख्या** – न आत् इचि इतिसूत्रस्य पदविभागः। न इत्यव्ययम्, आत् इति पञ्चम्यन्तम् अवर्णात् इत्यर्थः। इचि इति सप्तम्यन्तं, तेन इचि परे इत्यर्थः। अत्र **'प्रथमयोः पूर्वसवर्णः'** अस्य सूत्रस्य, दीर्घः इत्यस्य चानुवृत्तिर्भवति। **'एकः पूर्वपरयोः'** इत्यस्याधिकारः। इत्थम् – अवर्णात् इच् प्रत्याहारस्थे वर्णे परे पूर्वसवर्णदीर्घ एकादेशो न भवतीति सूत्रार्थो भवति। तद्यथा शिव उ अर्च्यः इत्यत्र अकारात् इच् प्रत्याहारस्थे उकारे परे न पूर्वसवर्णदीर्घः। ततः **'आद्गुण'** इति सूत्रेण अकारोकारयोः गुणे 'शिवो अर्च्य' इत्यवस्थायाम् **'एङः पदान्तादति'** इति सूत्रेण पूर्वरूपे च **शिवोऽर्च्य** इति। **'अतोरोरप्लुतादप्लुते'** इति सूत्रे अतः इति तपरकरणेन देवार् अत्र इत्यत्र रेफस्य उत्वं न भवति, रेफस्य स्थाने **'भो भगो अघो'** इत्यादिना यकारे **'हलि सर्वेषाम्'** इति सूत्रेण लोपे देवा अत्र इति भवति। **'अति'** इत्यत्र तपरकरणेन श्वस् आगन्ता इत्यत्र रुत्वे श्वर् आगन्ता इत्यवस्थायाम् उत्वं न भवति, अत्रापि यत्वे, तस्य लोपे **श्व आगन्ता** इति। 'अप्लुतात्' इति कथनेन एति सुश्रोत३अत्र इत्यत्र सुस्रोतस् इत्यस्य सम्बोधने प्लुतत्वात् सस्य रुत्वे सुश्रोतर् अत्र उत्वं न भवति यत्वे यलोप **सुस्रोत३अत्र** इति। अत्र प्लुतत्वे ह्रस्वस्य अभावः स्यादिति चेत् कथयति मूले **प्लुतस्य असिद्धत्वात् परोऽयम्** इति। उत्वे कर्त्तव्ये प्लुतस्य असिद्धत्वात् ह्रस्वात् परोऽयं रु, अतस्तस्य उत्वे प्राप्ते तन्निवृत्यर्थम् अप्लुतात् इत्यावश्यकम्।

अत्र अप्लुतग्रहणस्य किं प्रयोजनमिति। तत्रोच्यते समाधानरूपेण मूले **अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम्** इति। अर्थात् 'अप्लुतात्' इति विशेषणपदग्रहणसामर्थ्यादेव प्लुतत्वस्य नासिद्धत्वं भवति। अत्रेदं न वक्तुं शक्यते यत् तपरकरणमेव प्लुतनिवृत्तौ समर्थमत 'अ प्लुतात्' इत्यावश्यकम् इति यतोहि तपरकरणस्य न सामर्थ्यम्, दीर्घनिवृत्तौ तस्य चारितार्थ्यत्वात्। सूत्रे अप्लुते इति कथनेन **तिष्ठतु पय अ३अग्निदत्त** इत्यत्र पयर् इत्यस्य रेफस्य उत्वं न भवति। अत्र **'गुरोरनृत'** इत्यादिना अकारस्य प्लुतत्वादिति।

**शिवोऽर्च्यः** – शिवस् अर्च्य इत्यत्र **'ससजुषो रुः'** इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे शिवर् अर्च्य इति जाते, **'अतोरोरप्लुतादप्लुते'** इति सूत्रेण रेफस्य स्थाने उकारादेशे **शिव 3 अर्च्य** इति स्थितौ **'प्रथमयोः पूर्वसवर्णः'** इति सूत्रेण अकारोकारयोः पूर्वसवर्णदीर्घे प्राप्ते, **'नादिचि'** इति सूत्रेण निषेधे, **'आद्गुणः'** इति सूत्रेण गुणे शिवो अर्च्य इत्यवस्थायाम् **'एङः पदान्तादति'** इति सूत्रेण पूर्वरूपे शिवोऽर्च्य इति रूपं सिद्धयति।

**हशि च 6.1.114 अप्लुतादतः परस्य रोरुः स्याद्धशि। शिवो वन्द्यः। रोः इत्युकारानुबन्धग्रहणान्नेह – प्रातरत्र। भ्रातर्गच्छ। देवास इह इति स्थिते – रुत्वम्।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्। हशि इति सप्तम्यन्तं पदम्। सप्तम्यन्तत्वात् हशि परे इत्यर्थः। च इत्यव्ययम्। अत्र **'अतो रोरप्लुतादप्लते'** इति सूत्रात् 'अतोरोरप्लुतात्' इति पदत्रयमनुवर्तते, **'ऋत उत्'** इत्यतः

उदिति च। एतेन अप्लुतह्रस्वाकारात् परस्य रोः उत्वं स्यात् हशिप्रत्याहारे वर्णे परे इति सूत्रार्थः सङ्गच्छते। तद्यथा शिवस् वन्द्य इति स्थिते, सस्य रुत्वे शिवर् वन्द्य इति जाते अत्र अत् परकत्वाभावात् हकारपरकत्वाच्च पूर्वसूत्रेण अप्राप्तौ सूत्रमिदम्। अनेन सूत्रेण रेफस्य उत्वे, शिव 3 वन्द्य इति जाते, '**आद्गुण**' इति सूत्रेण गुणे शिवो वन्द्य इति।

अत्रेदमाशङ्कते यत् प्रातर् अत्र, भ्रातर् गच्छ इत्यादावपि अप्लुत् अत्पूर्वकात् ग हश्परकत्वात् रेफस्य स्थाने उत्वं कुतो न स्यादिति। तत्रोच्यते मूले – 'रोरित्युकारानुबन्धग्रहणान्नेह' इति। अस्यायम्भावो यत्र रुत्वं कृतस्य रेफस्तत्रैव उत्वं विधीयते। अत्र रेफान्तमव्ययं न तु रुत्वविशिष्टो रेफः। भ्रातर् इत्यत्रापि सम्बोधने ऋकारस्य स्थाने गुणे रपरत्वे जातो रेफः तस्मात् न उत्वमिति।

**शिवो वन्द्यः** – शिवस् वन्द्य इत्यत्र '**ससजुषो रुः**' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे शिवर् वन्द्य इजि जाते, '**हशि च**' इति सूत्रेण रेफस्य स्थाने उत्वे '**आद्गुणः**' इति सूत्रेण गुणे 'शिवो वन्द्यः' इति रूपं सिद्ध्यति।

**देवा इह** इति रूपं दर्शयितुं कथयति मूले देवास् इह इत्यवस्थायां ससजुषोः रुः इति सूत्रेण रुत्वे कृते देवार् इह इति जाते–

**भोभगोअघोअपूर्वस्य योऽशि 8.3.17 एतत्पूर्वकस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। लोपश्शाकल्यस्य ( सू.67 ) देवा इह, देवायिह। अशि किम् – देवास्सन्ति। यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लभ्यते तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। न ह्यमल्विधिः। रोरिति समुदायरूपाश्रयणात्। भोस्, भगोस्, अघोस् इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते।**

**संस्कृतव्याख्या** – भोभगोअघोअपूर्वस्य यः अशि इति सूत्रस्य पदच्छेदः। भोभगोअघोआः इति द्वन्द्वसमासे कृते भोभगोअघोआः पूर्वो यस्मात् स भोभगोअघोअपूर्वः तस्य भोभगोअघोअपूर्वस्य इति। अत्र असन्धिः सौत्रत्वात्। यः इति प्रथमान्तं विधेयं पदं, तेन यकारादेशः स्यादित्यर्थो लभ्यते। अशि इत्यस्य सप्तम्यन्तत्वात् अशि परे इत्यर्थः। अत्र **रोः सुपि** इत्यतो रोरित्यनुवर्तते। सूत्रे पूर्वशब्दश्च प्रत्येकं सम्बद्ध्यते एतेन भोभगोअघो अपूर्वकस्य रोः इत्यस्य रेफस्य स्थाने य स्यादशि प्रत्याहारे पर इति सूत्रार्थः सङ्गच्छते। इत्थं देवाय् इह इति जाते यलोपं स्मारयति मूले – '**लोपश्शाकल्यस्य**' इति विकल्पेन यलोपे देवा इह, देवायिह इति।

सूत्रे अशि परे इति कथनेन देवार् सन्ति इत्यत्र न यत्वम्, अश् परकत्वाभावात्। अत्रेदं न वक्तव्यं यत् रेफस्य यत्वव्यावृत्यर्थं अश्ग्रहणमिति, यत्वस्य असिद्धतया विसर्गे सति देवास्सन्तीति सिद्धेरित्याशङ्कायां कथयति मूले **यद्यपीह यत्वस्यासिद्धत्वादित्यादिः**। अयम्भावः यद्यपि यत्व-विसर्गयोः युगपत्प्राप्तौ परत्वात् यत्वस्यैव प्राप्ति परं पूर्वत्रासिद्धमिति सिद्धान्ततया यत्वस्य असिद्धत्वेन विसर्गस्य प्राप्तिः अर्थात् यत्वस्य निवृत्तिर्भवति तथापि विसर्गस्य स्थानिवद्भावेन विसर्गे रुत्वबुद्ध्या यत्वस्य प्राप्तिः स्यात्तद्वारणाय अशिग्रहणं कर्त्तव्यमिति। अत्र न अल्विधित्वेन स्थानिवद्भावस्य प्रतिषेधः रोरिति समुदायरूपाश्रयणात् अयम् अनल्विधिर्नतु अल्विधिः। अत्रसूत्रे भोस् भगोस् अघोस् इत्येते सान्तनिपाता। इत्थं भोर् देवा इत्यत्र रेफस्य यत्वे कृते भो य् देवा इति स्थिते –

**व्योर्लघुप्रयत्नतरः शाकटायनस्य 8.3.18 पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः।**

**संस्कृतव्याख्या** – सूत्रे व् च य् चेति व्यौ तयोः व्योरितिः, लघुः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नः। अतिशयितो लघुप्रयत्नो लघुप्रयत्नतरः। लघुप्रयत्नको वर्ण इति। अत्र पदस्य अधिकारः तच्च वकारयकाराभ्यां सह विशेष्यत्वेन प्रयुज्यते वकारयकारयोश्च विशेषणत्वात् तदन्तविधिः। पदस्य षष्ठ्यन्तत्वात् **अलोऽन्त्यस्येति** परिभाषया अन्त्यस्य इत्यर्थो लभ्यते। अशि इत्यनुवर्तते शाकटायनग्रहणेन विकल्पः। इत्थम् – पदान्ते स्थितस्य वकारस्य यकारस्य च स्थाने लघूच्चारणप्रयत्नकः य् इति व् इत्यादेशः स्यात् अशि परे शाकटायनमतेन विकल्पेनेति भावः।

**कोऽयं लघूच्चारणः** इति स्पष्टयति मूले **यस्योच्चारणे** इत्यादि। अर्थात् यस्योच्चारणकाले जिह्वाया अग्रे मध्ये मूलभागे च शैथिल्यं भवति स लघूच्चारणः एतेन भो य अच्युत इत्यस्य स्थाने भो य् अच्युत इति जाते –

**ओतो गार्ग्यस्य 8.3.20 ओकारात्परस्य पदान्तस्य अलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजार्थम्। भो अच्युत। लघुप्रयत्नपक्षे भो यच्युत। पदान्तस्य किम् – तोयम्।**

**संस्कृतव्याख्या** – अत्र सूत्रे ओतः इति पञ्चम्यन्तं पदम्, तस्मात् ओकारात् परस्य इत्यर्थः। पूर्वसूत्रात् व्योः इत्यतो यग्रहणमनुवर्तते न तु वकारः, ओकारात्परस्य वकारस्य असंभवात्। पदस्य इत्यधिकृतं यकारेण विशेष्यते, यकारस्य विशेषणत्वात् तदन्तविधिः, पदस्य षष्ठ्यन्तत्वात्, **'अलोऽन्त्यस्य'** इति परिभाषासूत्रेण अन्त्यस्य इत्यर्थो लभ्यते। अत्र **लोपः शाकल्यस्य** इति सूत्रात् लोप इति **भोभगो** इत्यादिसूत्रात् अशि इत्यनुवर्तते। गार्ग्यमुनेर्नाम सम्मानार्थम्। एतेन सर्वमाहत्य सूत्रस्यार्थो भवति यत्– ओकारात् परस्य पदान्ते स्थितस्य अलघुप्रयत्नवतः यकारस्य नित्यं लोपो भवति गार्ग्यमते इति। तथाहि भो य् अच्युत इत्यत्र व्योर्लघु इत्यादिना लघूच्चाररण प्रयत्नवतः आदेशाभावे **'ओतो गार्ग्यस्य'** इति सूत्रेण यकारलोपे **भो अच्युत** लघुप्रयत्नपक्षे च **भोयच्युत** इति रूपं भवति।

सूत्रे पदान्तस्य इति कथनेन तोयम् इत्यत्र यकारलोपो न भवतीति बोध्यम्।

**भो अच्युत, भो यच्युत** = भोस् अच्युत इत्यत्र **'ससजुषोः रुः'** इति सूत्रेण सस्य रुत्वे भो र् अच्युत इति जाते **'भो भगो अघो अपूर्वस्य योऽशि'** इति सूत्रेण रेफस्य स्थाने यकारादेशे भो य् अच्युत इति जाते **'ओतो गार्ग्यस्य'** इति सूत्रेण विकल्पेन यकारलोपे भो अच्युत इति, विकल्पपक्षे **'व्योर्लघुप्रयत्नतरः'** इति सूत्रेण विकल्पेन यकारस्य लघूच्चारणे भो य् अच्युत इत्यवस्थायां वर्णसम्मेलने भो यच्युत इति रूपं भवति।

**उञि च पदे 8.3.21 अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपः उञि च परे। स उ एकाग्निः। पदे किम्? तन्त्रयुतम्। वेञः सम्प्रसारणे रूपम्। यदि तु प्रतिपदोक्तो निपात उञिति ग्रहीष्यते, तर्ह्युत्तरार्थं पदग्रहणम्।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयम्, उञि इति पदे इति च सप्तम्यन्तं पदम् चेत्यव्ययम् उञि च पदे इत्यनयोः समानाधिकरण्येनान्वये उञि पदे परे इत्यर्थः। अत्र अपूर्वस्य इति, पदस्येति, व्योरिति, लोप इति चानुवर्तते। एतेषां परस्परमन्वयेन– अवर्णपूर्वकयोः पदान्तस्थितयोर्यकारवकारयोः लोपो भवति उञि च पदे परे इति सूत्रार्थो भवति। **यथा स उ एकाग्नि** इत्यत्र तद्शब्दात् प्रथमैकवचने सस् उ एकाग्नि इत्यत्र सकारस्य रुत्वे, यत्वे स य् उ एकाग्नि इति स्थिते यकारलोपे स उ एकाग्नि इति।

अत्र सूत्रे पदग्रहणं किमर्थमित्यस्योत्तरत्वेन कथयति **पदग्रहणाभावे** तन्त्रे उतम् इति विग्रहे अयादेशे तन्त्र य् उतम् अत्रापि लोपः स्यात् तन्माभूत् तदर्थं पदग्रहणम्। अत्र उञ् इति वेञः तन्तुसन्ताने इत्यस्माद्धातोः क्तप्रत्यये, **वचि स्वपि** इत्यादिना सम्प्रसारणे उकारे पूर्वरूपे उतम् इति रूपम्, तस्य उञः पदत्वाभावात्तस्मिन् परे यस्य लोपो न भवतीति तात्पर्यम्। यदि त्वत्र प्रतिपदोक्तनिपातगणपठितम् उञ् इति पदं गृह्यते चेत् पदग्रहणमुत्तरार्थमिति।

**हलि सर्वेषाम् 8.3.22 'भो भगो अघो अपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भोः लक्ष्मीः। भो विद्वद्वृन्द। भगो नमस्ते। अघो याहि। देवा नम्याः। देवा यान्ति। हलि किम् – देवायिह, देवा इह।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयं वर्तते। हलि इति सप्तम्यन्तं पदम्, सप्तम्यन्तत्वात् हलि परे इत्यर्थः। सर्वेषाम् इति षष्ठ्यन्तं पदम् – सर्वेषां मते इति शेषः।

अत्र **भो भगो अघो अपूर्वस्य** इत्यनुवर्तते। **व्योर्लघुप्रयत्नतरः शाकटायनस्य** इति सूत्रात् यस्य इति, **लोपः शाकल्यस्य** इति सूत्रात् लोप इति चानुवर्तते। इत्थम् भो भगो अघो अ पूर्वकस्य लघूच्चारितस्य अलघूच्चारितस्य च यकारस्य लोपो भवति हलि परे सर्वेषाम् आचार्याणां मते इति सूत्रार्थः।

सर्वेषाम् आचार्याणां सम्मतत्वादयं लोपो नित्य इति फलति। तद्यथा – भो य् देवाः इत्यवस्थायां यलोपे 'भो देवाः' इति रूपं भवति। एवमेव भो लक्ष्मि। **भो विद्वद्वृन्द**, भगो नमस्ते। अघो याहि। देवा नम्याः। देवा यान्ति इत्यादीनि सर्वाणि रूपाणि भवन्ति। सूत्रे हलि इति कथनेन देवाय् इह इत्यत्र अनेन लोपो न भवति, अत्र **'लोपः शाकल्यस्य'** इति सूत्रेण विकल्पेन यलोपे देवा इह, विकल्पपक्षे देवायिह इति रूपं भवति।

**भो देवाः** – भोस् देवा इत्यत्र '**ससजुषोः रुः**' इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे भो र् देवाः इति जाते '**भो भगो अघो अपूर्वस्य योऽशि**' इति सूत्रेण रेफस्य स्थाने यकारादेशे भो य् देवा इति जाते 'हलि सर्वेषाम्' इति सूत्रेण नित्यं यलोपे भो देवा इति रूपं सिद्ध्यति।

**भो लक्ष्मि** = भोस्+लक्ष्मि इत्यत्र '**ससजुषोः रुः**' इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे भो र् लक्ष्मि इति जाते '**भो भगो अघो अपूर्वस्य योऽशि**' इति सूत्रेण रेफस्य स्थाने यकारादेशे भो य् लक्ष्मि इति जाते '**हलि सर्वेषाम्**' इति सूत्रेण नित्यं यलोपे भो लक्ष्मि इति रूपं भवति।

एवमेव **भो विद्वद्वृन्द! भगो नमस्ते, अघो याहि** इत्यादीनि रूपाणि बोध्यानि।

**रोऽसुपि 8.2.69 अह्नो रेफादेशः स्यान्न तु सुपि। रोरपवादः। अहरहः। अहर्गणः। असुपि किम्? अहोभ्याम्। अत्र अहन् ( सू.443 ) इति सूत्रेण रुत्वम्। रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् ( वा.4847 ) अहोरूपम्। गतमहो रात्रिरेषा। एकदेशविकृतस्यानन्यत्वादहोरात्रः। अहो रथान्तरम्। अहरादीनां पत्यादिषु वा रेफः ( वा. 4851 ) विसर्गापवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मानीयौ।**

**संस्कृतव्याख्या** – रः असुपि इति सूत्रस्य पदविभागः। रः इति प्रथमान्तं विधेयं पदम्। असुपि इति न सुप् असुप् तस्मिन् इत्यर्थे सप्तम्यन्तं पदम्। एतेन सुपि भिन्ने परे इत्यर्थः। अत्र अहन् इति पदम् अनुवर्तते। तच्च लुप्तषष्ठीकं पदम्। षष्ठ्यन्तत्वात् '**अलोऽन्त्यस्य**' इति परिभाषासूत्रेण 'अन्त्यस्य' स्थाने इत्यर्थो लभ्यते। एतेन – अहन् शब्दस्य अन्त्यस्य नकारस्य स्थाने रेफादेशो भवति असुपि, सुप् भिन्ने प्रत्यये परे इत्यर्थः।

अत्रेदमाशङ्कते यत् – अहन् इत्यस्य रुः स्यात् पदान्ते इत्यर्थेणैव कार्ये सिद्धे किमर्थम् इदं सूत्रम् इत्युक्तमिति चेत् कथयति मूले **रोरपवाद** इति। अर्थात् इदं सूत्रम् **अहन्** इत्यस्य सूत्रस्य बाधकमस्ति, तेन सूत्रेण रेफादेशे कृते उत्वं न स्यात्। तथाहि – अहन् अहः इत्यत्र असुपि, सुप्प्रत्यये परे नास्ति, तस्मात् नकारस्य रेफादेशे कृते वर्णसम्मेलने अहरहः इति। एवमेव अहर्गणः सूत्रे असुपि इति कथनेन अहन् भ्याम् इत्यादौ सुपि परत्वात् न अनेन रेफादेशः, अत्र 'अहन्' इति सूत्रेण रेफादेशे उत्वे, गुणे च कृते अहोभ्याम् इति रूपं भवति।

**रूपरात्रि....।** इदं वार्तिकम्। रोऽसुपि इति रत्वस्यापवादः। अत्र अहन् इति शेषः। तेन रूपरात्रिरथनन्तर- इत्येतेषु शब्देषु परेषु अहन् शब्दस्य अन्त्यनकारस्य रुत्वं भवतीति वार्तिकार्थः। तद्यथा – अह्नो रूपम् इत्यर्थे अहन् रूपम् इत्यत्र '**रोऽसुपि**' इति सूत्रं प्रबाध्यानेन वार्तिकेन रुत्वे अहर् रूपम् इति जाते **हशि च** इति सूत्रेण रेफस्य उत्वे गुणे च अहो रूपम्, एवमेव अहर् रात्रि इति जाते '**हशि चेति**' इति सूत्रेण रेफस्य उत्वे गुणे च अहो रात्रिरिति।

**अहोरात्रः** = इत्यत्र अहश्च रात्रि इत्यर्थे द्वन्द्वसमासे समासान्तटच्प्रत्ययेऽनुबन्धलोपे अहन् रात्र इत्यत्रापि **रूप रात्रि** इत्यादिना वार्तिकेनैव 'एकदेशविकृतस्यानन्यत्वाद्' रुत्वे, उत्वे गुणे च **अहोरात्र** इति रूपं भवति।

**अहरादीनाम्......।** इदमपि वार्तिकम्। अत्र आदिशब्दः प्रकारवाची। पति आदिषु शब्देषु परेषु अहन् इत्यादीनाम् अन्त्यस्य अलः नकारस्य स्थाने विकल्पेन रेफादेशो भवतीति वार्तिकार्थः। **रोऽसुपि** इति सूत्रेण नित्ये रेफादेशे प्राप्ते अनेन विकल्पो विधीयते।

**अहरहः** = अहन्+अहः इति इत्यत्र '**रोऽसुपि**' इति सूत्रेण नकारस्य रेफादेशे वर्णसम्मेलने अहरहः इति रूपं सिद्ध्यति।

**अहर्गणः** = अहन्+गणः इत्यत्र '**रोऽसुपि**' इतिसूत्रेण अहन् इत्यस्य नकारस्य स्थाने रेफादेशे वर्णसम्मेलने अहर्गणः इति।

**अहोरूपम्** = अहन् रूपम् इत्यर्थे अहन् रूपम् इत्यत्र '**रोऽसुपि**' इति सूत्रेण प्राप्तं रेफादेशं प्रबाध्य '**रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्**' इति वार्तिकेन अहन् इत्यस्य नकारस्य रुत्वे अहर् रूपम् इति जाते '**हशि च**' इतिसूत्रेण रेफस्य स्थाने उत्वे, '**आद्गुणः**' इति सूत्रेण गुणे अहो रूपम् इति रूपं सिद्ध्यति।

**अहोरात्रिः** = अहश्च रात्रिश्च इत्यर्थे अहन् रात्रि इत्यत्र '**रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्**' इति वार्तिकेन नकारस्य स्थाने रुत्वेऽनुबन्धलोपे, '**हशि च**' इति सूत्रेण उत्वे '**आद्गुणः**' इतिसूत्रेण गुणे अहोरात्रि इति।

**अहोरात्रः** = अहश्च रात्रि इत्यर्थे द्वन्द्वसमासे, समासान्तटच्प्रत्यये अहन्+रात्र इत्यत्र 'एकदेशविकृतमनन्यवत्' इति परिभाषासहकारेण '**रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्**' इति वार्तिकेन नकारस्य रेफादेशे, '**हशि च**' इति सूत्रेण उत्वे, गुणे च अहोरात्रः इति रूपं सिद्ध्यति।

**रो रि 8.3.14 रेफस्य रेफे परे लोपः स्यात्।**

**संस्कृतव्याख्या** – अत्र रः इति षष्ठ्यन्तं पदम्, एतेन रस्थाने, रेफस्य वा इत्यर्थः। रि इति सप्तम्यन्तं निमित्तवाचकं तेन रपरे सति इत्यर्थः। अत्र '**ढो ढे लोपः**' इति सूत्रेण लोप इति प्रथमान्तं विधेयं पदमनुवर्तते। एतेन रेफे परे पूर्वस्य रेफस्य लोपो भवतीति सूत्रार्थः सङ्गच्छते तद्यथा – पुनर् रमते इत्यत्र रेफात् रेफे परे पूर्वस्य लोपे पुन रमते इति जाते।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः 6.3.111 ढ्रेफौ लोपयतीति तथा, तस्मिन् वर्णेऽर्थाद् ढ्कारे परे पूर्वस्याणो दीर्घः स्यात्। पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम् – तृढः। वृढः। तृहू हिंसायाम्। बृहू उद्यमने। पूर्वग्रहणमनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम्। अजर्घाः। लीढः। मनस् रथः इत्यत्र रुत्वे कृते हशि च ( सू.166 ) इत्युत्वे, 'रो रि' इति रेफलोपे च प्राप्ते –**

**संस्कृतव्याख्या – ढ्रलोपे पूर्वस्य दीर्घः** अणः इति सूत्रस्य पदच्छेदः। ढ् च रेफस्य ढ्रौ तौ लोपयति इति ढ्रलोपः तस्मिन् ढ्रलोपे इति सप्तम्यन्तं पदम्, णिजन्तात् कर्मण्युपपदे कर्मणि अण्प्रत्यये ढ्रलोप इति निष्पन्नेन ढ्रलोपनिमित्तं रेफलोपनिमित्तं च विवक्षितम्। तच्च ढ्कार, रेफात्मकमेव, **ढ़ोढ़े लोपः**, रोरि इत्यनेन तयोरेव ढ्रलोपनिमित्तत्वात्। इत्थम् – ढ़लोपनिमित्ते ढ़कारे, रेफलोपनिमित्ते रेफे च परतः पूर्वस्य अणो दीर्घः स्यात् इति सूत्रार्थः सम्पद्यते। तद्यथा – पुना रमते इत्यस्य पुनर् रमते इत्यवस्थायां 'रो रि' इति सूत्रेण पूर्वरेफस्य लोपे पुन रमते इत्यत्र रेफलोपनिमित्तात् पूर्वस्य अणः दीर्घे पुना रमते इति। एवमेव हरी रम्यः शम्भुर् राजते इत्यादौ शम्भू राजते, इत्यादीनि रूपाणि सिद्ध्यन्ति।

सूत्रेऽस्मिन् अणः ग्रहणेन तृहू उद्यमने इत्यस्माद्धातोः क्तप्रत्यये तृह्त इत्यवस्थायां तकारस्य धकारे, '**होढः**' इति सूत्रेण हकारस्य ढ़कारे तृढ़ ध् इति जाते धकारस्य ष्टुत्वे तृढ़ ढ़ इति जाते '**ढ़ो ढ़े लोपः**' ढ़कारस्य लोपे तृढ़ इत्यत्र ढ्रलोपनिमित्तात् ढ़कारात्प्राक् ऋकारस्य दीर्घो न भवति, अण् प्रत्याहारे ऋकारस्य ग्रहणाभावात्। अण्ग्रहणाभावे अत्रापि दीर्घः स्यात् तन्माभूत् तदर्थमण् ग्रहणम्। एवमेव वृढ़ इत्यत्रापि बोध्यम्।

सूत्रेऽस्मिन् पूर्वग्रहणं किमर्थमिति जिज्ञासायां कथयति मूले – अनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम् इति। अत्रेदं तात्पर्यं वर्तते यत् ढ्रलोपे इत्यस्य सप्तम्यन्तत्वात् '**तस्मिन्निति निर्दिष्टे पूर्वस्य**' इति सूत्रेण सप्तम्यन्तात् अव्यवहितपूर्वस्य इत्यर्थलाभे पूर्वग्रहणं किमर्थमिति प्रश्नः **तत्रोच्यते** उत्तररूपेण **अनुत्तरपदेऽपि पूर्वमात्रस्यैव दीर्घार्थम्** इति। अर्थात् ढ्रलोप इति सूत्रस्य 'अलुगुत्तरपदे' इत्युत्तरपदाधिकारस्थाद् उत्तरपदस्थयोरेव ढ्रलोपनिमित्तभूतढ़रेफयोः परयोः पूर्वपदस्याणो दीर्घ इत्यर्थः स्यात्। पूर्वोत्तरपदयोर्व्यवस्था तत्रैव भवति यत्र पदद्वये समासः परं **पुना रमते** इत्यादिस्थले तथात्वाभावात् पूर्वस्य दीर्घो न स्यात् अतः सूत्रे 'पूर्वस्य' ग्रहणमावश्यकम्। इत्थम् **अलुगुत्तरपदे** इत्यस्मात् उत्तरपदे इत्यस्यानुवृत्तिविघातार्थं पूर्वस्य ग्रहणं बोध्यम्। किञ्च उत्तरपद इत्यस्यानुवृत्तौ 'अजर्घा' इत्यत्रापि दीर्घो न स्यात्। तथाहि **गृधु** अभिकाङ्क्षायाम् इत्यस्माद्धातोः **यङ्लुकि**, धातोर्द्वित्वे, हलादिशेषे, अभ्यासस्य रुकागमे, **कुहोश्चु** इति सूत्रेण चवर्गे जगृध् इत्यस्मात् धातोः '**सनाद्यन्ता धातवः**' इति सूत्रेण धातुसंज्ञायां लङि सिपि, शपि तस्य लुकि, लधूपधगुणे, रपरत्वे, इकारलोपे, **हलङ्याादिना** सलोपे, अजर्गर्ध् इति स्थिते, गकारस्य भष्भावे अजर् घर् घ्, '**झलो जशोऽन्ते**' इति सूत्रेण धकारस्य जश्त्वे अजर्घर्द् इत्यवस्थायां **दश्च** इति सूत्रेण दकारस्य रेफे अजर्घर् र इति जाते '**रोरि**' इति सूत्रेण रेफस्य लोपे, '**ढ्रलोपेपूर्वस्य दीर्घोऽणः**' इति सूत्रेण दीर्घे

अजर्घार् इति जाते रेफस्य विसर्गे अजर्घा इति भवति '**अनुत्तरपदस्य**' इति ग्रहणाभावे अत्रापि दीर्घो न स्यात्तस्मात् सूत्रे पूर्वस्य इति ग्रहणं कृतमिति। एवमेव **लीढः** इत्यत्रापि दीर्घो बोध्यः।

**पुना रमते** = पुनर् रमते इत्यत्र '**रोरि**' इति सूत्रेण पूर्वरेफस्य लोपे '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इति सूत्रेण रलोपनिमित्तात् रेफात्पूर्वस्य पुन इत्यस्य अकारस्य दीर्घे **पुना रमते** इति।

**हरी रम्यः** = हरिस् रम्यः इत्यत्र '**ससजुषोः रुः**' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे **हरिर् रम्यः** इति जाते '**रोरि**' इति सूत्रेण पूर्वरेफस्य लोपे, '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इति सूत्रेण इकारस्य दीर्घे '**हरी रम्यः**' इति रूपं सिद्ध्यतीति।

**शम्भू राजते** = शम्भु स् राजते इत्यत्र '**ससजुषोः रुः**' इति सूत्रेण सकारस्य रुत्वे शम्भु र् राजते इत्यत्र 'रो रि' इति सूत्रेण पूर्वरेफस्य लोपे, '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इति सूत्रेण उकारस्य दीर्घे शम्भू राजते इति रूपं सिद्ध्यति।

मनस् रथ इत्यत्र '**ससजुषो रुः**' इति सूत्रेण सकारस्य स्थाने रुत्वेऽनुबन्धलोपे मनर् रथः इत्यवस्थायां '**हशि च**' (सू.166) इति सूत्रेण उत्वं प्राप्नोति, **रोरि**(173) इति सूत्रेण च रेफस्य लोपः प्राप्नोति। एवम् एकस्मिन् लक्ष्ये युगपत् शास्त्रद्वयस्य प्रवृत्तौ किं कर्त्तव्यमित्यपेक्षायाम् अग्रिमं सूत्रमुपस्थापयति –

**विप्रतिषेधे परं कार्यम् 1.4.2 तुल्यबलविरोधे परं कार्यं स्यात्। इति रेफलोपे प्राप्ते। पूर्वत्रासिद्धम् (सू.12) इति रोरि (सू.173) इत्यस्यासिद्धत्वादुत्त्वमेव – मनोरथः।**

**संस्कृतव्याख्या** = सूत्रे विप्रतिषेधशब्दः विप्रतिपूर्वात् सेधतेर्घञि प्रत्यये सस्य षत्वे निष्पन्नः, परस्परविरोधकवाचकः, तस्मिन् विप्रतिषेधे, इति। विरोधश्च तुल्यबलयोरेव। तादृशे विप्रतिषेधे अर्थात् तुल्यबलविरोधे सति परं कार्यं भवतीति। अयम्भावः **द्वयोः शास्त्रयोः क्वच्चिल्लब्धावकाशयोः एकत्र लक्ष्ये युगपत्प्राप्तिः** तुल्यबलविरोधः, तादृशे विप्रतिषेधे परं कार्यमिति सूत्रस्यार्थः। एतेन मनर् रथ, इत्यत्र, **हशि च** (6.1.114) इत्यतः **रोरि** (8.3.14) इत्यस्य परत्वात् रेफस्य लोपः प्राप्नोति परं पूर्वत्रासिद्धम् इति सूत्रेण पूर्वशास्त्रदृष्टौ परशास्त्रस्य असिद्धत्वात् '**रोरि**' इति शास्त्रमसिद्धत्वं भवति तस्मादुत्वमेवेति।

**मनोरथः** = मनस्+रथ इत्यत्र '**ससजुषोः रुः**' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे, मनर् रथ, इत्यवस्थायां, हशि च इति सूत्रेण उत्वे प्राप्ते, रोरि इति सूत्रेण च पूर्वरेफस्य लोपे प्राप्ते, युगपत्पत्शास्त्रद्वयस्य प्रवृत्तौ '**विप्रतिषेधं परे कार्यम्**' इति नियमेन परत्वात् '**रोरि**' इत्यनेन रेफलोपः प्राप्नोति। किन्तु '**पूर्वत्रासिद्धम्**' इति सूत्रदृष्टया '**रोरि**' इत्यस्य असिद्धत्वात् अथवा पूर्वत्रासिद्धमिति शास्त्रविषये विप्रतिषेधशास्त्रस्य अप्रवृत्तेः '**हशि च**' इति सूत्रेण रेफस्य उत्वे **मन उ रथः** इत्यवस्थायाम्, '**आद्गुणः**' इति सूत्रेण अकार उकारयोः गुणे ओकारादेशे वर्णसम्मेलने **मनोरथः** इति रूपं सिद्ध्यतीति।

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (6.1.132)**

**अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु समासे।**

**एष विष्णुः। स शम्भुः। अकोः किम् एषको रुद्रः। अनञ्समासे किम् असश्शिवः। हलि किम्– एषोऽत्र।**

**संस्कृतव्याख्या** – एतत्तदोः सुलोपः अकोः अनञ् समासे हलि इति सूत्रस्य पदविभागः। एतच्च तच्चेति तयोः एतत्तदोरिति षष्ठ्यन्तं पदम्, सु इ लुप्तषष्ठीकं पदम्, तच्च एतत्तदो इत्यनेन सह अन्वेति। एतेन एतत्तदोः सकारस्य इत्यर्थः। अविद्यमानककारः ययोस्तौ अकौ, तयोः अकोरिति बहुव्रीहिः। नञा समासः इति नञ्समासः, न नञ्समासः, इति अनञ् समासः तस्मिन् इति अनञ्समासे इति वैषयिकं सप्तम्यन्तं पदम्, हलि इति सप्तम्यन्तं पदं तेन हलि परे इत्यर्थः। इत्थम् ककाररहितयोः (अकच्प्रत्ययान्तभिन्नयोः)। एतत्तदोः सकारस्य लोपो भवति अनञ्समासे (नञ्समासरहिते) हलि परे इति सूत्रार्थः सम्पद्यते। तद्यथा एतद्शब्दात् प्रथमैकवचने एषस् विष्णुः इत्यत्र सकारलोपे

**एष विष्णु** इति। तच्छब्दस्य प्रथमैकवचने सस् विष्णु इत्यत्र सलोपे स शम्भुरिति। सूत्रे अकोरिति कथनेन एषको रुद्रः, इत्यत्र एतद्शब्दात् **अव्ययसर्वनाम्नामकच्प्राक् टेः** इति सूत्रेण अकच् प्रत्ययान्तत्वात् ककारविशिष्टत्वात् एषकस् रुद्रः इत्यवस्थायां सकारलोपो न भवति सस्य रुत्वे, उत्वे गुणे च एषको रुद्रः इति रूपं भवति। एवमेव अनञ्समासे इत्युक्ते न सः असः शिवः इत्यर्थे असस् शिव इत्यवस्थायां नञ्समासत्वात् सकारलोपो न भवति **'स्तोः श्चुना श्चु'** इति सूत्रे श्चुत्वे सकारे च असश्शिव इति। सूत्रे हलि परे इत्युक्ते **एषस् अत्र** इत्यत्र अच् परत्वात् न सकारलोपः, तस्य रुत्वे उत्वे, गुणे च पररूपे च एषोऽत्र इति रूपं सिद्ध्यति।

**एष विष्णुः** = एषस् विष्णुः इत्यत्र **'एतत्तदोः सुलोऽकोरनञ्समासे हलि'** इति सूत्रेण सुलोपे एष विष्णुः इति रूपं भवति।

**सोऽचि लोपे चेत्पादपूरणम् 6.1.134 सस् इत्येतस्य सोर्लोपः स्यादचि पादश्चेल्लोपे पूर्येत। सेमामविड्ढिप्रभृतिम्' य ईशिषे। 'इह ऋक्पाद एव गृह्यते' इति वामनः। अविशेषाच्छ्लोकपादोऽपि इत्यपरे। सैष दाशरथी रामः। लोपे चेत् इति किम् स इत्क्षेति, स एवमुक्त्वा। सत्येव इत्यवधारणं तु 'स्यश्छन्दसि बहुलम् ( सू.3526 ) इति पूर्वसूत्राद् बहुलग्रहणानुवृत्त्या लभ्यते। तेनेह न सोऽहमाजन्मशुद्धानाम्।**

**इति स्वादिसन्धिप्रकरणम्।**

**संस्कृतव्याख्या** – सः अचि लोपे चेत् पादपूरणम् इति सूत्रस्य पदविभागः। सः इति तद् इत्यस्य अनुकरणं षष्ठ्यर्थे प्रथमान्तं पदं, तेन सस्शब्दस्य इत्यर्थः। पादस्य पूरणम् इति पादपूरणम्, चेत् इत्यव्ययपदं पादपूरणं प्रथमान्तम्। **स्यश्छन्दसि बहुलम्,** इति सूत्रात् बहुलम् इत्यस्यानुवृत्तिं विधाय एव इत्यर्थः क्रियते। इत्थम् – लोपे सत्येव यदि पादपूर्त्तिस्स्यात्तदा अचि परे सस् इत्यस्य सुलोपः स्यादिति सूत्रार्थः सम्पद्यते। तद्यथा ऋग्वेदे **'सेमामविड्ढि प्रभृतिं य ईशिषे'** इति जगतीछन्दसः एकः पादः, अस्मिन् छन्दसि प्रत्येकं पादे द्वादशवर्णा भवन्ति। अत्र 'सस् इमामविड्ढि' इत्यादौ सलोपाभावे सकारस्य रुत्वे यत्वे, यलोपे च **स इमामविड्ढिप्रभृतिं य** ईशिषे इत्यवशिष्यते, यकारलोपस्य असिद्धत्वात् न गुणः। इत्थमत्र त्रयोदशवर्णा भवन्ति छन्दोभङ्गश्च जायते, **'सोऽचि लोपे चेदपादपूरणम्'** इत्यनेन सलोपे गुणे च द्वादशवर्णा। अतः पादपूर्त्तये सुलोपो भवति। इदं **वैदिकमन्त्रस्योदाहरणम्**। आचार्यवामनस्यात्र मतमस्ति यत् **'सोऽचि लोपे चेत्पादपूरणम्'** इत्यत्र पादपदेन ऋग्वेदस्यैव ऋचोर्ग्रहणं भवति नान्यस्य वेदस्य लौकिकछन्दसोर्वा ग्रहणमिति।

अन्येषामाचार्याणां मते अविशेषात् अर्थात् सामान्यरूपेण सर्वेषु छन्दःसु वैदिके, लौकिके वा सर्वेषां ग्रहणम्। लौकिकमुदाहरणं यथा – **सैष दाशरथी रामः**, इत्यत्रानुष्टुपछन्दसः एकः पादः। अस्मिन् छन्दसि प्रत्येकं पादे अष्टौ वर्णा भवन्ति अत्र **सस् एष दाशरथी रामः** सस्य रुत्वे यत्वे, यलोपे च स एष इत्यवशिष्यते, यकारलोपस्य असिद्धत्वात् न सन्धिः। अस्यायमवस्थायां स एष दाशरथी रामः, इत्युक्ते नववर्णा भवन्ति, तेन छन्दोभङ्गो भवति। अतः पादपूर्त्तौ अनेन सुलोपे वृद्धौ च 'सैष दाशरथी रामः' इति छन्दःपूर्त्ति भवति। सम्पूर्णः श्लोकः इत्थम् –

**सैष दाशरथी रामः, सैष राजा युधिष्ठिरः।**
**सैष कर्णो महात्यागी, सैष भीमो महाबलः।।**

सूत्रे लोपे चेत् इति कथनेन 'स इत्क्षेति' इत्यत्र सस् इत् क्षेति सुधित इत्यादौ न अनेन सुलोपः, अपितु सस्य रुत्वे, यत्वे यलोपे च स इत्क्षेति इत्येव यलोपस्य असिद्धत्वात् न सन्धिर्भवति। एवमेव **'स एवमुक्त्वा'** इत्यस्मिन् वाक्ये सस् एवम् इत्यवस्थायामनेन सुलोपाभावे, सस्य रुत्वे यत्वे, यलोपे, यलोपस्य असिद्धत्वा सन्ध्यभावे **'स एवमुक्त्वा'** इत्येवरूपं भवति। अत्र **बहुलग्रहणानुवृत्तिं विधाय तस्य एवार्थे प्रयोगे लोपे सत्येव पादपूर्त्तौ इत्यर्थे कृते – सोऽहमाजन्मशुद्धानाम्** इत्यत्र पादपूर्त्तौ, अर्थात् सुलोपेऽपि स अहम् = साहमाजन्मशुद्धानाम्, इत्येवं पादपूर्त्तिः स्यादेव, तस्मात् अत्र सुलोपो न भवति, सस्य रुत्वे उत्वे गुणे पररूपे च **सोऽहमाजन्म** इति।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितं स्वादिसन्धिप्रकरणं सम्पूर्णम्।**

# अथाजन्तपुँल्लिङ्गप्रकरणम्

**1. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (1.2.45)

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसञ्ज्ञं स्यात्।

**संस्कृत व्याख्या** - प्रातिपदिकसंज्ञाबोधकम् इदं सूत्रम्। अस्मिन् सूत्रे, अर्थवत्, अधातुः अप्रत्ययः प्रातिपदिकपदम् इत्येतानि पञ्चपदानि सन्ति, एषु अर्थवत् अधातुः अप्रत्ययः इत्येतानि उद्देश्यबोधकानि पदानि प्रातिपदिकम् इति च विधेयं पदम्।

अर्थवत् इति नपुंसकनिर्देशानुसारं तदनुगुणं शब्दस्वरूपम् इति विशेष्यपदम् अध्याह्रियते। अर्थवत् अधातुः अप्रत्ययः शब्दस्वरूपं प्रातिपदिकम् इति सूत्रस्वरूपं भवति। शब्दस्वरूपम् इति विशेष्यपदं नपुंसकलिङ्गे वर्ततेतस्मात् तदनुरूपमेव तस्य विशेषणवाचके अधातुः, अप्रत्ययः इत्यस्मिन् पदेऽपि नपुंसकलिङ्गस्यैव प्रयोग उचितः, परम् न धातुः अधातुः, न प्रत्ययः अप्रत्ययः इति नञ् तत्पुरुषसमासात्, **परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः** इति सूत्रेण धातुपदस्य प्रत्ययपदस्य च पुल्लिङ्गत्वात् उभयोः पुल्लिङ्गे प्रयोगः। अत्र सूत्रे अप्रत्ययपदस्य द्विरावृत्तिः क्रियते, आवृत्ते अप्रत्यये **प्रत्ययग्रहणे तदन्ता ग्राह्या** इति परिभाषया तदन्तविधिना अप्रत्ययान्त इत्यर्थोऽपि गृह्यते। इत्थं **धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्तभिन्नं यत् अर्थवत् शब्दस्वरूपं तत्प्रातिपदिकसंज्ञकं भवतीति सूत्रार्थो भवति।**

**संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति** इति नियमात् अत्र तदन्तविधिनिषेधो न भवति यतोहि अनया परिभाषया तत्रैव निषेधो यत्र प्रत्ययविशेषस्य संज्ञा भवति, अत्र विधीयमाना प्रातिपदिकसंज्ञा न प्रत्ययविशेषस्य संज्ञा तस्मात् न तदन्तविधिनिषेधः।

अत्र सूत्रे अप्रत्ययः इत्यस्य प्रत्ययान्तभिन्नोऽपि अर्थ इत्यत्र प्रमाणं **कृत्तद्धितसमासाश्च** इति सूत्रे तद्धितग्रहणं वर्तते। तथाहि-

केवलम् अप्रत्यय इत्यस्य प्रत्ययभिन्न इत्येवार्थे जाते तद्धितान्तस्य धातुभिन्नत्वात् प्रत्ययभिन्नत्वात् अर्थवदितिसूत्रेणैव प्रातिपदिकसंज्ञायां सत्यां कृत्तद्धितसूत्रे तद्धितग्रहणं व्यर्थं भविष्यति, तद्व्यर्थं सत् ज्ञापयति अर्थवत् सूत्रे अप्रत्ययपदेन अप्रत्ययान्तस्यापि ग्रहणं भवति, तच्च अप्रत्ययपदस्यावृत्या एव कर्त्तुं शक्यम् इति।

अस्मिन् सूत्रे **अर्थवद्ग्रहणं किमर्थ**मिति जिज्ञासायाम् एतद् बोध्यं यत् अर्थवत् इति कथनेन निरर्थकस्य प्रातिपदिकसंज्ञायाः वारणं भवति तत्फलं **धनं वनम्** इत्यादौ प्रतिवर्णं प्रातिपदिकसंज्ञा न भवति अन्यथा अर्थवद्ग्रहणाभावे

प्रतिवर्णं प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः स्यात्। यदि चात्रैवमुच्येत यत् संख्याकर्मादीनां यत्र विवक्षा तत्रैव स्वादयो, न चात्र संख्याकर्मादीनां विवक्षा तस्मात् स्वादयो न भविष्यन्तीति, तन्नोचितं यतोहि संख्याकर्मादेरभावादपि **'एकवचनमुत्सर्गतः करिष्यते'** इति सिद्धान्तात् 'हुँ' फटादिभ्य इव सु दुर्वारः अर्थात् अत्रापि स्वादयो भविष्यन्ति। यद्यपि तस्य हलङ्यादिसूत्रेण लोपः संभवः तथापि तस्य पदत्वात् 'न लोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे धनं वनम् इत्यादीनि रूपाणि न भविष्यन्ति, तस्मात् अर्थवदग्रहणमावश्यकम्।

**अधातुग्रहणं किमर्थमिति चेत्** – धातोः प्रातिपदिकसंज्ञा यथा न स्यात् अन्यथा अधातुग्रहणाभावे धातोरपि प्रातिपदिकसंज्ञायां हन् धातोर्लङ्लकारे प्रथमपुरुषवचने **अहन्** इत्यादेरपि प्रातिपदिकत्वात् तिङि सिपि वा इतश्चेति सूत्रेण इकारलोपे, प्राक् कृतायाः प्रातिपदिकसंज्ञायाः सत्वात् नलोपः **अहन्** इत्यादेरसिद्धिः स्यात्, तस्मात् धातोः प्रातिपदिकसंज्ञा माभूत् तदर्थम् अधातुग्रहणमिति।

एवमेव **हरिषु करोषि** इत्यादौ सुप् सिपादीनां प्रातिपदिकसंज्ञावारणाय प्रत्ययग्रहणमावश्यकम्, अन्यथा हरिषुः, करोषिः इत्याद्यनिष्टं रूपं स्यात्।

एवमेव हरिषु करोषि इति प्रत्ययान्तसमुदायस्य प्रातिपदिकसंज्ञा माभूत् तदर्थं प्रत्ययान्तग्रहणं वर्तते।

इत्थं धातुभिन्नस्य प्रत्ययभिन्नस्य प्रत्ययान्तभिन्नस्य अर्थवत् शब्दस्वरूपस्य प्रातिपदिकसंज्ञा भवतीति तात्पर्यम्।

**2. कृत्तद्धितसमासाश्च ( 1.2.46 ) कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः।**

**पूवसूत्रेण सिद्धे समासग्रहणं नियमार्थम्। यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव। तेन वाक्यस्य न।**

**संस्कृत व्याख्या** – व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधातुमिदं सूत्रम्। कृच्च तद्धितश्च समासश्चेति विग्रहे कृत्तद्धितसमासा इत्येकं पदं चेति द्वितीयं पदम्। पूर्वसूत्रात् प्रातिपदिकम् इत्यनुवर्तते बहुवचनान्ततया विपरिणम्यते। **प्रत्ययग्रहणपरिभाषया** कृत्तद्धित् इत्यत्र तदन्तग्रहणम् इति **बालमनोरमाकारः**। अर्थवद् इत्यनुवृत्तिसामर्थ्यात् तदन्तविधिरिति **तत्त्वबोधिनीकारः**। इत्थं कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञका भवन्तीति सूत्रार्थः।

कृत्ततद्धितान्तयोः प्रत्ययान्तत्वात् पूर्वसूत्रेणाप्राप्तौ कृत्तद्धितग्रहणमत्र कृतं वर्तते। **कृदन्ते** यथा – **कर्त्ता, भर्त्ता** इत्यादि। **तद्धिते** यथा औपगव इत्यादिः। समासे यथा **राजपुरुष** इत्यादिः।

एवं **लिट्, धुक्** इत्यादौ अधातुग्रहणेन, कर्त्ता, औपगव इत्यादौ अप्रत्ययान्त इति पर्युदासे प्राप्ते **कृत्तद्धित-इत्यस्यारम्भः।**

**सूत्रे समासग्रहणं व्यर्थम्**, कथमिति चेदत्र विचार्य्यते राजपुरुष इत्यादिशब्दानां पूर्वसूत्रेणैव प्रातिपदिकत्वस्य सिद्धत्वात्। तथाहि ''राजन् ङस् पुरुष स्'' इत्यवस्थायां प्रत्येकं प्रत्ययान्तत्वेऽपि समुदायस्य न प्रत्ययान्तत्वम् तस्मात् पूर्वसूत्रेण समासे सिद्धेऽत्र समासग्रहणं व्यर्थम्। व्यर्थं सन्नियमाय कल्प्यत इति सिद्धान्तात् समासग्रहणं नियमार्थमिति प्रतिपादयन्नाह – मूले **पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम् इति।**

नियमशरीरं दर्शयति मूले – **यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समास्यैव।**

षड्विधेऽपि समासे पूर्वभागस्य पदत्वाव्यभिचारात् अयं सजातीयो भवति।

अत्र नियमाकारे **पूर्वो भागः** पदमित्युपलक्षणम्, उत्तरभागस्तु प्रत्ययो न इत्यपि बोध्यम्। इत्थं नियमस्यायमर्थो भवति यत्र संघाते = यस्मिन् समुदाये, पूर्वोभागः पदं तस्य शब्द समुदायस्य चेत् = यदि भवति= (प्रातिपदिकसंज्ञा) तर्हि समासस्य एव= केवलं समासस्य एव नान्यशब्दसमुदायस्य। अस्य फलं कथयति **तेन**=एतादृशनियमेन =

**वाक्यस्य न वाक्यस्य**, प्रातिपदिकसंज्ञा न भवति अन्यथा '**रामः गृहं गच्छति**' इत्यादि पदसमूहस्य धातुप्रत्ययप्रत्ययान्तभिन्नत्वात् प्रातिपदिकसंज्ञायां प्रातिपदिकावयस्य सुपो लुकि रामगृहगच्छति इत्याद्यनिष्टप्रयोगापत्तिः।

'**नियमे उत्तरस्तु प्रत्ययो न**' इति कथनेन **जन्मवान्** इत्यादौ जन्मन् शब्दात् मतुप्प्रत्यये नकारलोपे **जन्म वत्** इत्यवस्थायां '**स्वादिष्वसर्वनामस्थाने**' इत्यनेन सूत्रेण जन्म इत्यस्य पदत्वात् पूर्वभागः पदमस्ति उत्तरभागे प्रत्ययो विद्यते तस्मात् उत्तरभागे प्रत्ययविद्यमानात् जन्मवत् शब्दस्य प्रातिपदिकसंज्ञायां न काचिदापत्तिः, नियमशरीरे उत्तरस्तु प्रत्ययो नेति कथनेन समासातिरिक्ते शब्दसमुदाये प्रत्यये परेऽपि प्रातिपदिकसंज्ञा भवतीति भावः। अन्यथा जन्मवान् इत्यस्य प्रातिपदिकसंज्ञा न स्यात्।

एवमेव बहुपटवः इत्यादौ प्रातिपदिकसंज्ञां विधातुं नियमशरीरे **पूर्वो भागः पदम्** इति कथनमावश्यकं यतोहि उत्तरस्तु प्रत्ययो न इत्येतावत्कथनेन **यत्र समुदाये उतरस्तु प्रत्ययो न तस्य चेद् भवति तर्हि समासस्यैवेति** नियमस्वरूपेण बहुपटव इत्यत्र उत्तरभागे प्रत्ययाभावेऽपि समासातिरिक्तत्वात् प्रातिपदिकसंज्ञा न स्यात्, नियमशरीरे **पूर्वो भागः पदम्** इति कथनेन बहुपटव इत्यत्र पूर्वभागे पदत्वाभावात् नियमस्याप्रवृत्तौ प्रातिपदिकसंज्ञा भवति, सत्यां च तस्यां जस्प्रत्यये प्रातिपदिकावयवस्य जसो लुकि '**चितः सप्रकृतिर्बहुजर्थम्**' इत्यनेन टकारोत्तरवर्तिन उकारस्य चित्स्वरो भवति, चित्स्वरत्वाच्च तस्योदात्तत्वं संभवतीति।

अत्र सूत्रे चकारग्रहणमनुक्तसमुच्चयार्थम् उभयसूत्रशेषार्थमिति। तेन '**निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या**' इति वार्तिकं गतार्थम्। येषां द्योत्योऽप्यर्थो नास्ति तेषां प्रातिपदिकसंज्ञां विधातुं चकारग्रहणमिति तात्पर्यम्। यथा– अवद्यति इत्यादि।

**प्रत्ययः ( 3.1.1. ) आ पञ्चमपरिसमाप्तेरधिकारोऽयम्।**

**परश्च ( 3.1.2 ) अयमपि तथा।**

**संस्कृतव्याख्या - प्रत्ययः** - इदं सूत्रम् अधिकारसूत्रं वर्तते। अधिकारो नाम स्ववाक्यार्थबोधशून्यत्वे सति स्वोत्तरवाक्यार्थबोधकत्वम्, उत्तरोत्तरगमनं वेत्यधिकारः। तृतीयाध्यायस्यादिमं सूत्रम्। इतः परम् आपञ्चमाध्यायपरिसमाप्तेः प्रत्ययशब्दः संज्ञात्वेन अधिक्रियत इति तात्पर्यम्। अतः प्रक्रियायां सु औ जस् तिप् तस् झि अण् ण्वुल् तृजादयः प्रत्ययत्वेन व्यवह्रियन्ते। **प्रत्येति, प्रत्याययति वा स्वार्थं स्वप्रकृत्यर्थं वेति** अन्वर्थसंज्ञया महासंज्ञाकरणात् **हनश्च वधः, ई च खनः** नडादीनां कुक्चेत्यादिषु सूत्रेषु विहितानां वध ई इत्यादीनाम् आदेशानां कुकादीनाम् आगमानां च प्रत्ययसंज्ञा न भवति। अयं भावः प्रकृतेः, उपाधेः, विकारस्य आगमादेः प्रत्ययसंज्ञा न भवति स्वार्थबोधकत्वाभावात् स्वप्रकृत्यर्थबोधकत्वाभावाच्च। प्रतिपूर्वकात् ण्यन्तात् इण् गतौ इत्यस्मात् धातोः कर्तरि कर्मणि वा अच् प्रत्ययेन निष्पन्नस्य प्रत्ययशब्दस्य **प्रत्ययेति इति प्रत्ययः, प्रतीयते विधीयते इति प्रत्ययः, प्रत्याय्यते इति प्रत्यय, प्रत्याययति इति वा प्रत्ययः** इत्यर्थो भवति। इत्थं सूत्रमिदं संज्ञासूत्रम् अधिकारसूत्रञ्चेति।

**पर**..........। परः इति प्रथमान्तम्, च इत्यव्ययम्, प्रत्ययस्य चाधिकारः। प्रत्ययसंज्ञकः शब्दः यस्मात् विहितः सः तत्शब्दस्वरूपात् परो भवतीति सूत्रार्थः। इदमपि अधिकारसूत्रमेव। अयमपि योगः आपञ्चमपरिसमाप्तेरधिकारः। अस्य अवधिनियमे व्याख्यानमेव शरणम्।

अत्रेदं ध्यातव्यं भवति - यत्र प्रत्ययो विधीयते तत्र प्रकृतेः पञ्चम्यन्ततयोपस्थितत्वात् **तस्मादित्यु**त्तरस्य इति परिभाषासूत्रेण परत्वलाभे परश्चेति सूत्रं व्यर्थं सज्ज्ञापयति प्रत्ययः परो भवत्येवेति। अनेन नियमेन न केवलं प्रकृतिमात्रस्य प्रयोगः न वा प्रत्ययमात्रस्य। इत्थं **नापि केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः** इति नियमस्वरूपं भवतीति।

**ङ्याप्प्रातिपदिकात् (4.1.1) ङ्यन्तादाबन्तात् प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ( प-72 ) इत्येव सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यान्ङ्याब्भ्यां प्राङ् माभूदित्येवर्थम्।**

**संस्कृत व्याख्या - ङ्याप्प्राति...........** अधिकारसूत्रमिदम्। ङी च आप् च प्रातिपदिकञ्चेति समाहारद्वन्द्वादेकवचनम् ङ्याप्प्रातिपदिकम्, तस्मात् ङ्याप्प्रातिपदिकात् इति पञ्चम्यन्तम् एकपदात्मकमिदं सूत्रम्। ङी इत्यनेन ङीप् ङीष् ङीन् इत्येतेषां त्रयाणामपि सामान्येन ग्रहणं भवति एवमेव आप् इत्यनेन टाप्चाप्डापां ग्रहणम्। **'प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तदन्तस्य ग्रहणम्'** इत्यनया परिभाषया तदन्तग्रहणात् ङ्यन्तात् आबन्तात् इत्यर्थो लभ्यते।

प्रातिपदिकात् इति पृथक् पदं वर्तते। एवं ङ्यान्तात् आबान्तात् प्रातिपदिकात् च इत्यर्थः। अस्यापि अधिकारसूत्रत्वात् व्याख्यानेन आपञ्चमसमाप्तेरधिकारः। अत्रेदमाशङ्कते यत् प्रातिपदिकात् इत्येव सूत्रं क्रियताम्, ङ्याब्ग्रहणं मास्तु। **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि** ग्रहणम् इत्यनया परिभाषया ऊङ्प्रत्ययान्तात् श्वश्रूशब्दादिव दण्डिनी अजा खट्वा इत्यादिभ्योऽपि सुबादिप्रत्यया- भविष्यन्ति इति अत्रोच्यते समाधानमुखे मूले - **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि इत्येव सिद्धे ङ्याब्ग्रहणं ङ्यन्तादाबन्तात् तद्धितोत्पत्तिर्यथा स्यात् ङ्याब्भ्यां प्राङ् माभूत् इत्येवर्थम्।** अस्यायं भावः ङ्यन्तादेव तद्धितः प्राप्तुं योग्यः स च ङ्याब्ग्रहणे सत्येव स्यात्।

अर्थात् प्रातिपदिकात् ङी आप् इत्यादीनां प्रत्ययानां, तद्धितप्रत्ययानां युगपत्प्राप्तौ पूर्वं ङीवादिप्रत्यये कृते ङ्यन्तात् आबन्तादेव तद्धितोत्पत्तिर्म तु ङ्याब्भ्यां प्राक् इत्यर्थबोधाय ह्याब्ग्रहणमिति।

इत्थम् ङ्यन्तात् आबन्तात् एव तद्धितोत्पत्तिः ङ्याभ्यां प्राक् यथा न स्यादित्यर्थविधानमेव ङ्याब्ग्रहणफलम्।

तेन **लोहिनिका आर्यका** इत्यादीनां सिद्धिर्भवति। तथाहि लोहितशब्दात् **''वर्णादनुदात्तात्तोपधातो नः''** इति सूत्रेण स्त्रीत्वविवक्षायां ङीप्, तत्सन्नियोगेन तकारस्य नकारादेशश्च प्राप्तः। एवं **'लोहितान्मणौ'** इति सूत्रेण कन्नपि प्राप्तः, तत्र स्वार्थिकत्वात् अन्तरङ्गः परश्च कन् नत्वसन्नियोगशिष्टं ङीपं बाधित्वा प्रवर्तेत। ततश्च ङीप् प्रवृत्तिर्न भविष्यति कोपधत्वेन तोपधत्वाभावात्। एतेन लोहितशब्दात् अजाद्यतष्टाप् इति सूत्रेण टाप्प्रत्यये प्रत्ययस्थात् इत्यादिसूत्रेण इत्वे लोहितिका इत्येव रूपं भविष्यति न तु लोहिनिका। इष्यते रूपद्वयमपि, ङ्याप्प्रातिपदिकात् इत्यत्र ङीप्ग्रहणं तत्सामर्थ्यात् अन्तरङ्गमपि कनं बाधित्वा नत्वसंनियोगशिष्टे ङीपि कृते लोहिनीशब्दात् कनि, **''केऽणः''** इति सूत्रेण ह्रस्वे लोहिनिकेति रूपम्। किञ्च वर्णादनुदात्तादित्यस्य वैकल्पिकतया नत्वसंनियोगशिष्टङीभावे तु लोहितशब्दात् कनि, ह्रस्वे कान्तात् टापि-प्रत्यस्थादित्यादिना इत्वे लोहितिका इत्यपि सिद्ध्यति। एवमेव आप्ग्रहणेन **आर्यिका, आर्यकेति** रूपद्वयं भवति।

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (4.1.2)**

**ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सुङस्योरुकारेकारौ जशटङपाश्चेतः।**

**संस्कृत व्याख्या** - इदं सूत्रम् **आदिरन्त्येन सहेता** इत्यनेनैकवाक्यतया प्रत्याहारसंज्ञया अर्थबोधकत्वात् संज्ञासूत्रम्, स्वादिविधायकतया विधिसूत्रञ्च वर्तते।

सु औ जस्, अम् औट् शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप्, इत्येकविंशतिः स्वादयः प्रत्ययाः तेषु समाहारद्वन्द्वः, तस्मात् नपुंसकम् एकवचनञ्च। अथवा इतरेतरयोगद्वन्द्वः तथा सति सौत्रत्वादेकवचनम्। अत्र **प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात्** इत्येतेषामधिकारः, इत्थम् ङीप्प्रत्ययान्तात्, आप्प्रत्ययान्तात्, प्रातिपदिकसंज्ञकात् परे स्वादयः प्रत्यया भवन्तीति सूत्रस्यार्थः। एतेन स्वादयः प्रत्ययाः पर एव, ङ्यान्तात् आबान्तात् प्रातिपदिकात् एव स्युरिति फलितार्थः।

अत्र प्रत्ययेषु 'सु ङसि' इत्यनयोरुकारेकारौ, जस्–शस्–इत्यनयोर्जकारशकारौ, औट्–टा इत्यनयोष्टकारः, ङे ङसि ङस् ङि इत्येतेषां ङकारः, सुप् इत्यस्य पकारः इत्येते इत्संज्ञका ज्ञातव्याः, इत्संज्ञायां च लोपः।

सर्वेषु प्रत्ययेषु इत्संज्ञाफलमेवं बोध्यम् –सोरुकारः **अर्वणस्त्रसावनञः** (6.4.127) इत्यत्र विशेषणार्थः। अत्र अर्वणस्तृ असौ इति पदच्छेदः। असौ इत्यत्र न सुः असुः तस्मिन् असौ। **सुपदे तृ**–इत्यादेशस्य निषेधो भवति। यदि सु इत्यस्योकार इत्संज्ञको न स्यात् तदाऽत्र सूत्रे लाघवात् असि इत्येव पाठः कर्त्तव्यः, किञ्च तथा कृते सकारादिप्रत्यये सुबादावपि निषेधापत्ति स्यात्तद्वारणाय सु इत्यत्रोकार अनुबन्धो न तूच्चाराणार्थक इति।

जस् शसोः जकारशकारयोत्संिज्ञा '**जसःशि**', **तस्माच्छसो नः** इत्यनयोर्विषयविभागबोधनाय। औटष्टकारः **सुट् प्रत्याहारार्थः।** टाटकारस्तु **टाङसिङसाम्, द्वितीया टौस्वेन** इति विशेषणार्थः। ङेप्रभृतीनां ङकारो **घेर्ङिति ङेराम्** इति विशेषणार्थः। सुपः पकारेत्संज्ञकः प्रत्याहारार्थः।

**विभक्तिश्च ( 1.4.104 ) सुप्तिङौ विभक्तिसञ्ज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाः। ताभिरिहापि व्यवहारः।**

**संस्कृत व्याख्या** – '**विभ**.....'। अत्र विभक्तिरिति प्रथमान्तं, चेत्यव्ययम्। **सुपः**(3.4.103) सूत्रस्य तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमः इति सूत्रात् तिङ् इत्यस्य चानुवृत्तिर्भवति। विभक्तिरत्र संज्ञा सुपः, तिङश्चेति द्वयं संज्ञी। एतेन सुप् तिङौ विभक्तिसंज्ञकौ स्त इति सूत्रार्थः। सूत्रे चकारग्रहणेन तिङन्तानां प्रथमपुरुषादिसंज्ञाभिः सह वचनसंज्ञायाः समावेशो भवति। तदुच्यते **चकारः पुरुषवचनसंज्ञाभिः सह समावेशार्थः।** एतेन **आ कडारादेका** संज्ञा इत्यनेन एकसंज्ञाधिकारेऽपि विभक्तिसंज्ञया सह वचनसंज्ञापि भवति। अन्यथा रामेभ्यः, भवाम इत्यादौ विभक्तिसंज्ञाया अभावेन '**विभक्तौ तुस्माः**' इति निषेधो न स्यात्।

उक्तेषु सुप्प्रत्ययेषु त्रिकाणां सप्तसमुदायो भवति प्रत्येकं त्रिकेषु प्राचीनाचार्यैः कृताः प्रथमा द्वितीयेत्यादिसंज्ञा अत्रापि व्यवह्रियते। इत्थं प्रथमाद्वितीयेत्यादिप्राचां संज्ञा यस्या व्यवहारः पाणिनिशास्त्रेऽपि कृतो विद्यत इति।

**सुपः ( 1.4.103 ) सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः।**

**संस्कृतव्याख्या** – सुप इति षष्ठ्यन्तम् एकपदम्। अत्र ''**तान्येकवचनद्विवचनबहुवचनान्येकशः**'' इत्यस्मात् 'तानि' इति परित्यज्य सर्वम् अनुवर्तते, तिस्त्रीणि त्रीणि प्रथममध्यमोत्तमा इत्यस्मात् त्रीणि त्रीणि इति चेत्यनुवर्तते।

इत्थं सुपः त्रिकसमुदायस्य एकैकम् एकवचनसंज्ञा, द्विवचनसंज्ञा, बहुवचनसंज्ञा भवति। तालिकयैवं ज्ञातुं शक्यते – तद्यथा–

| **विभक्तिः** | **एकवचन** | **द्विवचन** | **बहुवचन** | **विभक्तिः** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|---|---|---|---|
| प्रथमा | सु | औ | जस् | पञ्चमी | ङसि | भ्याम् | भ्यस् |
| द्वितीया | अम् | औट् | शस् | षष्ठी | ङस् | ओस् | आम् |
| तृतीया | टा | भ्याम् | भिस् | सप्तमी | ङि | ओस् | सुप् |
| चतुर्थी | ङे | भ्याम् | भ्यस् | | | | |

**द्वये कयोर्द्विवचनैकवचने ( 1.4.22 ) द्वित्वैकत्वयोरेते स्तः।**

**बहुषु बहुवचनम् ( 1.4.22 ) बहुत्वे एतत्स्यात्। रुत्वविसर्गौ। रामः।**

**संस्कृत व्याख्या – द्वये**.......। अत्र सूत्रे पदद्वयं वर्तते द्वयेकयोरित्येकं द्विवचनैकवचने इति द्वितीयं पदम्।

द्वौ च एकश्च तयोरितरेतरयोगद्वन्द्वो द्व्येकौ तयो: द्व्येकयो:। द्विवचनं च एकवचनं तयोरितरेतरयोगद्वन्द्वो द्विवचनैकवचने। अत्र द्व्येकयोरिति भावप्रधानो निर्देशस्तेन द्विशब्दात् द्वित्वस्य एकशब्दात् एकत्वस्य च ग्रहणं भवति। द्विशब्दो द्वित्वस्य एकशब्दश्च एकत्वसंख्यावाचको न तु संख्येयवाचक इति तात्पर्यम्।

सूत्रस्थं द्व्येकयोरित्युद्देश्यवाचकं द्विवचनैकवचने इति च विधेयवाचकं पदम्, उद्देश्यविधेययो: समानसंख्याकत्वात् यथासंख्येनान्वयो भवति तेन द्वित्वस्य विवक्षायां द्विवचनम्, एकत्वस्य विवक्षायाञ्च एकवचनमिति सूत्रार्थ: सम्पद्यते।

**बहु.1** अयमपि संख्यापर एव। बहुषु इति सप्तम्यन्तं, बहुवचनम् इति प्रथमान्तं पदं वर्तते। एतेन बहुत्वसंख्याविवक्षायां बहुवचनं भवतीति सूत्रार्थ: सङ्गच्छते।

अत्रेदमाशङ्कते सूत्रे बहुशब्द: बहुत्वपरक:, बहुत्वस्य एकत्वात् बहुषु इति बहुवचनं कथं प्रयुक्तमिति,अत्रेदं बोध्यम् –

बहुत्वसंख्याधारद्रव्यगतबहुत्वस्य बहुत्वगुणे (धर्मे) आरोप्य कृतं वर्तते। तथा च बहुत्वं च **त्रित्वचतुष्ट्वादिपरार्धसंख्याव्यापकीभूतधर्मविशेषो** न तु त्रित्वाद्यन्यतमम्। तत्फलं तु 'बहुपर्वत:' इति वैपुल्यवाचिनो नेह ग्रहणम् इति सूचनार्थम्। रुत्वविसर्गौ। सु इत्यस्य सकारस्य रुत्वे, विसर्गे च राम इति रूपं भवति। अत्रेयमाशङ्का भवति यत् ससजुषोरु: (8.2.66) इति सूत्रेण विधीयमानस्य रुत्वस्य उपदेशेऽजनुनासिक इत् (1.3.2) इति सूत्रं प्रति असिद्धत्वात् उकारस्य इत्संज्ञा लोपयोरभावात्, **स्थानियदादेशोऽनल्विधौ ( 1.1.56 )** इत्यस्यापि त्रिपाद्यामप्रवृत्या रेफान्तस्य पदसंज्ञाभावेन च विसर्गोऽत्र दुर्लभ: अत्रेदं बोध्यम् '**न मुने**' इति सूत्रे 'न' इति योगं विभज्य असिद्धं न इति व्याख्यानात् इदुदुपधस्य चाप्रत्ययस्य अप्रत्ययग्रहणेन स्थानिवत्वादेशे रोरसिद्धत्वाभावज्ञापनात् वा इष्टसिद्धिरिति।

**राम:** – संज्ञाशब्दोऽयमव्युत्पन्न इति पक्षे '**अर्थवदधातुरप्रत्यय: प्रातिपदिकम्**' इति सूत्रेण प्रातिपदिकसंज्ञायां, करणाधिकरणयोश्च इत्यधिकारे घापवादने 'हलश्च' इति सूत्रेण घञ् प्रत्ययेन 'रमन्ते योगिनोऽस्मिन्निति व्युत्पन्नपक्षे कृतद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां, '**द्व्येकयोर्द्विवचनैकवचने**' इति सूत्रसहकारेण '**स्वौजसमौट्**......' इत्यादिना सूत्रेण प्रथमा विभक्तौ एकत्वविवक्षायां सुप्रत्यये राम सु इति जाते, **उपदेशेऽजनुनासिक इत्** इति सूत्रेण उकारस्येत्संज्ञायां, लोपे च 'राम स्' इति जाते 'ससजुषो: रु: इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे राम र् इति जाते अवसानसंज्ञायाम्, '**खरवसनायोर्विसर्जनीय:**' इति सूत्रेण रेफस्य स्थाने विसर्गादेशे राम: इति रूपं सिद्ध्यति।

**प्रातिपदिकार्थगतद्वित्वादिविवक्षायां प्रातिपदिकस्य द्वित्र्यादिप्रयोगप्राप्तौ राम राम औ इत्यवस्थायाम् अग्रिमं सूत्रमारभते–**

**सरूपाणामेकशेष एकविभक्तौ ( 1.2.64 ) एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। प्रथमयो: पूर्वसवर्ण: ( 6.1.102 ) नादिचि ( 6.1.104 ) वृद्धिरेचि ( 6.1.88 ) रामौ।**

**संस्कृतव्याख्या** – सरूपाणाम् एकशेष एकविभक्तौ इति सूत्रस्य पदच्छेद:।

समानं रूपं येषां ते सरूपा:, तेषां सरूपाणाम् इति बहुब्रीहिसमासघटितं षष्ठीबहुवचनान्तं पदम्। **ज्योतिर्जन**पदेत्यादिना समानस्य सभाव:। शिष्यत इति शेष:, एकश्चासौ शेष: एकशेष:, **पूर्वकालैक....** इत्यनेन कर्मधारयसमास:। यद्वा एक इति लुप्तषष्ठीकं पदम्, शेष इति भिन्नं पदम्। एका चासौ विभक्ति एकविभक्ति: तस्याम् एकविभक्तौ, कर्मधारय:। इत्थम् एकविभक्तौ सरूपाणाम् एकस्य शेषो भवतीति सूत्रार्थ:। एकस्यां विभक्तौ परत: सरूपाणामेव दृष्टानां मध्ये एक एव शिष्यत इति फलितार्थ:।

अत्र सूत्रे एकशेष इत्यत्र एकशब्द: प्रथमार्थक:, एकविभक्तौ इत्यत्र च एकशब्द: समानार्थक:। **वृद्धोयूना**

**तल्लक्षणश्चेदेवविशेषः** इति सूत्रात् 'एव' इति पदम् अपकृष्यते, एतेन सरूपाण्येव दृष्टानि, न तु विरूपाणि इत्यर्थो लभ्यते। सरूपाणाम् इत्यत्र निर्धारणे षष्ठी तस्य च लुप्तषष्ठीकेन एक इत्यनेन सहान्वयो भवति, यदि च एकशेष इत्यत्र समासः क्रियते तदा एकपदस्य सरूपाणाम् इत्यनेन सहान्वयो न स्यात् **विशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति** नियमात्।

इत्थम् एकविभक्तौ (यावत् समानविभक्तौ) यानि सरूपाणि दृष्टानि एकस्यामपि विभक्तौ परतो विरूपाणि न दृष्टानि तेषाम् एक एव शिष्यते। **यः शिष्यते स लुप्यमानार्थाभिधायी इति** नियमेन शेषभूतेन एकेन पदेन लुप्यमानस्यापि बोधो भवति। यथा राम राम औ इत्यवस्थायाम् एकशेषे 'राम औ' इति। अत्र सूत्रे एव ग्रहणेन न क्वचिद् विरूपाणि दृष्टानि इत्यर्थेन मातृशब्दस्तावद् जननीवाची परिच्छेतृवाची च तत्र 'मातृभ्याम्' इति भ्यामादौ क्वचित्सारूप्ये सत्यपि, औजसादिषु मातरौ माताराविति वैरूप्यदर्शनात् एकशेषो न भवति। एतद्द्योतनाय एव एकविभक्तौ इत्यत्र एकग्रहणं वर्तते।

एवमेव सूत्रे एकशेष इत्यत्र एकपदोपादानं तु द्विबहूनामपि एकशेषः स्यात्तन्माभूत् इत्येतदर्थम्। शेषपदग्रहणाभावे सरूपाणां स्थाने एक आदेशः स्यात्। ततश्च अश्वश्च अश्वश्चेति द्व्युदात्तवतः स्थाने द्व्युदात्तवान् आदेशः स्यात् तन्निवृत्यर्थं शेषग्रहणं कृतम्।

अत्र सूत्रे **विभक्तिः** सारूप्ये उपलक्षणम् न तु एकशेषे निमित्तम्। अत एकविभक्तौ परतः एकशेषो भवतीति व्याख्यानं न कर्तव्यम्, एवं स्वीकारे जननीपरिच्छेतृवाचिनोरेकशेषापत्तिः स्यात्। एवञ्च अनैमित्तिकत्वेनान्तरङ्गोऽयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्तते। यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्याद् द्वन्द्वश्च प्रवर्तेत। आरब्धे त्वेकशेषेऽनेकसुबन्तविरहाद् **द्वन्द्वश्च** प्राप्तिरेव नास्तीति तात्पर्यम्। घटश्च घटश्च घटश्च तेषां समाहारद्वन्द्वविषये तु अस्य प्रवृत्तिर्नभवति अनभिधानात्। इत्थं राम औ इत्यवस्थायां '**वृद्धिरेचि**' इति सूत्रं प्रबाध्य '**प्रथमयोःपूर्वसवर्णः**' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते '**नादिचि**' इति सूत्रेण निषेधो भवति, तथा च प्रतिषिद्धे सति वृद्धेः प्रवृत्तौ '**वृद्धिरेचि**' इति सूत्रेण वृद्धौ रामौ इति रूपं भवति।

**रामौ** – रामशब्दात् अव्युत्पत्तिपक्षे **अर्थवदित्यादिना**, व्युत्पत्तिपक्षे '**कृत्तद्धितसमासाश्च**' इति सूत्रेण प्रातिपदिकसंज्ञायाम्, '**द्व्येकयोर्द्विवचनैकवचने**' इति सूत्रेण द्वित्वविवक्षायां प्रथमाद्विवचने औ विभक्तौ 'राम राम औ' इति जाते '**सरूपाणामेकशेष एकविभक्तौ**' इति सूत्रेण एकशेषे 'राम औ' इति जाते '**वृद्धिरेचि**' इति सूत्रेण प्राप्तां वृद्धिं प्रबाध्य '**प्रथमयोः पूर्वसवर्णः**' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते, '**नादिचि**' इति सूत्रेण निषेधे पुनः '**वृद्धिरेचि**' इति सूत्रेण वृद्धौ रामौ इति रूपं भवति।

**रामशब्दात् बहुत्वविवक्षायां प्रथमा बहुवचने जस् विभक्तौ 'राम जस्' इत्यवस्यायाम् अग्रिमं सूत्रम् उपस्थापयति –**

**चुटू ( 1.3.7 ) प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्येत्संज्ञायाम्।**

**न विभक्तौ तुस्माः ( 1.3.4 ) विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति सकारस्य नेत्वम्।**

**संस्कृतव्याख्या** – '**चुटू**.....'। चुश्च टुश्च तयोरितरेतरयोगद्वन्द्वः चुटू इति प्रथमान्तम् एकपदम् अत्र षः प्रत्ययस्य इति सूत्रेण प्रत्ययस्य, **आदिर्ञिटुडवः** इत्यनेन आदेः, **उपदेशेऽजनुनासिक इत्** इति सूत्रेण इतः अनुवृत्तिर्भवति। एतेन प्रत्ययादौ चवर्ग-टवर्गयोरित्संज्ञा भवतीति सूत्रार्थः सम्पद्यते।

सूत्रे प्रत्यय इत्यस्यानुवृत्यभावे प्रत्ययातिरिक्तस्याप्यादेः चवर्ग-टवर्गयोरित्संज्ञा स्यात् तेन चिरिणोति **जगत् टीकते ड्यते** इत्यादावपीत्संज्ञापत्तिः स्यात् तन्माभूत् इत्येतदर्थं प्रत्ययग्रहणम्।

अत्रेदमाशङ्कते प्रत्ययाद्या: 'चुटू' इत्यनयोरित्संज्ञाविधानात् '**चुञ्चुप्, चणप् चरट्, टीटच्** इत्यादि तद्धितप्रत्ययाननां चट् चिक् ढ ढ़ णु इत्याद्युणादिप्रत्ययानाम् इत्संज्ञा भवतीति, अत्रेदं बोध्यम् – तेन **वित्तश्चुञ्चुप्** इत्यादौ प्रत्ययादौ यकारो लुप्तनिर्दिष्टयकारस्य लोपोव्योर्वलीति सूत्रेण लोपविधानात्। अन्यच्च 'ष: प्रत्ययस्य' चुटू इत्यनयोरेकयोगं कृत्वा 'ष चुटव: प्रत्ययस्य' योगविगाश्रयात् 'चुटू' इत्यस्यानित्यत्वं ज्ञाप्यते। अनित्यत्वाच्च कुत्रचिन्नेत्संज्ञा भवतीति। **न विभ.........।** जस: सकारस्य हलन्त्यम् इतीत्संज्ञायां लोपमाशङ्क्य इदं सूत्रमारभते **न विभक्ताविति।** तुस् च, स च मश्चेति विग्रहे इतरेतरयोगद्वन्द्व:। न इत्यव्ययं पदम्, विभक्तौ इति सप्तम्यन्तम्। अत्र **उपदेशेऽजनुनासिक** इत् इति सूत्रात् उपदेशे इत्यस्य इत् इत्यस्य, चानुवृत्तिर्भवति **हलन्त्यम्** इति सूत्रेण अन्त्यमित्यस्य। इत्थम् विभक्तिस्था: तवर्ग-सकार-मकारा इत्संज्ञका न भवन्तीति सूत्रार्थ: सम्पद्यते। इति जस: सकारस्य नेत्वम्। सूत्रे तु इत्यस्योदाहरणं **रामात् पचेरन्**। **मकारस्य** तु रामम्, अद्राक्षम्। इत्थम्, राम अस् इत्यवस्थायाम् –

**अतो गुणे (6.1.97) अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्। इति प्राप्ते। परत्वात्पूर्वसवर्णदीर्घ। 'अतो गुणे' इति हि 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् (प.६०) इति न्यायेन 'अक: सवर्णे दीर्घ:' (सूत्र ६०) इत्यस्यैवापवाद: न तु प्रथमयो: (सू.१६४) इत्यस्यापि। रामा:।**

**संस्कृत व्याख्या – 'अतो गुणे.....'।** सूत्रे अत: इति पञ्चम्यन्तं पदम्, गुणे इति सप्तम्यन्तम्, **एक: पूर्वपरयो:** इत्यस्याधिकार:। **एङि पररूपम्** इति सूत्रात् 'पररूपम्' इति **उस्यपदान्तात्** इति सूत्रात् अपदान्तात् इति चेत्यनुवर्तते। एतेन अपदान्तात् अकारात् परे गुणवाचके पूर्वपरयो: स्थाने पररूपमेकादेशो भवति।

तथाहि राम अस् इत्यवस्थायाम् '**अक: सवर्णे दीर्घ:**' इति सूत्रेण प्राप्तं दीर्घं प्रबाध्य सवर्णदीर्घस्यापवादेन, **अतो गुणे** इति इति सूत्रेण पररूपे प्राप्ते, **अतो गुणे** (6.1.97) इत्यपेक्षया **प्रथमयो: पूर्वसवर्ण:** (6.1.102) इत्यस्य परत्वात् पूर्वसवर्णदीर्घ: प्राप्नोति।

अत्रेदमाशङ्कते **अतोगुणे** इति पररूपम् अपवादत्वात् यथा सवर्णदीर्घं बाधते तथा पूर्वसवर्णदीर्घं कुतो न बाधते, अत्रोच्यते '**पुरस्तादपवाद** इत्यादि। अस्यायम्भाव: अष्टाध्यायिक्रमे पुरस्ताद् अपवादा अर्थात् उत्सर्गशास्त्रात् पूर्वपठितम् अपवादशास्त्रम् अनन्तरान् **विधीन्**.....' स्वसमीपस्थविधीन् एव बाधते नोत्तरान् अपवादाद्यशास्त्रोत्तरपठितम् उत्सर्गशास्त्रं न बाधत इति तात्पर्यम्। अष्टाध्यायिक्रमे '**अतो गुणे**' इत्युत्तरम् अव्यक्तानुकरणस्य इति पठित्वा **अक: सवर्णे दीर्घ:**, **प्रथमयो: पूर्वसवर्ण** इति पठितम्। ततश्च पररूपमिदं सवर्णदीर्घमेव बाधते न तु पूर्वसवर्णदीर्घमपीति। रामा:।

**रामा:** राम शब्दात् प्रातिपदिकसंज्ञायां '**बहुषु बहुवचनम्**' इति सूत्रेण बहुत्वविवक्षायां प्रथमाबहुवचने जस् विभक्तौ राम राम राम जस् इत्यवस्थायां '**सरूपाणामेकशेष एकविभक्तौ**' इति सूत्रेण एकशेषे राम जस् इत्यवस्थायां '**चुटू**' इति सूत्रेण जकारस्येत्संज्ञायां राम 'अस्' इति स्थिते '**हलन्त्यम्**' इति सूत्रेण संज्ञकारस्येत्संज्ञायां प्राप्तायां '**न विभक्ता तुस्मा**' इति सूत्रेण निषेधे '**अक: सवर्णे दीर्घ:**' इति सूत्रेण दीर्घे प्राप्ते तं प्रबाध्य '**अतो गुणे**' इति सूत्रेण पररूपे प्राप्ते परं परत्वात् '**प्रथमयो: पूर्वसवर्ण:**' इति सूत्रेण पूर्वसवर्णदीर्घे' इति जाते '**ससजुषो: रु:**' इत्यनेन सस्य रुत्वे, '**खरवसानयोर्विसर्जनीय:**' इति सूत्रेण रेफस्य विसर्गे रामा इति रूप सिद्धम्।

**एङ् ह्रस्वात्सम्बुद्धे: (6.1.96) एकवचनं संबुद्धि (2.3.49) संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात्। एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते संबुद्धेश्चेत्। सम्बुद्धयाक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषान्नेह। हे कतरत् कुलेति। हे राम। हे रामौ। हे रामा:। 'एङ्' ग्रहणं किम् – हे हरे। हे विष्णो। अत्र हि परत्वान्नित्यत्वाच्च संबुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति।**

**संस्कृतव्याख्या – 'एकवचनं........'।** सूत्रेऽस्मिन् पदद्वयं वर्तते। एकवचनम् इति प्रथमान्तं पदम्, सम्बुद्धि

इति प्रथमान्तम्। प्रातिपदिकार्थेत्यादि सूत्रात् प्रथमा इत्यनुवर्तते तस्य च षष्ठ्यन्ततया विपरिणाम: क्रियते। संबोधने च इति सूत्रात् सम्बोधने इत्यनुवर्तते। एतेन सम्बोधने प्रथमा एकवचनं सम्बुद्धिसंज्ञं स्यादिति सूत्रार्थ:। एतेन हे राम स् इति स्थिते सम्बुद्धिसंज्ञायाम्।

**एङ् ह्रस्वात्.....।** अत्र एङह्रस्वात् सम्बुद्धे: इति पदद्वयम्। एङ् च ह्रस्वश्च तयो: इति समाहारद्वन्द्वे एङ्ह्रस्वम् तस्मात् एङ्ह्रस्वात् इति पञ्चम्यन्तं पदम्, सम्बुद्धे: इति षष्ठ्यन्तं पदम्। अत्र '**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं** हल्' इत्यतो हलिति प्रथमान्तम् अनुवर्तते तस्य च हलि इत्यनेन समानाधिकरण्येन अन्वयो भवति। लुप्यत इति लोप:। कर्मणि घञ् प्रत्यय:। एङ्ह्रस्वात् इति अङ्गविशेषणम्। विशेषेणत्वात् तदन्तविधि:। इत्थम् एङन्तात् ह्रस्वान्तात् अङ्गात् परे हल् लुप्यते संबुद्धिविवक्षायाम् इति सूत्रार्थ:।

अत्रेदमाशङ्कते यत् एङ्ह्रस्वात् इति अङ्गाधिकारे नास्ति तर्हि कथं अङ्गस्य विशेषणम् तस्य वा किं प्रयोजनम्, एङो ह्रस्वाच्च परं संबुद्ध्यवयवभूतं हल् लुप्यत इत्येव सूत्रार्थोऽस्तु अत्रोच्यते मूले **सम्बुद्ध्याक्षिप्तस्येत्यादि।** अत्रेदं तात्पर्यम् संबुद्धे: प्रत्ययत्वात् तत्प्रकृतेरङ्गत्वम् अर्थाल्लब्धं तस्य च एङो ह्रस्वेन च तदन्तविधौ एङन्तात् ह्रस्वान्ताच्चाङ्गात् परं हल लुप्यत – इत्यर्थ लाभात् हे कतरत् इत्यादौ कतरशब्दात् नपुंसके सम्बोधने एकवचने सुप्रत्यये हे कतरत् स् इति स्थिते – **अदड्डतरादिभ्य: पञ्चभ्य:** (7.1.125) इति सूत्रेण अदङ् आदेशेऽनुबन्धलोपे हे कतर अद् इति जाते डित्वसामर्थ्याद् अभस्यापि टेर्लोपे वर्णसम्मेलने हे कतरत् इत्यत्र हलो लोपो न भवति ह्रस्वाङ्गात् परत्वाभावात्। परम् हे कुलम् इत्यादौ ह्रस्वाङ्गात् परत्वात् मकारलोपे हे कुल इति रूपं भवति। तस्मात् सम्बुद्ध्याक्षिप्तस्यैङ्ह्रस्वाभ्यां विशेषणम् आवश्यकमिति। सूत्रे एङ् ग्रहणं किमर्थमित्याशङ्कायां तत्फलं कथयति हे हरे। हे विष्णो। अत्रायम्भाव: हे हरि सु, हे विष्णु सु इत्यवस्थायां सम्बोधने '**ह्रस्वस्य गुण:**' इति सूत्रेण गुणे हे हरे स्, हे विष्णो स् इत्यवस्यां एङन्तपरत्वात् स् इत्यस्य लोपे हे हरे, हे विष्णो इति रूपं भवति, एङ्ग्रहणाभावे सलोपाभावे उक्तरूपं न स्यात्। तस्मात् उक्तरूपसिद्ध्यर्थम् एङ्ग्रहणं कृतमिति।

अत्र पुनरिदमाशङ्कते हे हरि हे विष्णु इत्यादे: ह्रस्वान्तात् '**ह्रस्वस्य गुण:**' इति सूत्रेण गुण:, '**एङ्ह्रस्वात्सम्बुद्धे:**' इति सूत्रेण च हल्लोपश्च युगपत् प्राप्नोति, अस्यामवस्थायां '**वर्णादाङ्गं बलीय:**' इति नियमेन वर्णाश्रितकार्यापेक्षया अङ्गकार्यस्य बलवत्वात् ह्रस्वस्य गुणात् पूर्व एव सम्बुद्धिलोप: स्यात्तदा एङ्ग्रहणस्य नास्ति किमपि प्रयोजनम् इति, अत्रोच्यते समाधानमुखेन मूले – **अत्र हि परत्वान्नित्यत्वाच्च सम्बुद्धिगुणे कृते ह्रस्वात्परत्वं नास्ति।** अर्थात् परत्वात् नित्यत्वात् पूर्वं गुण एव स्यात् न तत्पूर्वं सम्बुद्धिलोप:। तस्मात् एङ् ग्रहणं सार्थकमिति।

**अमि पूर्व: ( 6.1.107 ) अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्। रामम्। रामौ।**

**संस्कृतव्याख्या** – अत्र पदद्वयं वर्तते। अमि इति सप्तम्यन्तं पदमेकम्, पूर्व इति प्रथमान्तं द्वितीयम्। अत्र सूत्रे 'अक: सवर्णे दीर्घ:' इति सूत्रात् दीर्घ इत्यस्य इको यणचि इति सूत्राच्च अपि इत्यस्यानुवृत्तिर्भवति। एक: पूर्वपरयोरित्यस्य अधिकार:। एतेन अक: परे पूर्वपरयो: पूर्वरूपमेकादेश: स्यात्। अर्थात् अमिविद्यमानो योऽच् तस्मिन् परे पूर्वपरयो: स्थाने पूर्वरूपमेकादेश: स्यादिति सूत्रार्थ:। तद्यथा रामम् इति मकारादकारस्य अमवयवाकारस्य च पूर्वरूपमकार एको भवति। अचि इत्यननुवृत्तौ अक: अमि परे पूर्वपरयो: 'पूर्वरूपमेकादेश: स्यादिति लभ्येत। तथा सति अमो मकारसहितस्य पूर्वरूपापत्ति: तन्माभूत् तदर्थम् अजनुवृत्ति:।

**रामम्** – रामशब्दात् प्रातिपदिकसंज्ञायां '**द्व्येकयोर्द्विवचनैकवचने**' इति सूत्रेण एकत्वविवक्षायां द्वितीयैकवचने अम् विभक्तौ राम अम् इत्यवस्थायां '**अमि पूर्व:**' इति सूत्रेण पूर्वरूपे रामम् इति सिद्धम्।

**रामौ** – रामशब्दात् प्रातिपदिकसंज्ञायां '**द्व्येकयोर्द्विवचनैकवचने**' इति सूत्रेण द्वित्वविवक्षायां द्वितीयाद्विवचने

औट् विभक्तावनुबन्धलोपे राम औ इति स्थिते '**प्रथमयोः पूर्वसवर्णः**' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य '**वृद्धिरेचि**' इति वृद्धौ रामौ इति रूपं सिद्ध्यति।

**लशक्वतद्धिते ( 1.3.8 ) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा।**

**संस्कृतव्याख्या** – लशकु अतद्धिते इति सूत्रस्य पदविभागः।

लशकु इति लश्च शश्च कुश्चेति विग्रहे समाहारद्वन्द्वः। न तद्धितं, तस्मिन् अतद्धिते इति सप्तम्यन्तं द्वितीयं पदम्। अत्र उपदेशेऽजनुनासिक इत्, **आदिर्ञिटुडवः, ''षः प्रत्ययस्य''** इत्यतः इदिति, आदिरिति, प्रत्ययस्येति चानुवर्तते। अद्धिते इति षष्ठ्यर्थे सप्तमी। एतेन तद्धितभिन्नस्य आदिभूतं लकारशकारवर्गम् इत्संज्ञं भवतीत्यर्थः ''वृत्तौ तु इतरेतरयोगद्वन्द्वेन विवृणोति लशकवर्गा इति। तदुच्यते वृत्तौ तद्धितप्रत्ययं वर्जयित्वा प्रत्ययाद्याः लशकवर्गा इत्संज्ञका भवन्ति इति। इति शसः शस्येत्संज्ञा भवति, सकारस्य '**न विभक्तौ तु स्माः**' इति सूत्रेण निषेधेन इत्संज्ञा न भवति।

इत्थम् – राम शब्दात् द्वितीयाबहुवचने शस् विभक्तौ राम शस् इत्यवस्थायां **लशक्वतद्धिते** इति सूत्रेण शकारस्येत्संज्ञायां, **हलन्त्यम्** इत्यनेन प्राप्तस्य सकारस्य इत्संज्ञा प्राप्नोति परं '**न विभक्तौ तुस्मा**' इति सूत्रेण निषेधे 'राम अस्' इति जाते **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण दीर्घे रामास् इति स्थितौ अग्रिमं सूत्रं प्रवर्तते –

**तस्माच्छसो नः पुंसि ( 6.1.103 ) कृतपूर्वसवर्णदीर्घात्परो य शसः सकारस्तस्य नः स्यात्पुंसि।**

**अट्कुप्वाङ्नुम्व्यवायेऽपि ( 8.4.2 ) अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। पदव्यवायेऽपि ( 1057 ) इति निषेधं बाधितुमाङ्ग्रहणम्। नुम्ग्रहणमनुस्वारोपलक्षणार्थम्। तच्याकर्तुं शक्यम्। इति णत्वे प्राप्ते।**

**पदान्तस्य ( 8.4.37 ) पदान्तस्य नस्य णत्वं न स्यात्। रामान्।**

**संस्कृतव्याख्या – तस्मात्........।** तस्मात् शसो नः पुंसि इति सूत्रस्य पदच्छेदः। अत्र तस्मात् इति पञ्चम्यन्तं पदम्, '**प्रथमयोः पूर्वसवर्णः**' इति पूर्वसवर्णकृतः संनिहितः पूर्वसवर्णदीर्घः तस्मात् इत्यनेन परामृश्यते। दिक्शब्दयोगे पञ्चम्येषा, परस्य इत्यस्याध्याहारः क्रियते। शसः इति अवयवषष्ठी, षष्ठ्यर्थावयवस्य परस्य इत्यस्य विशेष्येणान्वयो, नः इति प्रथमान्तं, पुंसि इति सप्तम्यन्तं पदम्। एतेन कृतपूर्वसवर्णदीर्घात् अचः परस्मात् शसः सकारस्य स्थाने नकारादेशः स्यात् पुंसि – पुँल्लिङ्गे इति तात्पर्यम्।

अत्र सूत्रे 'कृतपूर्वात्' इति ग्रहणं किमर्थमिति जिज्ञासायामेतद् बोध्यं यत् 'कृतपूर्वादितिग्रहणाभावे, दीर्घात् परस्य शसवयवस्य इत्येवार्थे जाते '**एतान् गाः पश्य**' इत्यत्र गोशब्दात् शसः सस्यापि नत्वप्रसङ्गः स्यात्। गा इत्यत्र **औतोम्शसो**रित्याकार एकादेशः, न तु पूर्वसवर्णदीर्घ इति, ततः परस्य नत्वं न भवति, कृतपूर्वग्रहणाभावे अत्रापि नत्वं स्यात्तन्माभूत् तदर्थं कृतपूर्वदीर्घग्रहणम् इति भावः।

शसः इति ग्रहणे प्रथमाबहुवचने रामाः इत्यत्र नत्वं न भवति।

'**अट्कुप्वा.......**' सूत्रेऽस्मिन् पदद्वयं वर्तते। अट् च कुश्च पुश्च आङ् च नुम् चेति अट्कुप्वाङ्नुमः इतरेतरयोगद्वन्द्वः, अट्कुप्वाङ्नुम्भिर्व्यवाब्य इति अट्कुप्वाङ्नुम्व्यवायः, तस्मिन् अट्कुप्वाङ्नुम्व्यवाये इति सप्तम्यन्तम् एकं पदम् अपि इत्यव्ययं द्वितीयं पदम्। अत्र **रषाभ्यां नो णः समानपदे** इति सूत्रमनुवर्तते। एतेन अट् कवर्ग पवर्ग आङ्नुम् तैः व्यवधानम्, तस्मिन् सत्यपि रषाभ्यां परस्य नस्य णत्वं स्यादिति सूत्रस्यार्थः सम्पद्यते। **रषाभ्यां नो णः समानपदे** इति सूत्रेण रषाभ्याम् अव्यवहितपरस्य णत्वं विहितम्। रामेण इत्यादौ अडादिव्यवधानेऽपि णत्वप्राप्त्यर्थं सूत्रमिदमारब्धम्।

अत्र अडादिभिः समस्तैर्व्यवधानं लक्ष्ये क्वापि न सम्भवम्, एकैकव्यवधाने इत्यर्थे रामेण इत्यादौ अव्याप्तिः तस्मात् यथासम्भवं मिलितैश्च व्यवधाने इत्युक्तं परं यथासम्भवं मिलितैर्व्यवधानेऽपि इतिव्याख्याने नराणाम् इत्यादौ एकमात्रव्यवधाने णत्वं न स्यात्। अतः अडादिभिः व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधाने इत्युक्तम्। इत्थम् अट्कुपु आङ् नुम् एभिः र्व्यवायैः र्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि समानपदे रषाभ्यां परस्य नस्य णत्वं भवतीति सूत्रार्थः सम्पद्यते। एतेन **क्षुभ्नादिषु** च इति णत्वनिषेधसूत्रे क्षुभ्नशब्दपाठोऽर्थवान् भवति। अत्र समानपद इत्यस्य एकपदे (अखण्डपदे) इत्यर्थः तेन रामेण इत्यादौ नातिप्रसङ्गो भवति। आङाव्यवाये णत्वस्योदाहरणं **पर्याणद्धम्**। आङ्ग्रहणाभावे, '**उपसर्गादसमासेऽपि**' इत्यत्र अस्यानुवृत्त्या णत्वं न स्यात् तस्माद् **आङाव्यवधाने** इत्युक्तम्। अत्रेदमाशङ्कते सूत्रे अडव्यवाय इत्युक्ते 'आ' इत्यस्य व्यवधानेऽपि णत्वं भविष्यति पुनराङ् ग्रहणं किमर्थम्। अत्रोच्यते मूले '**पदव्यवायेऽपि**' इति निषेधं बाधितुम् **आङ्ग्रहणम्**। अस्यायं भावः पदव्यवायेऽपि इति सूत्रेण पदस्य व्यवधानेऽपि णत्वं निषिध्यते आङ् इति स्वतन्त्रं पदं तस्मात् तेन सूत्रेण णत्वनिषेधः स्यात् तद्बाधनार्थं सूत्रे आङ् इति पृथक्ग्रहणं कृतम्। एतेन पर्याणद्धम् इत्यत्र उपसर्गादसमासेऽपि णत्वं सिद्ध्यति।

प्रकृतसूत्रे नुम्ग्रहणेन अनुस्वारो लक्ष्यते। अत्रायं भावः अनुस्वार अडाद्यनन्तर्गतत्वात् प्रेन्वनम् इत्यत्र 'कुमति च' इति नुमा व्यवधानेऽपि णत्वं स्यात् तृंहणम्, वृंहणम् इत्यादौ च स्वाभाविकानुस्वारात् णत्वं न स्यात् तस्मात् नुम् ग्रहणेन अनुस्वारोपलक्षिततत्वात् सर्वत्र अनुस्वारव्यवधानेऽपि णत्वं भवति। इत्थं प्रयोगानुसारत् उभयत्र णत्वे सिद्धे नुम्ग्रहणं अकर्तुं शक्यम्। नुम्ग्रहणाभावे तल्लक्षितानुस्वारस्य लाभः अयोगवानाम् अट्सु उपदेशस्य उक्तत्वात् अनुस्वारस्य अट् प्रत्याहारे ग्रहणात् अट् ग्रहणेनैवानुस्वारस्य व्यवधानेऽपि णत्वं स्यादिति।

**रामान् इत्यवस्थायां णत्वे प्राप्ते अग्रिमं सूत्रं प्रवर्तते -**

**पदान्तस्य** - अत्र सूत्रे **रषाभ्यां नो णः समानपदे** इति सूत्रात् रषाभ्यां, नः, णः इत्येतेषां तथा **न भाभूपूकमिगमि** - इत्यादिसूत्रात् न इत्यस्य चानुवृत्तिर्भवति। एतेन रेफात् षकारात् परे पदान्तस्य नस्य णत्वं न स्यादिति सूत्रार्थो भवति।

**रामान्** - रामशब्दात् प्रातिपदिकसंज्ञायां '**बहुषु बहुवचनम्**' इति सूत्रेण बहुत्वविवक्षायां द्वितीयाबहुवचने शस् विभक्तौ राम शस् इति जाते **लशक्वतद्धिते** इति सूत्रेण शस्येत्संज्ञायां, **हलन्त्यम्** इति सूत्रेण सकारस्येत्संज्ञायां प्राप्तायां **न विभक्तौ तुस्माः** इति सूत्रेण निषेधे 'राम अस्' इति जाते **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते रामास् इति जाते '**तस्माच्छसो नः पुंसि**' इति सूत्रेण सस्य नत्वे रामान् इत्यवस्थायाम् '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' इति सूत्रेण नस्य णत्वे प्राप्ते **पदान्तस्य** इति सूत्रेण निषेधे रामान् इति रूपं सिद्धम्।

**यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (1.4.13) यः प्रत्ययो यस्मात्क्रियते तदादिशब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्। 'भवामि' भविष्यामि इत्यादौ विकरणविशिष्टस्याङ्गसंज्ञार्थं तदादिग्रहणम्। विधिः इति किम् - स्त्री इयती। प्रत्यये किम् प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत्।**

**संस्कृतव्याख्या–** अङ्गसंज्ञाविधायकं सूत्रमिदम्। अत्र यस्मात् प्रत्ययविधिः तदादिः प्रत्यये अङ्गम् इति सूत्रस्य पदच्छेदः। विधानं विधिः प्रत्ययस्य विधिरिति प्रत्ययविधिः, तत् प्रकृतिरूपम् आदिर्यस्य शब्दस्वरूपस्य तद् तदादिरिति बहुब्रीहिः। यस्मात् इत्यस्य प्रकृतिभूतात् इत्यर्थः, प्रत्यासत्या यस्य अध्याहारः क्रियते। तदादि इत्यनेन शब्दस्वरूपं गृह्यते। एतेन यस्मात् प्रकृतिभूतात् यस्य प्रत्ययस्य विधिः भवति तत्प्रत्ययप्रकृतिरूपम् आदियच्छब्दस्वरूपं तस्य, तस्मिन् प्रत्यये परे अङ्गसंज्ञं भवतीति सूत्रार्थः। अर्थात् यः प्रत्ययो यस्मात् प्रकृतिभूतात् विधीयते तच्छब्दस्वरूपं यस्यादौ भवति एवं भूतस्य शब्दस्वरूपस्य तस्मिन् प्रत्यये परे अङ्गसंज्ञा भवतीति तात्पर्यम्।

अत्रेदमाशङ्कते यत् '**यस्मात्प्रत्ययविधिस्तदङ्गम्**' इत्येव सूत्रमस्तु आदिग्रहणं किमर्थम् तदुच्यते उत्तरमुखेन मूले ''**भवामि भविष्यामि**'' **इत्यादौ इति।**

अत्रायं भावः सूत्रे आदिग्रहणाभावे यः प्रत्ययो यस्मात् क्रियते तत्प्रत्यये परे अङ्गसंज्ञा स्यादित्यर्थे जाते भू धातो लटि, मिपि, **कर्तरि शपि** गुणेऽवादेशे च भव मि इत्यवस्थायां किञ्च एवमेव भूधातोर्लृटि मिपि स्यविकरणे अपि गुणे अवादेशे सस्य षत्वे भविष्य मि इत्यादौ प्रत्यये पर भू इति प्रकृतिं मात्रस्य अङ्गसंज्ञा स्यात्, भू शब्दादेव मिप्प्रत्ययविधानात् न तु भव इत्यस्य भविष्य इत्यस्य च विकरणविशिष्टस्य ततः मिप् प्रत्ययस्य विधानाभावात्। एतेन **अतो दीर्घो यञि** इति सूत्रेण मिप् प्रत्यये परे दीर्घो न भविष्यति। तस्मात् आदिग्रहणमावश्यकमिति।

**अत्र सूत्रे विधिग्रहणं किमर्थम्** इति जिज्ञासायां कथयति – **स्त्री इयती।** अत्रेदं तात्पर्यं यत् यस्मात् यः प्रत्ययः परत्वेन श्रूयते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये अङ्गसंज्ञं स्यात् इत्येतावता एव कार्ये जाते सूत्रे विधिग्रहणस्य किं प्रयोजनमिति, तदुच्यते विधिग्रहणफलमुखेन विधिग्रहणाभावे '**स्त्री इयती**' इत्यादौ, इदं परिमाणमस्या इत्यर्थे इदं शब्दात् '**किमिदम्भ्यां बोधः**' इति सूत्रेण वतुप्प्रत्यये वस्य घश्चादेशे तस्य च इयादेशे, इदम् इयत् इति जाते, '**इदं किमोरीश्की**' इति सूत्रेण शित्वात् सर्वादेशे इदम् स्थाने ईशादेऽनुबन्धलोपे ई इयत् इत्यवस्थायां '**यस्येति च**' इत्यनेन ईकारलोपे 'इयत्' इति प्रत्ययमात्रमवशेषात् इयत् इत्यस्मात् 'उगितश्च' इति सूत्रेण ङीपि इयती इति रूपे जाते '**स्त्री इयती**' इत्यत्र रेफात् ईकारस्य (स्त्र् ई) 'स्त्रियाः' इति सूत्रेण अङ्गकार्यमियङ् स्यात् स्त्रीशब्दावयत्वेन इयत् इति प्रत्ययस्य श्रूयमाणत्वात्। विधिग्रहणे अत्र इयङ् न भवति वतुपः इदम एवात्र विहितत्वेन तस्मिन् परे स्त्रीशब्दस्य अङ्गत्वाभावात्। अतः सूत्रे विधिग्रहण कर्त्तव्यमिति।

एवमेव सूत्रे द्वितीयप्रत्यग्रहणं मास्तु 'यस्मात् प्रत्ययविधिस्तदाद्यङ्गम् इत्येव सूत्रमस्तु इति जिज्ञासायां तदुत्तरति मूले **प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत्।**

अस्यायं भावः तदादिशब्दस्वरूपं कियत् इत्यविवक्षायाम् अविशेषात् प्रत्ययविशिष्टं ततोऽप्यधिकं वा निरवधिकम् अङ्गं यथा स्यात्। अत्र सूत्रे यस्मात्प्रत्यय इति प्रत्ययस्य श्रुतत्वात् प्रत्ययावधि एवाङ्गं भविष्यतीति न वक्तव्यं, यस्मात् प्रत्ययविधिस्तदादीत्यर्थ समपर्णेन तस्य प्रत्ययग्रहणस्य चारितार्थम्। प्रत्ययविशिष्टस्याङ्गत्वे 'ओ व्रश्चु छेदने' इत्यस्माद्धातोः लिटि तिपि, तत्स्थाने णलादेशेऽनुबन्धलोपे 'व्रश्च अ' इत्यवस्थायां धातोः द्वित्वे '**लिट्यभ्यासस्योभयेषाम्**' इति सूत्रेणाभ्यासस्य रेफस्य सम्प्रसारणे वृश्च अ इति जाते हलादिशेषे 'वृ व्रश्च' इति जाते, 'उरत्' इति सूत्रेण ऋकारस्य अत्वे, रपरत्वे वर् वृश्च इति जाते, पुनः हलादिशेषे व व्रश्च इत्यवस्थायां पुनः **लिट्यभ्यासस्योभयेषाम्** इत्यनेन सम्प्रसारणे प्राप्ते '**न सम्प्रसारणे सम्प्रसारणम्**' इति सूत्रेण निषेधे य वव्रश्च इति यद्रूपं भवति तन्न स्यात् यतोहि पूर्वप्रत्ययग्रहणाभावे यस्मात् प्रत्ययविधि तस्य प्रकृतिप्रत्ययसमुदायस्य अङ्गसंज्ञा भवतीत्यर्थे जाते, उरत् इत्यस्मिन् सूत्रेऽङ्गपदेन प्रत्यये इत्यस्याक्षेपाभावात् उरत् इत्यनेन विधीयमानस्य अर् इत्यवस्थायां परनिमित्तस्य अजादेशाभावे स्थानिवद्भावस्य प्रवृत्त्यभावे सम्प्रसारणस्य निषेधो न स्यात् जाते च सम्प्रसारणे 'उव्रश्च' इत्यनिष्टरूपं स्यात् तद्वारणाय 'प्रकृतसूत्रे प्रत्यये' इत्यस्य ग्रहणामावश्यकम् इति।

एवमेव प्रत्यये ग्रहणाभावे अधिकस्याङ्गत्वे 'देवदत्त ओदनम् अपाक्षीत्' इत्यादौ देवदत्तात् सुप्रत्यये तदुत्तरवर्तिनः ओदनम् अपाक्षीत् इति सहितस्य निरवधिकस्य देवदत्तस्य अङ्गसंज्ञा स्यात् तेन लुङादौ अङ्गनिमित्तकोऽडागमः देवदत्तशब्दादेव स्यात् 'अङ्गसंज्ञायाः प्रत्ययनिमित्तत्वाभावेन लुङ्गादिनिरूपिताङ्गस्येत्यर्थस्य दुर्लभत्वात्, प्रत्यये इत्युक्तौ तु न कोऽपि दोषस्तस्मात् प्रत्ययग्रहणमावश्यकमिति। प्रकृते रामशब्दस्य प्रकृतिमात्रस्य तदादित्वं व्यपदेशिद्भावेन भवतीति बोध्यम्।

**अङ्गस्य ( 6.4.1 ) इत्यधिकृत्य।**

**टाङसिङसामिनात्स्या ( 7.1.12 ) अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः। णत्वम्। रामेण।**

**संस्कृतव्याख्या - अङ्गस्य.....**। इदमधिकारसूत्रं वर्तते। अङ्गस्येति षष्ठ्यन्तमेकपदात्मकं सूत्रम्। सप्तमाध्यायसमाप्तिपर्यन्तमस्याधिकारः। एतन्निमित्तकं कार्यम् अङ्गाधिकारीयमित्युच्यते तस्य कार्यञ्च आङ्गम्' इति।

**टाङसि..........**। विधिसूत्रमिदम्। अत्र पदद्वयं वर्तते। 'टाङसिङसाम्' इत्येकं षष्ठीबहुवचनान्तम्, इनात्स्याः इति प्रथमाबहुवचनान्तं द्वितीयं पदम्। अत्र अधिकृतम् अङ्गस्य इति पदम् पञ्चम्या विपरिणम्यते। **'अतो भिस् ऐस्'** इत्यस्मात् अत इति पञ्चम्यन्तम् अनुवृत्तम् अङ्गस्य विशेषणं भवति, विशेषणत्वात् तदन्तविधिः। एतेन अदन्तात् अङ्गात् परे टा ङसि ङस् इत्येतेषां स्थाने यथासंख्येन टा स्थाने इनादेशः, ङसि स्थाने आत् इत्यादेशः ङस् स्थाने 'स्य' इत्यादेशो भवतीति सूत्रार्थः सम्पद्यते।

**रामेण** – रामशब्दात् प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां तृतीयैकवचने 'टा' विभक्तौ राम टा इति जाते, **'टाङसिङसामानित्स्याः'** इति सूत्रेण टा स्थाने इनादेशे 'राम इन' इति जाते **'आद्गुण'** इति सूत्रेण गुणे रामेन इत्यवस्थायाम् **'अट्कुप्वाङ्नुम्व्यवायेऽपि'** इति सूत्रेण नस्य णत्वे रामेण इति रूपं भवतीति।

**राम शब्दात् भ्यामादिविभक्तौ राम भ्याम् इत्यवस्थायाम् अग्रिमं सूत्रं विवृणोति –**

**सुपि च ( 7.3.102 ) यञादै सुपि परे अतोऽङ्गस्य दीर्घः स्यात्। रामाभ्याम्।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदद्वयम् सुपि इत्येकं सप्तम्यन्तं पदम् च इत्यव्ययमिति द्वितीयम्। अङ्गस्य अधिकारः। **'अतो दीर्घो यञि'** इति सम्पूर्णं सूत्रम् अनुवर्तते, यञि इत्यनेन सुपि विशेष्यते। **यस्मिन् विधि** इत्यादिना तदादिविर्भवति। **'अलोऽन्त्यस्य'** इति सूत्रेण 'अन्त्यस्य' उपस्थितिः। एतेन यञादिविभक्तौ परे अदन्तस्य अङ्गस्य दीर्घो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा राम भ्याम् इत्यत्र दीर्घे रामाभ्याम् इति।

**रामाभ्याम्** – रामशब्दात् प्रातिपदिकसंज्ञायां द्वित्वविवक्षायां तृतीयाद्विवचने भ्याम् विभक्तौ 'राम भ्याम्' इति स्थितौ **'यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'** इति सूत्रेणात्र व्यपदेशिद्भावेन राम इत्यस्याङ्गसंज्ञायां **'सुपि च'** इति सूत्रे राम इत्यस्य अकारस्य दीर्घे रामाभ्याम् इति रूपं सिद्ध्यति।

**'अतो भिस् ऐस् ( 7.1.9 ) अकारान्तादङ्गात् भिस ऐस् स्यात्। अनेकास्त्वात्सर्वादेशः। रामैः।**

**संस्कृतव्याख्या** – अतः भिसः ऐस् इति सूत्रस्य पदच्छेदः। अतः इतिपञ्चम्यन्तं भिसः इति षष्ठ्यन्तम्, ऐस् इति च प्रथमान्तं पदम्। अङ्गस्य इति अधिकृतम् पञ्चम्या विपरिणम्यते। अतः इति तस्य विशेषणम्। विशेषणत्वात् तदन्त विधिः। अतः इत्यस्य पञ्चम्यन्तत्वात् **तस्मादित्युत्तरस्य** इति परिभाषासूत्रवलात् तस्मात् परे इत्यर्थोऽनुकृष्यते। एतेन ह्रस्वअकारान्तात् अदन्तात् अङ्गात् परस्य भिसः स्थाने ऐस् इत्यादेशः स्यादिति सूत्रार्थः सम्पद्यते। अयम् एकादेशः अनेकात्वात् सर्वादेशः (सम्पूर्णस्य भिसः स्थाने आदेशः) भवति। ऐस् इत्यस्य सकारस्य नेत्संज्ञा **'न विभक्तौ तुस्माः'** इति निषेधात्।

**रामैः** – रामशब्दात् प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां तृतीयाबहुवचने भिस् विभक्तौ राम भिस् इति जाते **'हलन्त्यम्'** इति सूत्रेण सकारस्येत्संज्ञायां प्राप्तायां **'न विभक्तौ तुस्मा'** इत्यनेन निषेधे राम भिस् इति जाते **'यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'** इति सूत्रेण राम इत्यस्याङ्गसंज्ञायाम्, **अतोभिस् ऐस्** इति सूत्रेण भिसः स्थाने ऐसादेशे राम ऐस् इति जाते **'वृद्धिरेचि'** इति सूत्रेण वृद्धौ रामैस् इत्यवस्थायां **'ससजुषोः रुः'** इति सूत्रेण रुत्वे, **'खरवसानयोर्विसर्जनीयः'** इति सूत्रेण रेफस्य विसर्गे रामैः इति रूपं सिद्धम्।

**ङेर्य ( 7.1.13 ) अतोङ्गात् परस्य ङे इत्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन यादेशस्य सुप्त्वात् 'सुपि च' इति सूत्रेण दीर्घः। सन्निपातलक्षणोविधिरनिमित्तं तद्विघातस्य ( प.८६ ) इति परिभाषा तु नेह प्रवर्तते। 'कष्टाय क्रमणे' इत्यादिनिर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्याम्।**

**संस्कृतव्याख्या** – ङेः यः इति सूत्रस्य पदच्छेदः। ङेरिति एकारान्तात् षष्ठ्येकवचनं वर्तते न तु ङि इति सप्तमी एकवचनात् एतच्च व्याख्यानात् ज्ञायते। अत्र अतः इति पञ्चम्यन्तम् अनुवर्तते। तेन च अङ्गस्य इत्यधिकृतं पञ्चम्या विपरिणतं विशेष्यते। अतः इत्यस्य विशेषणत्वात् तदन्तग्रहणं भवति। एतेन अदन्तात् (ह्रस्व अवर्णान्तात्) अङ्गात् परे ङे इत्यस्य स्थाने यकारादेशो भवति इति सूत्रार्थः सम्पद्यते। तथाहि –

**रामाय** – रामशब्दात् चतुर्थ्येकवचने ङे विभक्तौ राम ङे इत्यवस्थायां **लशक्वतद्धिते** इति सूत्रेण इत्संज्ञायां लोपे 'राम ए' इत्यवस्थायां **'ङेर्यः'** इति सूत्रेण ङे इत्यस्य स्थाने अनेकाल्त्वात् सर्वादेशे राम य इति जाते **'स्थानिवदादेशोऽनल्विधौ'** इति सूत्रेण स्थानिवद्भावे सुप्त्वधर्मातिदेशे **सुपि च** इति सूत्रेण दीर्घे रामाय इति रूपं सिद्ध्यति।

अत्रेदमाशङ्कते यत् अत्र दीर्घः यञादित्वेन सुप्त्वेन च यादेशं परनिमित्तिकृत्य प्रवर्तते। स च यञंशे अलाश्रयः, तस्मिन् कर्त्तव्ये, यादेशस्य कथं स्थानिवद्भावः? अनल्विधौ इत्यनेन स्थानिवद्भावनिषेधात्, अत्रोच्यते – इह दीर्घस्य यञादिसुबाश्रयतया आदेशगतयकाररूपालाश्रयत्वे तस्मिन् कर्त्तव्ये यादेशस्य स्थानिवद्भावे सुप्त्वं भवत्येव, दीर्घस्य आदेशगतयकाररूपालाश्रयत्वेऽपि स्थान्यलाश्रयत्वाभावात् सुप्त्वात्।

**अत्र पुनराशङ्कते** – एका परिभाषा भवति **'संनिपातलक्षणो विधिरनिमित्तं तद्विघातकस्य।** अस्यायम्भावः संनिपातः संश्लेषः लक्षणं निमित्तं यस्य स संनिपातलक्षणः। विधिः कार्यम्। तद्विघातस्य तं संनिपातं विहन्तीति तद्विघातः। यथा **कर्मण्यण्** इति कर्मण्युपपदे कर्तरि अण् प्रत्ययः, **हनस्तोऽचिण्णलोः** इति तकार। 'हो हन्तेः' इति कुत्वम् संनिपातविघातकस्य न निमित्तमित्यर्थः। उपजीवकमुपजीव्यस्य विघातकं न भवतीति यावत्। अनया परिभाषया अत्रापि प्रकृते अदन्तसंबन्धमाश्रित्य प्रवृत्तो यादेशः अदन्तसम्बन्धविघातस्य दीर्घस्य कथं निमित्तं स्यादिति। अत्रोच्यते समाधानमुखे मूले **संनिपातलक्षणोविधिरनिमित्तं तद्विघातस्य** (प.८६) इति परिभाषा तु नेह प्रवर्तते **कष्टाय क्रमणे** इत्यादिनिर्देशात् तस्या अनित्यत्वज्ञापनात् इति। अत्रेदं तात्पर्यं यत् यदीयं परिभाषा सर्वत्र प्रवर्तेत तदा कष्टशब्दात् चतुर्थ्येकवचने ङे विभक्तौ, **'ङेर्यः'** इति सूत्रेण यकारादेशे, अत्रापि सुप्त्वमाश्रित्य यञादिसुप्त्वात् कृतो दीर्घो न स्यात्, तर्हि प्रकृतसूत्रे कष्टाय इति रूपं न वक्तव्यम् कृतं च पाणिना **कष्टाय क्रमणे** इति सूत्रम्। एतेन पाणिनिनिर्देशेन ज्ञायते इयं परिभाषा अनित्येति।

**रामाभ्याम्** – रामशब्दात् प्रातिपदिकसंज्ञायां द्वित्वविवक्षायाम् तृतीयाचतुर्थीपञ्चमी इत्येतासां द्विवचने भ्याम्विभक्तौ राम भ्याम् इति जाते, **यस्मात्प्रत्यय विधिस्तदादिप्रत्ययेऽङ्गम्** इति सूत्रेण अङ्गसंज्ञायाम्, भ्याम् इत्यस्य यञादि सुप्त्वात् **'सुपि च'** इति सूत्रेण दीर्घे रामाभ्याम् इति रूपं सिद्ध्यति।

**बहुवचने झल्येत् ( 7.3.103 ) झलादौ बहुवचने सुपि परे अतोङ्गस्यैकारः स्यात्। रामेभ्यः। बहुवचने किम् – रामः रामस्य। झलि किम् – रामाणाम्। सुपि किम् – पचध्वम्। जश्त्वम्।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयं वर्तते, बहुवचने इति सप्तम्यन्तं प्रथमम्, झलि इति सप्तम्यन्तं द्वितीयम्। एत् इति प्रथमान्तं तृतीयं पदम्। अत्र **अतो दीर्घो यञि** इति सूत्रात् अतः इत्यस्य, **सुपि च** इत्यस्मात् सुपि इत्यस्य चानुवृत्तिर्भवति अङ्गस्य अधिकारः।

झलि इत्यनेन सुपि इति विशेष्यते। **'यस्मिन् विधस्तदादावल्ग्रहणे'** इति परिभाषया वर्णग्रहणे तदादिविधिर्भवति। एतेन झलादौ सुपि परे अदन्ताङ्गस्य अन्त्यस्य स्थाने एकारादेशः स्यादिति सूत्रार्थः सम्पद्यते।

यथा – रामशब्दात् चतुर्थी बहुवचने भ्यस् विभक्तौ राम भ्यस् इति जाते राम इत्यस्य अकारस्य स्थाने एकारादेशे रामेभ्यस् इति जाते, सस्य रुत्वे विसर्गे रामेभ्य इति रूपं सिद्ध्यति।

अत्र सूत्रे बहुवचनग्रहणं किमर्थमिति जिज्ञासायाम् इदं बोध्यं यत् बहुवचनग्रहणाभावे झलादौ सुपि परे अदन्ताङ्गस्य अकारस्य एत्वे इत्यर्थे जाते रामः इत्यत्र अयोगवाहानाम् **अकारोपरि शर्षु चोपसंख्यानम्** इत्यनेन विसर्गस्य झल्त्वात् स्थानिवद्भावेन तस्य सुप्त्वाच्च तस्मिन् परतः एत्वं प्राप्तम्, यदि चात्र रुत्वविसर्गयोरसिद्धत्वात् न विसर्ग इत्युच्यते तदापि राम स् इत्यवस्थायां झलादिसुप्परत्वात् एत्वं स्यात् तद्वारणाय बहुवचनग्रहणमावश्यकम्।

किञ्च, रामशब्दात् षष्ठ्येकवचने ङस् विभक्तौ राम ङस् इत्यत्र ङसः स्यादेशे तस्य स्थानिवद्भावेन सुप्त्वात् तस्य च स्वतो झलादित्वात् तस्मिन् परेऽपि एत्वे प्राप्ते तन्निवृत्यर्थं बहुवचनग्रहणम्। **संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य** इति परिभाषा एत्वविधौ न प्रवर्तते सर्वेषाम् इति निर्देशात्।

अत्र सूत्रे 'झलि' इति कथनं किमर्थम् तथाहि, **'उतो वृद्धिर्लुकि हलि'** इत्यस्मात् हलि इत्यनुवर्त्य हलादौ बहुवचने सुपि एत्वम् इत्येवार्थस्वीकारेण कार्ये सिद्धे झलि ग्रहणस्य नास्ति प्रयोजनम्, रामा इत्यादौ अपि तावता एव एत्वनिवारणं कर्तुं शक्यम् इति। अत्रोच्यते उत्तरमुखेन मूल – **रामाणाम् इति**। अत्रायम्भावः, हलादौ बहुवचने सुपि एत्वमित्युक्तौ रामाणामित्यत्राप्येत्वं स्यात् तन्निवृत्यर्थं झल्ग्रहणमावश्यकमिति।

अत्र सूत्रे **'सुपि'** इत्यस्य ग्रहणस्य प्रयोजनं प्रतिपादयन्नाह – पचध्वम् इति। अर्थात् सुपि ग्रहणाभावे झलादौ बहुवचने एत्वं भवतीत्यर्थे पचध्वम् इत्यवस्थायां झलादिबहुवचने सति एत्वप्रसङ्गः सुपि ग्रहणे च सुप्त्वाभावात् तस्मिन् परतः एत्वन्न भवतीत्यर्थः।

**रामेभ्यः** – रामशब्दात् प्रातिपदिकसंज्ञायां चतुर्थीपञ्चमीबहुवचने भ्यस् विभक्तौ राम भ्यस् इति जाते अङ्गाधिकारात् सुपि च इति सूत्रेण दीर्घे प्राप्ते परत्वात् तं प्रबाध्य **'बहुवचने झल्येत'** इति सूत्रेण एत्वे रामेभ्यस् इति जाते सस्य रुत्वे विसर्गे रामेभ्य इति रूपं सिद्ध्यति।

**जश्त्वम्। वाऽवसाने ( 8.4.56 ) अवसाने झलां चरो वा स्युः। रामात्, रामाद्। द्वित्वे रूपचतुष्टयम्। रामेभ्यः। रामस्य। सस्य द्वित्वपक्षे खरि च ( सू.१२१ ) इति चर्त्वेऽप्यान्तरतम्यात्स एव, न तु तकारः। अल्पप्राणतया प्रयत्नभेदात्। अत एव 'सः सि'** (सू.२३४२) इति तादेश आरभ्यते।

**संस्कृतव्याख्या** – अत्र सूत्रे पदद्वयं वर्तते 'वा' इत्यव्ययपदं प्रथमम्, अवसाने इति सप्तम्यन्तं द्वितीयम्। अत्र **'झलां जश् झशि'** इत्यतो झलाम् इत्यस्य **'अभ्यासे चर्च'** इत्यस्मात् चर् इत्यस्य चानुवृत्तिर्भवति। एतेन अवसाने परे झलाम् स्थाने विकल्पेन चर्त्वं स्यादिति सूत्रार्थः सम्पद्यते।

अत्रेदं बोध्यम् जश्त्वे कृतेऽवसाने चर्त्वमिति न स्वीकर्त्तव्यम्, किंतु येन **नाप्राप्तिन्यायेन अवसाने** चर्त्वस्य जश्त्वापदत्वाच्चर्त्वाभावपक्षे जश्त्वमिति बोध्यम्। तथाहि रामशब्दात् पञ्चम्येकवचने ङसि तत्स्थाने आत् इत्यादेशे सवर्णदीर्घे रामात् इति जाते **झलां जशोऽन्ते** इति सूत्रेण जश्त्वे, **वाऽवसाने** इति सूत्रेण चर्त्वे रामाद् इति रूपद्वयं भवति, अत्र **अनचि च** इति सूत्रेण तकारदकारयो द्वित्वे तद्भावे च रूपचतुष्टयं भवतीति।

**रामात्** – रामशब्दात् प्रातिपदिकसंज्ञायां **'द्वयेकयोर्द्विवचनैकवचने'** इति सूत्रेण एकत्वविवक्षायां ङसि विभक्तौ राम ङसि इति जाते **'टाङसिङसामिनात्स्याः'** इति सूत्रेण ङसि स्थाने आत् इत्यादेशे राम आत् इति जाते, **'अकः सवर्णे दीर्घः'** इति सूत्रेण सवर्ण दीर्घे रामात् इति जाते, **'झलां जशोऽन्ते'** इति सूत्रेण तकारस्य जश्त्वे दकारे रामाद् इत्यवस्थायां **'वाऽवसाने'** इति सूत्रेण विकल्पेन चर्त्वे रामात्, विकल्पपक्षे रामाद् इति रूपद्वयं भवति। अत्र **'अनचि च'** इति सूत्रेण विकल्पेन तकारदकारयोः द्वित्वे रामात् रामाद्द् इति रूपद्वयसहितं चतुष्टयं रूपं भवतीति।

**रामस्य** – रामशब्दात् प्रातिपदिकसंज्ञायाम्, एकत्वविवक्षायां षष्ठ्येकवचने '**स्वौजसमौट्.....**' इत्यादिना ङस् विभक्तौ राम ङस् इति जाते, '**टाङसिङसामिनात्स्याः**' इति सूत्रेण ङसः स्थाने स्य आदेशे रामस्य इति रूपं भवति।

अत्रेदं विचार्य्यते रामस्य इत्यत्र '**अनचि च**' इति सूत्रेण विकल्पेन द्वित्वे रामस्स्य इत्यवस्थायां '**खरि च**' इति सूत्रेण सकरस्य खर् प्रत्याहारे पाठात् उत्तरसकारे खरि परे, पूर्व सकारस्य झल्त्वात् चर्त्वेन दन्तस्थानतोऽन्तरतमत्वात् तकारादेशे 'रामत्स्य' इति रूपं स्यादिति तत्रोच्यते – सस्य द्वित्वे **खरि च** इति चर्त्वेऽपि आन्तरतम्यात् स एव, न तु तकारः, अल्पप्राणतया प्रयत्नभेदात्, अर्थात् सकारः स्थानीमहाप्राणः, स एव भविष्यति तकारस्तु अल्पप्राणः। अतो बाह्यप्रयत्नभेदात् तकारो न भविष्यति। आभ्यन्तरप्रयत्नभेदादपि सकारस्य तकारो न भविष्यतीति मन्तव्यम्, अत एव सकारे परे सकारस्य स्थाने तकारो न भवति तस्मादेव, '**सः स्यार्द्धधातुके**' इति सूत्रेण सकारे परे पूर्वसकारस्य स्थाने तकारविधानं सार्थकं भवति, अन्यथा **खरि च** इत्यनेनैव तकारे कृते वत्स्यतीत्यादौ तकारविधातुं 'सः स्यार्द्धधातुके' इत्यादि विधानमनर्थकं स्यादिति।

**ओसि च ( 7.3.104 ) ओसि परे अतोऽङ्गस्यैकारः स्यात्। रामयोः।**

**संस्कृतव्याख्या** – अस्मिन् सूत्रे पदद्वयं वर्तते, ओसि इति सप्तम्यन्तम्, च इति अव्ययं द्वितीयं पदम्। अत्र, **अतो दीर्घो यञि** इत्यस्मात् अत इति, **बहुवचने झल्येत** इत्यतश्च एत इति चानुवर्तते, अङ्गस्य अधिकारः। इत्थम् ओसि परे अदन्ताङ्गस्य अकारस्य स्थाने एकारादेशः स्यादिति सूत्रार्थः सम्पद्यते। तद्यथा – राम ओस् इत्यत्र अकारस्य एकारादेशे रामे ओस्, इति जाते अयादेशे रामयोः इति।

**रामयोः** – रामशब्दात् प्रातिपदिकसंज्ञायां द्वित्वविवक्षायां षष्ठीसप्तम्योः द्विवचने स्वौजसमौट् इत्यादिना ओस्विभक्तौ राम ओस् इति जाते **ओसि च** इति सूत्रेण राम इत्यस्य अकारस्य एकारादेशे रामे ओस् इति जाते '**एचोऽयवायावः**' इति सूत्रेण अयादेशे, वर्णसंयोगे रामयोस् इत्यवस्थायां सकारस्य रुत्वे विसर्गे रामयोः इति रूपं सिद्ध्यति।

**ह्रस्वनद्यापो नुट् ( 7.1.54 ) ह्रस्वान्तान्नद्यन्तादावन्ताच्चाङ्गात् परस्यामो नुडागमः स्यात्।**

**संस्कृतव्याख्या** – रामशब्दात् षष्ठी बहुवचने आम् विभक्तौ राम आम् इति जाते सवर्णदीर्घे प्राप्ते सूत्रमिदं प्रवर्तते '**ह्रस्वनद्यापो नुट्**' इति। अत्र सूत्रे पदद्वयं वर्तते, **ह्रस्वनद्यापः** इति पञ्चम्यन्तं पदं प्रथमम्, नुट् इति प्रथमान्तं द्वितीयम्। ह्रस्वनद्याप इत्यत्र ह्रस्वश्च नदी च आप् चेति समाहारद्वन्द्वे कृते दिग्योगात् पञ्चमी वर्तते। परस्य अध्याहारः क्रियते। अङ्गस्य अधिकारः तं पञ्चम्या विपरिणम्य ह्रस्वनद्यापः इत्यस्य विशेष्यत्वेन प्रयोगः। ह्रस्वनद्यापः इति विशेषणम्, विशेषणत्वाच्च तदन्तविधिर्भवति, **आमि सर्वनाम्नः** सुट् इत्यतः आमि इत्यनुवर्तते।

अनुवृत्तम् आमि इति पदम्, **उभयनिर्देशे पञ्चमी निर्देशो बलीयान्** इति न्यायात् **तस्मादित्युत्तरस्य** इति षष्ठ्यन्तत्वेन प्रयुज्यते। एतेन ह्रस्वान्तात् नद्यन्तात् आबन्ताच्च अङ्गात् परस्य आमो नुडागमः स्यादित्यर्थः सम्पद्यते। नुटः टित्वात् आमः आद्यावयवो भवति, नुटः टकारेत्संज्ञकः, उकारः उच्चारणार्थकः। इति राम आम् इत्यवस्थायां नुटि राम नाम् इति स्थिते अग्रिमं सूत्रं प्रवर्तते –

**नामि ( 6.4.3 ) नामि परे अजन्ताङ्गस्य दीर्घः स्यात्। रामाणाम्। सुपि च ( सू.२०२ ) इति दीर्घो यद्यपि परस्तथापीह न प्रवर्तते, संनिपातपरिभाषाविरोधात्। नामि इत्यनेन त्वारमभसामर्थ्यात् परिभाषा बाध्यते।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्, दीर्घविधानात्। एकपदात्मकं सूत्रमिदम् तच्च 'नामि' इति सप्तम्यन्तम्। अत्र **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इति सूत्रात् दीर्घ इत्यनुवर्तते, दीर्घ इति श्रुत्या '**अचश्च**' इति परिभाषासूत्रेण अचः

इत्युपस्थितम् तच्च अङ्गस्य विशेषणं भवति, विशेषणत्वात् तदन्तविधिः एतेन नामि परे अजन्ताङ्गस्य दीर्घो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा राम आम् इत्यवस्थायां नुटि राम नाम् इत्यवस्थायां दीर्घे रामानाम् इति स्थिते **अट्कुप्वाङित्यादि** सूत्रेण नस्य णत्वे रामाणाम् इति सिद्ध्यति।

अत्रेदम् आशङ्कते यत् नामि इति सूत्रस्थाने आमि इत्येव सूत्रमस्तु, राम नाम् इत्यवस्थायां नुडागमस्य आम्भक्तत्वाद् आम् ग्रहणेन नकारसहितस्य आमः अर्थात् नाम इत्यस्य ग्रहणं भविष्यति तस्मात् आमि परे दीर्घः स्यात् इत्यर्थेन नामपरेऽपि दीर्घः स्यादेव कथं नामि इति। न चात्रेदं वक्तव्यं यत् राम आम् इत्यादौ आमि इति दीर्घस्य नित्यत्वात् परमपि नुटं बाधित्वा दीर्घे कृते ह्रस्वान्तत्वाभावाद् **ह्रस्वनद्यापः** इति नुट् न स्यादिति '**ह्रस्वान्तान्नुट्**' इति वचनसामर्थ्याद् कृतेऽपि दीर्घे भूतपूर्वगत्याश्रयेण नुड् भविष्यतीति। अत्रोच्यते समाधानमुखेन –उत्तरार्थं सनकारं '**नामि**' इति कर्त्तव्यम्, यदि हि आमि इत्येवोच्यते तर्हि '**नोपधायाः**' इत्युत्तरसूत्रेऽपि आमीत्येवानुवर्तेत। ततश्च नान्तस्योपधाया दीर्घः स्याद् आमि इत्येवार्थो भविष्यति, अस्यां स्थितौ चर्मणाम्, वर्मणाम् इत्यादावपि दीर्घः स्यात् तन्माभूत् तदर्थं सनकारनिर्देशः नामि इति कृतो वर्तत इति भाष्ये स्पष्टम्।

अत्र पुनरिदमाशङ्कते यत् राम नाम इत्यत्र परत्वात् **सुपि च** इति सूत्रेणैव दीर्घो वक्तव्यः, फलविशेषाभावेऽपि, **पूर्वपरनित्यन्तरङ्गापवादनाम् उत्तरोत्तरं बलीय** इति न्यायानुरोधेन शास्त्रप्रवृत्तेः,**इको झल्** इति सूत्रे प्रपञ्चितत्वाच्च तदुच्यते समाधानरूपेण मूले – **सुपि च** इति दीर्घो यद्यपि परस्तथापीह न प्रवर्तते, संनिपातपरिभाषाविरोधात्। अर्थात् ह्रस्वान्तसन्निपातम् उपजीव्य प्रवृत्तस्य नुटः ह्रस्वविघातकं 'सुपि च' इति दीर्घं प्रति निमित्तत्वासम्भवात् इति भावः।

नन्वत्र 'नामि' इति दीर्घप्रवृत्तौ अपि सन्निपातपरिभाषाविरोधस्तु तुल्य एव तर्हि कथं निमित्तत्वमिति चेत् **अत्रोच्यते-आरम्भसामर्थ्यात् परिभाषा बाध्यत** इति। अस्येदं तात्पर्यं यदि नामीति दीर्घो न स्यात्तर्हि तदारम्भो व्यर्थः स्यात्। तस्मात् **नामि** इति सामान्यसूत्रारम्भसामर्थ्याद्। ततश्च निरवकाशत्वात् रामाणाम् इत्यादौ नामीति दीर्घः सन्निपातपरिभाषां बाधित्वा प्रवर्तत इति। **सुपि च** इति दीर्घस्तु रामाभ्याम् इत्यादौ सावकाशत्वात्। तस्मात् रामाणाम् इत्यादौ नामि परे दीर्घप्रवृत्तौ सन्निपातपरिभाषां बाधितुं नामि इति दीर्घारम्भः।

**रामाणाम्** – रामशब्दात् प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां '**बहुषु बहुवचने**' इति सूत्रेण षष्ठीबहुवचने आम् इति जाते '**ह्रस्वनद्यापो नुट्**' इतिसूत्रेण नुटि अनुबन्धलोपे राम नाम इति जाते, '**नामि**' इतिसूत्रेण राम इत्यस्याकारस्य दीर्घे, रामानाम् इत्यवस्थायाम्, '**अट्कुप्वाङ्नुम्व्यायेऽपि**' इति सूत्रेण नस्य णत्वे रामाणाम् इति रूपं सिद्ध्यति।

**रामे** – रामशब्दात् प्रातिपदिकसंज्ञायाम्, ''**द्व्येकयोर्द्विवचनैकवचने**'' इति सूत्रेण एकत्वविवक्षायां सप्तमी एकवचने स्वौजसमौट् इत्यादिना 'ङि' प्रत्ययेऽनुबन्धलोपे राम इ इति जाते '**आद्गुणः**' इतिसूत्रेण गुणे रामे इति रूपं सिद्धम्।

**सुप्येत्वे कृते। अपदान्तस्य मूर्धन्यः ( 8.3.55 ) आपादसमाप्तेरधिकारोऽयम्। 'इण्कोः' ( 8.3.57 ) इत्यधिकृत्य।**

**आदेशप्रत्यययोः ( 8.3.59 ) सहेः साडः सः ( सू.३३५ ) इति सूत्रात् सः इति षष्ठ्यन्तं पदमनुवर्तते। इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः। रामेषु। इण्कोः किम्-रामस्य। आदेशप्रत्यययोः किम् - सुपीः। सुपिसौ। सुपिसः।अपदान्तस्य किम् - हरिस्तत्र। एवं कृष्णमुकुन्दादयः।**

**संस्कृतव्याख्या** – रामशब्दात् सप्तमीबहुवचने सुप्प्रत्यये अनुबन्धलोपे राम सु इत्यवस्थायां **बहुवचने झल्येत** इति सूत्रेण राम इत्यस्याकारस्य एत्वे **रामेसु** इति जाते अग्रिमं सूत्रमुपस्थापयति।

**अपदान्तस्य........।** इदं अधिकारसूत्रं वर्तते। अष्टमाध्यायस्य तृतीयपादे मध्ये इदं सूत्रं पठितम्। मूर्धन्य इत्यस्य मूर्धस्थानकः। एतेन इत आरम्भ्य एतत्पादसमाप्तिपर्यन्तम् अस्याधिकारः इति सूत्रस्यार्थः। सूत्रे 'ष' इत्येव सिद्धे मूर्धन्यग्रहणम् – 'इणः षीध्वम्.....' इति सूत्रेण ढत्वार्थम्। तेन **चकृढ्वे। अकृढ्वम्** इत्यादि सिद्ध्यति।

**इण्कोः** – इदमपि अधिकारसूत्रम्। उत्तरत्र विधिष्वनुवर्तत इति भावः। इण् च कुश्चेति समाहारद्वन्द्वः। समाहारद्वन्द्वात् नपुंसकत्वे, पुंस्त्वमार्षम्। इतरेतरयोगद्वन्द्वस्वीकारे तु एकवचनम् आर्षम्। इण् इति परणकारेण प्रत्याहारः। कु इति कवर्गः। सूत्रे गवाक्षु, गवाङ्षु इत्यादिसिद्ध्यर्थं 'कु' इत्यस्य ग्रहणम्।

**आदेशप्रत्यययोः** – षत्वविधायकम् इदं सूत्रम्। आदेशश्च प्रत्ययश्चेति आदेशप्रत्ययौ तयोः आदेशप्रत्यययोः, इतरेतरद्वन्द्वघटितं षष्ठीद्विवचनान्तम् एकपदात्मकं सूत्रमिदम्। अत्र प्रत्ययशब्दः प्रत्ययावयवे लाक्षणिकः, **हलि सर्वेषाम्** इति निर्देशात्, **सात्पदाद्योः** इत्यत्र सातिग्रहणाच्च। सूत्रे स्थानषष्ठी तस्मात् **षष्ठीस्थाने योगा** इति परिभाषया स्थाने इति पदं सम्बद्ध्यते, '**इण्कोः** अपदान्तस्य मूर्धन्यः इत्यनयोरधिकारः '**सहेः साडः सः**' इत्यस्मात् 'सः' इति षष्ठ्यन्तं पदमनुवर्तते। एतेन इण् कवर्गाभ्यां परयोः पदान्तयोः आदेशात्मकप्रत्ययावयवात्मकयोः सकारयोः मूर्धन्यादेशः स्यादिति सूत्रार्थः सम्पद्यते। तदेवोच्यते मूले **इण्कवर्गाभ्यामित्यादिना** रामे सु इत्यत्र विवृतस्य सस्य तादृश एव षः । अस्येदं तात्पर्यं यत् विवृतरूपाभ्यान्तरप्रयत्नवतोऽघोषरूपबाह्यप्रयत्नवतश्च सकारस्य तदुभयात्मकः षकार एव भवतीत्यर्थः। अतः तादृश ष एवादेशो नान्य इति तात्पर्यम्। ऋकारेऽतिप्रसङ्गवारणाय अघोषस्य इति विशेषणं दत्तम्, किञ्च अघोषस्य इत्येतावदुच्यमाने ठकारेऽतिप्रसङ्गवारणाय उभयमुपात्तम्।

सूत्रे **इण्को** इति कथमिति जिज्ञासायां कथयति रामस्य इत्यत्र **टाङसिङसामिनात्स्याः** इति वक्तव्ये सकारस्यापि षत्वं स्यात्, **इण्कोः** ग्रहणे तु न भवति। एवमेव '**आदेशप्रत्यययोः**' ग्रहणेन पिस् गतौ क्विप्प्रत्यये सुपिस् इत्यादावपि षत्वं न भवति आदेशप्रत्ययाभावात् सकारविशिष्टधातुत्वादिति। अपदान्तस्य इत्युक्ते हरिस्तत्र इत्यादौ सस्य षत्वं न भवति।

**रामेषु**– रामशब्दात् प्रातिपदिकसंज्ञायां बहुषु बहुवचने इति सूत्रेण बहुत्वविवक्षायां सप्तमीबहुवचने सुप् विभक्तौ अनुबन्धलोपे राम सु इति जाते **बहुवचने झल्येत्** इति सूत्रेण अकारस्य एत्वे रामे सु इति जाते, **आदेशप्रत्यययोः** इति सूत्रेण सस्य षत्वे रामेषु इति रूपं सिद्ध्यति।

**एवं कृष्णमुकुन्दादयः।** यथा रामशब्दस्य प्रत्येकं विभक्तौ रूपाणि सिद्ध्यन्ति एवमेव कृष्णमुकुन्दादीनामपि रूपाणि सिद्ध्यन्तीति तात्पर्यम्।

**सर्वादीनि सर्वनामानि ( 1.1.27 ) सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। 'तदन्तस्यापीयं संज्ञा' 'द्वन्द्वे च' ( सू.२२२ ) इति ज्ञापकात्। तेन परमसर्वत्र इति त्रल् 'परमभवकान्' इत्यत्राकच् सिद्ध्यति।**

**संस्कृतव्याख्या** – अथ सर्वादिशब्देषु सर्वनामकार्यं विधास्यन् सर्वनामसंज्ञामाह – **सर्वादीनि**। सूत्रमिदं संज्ञासूत्रं वर्तते। अत्र पदद्वयं वर्तते, सर्व आदिःप्रथमावयवो येषां तानि सर्वादीनि प्रथमाबहुवचनान्तं पदम्, सर्वनामानि इति प्रथमाबहुवचनान्तं पदम्। सर्वादीनि इत्युद्देश्यं, सर्वनामसंज्ञेति विधेयम्। इत्थम् सर्वादीनि अर्थात् सर्वादिगणपठितानि (35) पञ्चत्रिंशत् पदानि सर्वनामसंज्ञकानि भवन्तीति सूत्रार्थः।

अत्रेदं विचार्य्यते बहुब्रीहेरन्यपदार्थप्रधानो भवति, सर्वशब्दः समासवर्तिपदार्थः तस्मात् सर्वशब्दस्य अन्यपदार्थत्वाभावात् विश्वादिशब्दानामेव सर्वनामसंज्ञा भविष्यति न तु सर्वशब्दस्य तत्कथं सर्वनामसंज्ञानिमित्तकं कार्यं सर्वशब्दात्स्यादिति अत्रोच्यते –

**तद्गुणसंविज्ञानो बहुब्रीहिरयम्,** अदः सर्वेषाम् इति लिङ्गात्। तथाहि सर्वशब्दस्य सर्वनामसंज्ञाया अभावे

तन्निमित्तककार्याभावे सूत्रे सर्वेषाम् इति सुट् घटितं रूपन्न स्यात्, कृतञ्चात्र तस्मात् तस्य ग्रहणं भवति, तच्च तद्गुणसंविज्ञानेनैव स्यादिति। तथा च सर्व आर्दियस्य समुदायस्य इति विग्रहः, आदि शब्दोऽत्र अवयववाची, सर्वआदिराद्यावयवो येषामित्यपि विग्रहः, अत्र उद्भूतावयवसमुदायसमासार्थस्तस्मात् बहुवचनम्। तस्य समुदायस्य युगपल्लक्ष्ये प्रयोगाभावात् '**आनर्थक्यात्तदङ्गेषु** इति न्यायेन तदवयवेषु प्रवर्तमाना सर्वनामसंज्ञा अविशेषात् सर्वशब्देऽपि भविष्यतीति युक्तं तद्गुणसंविज्ञानम् तस्यान्यपदार्थस्य गुणावर्तिरूपाणि विशेषणानि कार्यान्वियतया संविज्ञानं यत्र स तद्गुणसंविज्ञान इत्यक्षरार्थः। यत्र संयोगसमवायान्यतरसम्बन्धेनान्यपदार्थे वर्तिपदार्थान्वयः तत्र प्रायेण तद्गुणसंविज्ञानो बहुव्रीहिः यथा **लम्बकर्णः, दशकण्ठ** इत्यादौ।

अत्रेदमाशङ्कते सर्व विश्व इत्येवं सर्वादिशब्दानां केवलानामेव सर्वादिगणे पाठः तेषामेव सर्वनामसंज्ञा परमसर्वादीनां शब्दानां गणे पाठाभावात् सर्वनामसंज्ञाया अभावे कथं परमसर्वत्र परमभवकान् इत्यादौ त्रल् अकच् इत्यादयः प्रत्यया इति – अत्रोच्यते – मूले '**तदन्तस्यापीयं**' '**संज्ञा द्वन्द्वे च**' इति ज्ञापकात्। तथाहि द्वन्द्वे च – इत्यनेन सर्वादिशब्दान्तद्वन्द्वस्य सर्वनामसंज्ञा प्रतिषिध्यते वर्णाश्रमेतराणामित्यादौ। यदि केवलानामेव सर्वादिगणपठितानां सर्वनामसंज्ञा स्यात् न तु तदन्तस्यापि तर्हि सर्वनामसंज्ञायाः प्राप्तिरेवन तत्प्रतिषेधो व्यर्थः, तदर्थं कृतञ्च सूत्रं तद्ज्ञापयति तदन्तस्यापीयं संज्ञा भवति। तदन्तविधिं विना समुदाये संज्ञाप्रसक्तिरेव नास्तीति भावः।

अत्र पुनराशङ्कते यत् '**सर्वनाम्नः स्मै**' इत्यादिसर्वनामकार्याणि अङ्गाधिकारस्थानि सन्ति अङ्गाधिकारस्थत्वात् पदाङ्गाधिकारे **तस्य च तदन्तस्य** चेति परिभाषया परसमर्वस्मै इत्यादिष्वपि सर्वनामसंज्ञा भविष्यति किं तदन्तस्यापि संज्ञाविधानेन इति। अत्र तदन्तसंज्ञाया फलत्वेन **परमसर्वत्र, परमभवकान्** इत्यादौ त्रल् अकच् सिद्ध्यति, आदिपदेन पञ्चम्यास्तसिल् इत्यस्य ग्रहणम्। न चेहापि प्रादिपदिकादित्यनुवृत्तेः सर्वनाम्नस्तद्विशेषणत्वेन तदन्तविधिर्न भविष्यतीति वक्तव्यम्, **समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात्** इति।

**'जसः शी' ( 7.1.17 ) अदन्तात् सर्वनाम्नः परस्य जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। न च अर्वणस्तृ ( सू. ३६४ ) इत्यादाविव नानुबन्धकृतमनेकाल्त्वम् ( प.६ ) इति वाच्यम्, सर्वादेशत्वात् प्रागित्संज्ञाया एवाभावात्। सर्वे।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयं वर्तते। जशः इति षष्ठ्यन्तं पदम्, शी इति लुप्तप्रथमान्तं पदम्। अतो भिस् ऐस् इतिसूत्रात् अतः इत्यस्य, **सर्वनाम्नः स्मै** इत्यस्माच्च सर्वनाम्नः इत्यस्यानुवृत्तिर्भवति। अतः इत्यस्य विशेषणत्वात् **तदन्तविधिः**। एतेन अदन्तात् सर्वनाम्नः परस्य जसः स्थाने शी इत्यादेशो भवतीति सूत्रार्थः सङ्गच्छते। सूत्रे शी इति दीर्घोच्चारणं नपुंसकाच्च इति उत्तरसूत्रानुवृत्यर्थम्। तेन वारिणी, मधुनी इत्यादीनि रूपाणि सिद्ध्यन्ति।

अत्रेदमाशङ्कते यत् 'जश शी' इति सूत्रेण जसः स्थाने शी आदेशः **अनेकाल्शित् सर्वस्य** इति सूत्रेण शित्वादेव सम्पूर्णस्य जशः स्थानेऽस्तु कथम् अनेकाल्त्वात्सर्वादेशः।

यतोहि '**नानुबन्धकृतमनेकाल्त्वम्**' इत्यनया परिभाषया अनुबन्धकृतम् अनेकाल्त्वं न गृह्यते अर्थात् शकारस्येत्संज्ञकत्वात् शकारोऽनुबन्धः तत्स्वीकृत्यानेकाल्त्वं न भविष्यति तदतिरिच्य इकारमात्रस्यैकाल्त्वादिति। तद्यथा– **अर्वणस्त्रसावनञः ( 6.4.127 )** इत्यनेन नञा रहितस्य अर्वत् इत्यस्याङ्गस्य तृ इत्यादेशो भवति, अत्र ऋकारस्येत्संज्ञकत्वेऽनुबन्धत्वात् तत्स्वीकृत्य अनेकाल्त्वात् सर्वादेशो न भवति अनया परिभाषया निषेधात् **ततोऽलोऽन्त्यस्य** इति परिभाषासूत्रेण अन्त्यस्य स्थाने आदेशो भवति तथैव अत्रापि शी इत्यत्र शकारानुबन्धमादाय अनेकाल्त्वात् सर्वादेशः कथमिति जिज्ञासायां कथयति मूले – **सर्वादेशत्वात् प्रागित्संज्ञाया एवाभावात् इति।** अत्रेदं तात्पर्यं यत् '**जशः शी**' इति सूत्रं प्रत्ययाधिकारे नास्ति, अतः शी इत्यस्य प्रत्ययत्वाभावात् '**लशक्वतद्धिते**' इति सूत्रेण प्रत्ययस्याद्यानामेव लशकवर्गानां इत्संज्ञा विधानात् शी इत्यस्य न भविष्यति, प्रत्ययत्वाभावात्। न च अत्र

जसः प्रत्ययत्वात् तत्स्थाने शी इत्यादेशस्य प्रत्ययत्वं स्थानिवद्भावेनैव कर्तुं शक्यते, कृतस्य आदेशस्य एव स्थानिभावः आदेशात् प्राग् इत्संज्ञाया अभावात् न, शित्वं किन्तु, अनेकाल्त्वं तु स्यादेव अतः ततः पूर्वं अनुबन्धत्वाभावात् नास्याः परिभाषायाः प्रवृत्तिः तस्मात् अनेकाल्त्वादेव सर्वादेश इति। एतदभिप्रेत्य मूले उक्तम्– **अनेकाल्त्वात् सर्वादेशः।**

**सर्वः** – सर्वशब्दात् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** इति सूत्रेण प्रातिपदिकसंज्ञायां '**द्वयेकयोर्द्विवचनैकवचने**' इति सूत्रेण एकत्वविवक्षायां **स्वौजसमौट्** इत्यादिना सूत्रेण सुविभक्तौ अनुबन्धलोपे सर्व स् इति जाते सस्य रुत्वे विसर्गे सर्व इति रूपं सिद्ध्यति।

**सर्वौ**– सर्वशब्दात् प्रातिपदिकसंज्ञायां द्वित्वविवक्षायां प्रथमाद्विवचने,औ विभक्तौ, सर्व औ इति जाते **प्रथमयोः पूर्वसवर्ण** इति सूत्रेण पूर्वसवर्णदीर्घेप्राप्ते, '**नादीचि**' इति सूत्रेण निषेधे, **वृद्धिरेचि** इति सूत्रेण वृद्धौ सर्वौ इति रूपं भवति।

**सर्वे**– सर्वशब्दात् प्रातिपदिकसंज्ञायां बहुत्वविवक्षायां प्रथमाबहुवचने जस् विभक्तौ सर्व जस् इति जाते '**सर्वादीनि सर्वनामानि**' इति सूत्रेण सर्वनामसंज्ञायां '**जसः शी**' इति सूत्रेण जसः स्थाने अनेकाल्त्वसर्वादेशे 'शी' इत्यादेशे 'सर्व शी' इति जाते अनुबन्धलोपे सर्व ई इत्यवस्थायाम् '**आद्गुणः**' इति सूत्रेण गुणे सर्वे इति रूपं सिद्ध्यति।

**सर्वनाम्नः स्मै ( 7.1.14 ) अदन्तात् सर्वनाम्नः ङे इत्यस्य स्मै स्यात्। सर्वस्मै।**

**ङसिङ्योः स्मात्स्मिनौ ( 7.1.15 ) अदन्तात् सर्वनाम्नः एतयोरेतौ स्तः। सर्वस्मात्।**

**संस्कृतव्याख्या** – अत्र पदद्वयं वर्तते। सर्वनानः इति पञ्चम्यन्तं, स्मै इति लुप्तप्रथमान्तं पदम्। **अतो भिस् ऐस्** इत्यस्मात् अतः इत्यस्य, **ङेर्यः** इत्यतः 'ङे' इत्यस्य चानुवृत्तिर्भवति। अत इति पदं सर्वनाम्नो विशेषणम् तस्मात् तदन्तग्रहणम्। एतेन सर्वनामसंज्ञकात् अदन्तशब्दात् ङे इत्यस्य स्थाने स्मै इत्यादेशो भवति इति सूत्रार्थः सम्पद्यते।

**सर्वस्मै** – सर्वशब्दात् प्रातिपदिकसंज्ञायाम् एकत्वविवक्षायां चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे सर्व ए इत्यवस्थायां सर्वनामसंज्ञायां '**ङेर्यः**' इति सूत्रेण ङे इत्यस्य स्थाने यादेशे प्राप्ते तं प्रबाध्य **सर्वनाम्नः** स्मै इति सूत्रेण स्मै इत्यादेशे सर्वस्मै इति रूपं सिद्ध्यति।

'**ङसि ङ्यो.......**' ङसिङ्योः स्मात्स्मिनौ इति सूत्रस्य पदच्छेदः। अत्र पदद्वयम्। 'ङसिङयोरिति' षष्ठ्यन्तं, स्मात्स्मिनौ इति प्रथमान्तम्। अत्रापि सर्वनाम्नः अतः इत्यनयोः अनवृतिर्भवति, ङसिङयोसिति स्थानी स्मात्स्मिनौ इत्यादेशः।

उभयोः समानसंख्याकत्वात् '**यथासंख्यमनुदेशः समानाम्**' इति परिभाषासूत्रेण यथासंख्यम् अन्वयः। एतेन ह्रस्वाकारान्त सर्वनामसंज्ञकात् शब्दात् परस्य ङसि इत्यस्य स्थाने स्मात्, ङि इत्यस्य स्थाने स्मिन् इत्यादेशो भवतीति सूत्रार्थो भवति। सर्वशब्दात् ङि स्थाने स्मात् इत्यादेशे तकारस्येत्संज्ञा न भवति, स्थानिवत्वात् विभक्तित्वात् '**न विभक्तौ तुस्माः**' इति सूत्रेण निषेधात्।

**सर्वस्मात्** – सर्वशब्दात् प्रातिपदिकसंज्ञायां पञ्चम्येकवचने ङसि विभक्तौ सर्व ङसि इति जाते '**टाङसिङसामिनात्स्याः**' इति सूत्रेण ङसि इत्यस्य आत् आदेशे प्राप्ते तं प्रबाध्य '**ङसिङयोः स्मात् स्मिनौ**' इति सूत्रेण स्मात् इत्यादेशे सर्वस्मात् इति। अत्र '**झलां जशोऽन्ते**' इति सूत्रेण तकारस्य जश्त्वे दकारे '**वाऽवसाने**' इति सूत्रेण विकल्पेन चर्त्वे सर्वस्मात् विकल्पपक्षे सर्वस्माद् इति रूपद्वयं भवति।

**सर्वस्य** – सर्वशब्दात् प्रातिपदिकसंज्ञायां षष्ठ्येकवचने ङस् विभक्तौ सर्व ङस् इति जाते '**टाङसिङसामिनात्स्याः**' इति सूत्रेण ङस् स्थाने स्य आदेशे सर्वस्य इति रूपं भवति।

**सर्वयोः** – सर्वशब्दात् षष्ठी द्विवचने ओस् विभक्तौ सर्व ओस् इत्यवस्थायाम् **'ओसि च'** इति सूत्रेण सर्वशब्दस्य अकारस्य एत्वे, **'एचोऽयवायावः'** इति सूत्रेण अयादेशे सर्वयोस् इति जाते सकारस्य रुत्वे विसर्गे सर्वयोः इति रूपं सिद्ध्यति।

**आमि सर्वनाम्नः सुट् ( 7.1.52 ) अवर्णान्तात् परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। एत्व षत्वे सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोऽप्यदन्ताः।**

**सर्वादयश्च पञ्चत्रिंशत्। सर्व विश्व उभ उभय डतर उतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम।**

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसञ्ज्ञायाम् ( ग.सू.३ )**

**स्वमज्ञातिधनाख्यायाम् ( ग.सू.२ ) अन्तरं बहिर्योगोपसंव्यानयोः ( ग.सू.३ ) त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति।**

**तत्र उभशब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनान्तः।**

**तस्येह पाठस्तु 'उभकौ' इत्यकजर्थः। न च क प्रत्ययेनेष्टसिद्धिः।**

**द्विवचनपरत्वाभावेन उभयतः उभयत्र इत्यादाविवायच्प्रसङ्गात्। तदुक्तम् – उभयोऽन्यत्र ( वा.२३२ )। अन्यत्र द्विवचनपरत्वाभावे।**

**संस्कृतव्याख्या – आमि सर्वना.....।** त्रिपदात्मकमिदं विधिसूत्रं वर्तते। आमि इति सप्तम्यन्तं, सर्वनाम्नः इति पञ्चम्यन्तं, सुट् इति प्रथमान्तं पदम्। अत्र **आज्जसेरसुक्** इत्यतः आत् इत्यनुवृत्तिर्भवति। अङ्गस्य चाधिकारः। तस्य पञ्चम्यन्तेन विपरिणम्य अङ्गात् इति विशेष्यत्वेन गृह्यते। आत् इत्यस्य विशेषणत्वात् **येन विधिस्तदन्तस्य** इति सूत्रेण तदन्तग्रहणं भवति। 'परस्य' इत्याध्याह्रियते।

अत्र आमि इत्यस्य सप्तम्यन्तत्वात् **तस्मिन्नित्यादि परिभाषा सूत्रस्य प्रवृत्तौ सप्तम्यन्तनिर्दिष्टस्याव्यवहितपूर्वस्य** इत्यर्थो लभ्यते, 'सर्वनाम्नः' इत्यस्य च पञ्चम्यन्तत्वात् **तस्मादित्युत्तरस्य** इति परिभाषासूत्रेण पञ्चमीनिर्दिष्टस्य अव्यवहितपरस्य इत्यर्थो लभ्यते, अस्यां स्थितौ युगपत् द्वयोः प्राप्तयोः **उभयनिर्देशे पञ्चमी निर्देशो बलीयान्।** इत्यनया परिभाषया पञ्चमीनिर्दिष्टमादाय आमि इति इति सप्तम्यन्तं पञ्चम्यन्तत्वेन विपरिणम्यते। सर्वनाम्न इति विहितविशेषणम्। इत्थम्– अवर्णान्ताद् अङ्गात् परस्य सर्वनाम्नो विहितस्य आमः सुडागमः स्यादिति सूत्रार्थो लभ्यते।

अवर्णान्तात् इत्यनन्तरम् अङ्गात् इति अन्वयं कृत्वार्थबोधः कार्य इति तात्पर्यम्। अत्रेदं विचार्यते यत् –

अवर्णान्तात् सर्वनाम्नो विहितस्य आमः सुडागमः इत्यर्थः, अवर्णान्तादङ्गात् परस्य सर्वनाम्नो विहितस्य आमः सुडागमः इत्यर्थो वा इति पक्षद्वयम्। तत्र प्रथमपक्षस्वीकारे येषां, तेषामित्यादौ सुडागमो न भविष्यति यतोहि तत्र आमो दकारान्तात् विहितो वर्तते। अस्यायमभिप्रायः– यद् तद् शब्दात् आम्प्रत्यये परे 'त्यदादीनामः' इति सूत्रेण दकारस्य स्थानेऽकारादेशे अतो गुणे इति सूत्रेण पररूपे **य आम्, त आम्** इत्यवस्थायाम् अवर्णान्तत्वं भवति परम् आम्विधानकाले यद् तद् शब्दः सर्वनामसंज्ञकस्तु वर्तते परम् अवर्णान्तो नास्ति दकारान्तो वर्तते दकारान्तत्वातच्च न सुडागमः। अतः अवर्णान्तात् अङ्गात् परस्य सर्वनाम्नो विहितस्येति द्वितीयः पक्षः स्वीक्रियते। एतेन अवर्णान्ततत्वाभावेऽपि सर्वनाम्नो विहितत्वात् येषां तेषामित्यादौ सुडागमो भवतीति। एवमेव केवलं सर्वनाम्नः परस्य आमः सुडागमः इत्यर्थोऽपि न क्रियते, तथा सति **'वर्णाश्रमेतराणाम्'** इत्यादावपि सुटः प्राप्ति, यतोहि अत्र 'इतरशब्दस्य सर्वनामत्वं **'द्वन्द्वे च'** इति सूत्रेण विहितो निषेधः **वर्णाश्रमेतर** इति सम्पूर्णसमुदायस्य भवति न तु केवलम् इतर इत्यवयवस्य।

अतः अवर्णान्तात् परस्य सर्वनाम्नो विहितस्य इत्यर्थे नात्र सुट्प्रसङ्गः। वर्णाश्रमेतर इत्यस्य अकारान्तत्वेऽपि सर्वनामसंज्ञकाभावात्।

अत्र पुनरिदं विचार्यते यत् सूत्रे आमि इति सप्तमीनिर्देशसामर्थ्यात् **तस्मादित्युत्तरस्य** इति न प्रवर्तते। ततः आमि परे प्रकृतेरेव सुडागमो युक्त इति। **अत्रेदं बोध्यम्** – भाष्ये अत्र आमः इति षष्ठीप्रकल्पकत्वं स्वीकृत्यैव कार्यनिर्देशो विहितः। भाष्यकारेण यदा षष्ठीप्रकल्पकत्वं स्वीकृतं तर्हि कथन्न पाणिनिना पूर्वमेव सूत्रे षष्ठीनिर्देशो विहित इति चेत् अत्र सप्तमी इति निर्देशः 'त्रेस्त्रयः' इत्युत्तरसूत्रे आमि इत्यनुवृत्तये बोध्यः। न च षष्ठीनिर्देशेऽपि उत्तरसूत्रे विभक्तिविपरिणामेणान्वयः कर्त्तव्य इति वाच्यम् विभक्तिविपरणामस्यापि तत्समानाधिकरणशब्दसत्वे संभवात् नहि त्रेस्त्रयः इत्यत्र तत्समानाधिकरणकः शब्दः, तस्मात् आमि निर्देशस्तूत्तरार्थमावश्यकमिति। **एत्व षत्वे सर्वेषाम्** इति।

**सर्वेषाम्** – सर्वशब्दात् षष्ठीबहुवचने आम् विभक्तौ सर्व आम् इति जाते **ह्रस्वनद्यापो नुट्** इति सूत्रेण नुटि प्राप्ते तं प्रबाध्य **आमि सर्वनाम्नः सुट्** इति सूत्रेण अवर्णान्त सर्वशब्दात् आमो विहितत्वात् सुडागमेऽनुबन्धलोपे 'सर्व स् आम्' इति जातेः '**बहुवचने झल्येत**' इति सूत्रेण एत्वे '**आदेशप्रत्यययोः**' इति सूत्रेण षत्वे सर्वेषाम् इति रूपं सिद्ध्यति।

**सर्वस्मिन्** – सर्वशब्दात् सप्तम्येकवचने ङिविभक्तौ 'सर्व ङि' इति जातेऽनुबन्धलोपे '**ङसिङ्योः स्मात्स्मिनौ**' इति सूत्रेण ङि इत्यस्य स्थाने स्मिन् इति आदेशे सर्वस्मिन् इति रूपं सिद्ध्यति।

**सर्वेषु** – सर्वशब्दात् सप्तमीबहुवचने सुप् विभक्तौ अनुबन्धलोपे सर्व सु इति जाते बहुवचने झल्येत इति सूत्रेण एत्वे, **आदेशप्रत्यययोः** इति सूत्रेण षत्वे सर्वेषु इति रूपं सिद्ध्यति।

**शेषं रामवत्** इति मूलोक्तस्येदं तात्पर्यं यत् सर्वशब्दस्य **सर्वे, सर्वस्मै, सर्वस्मात्, सर्वेषाम्, सर्वस्मिन्** इत्येतानि रूपाणि सर्वनामसंज्ञकविशिष्टकार्यसम्बद्धानि पृथक् भवन्ति, एतेभ्य अन्यानि यानि रूपाणि तानि रामशब्दवत् भविष्यन्तीति। अयं सर्वादिगणशब्दो विशेषणानि भवन्ति तस्मात् विशेष्यनिघ्नानि त्रिलिङ्गेषु प्रयुक्तानि भवन्ति।

**एवं विश्वादयोऽप्यदन्ताः** यथासर्वशब्दस्य रूपाणि सिद्ध्यन्ति तथैव विश्वशब्दस्यापि रूपाणि भवन्ति।

**सर्वादयश्च पञ्चत्रिंशत्** – तद्यथा – सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम इत्येते चतुर्दश साक्षात्पठिता शब्दाः सन्ति एतदतिरिच्य गणसूत्रानुसारम् विशिष्टेऽर्थे प्रयुक्तानि सन्ति। तथाहि –

**पूर्वपरावरेत्यादि** – पूर्व पर अवर दक्षिण उत्तर अपर इत्येते शब्दा अपि सर्वादयः तस्मात् एतेषां सप्तानामपि सर्वनामसंज्ञा।

**स्वमज्ञाति** – स्वशब्दस्य घनभिन्ने ज्ञाति (बन्धु) भिन्नेऽर्थे सर्वनामसंज्ञा भवति।

**अन्तरं बहिर्यो ......** अन्तर शब्दस्य बहिः, उपसंख्यानम् (धारणयोग्यः) इत्यर्थे सर्वनामसंज्ञा भवति।

त्यद् तद् यद् एतद् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इत्येते शब्दा अपि सर्वनामगणपठिताः तस्मात् सर्वनामसंज्ञका सन्तीति।

**तत्रेति** – सर्वादिषु मध्य उभशब्दो द्वित्वविशिष्टस्य वाचको वर्तते तस्मात् सर्वदा द्विवचनान्त एव भवति न त्वेकवचने बहुवचने इति तात्पर्यम् तेन टाबादि न निवार्यते। अत्रेदमाशङ्कते यत् **जशः शी, सर्वनाम्नः स्मै, ङसिङ्योस्मात्स्मिनौ, आमि सर्वनाम्नः सुट्** इत्येतानि कार्याणि द्विवचने न भवन्ति तथा च स्मयादीनां सर्वनामकार्याणामभावात् सर्वादिषु उभशब्दपाठो व्यर्थः। यदि चात्रैवमुच्येत यत् '**सर्वनाम्नस्तृतीया च**' इति सूत्रेणोभाभ्यां हेतुभ्यां उभयोर्हेतोरिति षष्ठीतृतीयादिसिद्धिः गणपाठफलम् इति तन्न युक्तम् – निमित्तकारणहेतुषु **सर्वासां प्रायदर्शनम्**

इति वार्तिकेनैव तस्य गतार्थत्वात् इति। अत्रोच्यते समाधानमुखेन मूले **तस्येह पाठस्तु उभकौ इत्यकजर्थः।** अस्येदं तात्पर्यं उभशब्दस्यास्मिन् गणे पाठस्तु 'उभकौ' इत्यत्र **'अव्ययसर्वनाम्नामकच् प्राक्टेः',** इत्यकच्प्रत्ययार्थः। अत्र पुनरिदमाशङ्कते यत् **'स्वार्थिके'** क प्रत्ययेऽपि 'उभकौ' इत्यस्य रूपसिद्धौ मास्तु गणपाठः, मास्तु सर्वनामसंज्ञा, मास्तु सर्वनामप्रयुक्त अकच्प्रत्ययः इति। तत्रोच्यते मूले **न च कप्रत्ययेनेष्टसिद्धिः द्विवचनपरत्वाभावेन 'उभयतः' इत्यादाविवायच्प्रसङ्गात्** अर्थात् उभकौ इति रूपसिद्धिः 'क' प्रत्ययेन न भविष्यति यतोहि स्वार्थे कप्रत्यये कृते उभ क औ इत्यवस्थायाम् मध्ये क प्रत्ययस्य व्यवधानात् उभशब्दात् द्विवचनपरत्वाभावे यथा उभयतः इत्यत्र स्वार्थे अयजादेशो भवति तथात्रापि स्यात्तदा उभयकौ इत्यनिष्टरूपापत्तिः न तु उभकौ इति रूपं स्यादिति भावः। द्विवचने सति अयच्प्रत्ययो न इत्यत्र किं प्रमाणमिति जिज्ञासायां कथयति मूले – **तदुक्तम्- वातृककृता।** अर्थात् द्विवचने सति अयच्प्रत्ययो नेति यदभिहितं तद् **उभयोऽन्यत्र** इति वदता वार्तिककृता उक्तमित्यर्थः।

उदाहृतवार्तिके अन्यत्र इत्यनेन द्विवचनाद् अन्यस्मिन् परे इत्यर्थो विवक्षितः। ततश्च सर्वनामतानिमित्तकाकजर्थ उभशब्दस्य सर्वादिषु पाठ इति सुस्थितम्।

**उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्तः। तस्माज्जस्ययजादेशस्य स्थानिवद्भावेन तयप्प्रत्ययान्ततया प्रथमचरम ( सू.२२६ ) इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वान्नित्यैव सञ्ज्ञा भवति। उभये। उतरडतमौ प्रत्ययौ।**

**प्रत्ययग्रहणे तदन्ता ग्राह्या ( प.२४ ) यद्यपि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ( प.२८ ) सुप्तिङन्तम् ( सू.२९ ) इति ज्ञापकात्। तथापीह तदन्तग्रहणम् केवलयोः संज्ञायाः प्रयोजनाभावात्। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा।**

**'त्व' 'त्व' इति द्वाप्यदन्तावन्यपर्यायौ, एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्तान्तः इत्यपरे। नेम इत्यर्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु नेह गृह्यते, यथासंख्यमनुदेशः समानाम् ( सू.१२८ ) इति ज्ञापकात्। अन्तरं बहिर्योगोप ( ग.सू.३ ) इति गणसूत्रे 'अपुरीति वक्तव्यम् ( वा.२४० ) अन्तरायां पुरि।**

**संस्कृतव्याख्या** – उभयशब्दस्य द्विवचनं नास्ति इति कैयटस्य मतं वर्तते। कथन्नास्तीति चेद् अनभिधानात् इति बोध्यम्। उभौ अवयवौ यस्य सः उभय 'अत्र उभशब्दात् **उभादुदात्तो नित्यम्**' इति सूत्रेण तयपः स्थाने अयजादेशे उभय इति रूपं भवति। अवयववृत्तेः संख्यावाचिन उभशब्दाद् अवयवविन्यर्थे अयच् प्रत्यये उभय इत्यस्य द्व्यवयवारब्धो मणिरित्यर्थः। उभयश्च उभयश्चेत्येयं द्व्यवयवारब्धत्र्यादिमणिविवक्षायां तु बहुवचनं भवति **उभये मणय** इति। तदाह कैयट् उभयशब्दस्य द्विवचनं नास्तीति। परं हरदत्तो न तथा स्वीकरोति – हरदत्तमते द्विवचनम् अस्तीति तथाहि **पचतिकल्पं पचतिरूपमि**त्यादिवारणेन पाठस्य उपक्षीणत्वात् कैयटेन अनभिधानादिति कथनमयुक्तमिति भावः।

उभयशब्दाद् जसि विभक्तौ **सर्वादीनि सर्वनामानि** इति सूत्रेण नित्यां सर्वनामसंज्ञां प्रबाध्य परत्वात् **'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च'** इति सर्वनामसंज्ञाविकल्पप्राप्तिमाशङ्क्य तत्समाधानमुखेन कथयति मूले – **'तस्माज्जस्ययजादेशस्य स्थानिवत्वेन तयप्प्रत्ययान्ततया' प्रथम चरम इति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वान्नित्यैव संज्ञा भवति – उभये।**

**अस्यायं भावः** उभयशब्देऽयजादेशः तयपः स्थाने सत्वात् स्थानिवद्भावेन तयप्प्रत्ययान्तत्वेन – **प्रथमचरमेत्यादिना** परत्वात् **'सर्वादीनि'** इत्यादिसूत्रेण प्राप्तां नित्यसर्वनामसंज्ञां बाधित्वा विकल्पेन प्राप्नोति परं **सर्वादीनि सर्वनामानीति** सूत्रं विभक्तिनिरपेक्षत्वाद् अन्तरङ्गं, **प्रथमचरमेत्यादिसूत्रं** तदपेक्षया बहिरङ्गम् अतः अन्तरङ्गस्य

बलवत्वात् बहिरङ्गं प्रथमेत्यादिसूत्रं प्रबाध्य **सर्वादीनी**त्यादिना नित्यैव सर्वनामसंज्ञा भवति। तस्मात् उभयशब्दात् प्रथमाविभक्तौ जसि एकमेव **उभये** इति रूपं भवति।

**उभये** – उभयशब्दात् **सर्वादीनि सर्वनामानि** इति सूत्रेण प्रातिपदिकत्वात् सर्वनामसंज्ञायाम्, प्रथमाबहुवचने जस्विभक्तौ उभय जस् इति जाते, **'जसःशी'** इति सूत्रेण जसः स्थाने शी इत्यादेशेऽनुबन्धलोपे उभय ई इति जाते **'आद्गुणः'** इतिसूत्रेण गुणे उभये इति रूपं सिद्ध्यति।

ननु डतरडतमशब्दयोः प्रयोगस्य दर्शनाभावात् किमर्थस्तयोः पाठः सर्वादिगणे विहित इत्याशङ्कायां मूले कथयति – **डतरडतमौ प्रत्ययौ।** अत्रेदं तात्पर्यं यत् **'किं यत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्, वा बहूनां जातिपरिप्रश्ने डतमच्, 'एकाच्च प्राचाम्' इति तद्धिताधिकारे डतरडतमयोः प्रत्ययत्वेन पाठात् 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' (प.२४)** इति परिभाषया डतरग्रहणेन प्रत्ययान्ततया कतरादीनां शब्दानां डतमग्रहणेन कतमादिशब्दानां सर्वनामसंज्ञां विधातुं डतरडतमयोर्ग्रहणं कृतमिति। एतेन – प्रथमाबहुवचने कतरे, कतमे इत्यादीनि सर्वशब्दवत् रूपाणि भवन्ति।

**अत्रेयमाशङ्का भवति यत्** – **'सुप्तिङन्तं पदम्'** इतिसूत्रेण अन्तग्रहणेन ज्ञापितया **'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति** इति परिभाषया तदन्तविधेः निषेधात् अत्रापि सर्वनामसंज्ञाविधौ डतरडतमयोः प्रत्ययत्वात् तद्ग्रहणे तदन्तस्य निषेधात् कथं कतरकतमादीनां डतरडतमप्रत्ययान्तानां ग्रहणं स्यादिति – तदेवोत्तरति स्वयं मूलकारो भट्टोजिदीक्षितः प्रश्नोत्थापनमुखेन – **तथाहि** – **यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति,** (प.२८) **सुप्तिङन्तं पदम् इति ज्ञापकात्** – **तथापीह तदन्तग्रहणम्।** केवलयोः संज्ञायाः प्रयोजनाभावात् इति।

अर्थात् **संज्ञाविधौ प्रत्ययग्रहणे च तदन्तग्रहणं नास्तीत्यस्यां** परिभाषायां सत्यामपि अन्यत्र संज्ञाविधौ प्रत्ययग्रहणेन तदन्तग्रहणाभावेऽपि इह सर्वनामसंज्ञाविधौ डतरडतमग्रहणे तदन्तग्रहणं भवत्येव, कथमिति चेत् कथयति केवलयोः संज्ञायाः प्रयोजनाभावात् तथाहि – **'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः** इति न्यायेन केवलयोः डतरडतमयोः प्रयोगानर्हत्वेन तयोः सर्वनामसंज्ञायाः फलाभावात् तद्ग्रहणं व्यर्थं स्यात्, कृतञ्च तत् तस्मात् डतरडतमग्रहणेनात्र कतरकतमादिशब्दानां ग्रहणं भवति तयोश्च सर्वनामसंज्ञा सिद्धेति।

अत्रेदमाशङ्कते यत् डतरग्रहणेनैव सिद्धे सर्वादिगणे अन्यतरशब्दपाठो व्यर्थः किञ्च अन्यतमशब्दस्यापि डतमप्रत्ययान्तत्वात् सर्वनामत्वापत्तिश्च स्यादिति – अत्रोच्यते समाधानमुखेन मूले – **अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते। तत्रान्यतमशब्दस्य गणे पाठाभावान्न संज्ञा।**

**अस्यायम्भावः** – अन्यतर अन्यतमशब्दौ डित्थादिशब्दवत् अव्युत्पन्नौ प्रकृतिप्रत्ययविभागविहीनौ वर्तेते – किं यत् तद् एकेभ्य एव डतरडतमविधानात् पाठाभावान्न सर्वनामसंज्ञा तस्मादस्य रूपं रामशब्दवदेव भवति। अन्यतरशब्दस्य डतरप्रत्ययान्तत्वाभावेऽपि सर्वादिगणे पाठादेव सर्वनामत्वमिति तूक्तमेव।

**त्व त्व** इति द्वावपि अदन्तौ अन्यशब्दपर्यायौ – **एकः उदात्तोऽपरोऽनुदात्तः** इति केषाञ्चन मतम्, एकस्तान्तः इत्यन्ये। इत्थं स्वरभेदादुभयोर्ग्रहणं कृतमिति। अन्ये कथयन्ति अनयोरेकः तकारान्तः त्वत् शब्दो वर्तते। इत्थमनयोरपि सर्वनामसंज्ञया सर्ववत् रूपं भविष्यतीति। अत एव **'त्वदधरमधुरमधूनि पिबन्तम्'** इति जयदेवप्रयोगोऽपि संगच्छते। तत्र त्वच्छब्दोऽन्यपर्यायः। त्वतः अधर इति विग्रहः अन्यस्या इति पूर्ववाक्येन सह अन्वयानुपपत्तिसम्भवात्।

**नेमः इत्यर्धे** अर्थे वर्तते। समशब्दः सर्वसमानार्थकः सर्वादिगणे पठित इत्यर्थः। तुल्यपर्यायः समशब्दो नात्र गृह्यते, **'यथासंख्यमनुदेशः समानाम्'** इति सूत्रज्ञापकात्। अर्थात् यदि तुल्यपर्यायः समशब्दः स्यात्तदा समानाम् इत्यस्य स्थाने समेषाम् इत्येव पाठः कर्त्तव्यः तथा एव निर्दिशेत परन्तथा नास्ति तस्मात् नात्र तुल्यपर्याय इति ज्ञायते।

**अन्तरं बहिर्योगोप......।** अत्रेदं तात्पर्यं यत् **सर्वादीनि सर्वनामानि** इति सूत्रान्तर्गते **अन्तरं बहिर्योगोपव्यानयोः**

इत्यस्मिन् गणसूत्रे '**अपुरीति वक्तव्यम्**' इति वार्तिकं पठितं वर्तते। एतेन सर्वादिगणे बाह्यपरिधानीय इत्यर्थवाचकस्य अन्तरशब्दस्य पाठात् **सर्वादीनि सर्वनामानि** इत्यनेन नित्यसर्वनामसंज्ञा प्राप्नोति तत्र पुर् इत्यर्थवाचकं परित्यज्य इति वार्तिकस्य तात्पर्यम् तस्मात् पुरवाचकस्य अन्तरशब्दस्य सर्वनामसंज्ञा नेष्टा। अतः सर्वनामसंज्ञाभावे पुर्शब्दस्य स्त्रीलिङ्गत्वात् अन्तरशब्दादपि स्त्रीलिङ्गे टाप्प्रत्यये अन्तरा इति जाते सप्तम्येकवचने अन्तरायां पुरि इति इष्टरूपं भवति। सर्वनामसंज्ञायां सत्यां तु 'अन्तरस्यां पुरि इत्यनिष्टापत्तिः'। पुर इत्यर्थे भिन्ने तु **अन्तरस्यां** भवत्येव। तच्च **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्** इति परिभाषया अन्तरा शब्दादपि भवतीति।

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। १/१/३४**

**एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे, पूर्वाः। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किम्? दक्षिणा गाथकाः, कुशला इत्यर्थः। असंज्ञायां किम्? उत्तराः कुरवः।**

**संस्कृतव्याख्या** – सर्वादिगणं व्याख्यायेदानीं तदन्तर्गतत्रिसूत्रीसमानाकारम् अष्टाध्यायीस्थां त्रिसूत्रीं विवेचयति – **पूर्वपरेत्यादिना।** अस्मिन् सूत्रे पदत्रयं वर्तते। तथाहि – पूर्वञ्च परञ्च अवरञ्च दक्षिणञ्च उत्तरञ्च, अपरञ्च तेषामितरेतरद्वन्द्वघटितम् पूर्वपरावरदक्षिणोत्तरापराधराणि इत्येकं पदम्। न संज्ञा असंज्ञा तस्याम्, असंज्ञायाम् इति सप्तम्येकवचनं द्वितीयं पदम्, व्यवस्थायाम् इति सप्तम्येकवचनान्तं तृतीयं पदम्। अत्र **सर्वादीनि सर्वनामानि** इत्यस्मात् सूत्रात् सर्वनामानि इत्यस्य, **विभाषा जसि** इत्यतश्च विभाषा, जसि इत्यनयोरनुवृत्तिर्भवति। एतेन संज्ञाभिन्ने व्यवस्थार्थे पूर्व पर अवर दक्षिण उत्तर, अपर, अधर इत्येतेषां शब्दानां सर्वनामगणे पाठात् सर्वत्र या सर्वनामसंज्ञा सा जसि विकल्पने स्यादिति सूत्रार्थः सङ्गच्छते। तस्मात् जसि विकल्पेन रूपद्वयमपि भवति, पूर्वे, पूर्वाः इति।

**का नाम व्यवस्थेति** जिज्ञासायामुच्यते मूले – **स्वाभिधेयापेक्षावधिनियमो व्यवस्था**। स्वस्य पूर्वादिशब्दस्य, अभिधेयः – दिग्देशकालरूपोऽर्थः, तेन अपेक्ष्यस्य=अपेक्षमाणस्य, योऽवधिस्तस्य नियमे इति। स एव व्यवस्थाशब्देन विवक्ष्यत इति तात्पर्यम्। अपेक्ष्यत इत्यपेक्षः स च अवधिः तस्य नियमो व्यवस्था इति। तद्यथा – **अयोध्या पूर्वा कुतः**? इत्यपेक्षायां **वृन्दावनात्**। अत्र पूर्वशब्दस्यार्थः अवधेर्नियमे साकाङ्क्षः। अतः पूर्वपूर्वशब्दोऽत्र व्यवस्थाया अर्थे विद्यते। व्यवस्थायां शब्दस्त्रिविधः **दिग्देशकालरूपः**। दिग्वाचकस्योदाहरणम् – **उत्तरस्यां ध्रुवः**। अत्र उत्तरा शब्दो दिशाविशेषः। देशवाचकस्योदाहरणं यथा – **काशी पूर्वा** = अर्थात् पूर्वदिशि स्थिता काशी नगरविशेषः। **कालवाचकस्योदाहरणम् – पूर्वे युधिष्ठिरादयो राजानः**। अत्र पूर्वे इति पूर्वकालिकेऽर्थे प्रयुक्तः। केभ्य इत्याकाङ्क्षायां **चन्द्रगुप्तादिभ्य** इति। अत्र सूत्रे व्यवस्थायाम् किमिति जिज्ञासायाम् – **उच्यते दक्षिणा गाथकाः** इति। अत्रेदं तात्पर्यम् सूत्रे व्यवस्थाग्रहणं न क्रियेत तदा व्यवस्थाभिन्नेऽर्थेऽपि पूर्वादिशब्दानां विकल्पेन सर्वनामसंज्ञा भविष्यति, अस्यां स्थितौ **दक्षिणा गाथकाः** इत्यादौ दक्षिणा शब्दस्य व्यवस्थाभिन्ने कुशलेऽर्थे सत्यपि सर्वनामसंज्ञायां दक्षिणे, दक्षिणा इति वैकल्पिकं रूपं स्यात् तन्नेष्टम्, अतः 'दक्षिणे' इत्यनिष्टरूपवारणाय व्यवस्था ग्रहणमावश्यकमिति।

एवमेव सूत्रे असंज्ञायाम् इति कथनेन संज्ञाभिन्नेऽर्थे एवं विकल्पेन सर्वनामसंज्ञा भवति अन्यथा संज्ञार्थेऽपि विकल्पेन सर्वनामसंज्ञायां प्राप्तायां 'उत्तराः कुरवः' इत्यादावपि उत्तरे कुरवः इत्यपि अनिष्टरूपापत्तिस्तन्माभूत् तदर्थं संज्ञायाम् इत्युक्तम् इति तात्पर्यम्। अत्र कुरुशब्दो देशविशेषे नित्यं बहुवचनान्तः। सुमेरुमवधीकृत्य तत्रोत्तरशब्दो वर्तत इत्यस्यत्र व्यवस्था। संज्ञाशब्दत्वन्नास्य सर्वनामता। दिक्कालेषु पूर्वादिशब्दानां तु अनादिसंकेत न ते संज्ञाशब्दाः।

**स्वमज्ञातिधनाख्यायाम् ( १.१.३५ ) ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। स्वे, स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा।**

**संस्कृतव्याख्या** – अत्र सूत्रे पदद्वयम्, स्वम् इति प्रथमान्तम्, अज्ञातिधनाख्यायाम् इति सप्तम्यन्तम्।

**सर्वादीनि सर्वनामानि** इत्यतः 'सर्वनामानि' इति पदम्, '**विभाषा जसि**' इति सूत्रञ्चात्र अनुवर्तेते। ज्ञातिश्च धनं चेति ज्ञातिधने तयोराख्या ज्ञातिधनाख्या, न ज्ञातिधनाख्येति अज्ञातिधनाख्या, तस्याम् अज्ञातिधनाख्यायाम् इति।

अर्थात् ज्ञातिधनवाचकात् भिन्नस्य स्वशब्दस्य सर्वनामवाचित्वात् सर्वादीनि सर्वनामानि इतिसूत्रेण नित्यं प्राप्ता सर्वनामसंज्ञा सा जसि विकल्पेन स्यादिति सूत्रार्थः। स्वशब्दस्य चत्वारोऽर्था भवन्ति **आत्मा आत्मीयं ज्ञातिः धनं** चेति।

**प्रमाणञ्चात्र कोशवचनम् – स्वो ज्ञातावात्मनि, स्वं त्रिष्वात्मीये, स्वोऽस्त्रियां धने इत्यमरः। स्वः स्यात् पुंस्यात्मनि ज्ञातौ, त्रिष्वात्मीयेऽस्त्रियां धने इति मेदनीकोशः।** तत्र सूत्रे ज्ञातिधनयोः पर्युदासात् पर्युदासस्य च तद्भिन्ने तत्सादृश्यबोधकत्वात् आत्मनि आत्मीये च सर्वनाम त्वं जसि विकल्प्यते। एतदभिप्रेत्य मूले कथयति – **स्वेः, स्वाः**। आत्मीया इत्यर्थः। आत्मन इति वा। ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा।

**अन्तरं बहिर्योगोपसंव्यानयोः ( १.१.३६ ) बाह्ये परिधानीये चार्थे अन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। अन्तरे, अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे, अन्तरा वा शाटकाः। परिधानीया इत्यर्थः।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्। अन्तरम् इति प्रथमान्तं, बहिर्योगोपसंव्यानयोः इति षष्ठ्यन्तं पदम्। बहिः अनावृतप्रदेशः, तेन योगः सम्बन्धो यस्य स बहिर्योगः बहिविद्यमानोऽर्थ इति। उपसंवीयते परिधीयत इति उपसंव्यानम् अन्तरीयं वस्त्रम्। अत्रापि सर्वनामानि इति विभाषा जसि इति चानुवर्तते। एतेन बाह्ये परिधानीये चार्थे अन्तरशब्दस्य जसि विकल्पेन सर्वनामसंज्ञा भवतीति सूत्रार्थः।

अन्तरशब्दस्य नैकेऽर्था भवन्ति। तद्यथा –

**अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।**

**छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च।।** इत्यमरः।

अवकाशः अवधिः परिधानम्, अन्तर्ध्यानम्, भेदः, तादर्थ्यम्, छिद्रम्, आत्मीयः, विना बाह्यः, अवसरः, मध्यः अन्तरात्मा चेति। एतेषु बाह्ये परिधानीये चार्थे अन्तर्शब्दस्य जसि विकल्पेन सर्वनामसंज्ञा भवतीति तात्पर्यम्। अन्तरे, अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे अन्तरा वा शाटकाः। परिधानीया इत्यर्थः।

**पूर्वादिभ्यो नवभ्यो वा ( ७.१.१६ ) एभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्यात्। पूर्वस्मात्, पूर्वात्। पूर्वस्मिन्, पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनान्तः।**

**संस्कृतव्याख्या** – पूर्वः आदिर्येषां ते पूर्वादयः, तेभ्यः पूर्वादिभ्यः, नवभ्यः पञ्चमीबहुवचनान्तम्। अत्र '**ङसिङ्योः स्मात्स्मिनौ इत्यनुवर्तते**'। पूर्वादिभ्य इत्यत्र आदिपदेन पूर्वपर इत्यादि त्रिसूत्रीनिर्दिष्टा अत्र विवक्षिताः। तेन पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर इत्येतेभ्यः नवभ्यः परस्य ङसिङ्योः स्थाने विकल्पेन यथासंख्यं स्मात्स्मिनौ आदेशौ भवत इति सूत्रार्थः। इत्थम् पञ्चम्येकवचने पूर्वस्मात् पूर्वात् इति रूपद्वयं भवति सप्तम्येकवचने च पूर्वस्मिन्, पूर्वे इति रूप द्वयं च जायते। एवमेव परादीनामपि रूपं बोध्यम्। शेषं सर्ववत्।

**पूर्वाः, पूर्वे** = पूर्वशब्दात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जस् विभक्तौ **सर्वादीनि सर्वनामानि** इति सूत्रं प्रबाध्य **पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थामसंज्ञायाम्** इतिसूत्रेण जसि विकल्पेन सर्वनामसंज्ञायां, सर्वनामसंज्ञापक्षे, '**जशः शी**' इतिसूत्रेण जसः स्थाने शी इत्यादेशेऽनुबन्धलोपे पूर्व ई इति जाते '**आद्गुणः**' इति सूत्रेण गुणे पूर्वे इति रूपं भवति, विकल्पपक्षे सर्वनामसंज्ञायां अभावे पूर्व जस् इत्यवस्थायाम् अनुबन्धलोपे **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे पूर्वाः इति रूपं भवति।

एवमेव जसि पर अवर इत्यादीनां शब्दानामपि रूपं बोध्यम्।

**स्वे स्वाः** – ज्ञातिधनान्यवाचिनः स्वशब्दात् प्रथमाबहुवचने जस् विभक्तौ **सर्वादीनि सर्वनामानि** इति सूत्रं प्रबाध्य 'स्वमज्ञातिधनाख्यायाम्' इति सूत्रेण जसि विकल्पेन सर्वनामसंज्ञायां जसः स्थाने शी इत्यादेशेऽनुबन्धलोपे गुणे स्वे इति रूपं, विकल्पपक्षे च स्व जस् इत्यवस्थायामनुबन्धलोपे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे स्वाः इति।

**अन्तरे, अन्तराः** – बाह्ये, परिधानीये चार्थे अन्तर् शब्दात् जसि, **अन्तरं बहिर्योगोपसंव्यानयोः** इति सूत्रेण विकल्पेन सर्वनामसंज्ञायां **जसः शी** इत्यनेन शी इत्यादेशेऽनुबन्धलोपे, गुणे अन्तरे इति विकल्पपक्षे अन्तर जस् इत्यवस्थायामनुबन्धलोपे, पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे अन्तराः इति रूपं भवति।

**पूर्वस्मात्, पूर्वात्** – पूर्वशब्दात् सर्वनामसंज्ञायां पञ्चम्येकवचने ङसि विभक्तौ पूर्व ङसि इत्यस्मात् **ङसिङ्‍यो स्मात्स्मिनौ** इति सूत्रं प्रबाध्य '**पूर्वादिभ्यो नवभ्यो वा**' इतिसूत्रेण विकल्पेन ङसि इत्यस्य स्थाने स्मात् आदेशे पूर्वस्मात् इति विकल्पपक्षे ङसि स्थाने **टाङसिङसामिनात्स्या इति** सूत्रेण आत् आदेशे दीर्घे पूर्वात् इति रूपं भवति।

**पूर्वस्मिन्, पूर्वे** – पूर्वशब्दात् सप्तम्येकवचने ङिविभक्तौ '**सर्वादीनि सर्वनामानि**' इतिसूत्रेण सर्वनामसंज्ञायां '**ङसिङ्‍यो स्मात्स्मिनौ**' इतिसूत्रं प्रबाध्य '**पूर्वादिभ्यो नवभ्यो वा**' इतिसूत्रेण विकल्पेन ङिस्थाने स्मिन् इत्यादेशे पूर्वस्मिन् इति रूपं सिद्ध्यति विकल्पपक्षे पूर्व ङि इत्यवस्थायाम् अनुबन्धलोपे **आद्गुणः** इतिसूत्रेण गुणे पूर्वे इति रूपं सिद्धम्।

**न बहुव्रीहौ १.१.२९ बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्।**

**त्वकं पिता यस्य स त्वत्कपितृकः। अहकं पिता यस्य स मत्कपितृकः। इह समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा लौकिकविग्रहवाक्य इव तत्राप्यकच् प्रवर्तेत। स च समासेऽपि श्रूयेत। अतिक्रान्तो भवकन्तम् अतिभवकान् इतिवत्।**

**भाष्यकारास्तु त्वकत्पितृकः, मकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ। यथोत्तरं मुनीनां प्रामाण्यम्।**

**सञ्ज्ञोपसर्जनीभूतास्तु न सर्वादयः ( वा.२२५ ) महासञ्ज्ञाकरणेन तदनुगुणानामेव गणे संनिवेशात्। अतः सञ्ज्ञाकार्यमन्तर्गणकार्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः सर्वमतिसर्वस्तस्मा अतिसर्वाय देहि। अतिकतरं कुलम्। अतितत्।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् न इत्यव्ययम्, बहुव्रीहौ इति सप्तम्यन्तं पदम्। '**सर्वादीनि सर्वनामानि**' इत्यनुवर्तते। एतेन बहुव्रीहौ सर्वादीनि सर्वनामानि न स्युरित्यर्थः सम्पद्यते। परमेतत्स्वीकारे सूत्रमिदं व्यर्थम्, यतोहि बहुव्रीहिसमासेऽन्यपदार्थस्य प्रधानतया सर्वादीनाम् उपसर्जनत्वात् (अप्रधानत्वात्) **संज्ञोपसर्जनीभूतास्तु न सर्वादयः** इति नियमेनैव सर्वनामसंज्ञाया निषेधात् सूत्रमिदं निष्प्रयोजकम्। अतो वृत्तौ उच्यते – **बहुव्रीहौ चिकीर्षित** इति। बहुव्रीहौ इत्यत्र वैषयिकी सप्तमी तेन बहुव्रीहिसमासे चिकीर्षिते। अलौकिकविग्रहवाक्यदशायामेव प्राप्तायाः सर्वनामसंज्ञाया निषेधोऽनेन सूत्रेण क्रियते।

यदि कर्त्तुम् इष्टम् 'चिकीर्षितम्' इति नोच्येत तदा '**त्वकं पिता यस्य अहकं पिता यस्य** इत्यर्थे बहुव्रीहौ सुबन्तसमुदायस्य निमित्तत्वात् बहिरङ्गत्वम्, '**अव्ययसर्वनाम्नामकच् प्राक् टेः**' इत्यस्य अनैमित्तिकत्वात् अन्तरङ्गत्वम्। तथा च अन्तरङ्गत्वात् '**अज्ञातः कुत्सितौ वा अहं त्वञ्च** इत्यर्थे अकच् प्रत्यये जाते बहुव्रीहौ युष्मकद् सु, अस्मकद् सु इत्यवस्थायाम् '**प्रत्ययोत्तरपदयोश्च**' इत्यनेन मपर्यन्तस्य त्वादेशे **त्वकत्पितृकः मकत्पितृक** इत्यनिष्टं रूपं स्यात् न तु त्वत्कपितृकः, मत्कपितृकः इतीष्टं रूपम्, तस्मात् चिकीर्षिते इत्यध्याह्रियते।

अत्रोच्यते बहुव्रीहिप्रवृत्तेः प्राग् अलौकिकविग्रहवाक्ये सर्वनामत्वनिषेधात् त्वकं पितेति कथं

लौकिकविग्रहवाक्यं प्रदर्श्यते इत्याशङ्कायां कथयति मूले – इह (न बहुव्रीहौ इत्यस्मिन् सूत्रे) समासात् प्रागेव प्रक्रियावाक्ये युस्मद् सु पितृ स्, अस्मद् स् पितृ स् इत्यलौकिकविग्रहवाक्य एव सर्वनामसंज्ञा निषिध्यते। लौकिकविग्रहवाक्ये तु नायं निषेधः बहुव्रीहिवत् तस्य स्वार्थे परिनिष्ठितत्वेन स्वतन्त्रप्रयोगार्हतया बहुव्रीहेस्तत्र चिकीर्षितत्वाभावात्, अलौकिकविग्रहवाक्ये प्रक्रियावाक्य एव चिकीर्षितत्वात् – अन्यथा अर्थात् अलौकिकविग्रहवाक्ये निषेधाभावे सति लौकिकविग्रहवाक्य इव अलौकिकविग्रहवाक्येऽपि अकच् प्रवर्तेत। स च समासेऽपि श्रूयेत 'त्वकत्पितृकः मकत्पितृक' इति, तन्माभूत् तदर्थम् अलौकिकविग्रहवाक्य एव अनेन निषेधः। ननु अलौकिकविग्रहवाक्ये यस्य श्रवणं तस्य समासेऽपि श्रवणं भवति तत्र किं मानमिति चेदत्र दृष्टान्तरूपेण द्वितीयेनोदाहरणेन कथयति तद्यथा – अतिक्रान्तो भवन्तकम् अतिभवकान् इत्यत्र समासात् प्रागपि भवच्छब्दस्य सर्वनामसंज्ञायाम् अकच् प्रत्यये द्वितीयैकवचने यथा भवकन्तम् अत्राकच् श्रूयते तथैव समासस्थले 'अतिभवकान्' इत्यत्रापि अकच् श्रूयमाणो वर्तते।

भाष्यकारस्तु अकच्प्रत्ययविशिष्टः त्वकत्पितृकः, मकत्पितृकः इत्यत्र इष्टापत्तिं कृत्वा 'न बहुव्रीहौ' इति सूत्रं प्रत्याचख्यौ।

इत्थं भाष्यकारमते रूपद्वयमपि इष्टम्, सूत्रकारमते एकमेव तर्हि किमत्र स्वीकर्तव्यमिति चेत् कथयति – **यथोत्तरं मुनीनां प्रामाण्यमिति।**

**संज्ञोप.........** संज्ञाशब्दा उपसर्जनीभूताश्च शब्दा न सर्वादयः = सर्वादिगणे पठिता न भवन्तीत्याशयः। संज्ञा नाम आधुनिकसंकेतः। उपसर्जनञ्च **अन्यविशेषणत्वेन स्वार्थोपस्थापकम्**। एवंभूताः शब्दा सर्वनामशब्दवत् सन्तोऽपि न सर्वादिगणपठिता भवन्ति न तेषां सर्वनामसंज्ञा इति तात्पर्यम्। कथमिति चेत् कथयति महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात्। अस्यायम्भावः–टि घु भ इत्यादीनामिव लघुसंज्ञामकृत्वा सर्वनाम इति महासंज्ञाकरणेन सर्वेषां नामानि इत्यन्वर्थसंज्ञाबलात् प्राधान्येन उपस्थितस्य स्वीयसर्वार्थवाचकस्यैव गणे पाठात् तेषामेव ग्रहणं न तु संज्ञाशब्दानाम् उपसर्जनीभूतानां शब्दानामिति।

अत एव **सर्वो नाम कश्चित् तस्मै सर्वाय देहि** इत्येवं रूपं भवति न तु सर्वस्मै, सर्वशब्दस्यात्र संज्ञावाचकत्वात्।

एवमेव अतिक्रान्तः सर्वम् अतिसर्वः तस्मै अतिसर्वाय देहि इत्येव, अत्र समासार्थप्राधान्यातिक्रान्तार्थस्य प्रधानत्वात् सर्वशब्दस्य चोपसर्जनीभूतत्वात् न सर्वनामसंज्ञा इति। अतिकतरं कुलम् इत्यत्रापि कतरद् अतिक्रान्तम् इत्यर्थे अतिक्रान्तार्थस्य प्राधान्यात् कतरशब्दस्य न सर्वनामसंज्ञा।

**तृतीयासमासे १.१.३०। इह सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमासार्थवाक्येऽपि न। मासेन पूर्वाय।**

**संस्कृतव्याख्या** – अत्र **सर्वादीनि सर्वनामानि** इत्यतः सर्वनाम् ग्रहणं भवति, **न बहुब्रीहौ** इत्यस्मात् 'न' इत्यनुवर्तते, तृतीयासमासे इति सप्तम्यन्तं तृतीयासमासान्तमेकं पदम्। एतेन तृतीयासमासे सर्वादिगणपठितानां शब्दानां सर्वादीनि सर्वनामसनि इत्यनेन सूत्रेण प्राप्ता सर्वनामसंज्ञा न भवतीति सूत्रार्थः। एतेन मासेन पूर्वः, मासपूर्वः इत्यस्य तृतीयासमासघटितस्य पदस्य न सर्वनामसंज्ञा चतुर्थीविभक्तौ मासपूर्वाय इत्येव।

**विभाषादिक्समासे बहुव्रीहौ** इत्यस्मात् समासग्रहणे अनुवर्तमाने पुनरत्र समासग्रहणेन तृतीयासमासार्थवाक्येऽपि सर्वनामसंज्ञा न भवति। अतः वाक्येऽपि 'मासेन पूर्वाय' इत्येवं रूपं भवति इति। तदेवोच्यते मूले – **तृतीयासमासार्थवाक्येऽपि नेति।**

भाष्यकारास्त्वत्र '**तृतीयासमासे**' इत्यस्य सूत्रस्य तृतीया असमासे इत्येवंरूपेण पदच्छेदं कृत्वा 'मासेन पूर्वाय' इत्यादिषु समासार्थवाक्येषु सर्वनामसंज्ञाया निषेधं कुर्वन्ति।

अत्रेदं ध्यातव्यं यत् **'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः इत्यादिभिः सूत्रैर्विहितेषु'** प्रतिपदोक्तसमासेष्वेवायं निषेधो न तु **'कर्तृकरणे कृता बहुलम्'** इत्यनेन सूत्रविहिततृतीयासमासे। एतेन **'त्वयका कृतम्'**, **मयका कृतम्** इत्यादिषु वाक्येष्वपि सर्वनामसंज्ञायाम् 'अकच्' भवत्येव। तस्मादत्र साक्षात्पठितत्वरूपं प्रतिपदोक्तं ग्राह्यमिति।

**द्वन्द्वे च १.१.३१द्वन्द्वे उक्तसंज्ञा न। वर्णाश्रमेतराणाम्। समुदायस्यैवायं निषेधः, न त्ववयवानाम्। न चैवं तदन्तविधिना सुट् प्रसङ्गः, सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्, द्वन्द्वे इति सप्तम्यन्तमेकं चेत्यव्ययं द्वितीयम्। सर्वादीनि इत्यतः सर्वनामग्रहणं **'न बहुव्रीहौ'** इत्यस्मात् नेति चानुवर्तते। एतेन द्वन्द्वसमासे सर्वाद्यन्तसमुदायस्य सर्वनामसंज्ञा न भवतीति सूत्रार्थः सम्पद्यते। अत एव **'वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः'** इत्यादियाज्ञवलक्यस्मृतादिवाक्येषु 'वर्णाश्च आश्रमाश्च' इति इतरेतरद्वन्द्वसमासे सर्वनामसञ्ज्ञाया अभावात् षष्ठीबहुवचने **'आमिसर्वनाम्नः सुट्'** इतिसूत्रेण सुट् न भवति वर्णाश्रमेतराणाम् इत्येवं रूपं भवति तत्रैव द्वन्द्वशब्दस्य मुख्यत्वात्। न चात्र द्वन्द्वे विद्यमानानि यानीति सम्बन्धं कृत्वा तत्र स्यादिति वाच्यं, विद्यति क्रियाध्याहारे गौरवात्, निषेध्याया भवति क्रियाया एव प्राधान्येन तदन्वस्यैव न्याय्यात्वात्। अत एव वृतौ **'समुदास्यैव'** इत्युक्तम्। द्वन्द्वे विद्यमानानि यानि सर्वादीनि तानि सर्वनामानि न स्यु इति नार्थः। तेन द्वन्द्वस्य सर्वनामसंज्ञा नेति फलितार्थः। वर्णाश्रमेतरेत्यादिसमुदायस्यैव द्वन्द्वता न तु तदवयवानाम्। एवं च **वर्णाश्रमे तरणामिति** समुदायस्यैव सर्वनामत्वनिषेधः न तु तदवयवानाम् इति वस्तुस्थितिः। अत्रेदमाशङ्कते यत् इतरशब्दस्य सर्वादिगणे पाठात् तस्य च सर्वनामसंज्ञायाम् **'आमिसर्वनाम्नः सुट्'** इत्यस्य अङ्गाधिकारस्थत्वात् तत्राधिकृतेन अङ्गेन सह सर्वनाम्नो विशेषणत्वेनान्वयात् **'विशेषणं तदन्तस्य संज्ञा इति** नियमात् सर्वनाम्नः अदन्तात् अङ्गात् विहितात् आमः सुडागमः इत्यर्थात् वर्णाश्रमेतर शब्दस्य सर्वनामत्वाभावेऽपि सर्वनामान्ताङ्गत्वात् आमि परे सुट् स्यादेवेति किमनेन द्वन्द्वे चेति सूत्रेण? तदुच्यते मूले –

**न चैवं तदन्तविधिना सुट्=प्रसङ्गः। सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्।** अस्यायं भावः यद्यपि इतरशब्दस्य सर्वनामत्वम् अस्ति तथापि = आमि सर्वनाम्नः सुट् इत्यस्य सर्वनाम्नो विहितस्य सुट् इत्यर्थत्वात् नात्र इतरशब्दात् आमो विहितोऽपितु वर्णाश्रमेतरशब्दात् आमः, वर्णाश्रमेतरशब्दस्य च असर्वनामत्वात् न सुट् प्रसङ्ग इति।

अत एव पूर्वे च परे तेषामितरेतरयोगद्वन्द्वे पूर्वपराणाम्, पूर्वश्च दक्षिणश्च उत्तरश्चेति तेषां पूर्वोत्तरदक्षिणानाम्, कतरकतमानाम् इत्यादीनि रूपाणि भवन्ति इति।

**विभाषा जसि ( १.१.३२ ) जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्त्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे, वर्णाश्रमेतराः। शीभावं प्रत्येव विभाषा इत्युक्तम्, अतो नाकच्, किं तु कप्रत्यय एव। वर्णाश्रमेतरकाः।**

**संस्कृतव्याख्या** – अत्र पदद्वयम्। विभाषा इति प्रथमान्तम्, जसि इति जस इः जसिः तस्मिन् इति सप्तम्यन्तं पदम्, सौत्रत्वात् सप्तम्या अलुक्, इशब्दः इवर्णपरः अथवा जसि इत्यविभक्तिको निर्देशः।

अत्र **सर्वादीनि सर्वनामानि** इति सूत्रं, **न बहुव्रीहौ** इत्यतो न इति पदं, **द्वन्द्वे च** इत्यस्मात् द्वन्द्वे इति पदमनुवर्तते। एतेन जस् आधारो यस्य तत् जसाधारं जस्स्थानकं यत्कार्यं शीभावाख्यं तत्र कर्त्तव्ये द्वन्द्वे सर्वनामसंज्ञा वा स्यादिति सूत्रार्थः सम्पद्यते। अतो वर्णाश्रमेतरशब्दस्य द्वन्द्वात् जसि, तस्य शीभावे कर्त्तव्येऽनेन सूत्रेण विकल्पेन सर्वनामसंज्ञायां वर्णाश्रमतरे इति विकल्पपक्षे वर्णाश्रमेतरा इति रूपं भवति।

अत्रेदं बोध्यं यदिदं सूत्रं **द्वन्द्वे च** इत्यस्यैवार्थं संकोचयति तदपि जस्विभक्तावेव अन्यत्र तु द्वन्द्वे सर्वनामसंज्ञाया निषेधो भवत्येवेति।

अत्रेदमाशङ्कते यत् जसि परतो द्वन्द्वे सर्वनामसंज्ञा वा स्यात् इत्यर्थः कथन्न स्वीक्रियत इति तत्रेदं बोध्यं तथा स्वीकारे अकचि प्रत्यये कर्त्तव्येऽपि '**जसःशी**' इत्यस्य प्रवृत्तौ 'वर्णाश्रमेतरके' इत्यनिष्टं रूपं स्यात् तन्माभूत् तदर्थं कथयति मूले -**शीभावं प्रत्येव**' विभाषेत्युक्तम्। अर्थात् शीभावे कर्त्तव्ये एवं सर्वनामसंज्ञाया विकल्पत्वम्, नान्यत्रेति। अत एव वर्णाश्रमेतरे इत्यत्र अकच् न भवति अपितु कप्रत्यये वर्णाश्रमेतरका इति रूपं भवति।

**प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ( १.१.३३ ) एते जसः कार्यं प्रत्युक्तसञ्ज्ञा वा स्युः। प्रथमे प्रथमाः। शेषं रामवत्। तयप् प्रत्ययस्ततस्तदन्ता ग्राह्याः। द्वितये, द्वितयाः। शेषं रामवत्। नेमे, नेमाः। शेषं सर्ववत्।**

**विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् ( वा.२४२ ) द्वितीयस्मै, द्वितीयाय इत्यादि। एवं तृतीयः। अर्थवद्ग्रहणान्नेह - पटुजातीयाय। निर्जरः।**

**संस्कृतव्याख्या** - संज्ञासूत्रमिदम्। सूत्रेऽस्मिन् पदद्वयम्। प्रथमचरमतयाल्पार्धकतिपयनेमाः इत्येकं प्रथमान्तं, च इत्यव्ययं द्वितीयं पदम्। प्रथमश्च चरमश्च तयश्च अल्पश्च अर्धश्च कतिपयश्च नेमश्चेत्येतेषाम् प्रथमचरमतयाल्पार्धकतिपयनेमा इति इतरेतरद्वन्द्वसमासः। अत्र सूत्रे '**सर्वादीनि सर्वनामानि**' इत्यस्मात् सर्वनामानि इति पदं '**विभाषा जसि**' इति सूत्रञ्चानुवर्तते। इत्थं सूत्रपठितानां प्रथम-चरम-तयप्प्रत्ययान्तशब्दानाम् अल्प-अर्ध कतिपय नेम इत्येतेषाञ्च शब्दानां जसि विभाषया सर्वनामसंज्ञा भवतीति सूत्रार्थः।

सूत्रपठितेषु नेमशब्दस्य सर्वादिगणे पाठात् सर्वनामसंज्ञा नित्या प्राप्ता तद्विकल्पविधानं, तथा नेमशब्दातिरिक्तानां प्रथमादिशब्दानां तु गणे पाठाभावात् सर्वनामसंज्ञायाम् अप्राप्तायां विकल्पेन सर्वनामसंज्ञाविधानं भवत्यनेन सूत्रेण, तस्मात् उभयत्र (प्राप्ताप्राप्त) विभाषा अत्र वर्तते।

एतेन नेमशब्दातिरिक्तानां प्रथमादिशब्दानां जसविभक्तेरतिरिक्तस्थले सर्वनामसंज्ञा न भवति, तेन जसि प्रथमे, प्रथमा इति रूपद्वयं भवति, अन्यत्र रामशब्दवदरूपं भवति। नेमशब्दस्य च जसोऽतिरिक्तस्थले सर्वशब्दवत् रूपं भवति। **संख्याया अवयवे तयप्** इति सूत्रेण विहितः तयप् प्रत्ययोऽत्र वर्तते तस्मात् प्रत्ययग्रहणेन तदन्ता ग्राह्या इति परिभाषया तयप्प्रत्ययान्तशब्दो गृह्यते। द्वौ अवयवौ अस्य इत्यर्थे द्विशब्दात् तयप्प्रत्ययेन निष्पन्नस्य द्वितीयशब्दस्य जसि विकल्पेन सर्वनामसंज्ञायां द्वितये, द्वितया इति रूपद्वयम् अन्यत्र रामवत्।

**विभाषा............**विभाषा जसि इत्यधिकारे तीयान्तस्य ङे ङसि-ङस्-ङि इत्येतेषु ङित्सु परेषु सर्वनामसंज्ञावचनं कर्त्तव्यम् इति वार्तिकार्थः। एतेन एतासु ङित्विभक्तिषु तीयप्रत्ययान्तस्य विकल्पेन सर्वनामसंज्ञा भवतीति। इत्थम् - द्वितीयस्मै, द्वितीयाय, द्वितीयस्मात्, द्वितीयात्, द्वितीयस्मिन्, द्वितीये इति वैकल्पिकं रूपं भवति। एवमेव तृतीयादिशब्दानामपि बोध्यम्।

अत्रेदमाशङ्कते - '**प्रकारवचने जातीयर्**' इतिसूत्रेण जातीयर्प्रत्यये निष्पन्नस्य पटुजातीयादिशब्दस्य च तीयप्रत्ययान्तत्वात् कथन्न सर्वनामसंज्ञेति। तत्रोच्यते - '**अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्**' इति परिभाषया स्वतंत्र-तीयप्रत्ययस्यैवार्थवत्वात् तस्यैव ग्रहणात् जातीयर्प्रत्ययस्यैकदेशस्य तीयस्य निरर्थकत्वात् न तस्य ग्रहणम्। तस्मात् पटुजातीय इत्यादौ न सर्वनामसंज्ञेति।

**प्रथमे, प्रथमाः** - प्रथमशब्दात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जसि विभक्तौ प्रथम जस् इत्यवस्थायाम्, **प्रथमचरमेत्यादिना** सूत्रेण जसिविकल्पेन सर्वनामसंज्ञायां '**जसःशि**' इतिसूत्रेण सर्वनामसंज्ञापक्षे जस्स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे 'प्रथम इ' इति जाते '**आद्गुण**' इतिसूत्रेण गुणे प्रथमे इति, विकल्पपक्षे प्रथम जस् इत्यवस्थायाम्

अनुबन्धलोपे प्रथम अस् इत्यवस्थायाम् '**प्रथमयोः पूर्वसवर्णः**' इतिसूत्रेण दीर्घे सस्य रुत्वे विसर्गे प्रथमाः इतिरूपं सिद्ध्यति। **शेषं रामवत्।**

**द्वितये, द्वितया** – तयप्प्रत्ययान्तद्वितीयशब्दात् **प्रातिपदिकग्रहणे तदन्तग्रहणमिति** नियमात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जस्विभक्तौ द्वितीयजस् इत्यवस्थायां **प्रथमचरमतयपादिना** सूत्रेण जसि विकल्पेन सर्वनामसंज्ञायां जसः स्थाने शि इत्यादेशेऽनुबन्धलोपे द्वितय इ इति जातेः गुणे द्वितये इति, विकल्पपक्षे जसः अनुबन्धलोपे द्वितय अस् इत्यवस्थायां **प्रथमयोः पूर्वसवर्णः** इतिसूत्रेण पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे द्वितया इतिरूपं सिद्ध्यति। शेषं रामवत्।

**नेमे, नेमाः** – नेमशब्दात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जस् विभक्तौ '**प्रथमचरमतयाल्पार्धकतिपयनेमाश्च**' इति सूत्रेण जसि विकल्पेन सर्वनामसंज्ञायां जसः स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे गुणे नेमे इति विकल्पपक्षे जसः अनुबन्धलोपे पूर्वसवर्णदीर्घे 'नेमास्' इत्यवस्थायां सस्य रुत्वे विसर्गे नेमाः इति रूपं भवति।

**निर्जरः** – निर्गता जरा यस्मात् इत्यर्थे निर्जरशब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने '**स्वौजस्मौट्**' इत्यादिना सूत्रेण सुप्रत्ययेऽनुबन्धलोपे निर्जर स् इति जाते, सस्य रुत्वे विसर्गे निर्जर इति रूपं भवति।

**जराया जरसन्यतरस्याम् ( ७.२.१०१ ) जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य च तदन्तस्य च ( परि.३ ) अनेकाल्त्वात् सर्वादेशे प्राप्ते –**

**निर्दिश्यमानस्यादेशा भवन्ति ( प.१३ ) एकदेशविकृतस्यानन्यत्वाद् जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरस्। निर्जरसा। निर्जरसे। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृता तु पूर्वविप्रतिषेधेनेनातोः कृतयोः संनिपातपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसात् इति रूपे, न तु निर्जरसा निर्जरस इति 'केचित्' इत्युक्तम्। तथा भिसि निर्जरसैः इति रूपान्तरमुक्तम्। तदनुसारिभिश्च षष्ठ्येकवचने 'निर्जरस्य' इत्येव रूपमिति स्वीकृतम्। एतच्च भाष्यविरुद्धम्।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयं वर्तते। जराया इति षष्ठ्यन्तं, जरस् इति प्रथमान्तम्, अन्यतरस्याम् इति सप्तयन्तम्। अत्र '**अचि र ऋतः**' इत्यस्मात् अचि इति, अष्टन् आ विभक्तौ इत्यस्मात् विभक्तौ इति चेति अनुवर्तेते। अचि इति सप्तम्यन्तं विभक्तौ इत्यस्य विशेषणं भवति, **यस्मिन् विधिस्तदादावल्ग्रहणे**' इत्यनया परिभाषया तदादिविधिः। एतेन – अजादौ विभक्तौ जराशब्दस्य स्थाने विकल्पेन जरस् इत्यादेशो भवतीति सूत्रार्थो भवति।

अत्रेदमाशङ्कते यत् जराशब्दस्य स्थाने विधीयमानो जरसादेशो निर्जरशब्दस्य स्थाने कथं भविष्यति 'जरा' इति प्रतिपत्पाठात् तदुच्यते मूले '**पदाङ्गेत्यादि**' अर्थात् पदाधिकारे अङ्गाधिकारे च यस्य यद् विहितं तस्य तदन्तस्य च भवतीति परिभाषाबलात् जरसादेशस्य अङ्गाधिकारस्थत्वात् जराशब्दस्य तदन्तस्य निर्जरशब्दस्य च स्थाने भवतीति। अनेकालत्वात् सम्पूर्णस्य निर्जरशब्दस्य स्थाने प्राप्तो जरसान्देशः **निर्दिश्यमानपरिभाषया** केवलं जराशब्दस्य स्थाने भवति किञ्च जरा इत्यस्य विधीयमानो जरस् एकदेशविकृतस्य न अन्यत्वात् जरशब्दस्य स्थानेऽपि भवति। **निर्जरसौ। निर्जरसः**। प्रथमाद्वितीययोर्द्विवचने बहुवचने च रूपम्। अमि निर्जरसम्। **ननु** निर्जरशब्दस्य तृतीयैकवचने पञ्चम्येकवचने, निर्जर आ, निर्जर अस् इति स्थिते '**टाङसिङसामिनात्स्याः**' इति सूत्रेण इनादेशे आत् आदेशे च कृते निर्जरसिन, निर्जरसात् इति रूपं भवितव्यम्, किञ्च चतुर्थ्येकवचने षष्ठ्येकवचने च यथाक्रमं ङे ङस् विभक्तौ अनुबन्धलोपे च निर्जर ए, निर्जर अस् इति स्थिते **ङेर्यः** इति सूत्रेण 'य' आदेशे, '**टाङसि**' इत्यादिना ङसः स्थाने स्य इत्यादेशे अजादिविभक्त्यभावाद् जरसादेशाभावे निर्जराय, निर्जरस्य इति रूपं भवितव्यम् इति – अत्रोच्यते समाधानमुखेन मूले – **इनादीन् बाधित्वा परत्वाज्जरस् इति।** अर्थात् इन–य–आत्–स्य इत्यादेशान् नुटं च परत्वात् बाधित्वा

जरसादेशः। ततश्च अदन्तत्वाभावाद् इनादयो न भवन्तीति। निर्जरसा, तृतीयैकवचने। चतुर्थ्येकवचने निर्जरसे इति। पञ्चम्येकवचने षष्ठ्येकवचने च निर्जरसः इति रूपम्। जरसादेशाभावपक्षे हलादौ भिस ऐशादेशे 'निर्जरैः' इत्येव। अत्र मूले **वृत्तिकृता** इत्यादिना तु काशिकाकारमतं प्रदर्शयित्वा तन्मतं भाष्यविरुद्धत्वात् खण्डयति। **तथाहि** – काशिकाकारमते – निर्जर टा निर्जर ङसि इत्यादिषु स्थलेषु परशास्त्रत्वात् पूर्वं जरसादेशः प्राप्नोति परं परशास्त्रस्य नियामके = **विप्रतिषेधे परं कार्यम्'** इत्यस्मिन् सूत्रे परशब्दस्य इष्टवाचित्वात् इष्टकार्यं हि पूर्वसूत्रेण इनादेशः, आत् इत्यादेशः तस्मात् तृतीयैकवचने निर्जरसिन, पञ्चम्येकवचने निर्जरसात् इत्येवोचितम्, **सन्निपातपरिभाषाया** अनित्यवात् न कश्चन दोष इति। किञ्च षष्ठ्येकवचने निर्जरस्य इत्येवरूपम् उचितमिति यदुक्तं तद्भाष्यविरुद्धत्वात् न स्वीकर्त्तुं योग्यम्। तथाहि – **भाष्यकारस्तु** – **'टाङसिङसामिनात्स्याः'** इति सूत्रस्थस्य इनः, आतः च स्थाने यथाक्रमं न इति अत् इति चेत्यादेशं विधाय राम टा इत्यवस्थायाम् **'आङि चापः'** इति सूत्रस्य योगविभागं कृत्वा **'आङि'** इति सूत्रेण आङ्परस्य अकारान्तस्य अङ्गस्य एकारादेशे कृते रामेण इत्यादेः रूपसिद्धौ अजादित्वाभावात् जरसादेशस्याप्राप्तिरिति भाष्यपक्षस्य विरोधः स्यात् तस्मात् वृत्तिकृन्मतं न ग्राह्यमिति भावः।

**निर्जरसौ** = निर्जरशब्दात् प्रथमाद्वितीयाद्विवचने औ औट् विभक्तौ निर्जर औ इति जाते, **पदाङ्गाधिकारे तस्य च तदन्तस्य चेति** परिभाषासहकारेण **निर्दिश्यमानपरिभाषा सहकारेण च 'जरायाःजरसन्यतरस्याम्'** इति सूत्रेण जरस्थाने जरस् इत्यादेशे निर्जरस् औ इति जाते वर्णसंयोगे निर्जरसौ इति रूपं सिद्ध्यति।

**निर्जरसः** – निर्जरशब्दात् प्रथमाद्वितीयाबहुवचने जस् शस् विभक्तौ अनुबन्धलोपे निर्जर अस् इति जाते **'जरायाः जरसन्यतरस्याम्'** इति सूत्रेण जरसादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे निर्जरसः इति रूपं सिद्ध्यति।

**निर्जरसा** – निर्जरशब्दात् तृतीयैकवचने टाविभक्तावनुबन्धलोपे जरस्थाने जरस् इत्यादेशे वर्णसंयोगे निर्जरसा इति रूपं भवति।

**निर्जरसे** – निर्जरशब्दात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे निर्जर ए इति जाते जरस्थाने जरसादेशे संयोगे निर्जरसे इति।

**निर्जरसः** – निर्जरशब्दात् पञ्चम्येकवचने ङसि विभक्तौ, षष्ठ्येकवचने ङस् विभक्तौ अनुबन्धलोपे निर्जर अस् इति जाते जरस्थाने जरस् इत्यादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे निर्जरस इति रूपं सिद्ध्यति।

**पक्षे हलादौ रामवत् रूपं बोध्यम्।**

**पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ( ६.१.६३ ) पाद दन्त नासिका हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा। यत्तु 'आसनशब्दस्यासन्नादेशः' इति काशिकायामुक्तं तत्प्रामादिकम्। पादः। पादौ। पादाः। पादम्। पादौ। पदः, पादान्। पदा, पादेनेत्यादि।**

**संस्कृतव्याख्या** – विधिसूत्रम् इदम्। अत्र पदद्वयमस्ति। पद् च दत् च नस् च मास् च हृत् च निश् च असन् च यूषन् च दोषन् च यकन् च शकन् च उदन् च आसन् च इत्येतेषां समाहारद्वन्द्वघटितं पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकनुदन्नासन् इति प्रथमान्तं पदमेकम्, शस-प्रभृतिर्येषां ते शस्प्रभृतयस्तेषु शस्प्रभृतिषु इति सप्तम्यन्तं पदं द्वितीयम्। अत्र अन्यतरस्याम् इत्यस्यानुवृत्तिर्भवति। सूत्रेऽस्मिन् केवलम् विधीयमाना आदेशा एवोल्लिखिताः सन्ति। अर्थानुसारं स्थानिनां ग्रहणं स्वयं कर्त्तव्यं भवति। एतेन पाद दन्त नासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक् आस्यम् इत्येतेषां स्थानिनां स्थाने यथासंख्यं पद दत् नस् मास् हृत् निश् असन् यूषन् दोषन् यकन् उदन् आसनम् इत्येते आदेशा भवन्तीति सूत्रार्थः।

अत्र काशिकारेण आसनशब्दस्य स्थाने आसन् इत्यादेशः कथितः तद्दीक्षितानुसारं प्रामादिकम्। तथाहि काशिकायाम् '**आसने किं लभे मधूनि**' इत्युदाहरणं प्रदत्तम् ऋग्वेदस्य मन्त्रे **हव्या जुह्वान आसनि आसन्यं प्राणमूचुः** इत्यादिषु स्थलेषु आसनि, आसन्यम् इति पदम् आस्ये (मुखे) इत्यर्थे प्रयुक्तम्, तस्मात् आसन् इत्यादेशः आस्यम् इत्यस्यैव स्थाने उचितन्नतु आसनशब्दस्य स्थान इति भट्टोजिदीक्षितस्य तात्पर्यम्।

**पादः, पादौ, पादाः, पादम्, पादौ इत्येतानि** रामशब्दवदेव भविष्यन्ति।

**पदः,** पादान् – पादशब्दस्य द्वितीयाबहुवचने शसप्रत्ययेऽनुबन्धलोपे पाद अस् इति जाते '**पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु**' इतिसूत्रेण विकल्पेन पदादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे पदः इति विकल्पपक्षे पाद अस् इत्यवस्थायां **प्रथमयोः पूर्वसवर्ण** इति सूत्रेण दीर्घे, पादास् इति जाते **तस्माच्छसो नः पुंसि** इति सूत्रेण सस्य स्थाने न् इत्यादेशे पादान् इति रूपं सिद्ध्यति। एवमेव **पदा पादेनेत्यादि**।

**पदा, पादेन** – पादशब्दात् प्रातिपदिकसंज्ञायां तृतीयैकवचने टा विभक्तावनुबन्ध पाद आ इत्यवस्थायां '**पदन्नोमासित्यादिना**' सूत्रेण पद् इत्यादेशे वर्णसंयोगे पदा इति, विकल्पपक्षे पाद टा इत्यवस्थायां टा स्थाने इनादेशे '**आद्गुणः**' इतिसूत्रेण गुणे 'पादेन' इति रूपं सिद्धम्।

**सुडनपुंसकस्य (१.१.४३) सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसञ्ज्ञानि स्युरक्लीबस्य।**

**संस्कृतव्याख्या** – संज्ञसूत्रमिदम्। सुट् अनपुंसकस्य इति सूत्रस्य पदविभागः। अत्र पदद्वयम् – सुट् इति प्रथमान्तम्, अनपुंसकस्य इति षष्ठ्यन्तं पदञ्च।'**शिसर्वनामस्थानम्**' इति सूत्रात्'सर्वनामस्थानम्' इत्यस्यानुवृत्तिर्भवति। अत्र सुट् इति सु इत्यारभ्य औटष्टकारपर्यन्तं प्रत्याहारो गृह्यते। एतेन नपुंसकभिन्नानि सु औ जस् अम् औट् इत्येतानि पञ्चवचनानि सर्वनामस्थानसंज्ञकानि भवन्तीति सूत्रार्थः सम्पद्यते।

**स्वादिष्वसर्वनामस्थाने (१.४.१७) कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।**

**संस्कृतव्याख्या** – स्वादिषु असर्वनामस्थाने इति सूत्रस्य पदच्छेदः। न सर्वनामस्थानम् इति असर्वनामस्थानं तस्मिन् असर्वनामस्थाने सर्वनामस्थानभिन्ने इत्यर्थः। अत्र **सुप्तिङन्तं पदम्** इति सूत्रेण पदमनुवर्तते। इत्थम् – सर्वनामस्थानसंज्ञकं प्रत्ययं परित्यज्य सु प्रभृति कप्प्रत्ययपरेषु पूर्वशब्दरूपं पदसंज्ञकं भवतीति सूत्रार्थः।

**यचिभम् (१.४.१८) यकारादिष्वजादिषु कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।**

**संस्कृतव्याख्या** – य च अच् च इति यच् तस्मिन् यचि इति सप्तम्यन्तं पदम्, भम् इति प्रथमान्तपदम्। इत्थं, द्विपदमिदं सूत्रम्।'**स्वादिष्वसर्वनामस्थाने** इति सम्पूर्णं सूत्रमनुवर्तते। एवम् – सर्वनामसंज्ञके प्रत्यये भिन्ने सुप्रभृति कप्पर्यन्तेषु प्रत्ययेषु यकारादौ अजादौ च प्रत्यये परे पूर्वं भसंज्ञं भवतीति सूत्रस्य तात्पर्यम्। तेन दत्शब्दात् द्वितीयाबहुवचने शस् विभक्तौ अनुबन्धलोपे दत् अस् इत्यत्र **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण प्राप्तां पदसंज्ञां प्रबाध्य अनेन सूत्रेण भसंज्ञा भवति तेन पदत्वाभावात् दत् अस् 'इत्यवस्थायां तकारस्य जश्त्वं दकारो न भवतीति।

**आ कडारादेका संज्ञा (१.४.१) इत ऊर्ध्वं कडारा कर्मधारये (२.२.३८) इत्यतः प्रागेकस्यैकैव सञ्ज्ञा ज्ञेया। या परा अनवकाशा च। तेन शशादावचि भसञ्ज्ञैव, न पदत्वम्। अतो जश्त्वं न। दतः। दता। जश्त्वम् दद्भ्यामित्यादि।**

**संस्कृतव्याख्या** – दत् अस् इत्यवस्थायां **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण प्रत्ययपूर्वस्य दत् शब्दस्य

पदसंज्ञा प्राप्नोति, **यचि भम्** इति सूत्रेण भसंज्ञा च। अस्यामवस्थायां सूत्रमिदं प्रवर्तते – **आ कडारेत्यादिः**। सूत्रे आ इति मार्यादायां न तु अभिविधौ कडाराशब्दस्यापि प्रवेशे प्रयोजनाभावात्।

एतेन इत ऊर्ध्वं **कडारा कर्मधारये** इत्यतः प्राक् एकस्य एक एव संज्ञा भवतीति सूत्रस्य तात्पर्यम्। तस्मात् दत् अस् इत्यवस्थायां पदसंज्ञा भसंज्ञा वा एकैव संज्ञा, का च सा संज्ञा भविष्यतीत्याशङ्कायां कथयति **या परा अनवकाशा** चेति। अर्थात् अष्टाध्यायिक्रमपाठात् परवर्तिनी, अनवकाशा अर्थात् संज्ञासूत्र स्वसमकालसूत्रापेक्षा कुत्राप्यचरितार्था सैव स्यादिति। **परशास्त्रविहितसंज्ञाया उदाहरणं** यथा – **'धनुषा शरैर्विध्यति'** अत्र धनुषः बाणस्य विश्लेषणात् अपायेऽपादानसंज्ञा प्राप्नोति किञ्च विश्लेषणं प्रति व्यधनव्यापारं प्रति अवधिभूतं धनुः साधकतममपि अस्ति। उभयोः युगपत्प्राप्तौ परत्वात् करणसंज्ञा भवति तेन धनुषा इति तृतीया विभक्तिर्भवति।

**अनवकाशसंज्ञाया उदाहरणम् – अततक्षत् इति।** अत्र क्ष इत्यस्मिन् कषसंयोगात् तत्पूर्ववर्तिनोऽकारस्य **'संयोगे गुरुः'** इति सूत्रेण गुरुसंज्ञा प्राप्नोति, ह्रस्वात्तस्य **ह्रस्वं लघु** इति सूत्रेण लघुसंज्ञापि। अत्र अनवकाशात् गुरुसंज्ञा भवति। एतेन **सन्वल्लघुनि चङ्परेऽनग्लोपे** इति सूत्रेण सन्वद्भावो न भवति न च तन्निमित्तकम् इत्वमपि। इत्थम् दत् अस् इत्यादौ शसादौ अचि परे भसंज्ञा एव भवति न तु पदसंज्ञा। **दतः। दता।**

**दतः** – दन्त् शब्दात् द्वितीया बहुवचने शस् विभक्तावनुबन्धलोपे, **पदन्नोमासे**त्यादि सूत्रेण दन्तस्थाने दत् आदेशे विकल्पेन इति जाते **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण प्राप्तां पदसंज्ञां प्रबाध्य **'आकडारादेश संज्ञा'** इति नियमसूत्रेण परत्वात् **'यचि भम्'** इति सूत्रेण भसंज्ञायां पदत्वनिषेधे जश्त्वाभावे वर्णसंयोगे दतस् इति जाते सस्य रुत्वे विसर्गे दतः इति। विकल्पपक्षे दन्त शस् इत्यवस्थायामनुबन्धलोपे, **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण दीर्घेः, **तस्माच्छसो नः पुंसि** इत्यनेन सस्य नत्वे दन्तान् इति रूपं भवति।

**दता-दन्तेन** – दन्तशब्दात् तृतीयैकवचने टा विभक्तावनुबन्धलोपे **पदन्नोमासेत्यादि** सूत्रेण दन्तस्थाने विकल्पेन दत् इत्यादेशे भसंज्ञया पदसंज्ञाया बाधे वर्णसंयोगे दता इति, विकल्पपक्षे दन्तशब्दात् टा विभक्तौ तत्स्थाने इनादेशे गुणे दन्तेन इति रूपं सिद्ध्यति।

**दद्भ्याम्, दन्ताभ्याम्** – दन्तशब्दात् तृतीयाद्विवचने भ्याम् विभक्तौ, दन्तभ्याम् इत्यवस्थायां **पदन्नोमास्हृन्निशसन्यूषनित्यादिसूत्रेण** दन्तस्थाने विकल्पेन तद् इत्यादेशे **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण पदसंज्ञायां **'झलां जशोऽन्ते'** इति सूत्रेण तकारस्य स्थाने जश्त्वे दकारे वर्णसंयोगे दद्भ्याम् इति रूपं भवति, विकल्पपक्षे दन्तभ्याम् इति इत्यवस्थायां **'सुपि च'** इति सूत्रेण दीर्घे दन्ताभ्याम् इति रूपं भवति।

**माभ्याम्, मासाभ्याम्** – मास शब्दात् तृतीया द्विवचने भ्याम् विभक्तौ मासभ्याम् इति जाते **पदन्नोमासेत्यादि**सूत्रेण मासशब्दस्य स्थाने विकल्पेन मास् इत्यादेशे, **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण पदसंज्ञायां, **'ससजुषो रुः'** इति सूत्रेण सस्य रुत्वे, **'भो भगोऽघोऽपूर्वस्य योऽशि'** इति सूत्रेण रेफस्य स्थाने यकारादेशे, **'हलि सर्वेषाम्'** इति सूत्रेण यलोपे माभ्याम् इति रूपं सिद्ध्यति, विकल्पपक्षे मास भ्याम् इत्यवस्थायां **'सुपि च'** इति सूत्रेण दीर्घे मासाभ्याम् इति। एवमेव **माभिरित्यादिः**।

**भस्य 6.4.129 इत्यधिकृत्य**

**संस्कृत व्याख्या** – एकपदात्मकमिदं सूत्रम्। एतच्चाधिकारसूत्रम्, भस्य इति षष्ठ्यन्तं पदम्। अधिकारस्योत्तरसूत्रार्थबोधकत्वात् षष्ठाध्यायस्य चतुर्थपादसमाप्तिपर्यन्तमस्याधिकारः। एतन्मध्यकं सर्वं कार्यं भसंज्ञकनिमित्तकं भवतीति सूत्रस्य तात्पर्यम्।

**अल्लोपोऽनः 6.4.134**

**अङ्गावयवोऽसर्वनामस्थानयजादिष्वादि परो योऽन् तस्याकारस्य लोपः स्यात्।**

**संस्कृत व्याख्या** – सूत्रेऽस्मिन् पदत्रयं वर्तते, अत् इति लुप्तषष्ठीकं पदम्, लोप इति प्रथमान्तम्, अनः इति षष्ठ्यन्तं पदम्। अत्र यस्य, अङ्गस्य च अधिकारः। भसंज्ञा च असर्वनामस्थानेषु यजादि स्वादिपरे पूर्वस्य भवति। इत्थं सर्वनामस्थानभिन्नेषु यकारादिषु अजादिस्वादिप्रत्ययेषु परेषु अङ्गावयवस्य अनः अकारस्य लोपो भवतीति सूत्रार्थः सम्पद्यते। तदुक्तं वृत्तौ अङ्गावयवोऽसर्वनामेत्यादिः।

**रषाभ्यां नो णः समानपदे 8.4.1**

**एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्।**

**यूष्णः। यूष्णा। पूर्वस्मादपि विधौ स्थानिवद्भावः इति पक्षे तु अडव्यवाये इत्येवात्र णत्वम्। पूर्वत्रासिद्धे न स्थानिवत् ( वा.४३३ ) इति त्विह नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेषु ( वा. ४४० ) इति निषेधात्।**

**संस्कृत व्याख्या** – अत्र सूत्रे चत्वारि पदानि सन्ति। रश्च षश्च तयो रषौ, ताभ्यां रषाभ्याम् इति पञ्चम्यन्तं पदम्, नः इति षष्ठ्यन्तं, णः इति प्रथमान्तं, समानं च तत्पदं तस्मिन् समानपदे इति सप्तम्यन्तं पदम्।

सूत्रेऽस्मिन् रेफस्थोऽकारः, षकारस्थोऽकारो णकारस्थोऽकारश्चोच्चारणार्थकः। रषाभ्याम् इत्यस्य पञ्चम्यन्तत्वात् '**तस्मादित्त्युत्तरस्य**' इति परिभाषासूत्रस्य प्रवृत्तौ अव्यवहितपरस्य' इत्यर्थो लभ्यते, नः इत्यस्य षष्ठ्यन्तत्वात् स्थाने' इति पदं प्रवर्तते। समानपदेन अखण्डपदस्य ग्रहणम्। इत्थं समानपदे अर्थात् एकस्मिन् पदे स्थितस्य रेफस्य षकारस्य च अकारात् परस्य नकारस्य स्थाने णकारादेशो भवतीति सूत्रस्यार्थः संगच्छते। एतेन **यूष्णः**, यूषान् इत्यादीनि रूपाणि भवन्ति। तद्यथा –

**यूष्णः, यूषान्** – यूष् शब्दात् द्वितीयाबहुवचने शस् विभक्तावनुबन्धलोपे यूष अस् इत्यवस्थायां **पदन्नोमास् हृन्निशसन्यूषन्दोषनित्यादि**सूत्रेण यूषस्थाने विकल्पेन यूषन् इत्यादेशे यूषन् अस् इति जाते, अजादिप्रत्ययपरत्वात् '**यचि भम्**' इति सूत्रेण भसंज्ञायाम्, **अल्लोपोऽनः** इति सूत्रेण अनोऽकारस्य लोपे यूष् न् अस् इति जाते '**रषाभ्यां नो णः समानपदे**' इति सूत्रेण नस्य णत्वे वर्णसंयोगे यूष्णस् इति जाते सस्य रूत्वे विसर्गे इति रूपं भवति विकल्पपक्षे पूर्वसवर्णदीर्घे सस्य नत्वे यूषान् इति रूपं सिद्ध्यति।

अत्रेदमाशङ्कते यत् यूषन् अस् इत्यवस्थायाम् **अल्लोपोऽनः** इति सूत्रेण विधीयमानोऽकारलोपः णत्वनिमित्ते षकारोत्तरवर्ती वर्तते। **अचः परस्मिन् पूर्वविधौ** इत्यस्मिन् सूत्रे पूर्वविधौ इत्यस्य पूर्वस्माद् विधौ इत्यर्थे अकारलोपस्य स्थानिवद्भावे ष् न् इत्यनयोर्मध्येऽकारस्य व्यवधानात् कथं '**रषाभ्यां नो णः समानपदे**' इति सूत्रेण णत्वमिति, तदुच्यतेऽस्मिन् पक्षे अडव्यवाये, **अट्कुप्वाङ्नुमित्यादि**सूत्रेणैव णत्वमिति।

अत्र पुनरिदमाशङ्कते – **पूर्वत्रासिद्धे न स्थानिवत्** इति वार्तिकेन पूर्वत्रासिद्धे कार्ये कर्त्तव्ये स्थानिवद्भावो न भवतीति दशायां त्रिपाद्यामपि असिद्धशास्त्रस्य प्रवृत्तेः यूष् न् अस् इत्यादौ स्थानिवद्भावो न स्यात् इति। **अत्रोच्यते समाधानमुखेन मूले पूर्वत्रासिद्धे न स्थानिवत् इति तु इह नास्ति।** अर्थात् णत्वकर्त्तव्यतायाम् अस्य वार्तिकस्य प्रवृत्तिर्नभवति, तस्य दोषः संयोगादिलोपलत्वणत्वेषु इति वार्तिकेन तद्वार्तिकस्य निषेधात् तस्मात्स्थानिवद्भावो भवति। अस्येदं तात्पर्यं यत् –

संयोगादिलोपे, लत्वं – णत्वं च कार्ये कर्त्तव्ये त्रिपाद्यामपि स्थानिवद्भावो भवति, यूष् न् अस् इत्यत्र णत्व कर्तव्यतायां स्थानिवद्भावे न कश्चिद् बाधः।

**संयोगान्तलोपस्योदाहरणम्** – चक्री अत्र चक्रयत्र इत्यादौ च क् र् य इत्यत्र ककारस्य **स्कोः संयोगाद्योरन्ते च** इति सूत्रेण लोपो न इकारस्य स्थानिवद्भावात्। **लत्वविधौ स्थानिवद्भावस्योदाहरणम्** – निगाल्यते। तथाहि नि

इत्युपसर्गात् गृधातो णिचि ऋकारस्य वृद्धौ निगाद् इत्यवस्थायां कर्मणि यक्प्रत्यये णिलोपस्य स्थानिवद्भावेन अजादिपरत्वात् '**अचि विभाषा**' इति सूत्रेण रेफस्य स्थाने लत्वं भवति।

**णत्वविधौ स्थानिवद्भावस्योदाहरणम्** – माषवपनी, माषोतर वप् धातोः ल्युट् प्रत्यये स्त्रीत्वे ङीप् प्रत्यये माषवपनी इति जाते अकारलोपस्यात्र स्थानिवद्भावेन नकारस्य प्रातिपदिकान्तत्वाभावात् **प्रातिपदिकान्तान्नुम्विभक्तिषु च** इति सूत्रेण णत्वन्न भवतीति।

**न लोपः प्रातिपदिकान्तस्य 8.2.7 नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसञ्ज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। न लोपस्यासिद्धत्वात् दीर्घत्वमेत्वमैस्त्वं च न। यूषभ्याम्। यूषभिः इत्यादि।**

**संस्कृत व्याख्या** – अस्मिन् सूत्रे न इति पदं नस्य इति षष्ठ्यन्तस्य, प्रातिपदिक इति प्रातिपदिकस्य इति षष्ठ्यन्तस्य लुप्तषष्ठीकं पदं वर्तते, अन्तस्य इति पदं लुप्तषष्ठीकस्य नस्य विशेषणम्, अधिकृतं पदस्य इति विशेष्यं पदं लुप्तषष्ठीकस्य प्रातिपदिकस्य इति पदं पदस्य विशेषणम्। एतेन प्रातिपदिकसंज्ञकं यत्पदं तदन्तावयवस्य नकारस्य लोपो भवतीति सूत्रार्थः। नलोपस्य असिद्धत्वात् यूषन् भ्याम् इत्यादौ दीर्घत्वम् एत्वम्, ऐस्त्वं च न भवति।

**यूषभ्याम्, यूषाभ्याम्** – यूषशब्दात् तृतीयाद्विवचने भ्याम् विभक्तौ **पदन्नोमासेत्यादि**सूत्रेण विकल्पेन यूषन् इत्यादेशे यूषन् भ्याम् इति जाते '**स्वादिष्वसर्वनामस्थाने**' इति सूत्रेण पदसंज्ञायां, नलोपः प्रातिपदिकान्तस्य इति सूत्रेण नलोपे तस्य असिद्धत्वात् **सुपि चेति** सूत्रेण प्राप्तस्य दीर्घस्याभावे वर्णसम्मेलने यूषभ्याम् इति रूपं भवति, विकल्पपक्षे यूषन् इत्यादेशाभावे यूषभ्याम् इत्यवस्थायां सुपि चेति सूत्रेण दीर्घे यूषाभ्याम् इति।

**विभाषा ङिश्योः 6.4.136, अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरोयोऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः। यूष्णि, यूषणि। पक्षे रामवत्। 'पदन्नो...... ( सू.२२८ ) इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम्। तथा च औङः श्यामपि दोषन्नादेशः। अत एव भाष्ये 'ककुद्दोषणी' इत्युदाहृतः। तेन पदङ्घ्रिचरणयोऽस्त्रियाम्' 'स्वान्तं हृन्मानसं मनसः' इत्यादि च सङ्गच्छते। आसन्यं प्राणमूचुः इति च। आस्ये भावः आसन्यः। दोष् शब्दस्य नपुंसकत्वमत एव भाष्यात्। तेन दक्षिणं दोर्निशाचरः इति संगच्छते। 'भुजबाहू प्रवेष्टो दोः' इति साहचर्यात्पुंस्त्वमपि। दोषं तस्य तथाविधस्य भजतः इति। द्वयोरह्नोर्भवो द्वयह्नः।**

**संस्कृत व्याख्या** – सूत्रेऽस्मिन् पदद्वयं वर्तते। विभाषा इति प्रथमान्तपदमेकम्, ङिश्च शीश्च तौ ङिश्यौ, तयो ङिश्योरिति सप्तमीद्विवचनान्तपदं द्वितीयम्। **अल्लोपोऽन** इति सूत्रमत्रानुवर्तते, अङ्गस्य भस्य चाधिकारः। अत्र सूत्रे ङि इत्यनेन सप्तम्येकवचनस्य ङिप्रत्ययः, **नपुंसकाच्च** इति सूत्रेण औ इत्यस्य स्थाने विधीयमान शी इत्यादेशो गृह्यते, न तु **जश्शसोः शि** इति सूत्रेण जश्शसोः स्थाने विधीयमानस्य शि इत्यादेशः, यतोहि भसंज्ञकस्य विषयः सर्वनामस्थानसंज्ञकात् भिन्नो वर्तते जश्शसोः शि इत्यनेन कृतस्य शि इत्यादेशस्य '**शि सर्वनामस्थानम्**' इति सूत्रेण सर्वनामस्थानसंज्ञा भवति। इत्थम् – अङ्गावयवः सर्वनामस्थानभिन्नयकारादिषु अजादि स्वादिप्रत्ययपरकेषु योऽन्, तस्य अकारस्य विकल्पेन लोपो भवति ङि प्रत्यये शिप्रत्यये च परे इति सूत्रस्यार्थः। एतेन **यूष्णि, यूषनि,** यूषे इति रूपत्रयं भवति –

**यूष्णि, यूषणि, यूषे** – यूष प्रातिपदिकात् सप्तम्येकवचने ङिप्रत्यये यूष ङि इति जाते '**पदन्नोमास्हृन्निशसन्यूषन्दोषनित्यादि**' सूत्रेण विकल्पेन यूष् स्थाने यूषन् इत्यादेशे यूषन् इ इत्यवस्थायां **यचि भम्** इति सूत्रेण भसंज्ञायाम् **विभाषा ङिश्योः** इति सूत्रेण विकल्पेन यूषन् इत्यस्याकारलोपे वर्णसंयोगे यूष्णि, अकारलोपाभावे यूषणि, विकल्पपक्षे यूष ङि इत्यवस्थायाम् अनुबन्धलोपे '**आद्गुणः**' इति सूत्रेण गुणे यूषे इति रूपं भवति।

अत्र सूत्रे इदमाशङ्क्यते यत् **पदन्नोमासित्यादि**सूत्रे 'शस्प्रभृतिषु' इत्युक्तम्, तत्स्थाने 'शसादौ' इत्येव वक्तव्ये

कार्ये जाते लाघवात् तदेव वक्तव्यं प्रभृतिग्रहणं कथमिति **अत्रोच्यते समाधानरूपेण मूले – पदन्नो ( सू.२२८ ) इति सूत्रे प्रभृतिग्रहणं प्रकारार्थम्।** अस्येदं तात्पर्यं यत् शसादौ इति वक्तव्ये शस् प्रत्ययादारभ्य सुप् पर्यन्तं विभक्तिषु पदेष्वेव कार्यं प्रवर्तेत न ततोऽन्यत्र, अन्यत्रापि कर्त्तुमिष्टम्। अत एव प्रभृतिग्रहणम्। प्रभृतिशब्दो हि प्रकारार्थः, स च सादृश्यवाची एतेन शस् सादृश्येऽपि कार्यं यथा स्यात्। सादृश्यञ्चात्र सुप्त्वेन गृह्यते। इत्थम् शस्सदृशान्येषु असर्वनामस्थलेष्वपि पदन्नोमासित्यादिसूत्रस्य प्रवृत्तिर्भवति। अत्र सूत्रे प्रभृतिशब्दस्य प्रकारार्थत्वे सत्येव भाष्ये **ककुद्दोषणी** इत्युदाहरणं प्रदत्तम्। अत्र प्रथमा द्विवचने ककुद् च दोः च इत्यर्थे ककुद् दोष् शब्दात् औ विभक्तौ अनेन सूत्रेण दोष् इत्यस्य स्थाने दोषन् इत्यादेशे ककुद्दोषणी इति रूपं भवति।

किञ्च एतत्स्वीकारे एव **पदङ्घ्रिश्चरणयोऽस्त्रियाम्, स्वान्तं हृन्मानसं मनः** इत्यादिकोशप्रयुक्तेषु पद् हृत् इत्यादीनां शब्दानां साधुत्वं संगच्छते। किञ्च **'आसन्यं प्राणमूचुः'** इत्यत्र आस्ये भवः आसन्य इति व्युत्पत्तौ आस शब्दस्य प्राणसमभिहारात् आस्ये भवम् इत्यर्थे **शरीरावयवाद्यत्** इति सूत्रेण यत् प्रत्यये **पदन्नोमासि**त्यादिना सूत्रेण आसन् इत्यादेशे **'ये च भावकर्मणोः'** इति सूत्रेण टिलोपं प्रबाध्य प्रकृतिभावे आसन्य इति रूपं सङ्गच्छते। तस्मात् प्रभृतिग्रहणमावश्यकमिति। सूत्रे **'दोषं तस्य तथाविधस्य भजतः'** इत्यादिप्रयोगेषु दोषशब्दः पुल्लिङ्गे दृश्यते तत्कथं भाष्यप्रयुक्ते 'ककुद्दोषणी' इत्युदाहरणे दोषशब्दस्य नपुंसकत्वमुपपन्नमिति जिज्ञासायां कथयति मूले – **दोषशब्दस्य नपुंसकत्वमत एव भाष्यात्।** अर्थात् भाष्यप्रयोग एव प्रमाणम् दोषशब्दस्य नपुंसकत्वे। अतएव तमुपाद्रवदुद्यम्य दक्षिणं **दोर्निशाचरः इति रघुवंशे दोः** इत्यस्य नपुंसकत्वम् उचितमेव। **भुजबाहू प्रवेष्टो दोः** इत्यादिकोशबलात् बाहुशब्दसाहचर्यात् दोषशब्दः पुल्लिङ्गेऽपि भवतीति बोध्यम्।

द्वयोरह्नोर्भवो इत्यर्थे द्वयह्नः इति शब्दः। द्वयह्नः, द्वयह्नौ द्वयह्ना: इत्यादिरूपं भवति।

**सङ्ख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ६.३.१०**

**सङ्ख्यादिपूर्वस्याह्नस्याहन्नादेशो वा स्यान्ङौ। द्वयह्नि, द्वयहनि, द्वयह्ने। विगतमहर्व्यह्नः। व्यह्नि, व्यहनि, व्यह्ने। अह्नः सायः सायाह्नः। सायाह्नि, सायाह्नि, सायाह्ने।।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। संख्याविसायपूर्वस्य इति षष्ठ्यन्तं, अह्नस्य इति षष्ठ्यन्तं अहन् इति प्रथमान्तम्, अन्यतरस्याम् इति सप्तमी प्रतिरूपकमव्ययम्।

संख्या च विश्च सायश्च तेषामिति संख्याविसायम्, एतत्पूर्व यस्य स सङ्ख्याविसायपूर्वम् तस्य अर्थात् सङ्ख्या विसाय एतत्पूर्वकस्य अह्नशब्दस्य स्थाने अहन् इत्यादेशो विकल्पेन भवति, ङौ इत्यनेन सप्तम्येकवचने ङिप्रत्यये परे इति सूत्रार्थः सम्पद्यते। तथाहि द्वयह्नशब्दात् सप्तम्येकवचने द्वयह्नि, द्वयहनि, विकल्पपक्षे अह्नादेशाभावे द्वयह्ने इति रूपं भवति।

**द्वयहिन, द्वयहनि, द्वयह्ने** = द्वयोरहनोर्भवः इत्यर्थे कृतसमासान्तद्वयह्नशब्दात् सप्तम्येकवचने ङि प्रत्ययेऽनुबन्धलोपे द्वयह्न इ इति जाते **'सख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ'** इति सूत्रेण द्वयह्नशब्दस्य अह्नस्य स्थाने विकल्पेन अहन् इत्यादेशे द्वयहन इ इति जाते, **'विभाषा ङिश्योः'** इति सूत्रेण हकारोत्तरवर्तिनोऽकारस्य विकल्पेन लोपे वर्णसंयोगे द्वयह्नि इति, अकारलोपाभावपक्षे वर्णसंयोगे द्वयहनि इति, अह्नादेशाभावो द्वयह्नशब्दात् ङिप्रत्ययेऽनुबन्धलोपे 'आद्गुणः' इति सूत्रेण गुणे द्वयह्ने इति रूपं सिद्धयति।

एवमेव विगतम् अहः **व्यह्नः, अह्नः** सायः **सायाह्नः** इत्यादीनां रूपाणि बोध्यानि।

**इत्यदन्ताः**

**विश्वपाः** = आकारान्तपुल्लिङ्गशब्दः – विश्वपा इति। **विश्वं पाति**=रक्षति इत्यर्थे विश्व अम् पा धातोः

**आतोऽनुपसर्गे क** इति सूत्रेण प्राप्तं कं प्रत्ययं **प्रबाध्यवासरूपविधिना** वैकल्पिकेनापवादशास्त्रेण वैदिकप्रयोगाय '**आतोमनिन् क्वनिब्वनिपश्च**' इति सूत्रेण, लौकिकप्रयोगाय च **अन्येभ्योऽपि दृश्यन्ते** इति सूत्रेण विच् प्रत्यये तस्य सर्वापहारिलोपे विश्वपा इति आकारान्तपुल्लिङ्गशब्दः, तस्य प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे विश्वपाः इति रूपं भवति।

**दीर्घाज्जसि च 6.1.105 दीर्घाज्जसि इचि च परे पर्वूसवर्णदीर्घो न स्यात्। वृद्धि। विश्वपौ। सवर्णदीर्घः – विश्वपाः। यद्यपीह औङि नादिचि ( सू. 165 ) इत्येव सिद्धम्। जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि गौर्यौ गौर्यः इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम्।**

**संस्कृत व्याख्या** – दीर्घात् जसि च इति सूत्रस्य पदविभागः। सूत्रेऽस्मिन् पदत्रयं वर्तते,दीर्घात् इति पञ्चम्यन्तं, जसि इति सप्तम्यन्तं च इत्यव्ययपदम्। अत्र **प्रथमयोः पूर्वसवर्णः** इत्यस्मात् पूर्वसवर्णग्रहणम्, '**अकः सवर्णे दीर्घः**' इति सूत्राच्च दीर्घग्रहणमनुवर्तते। एकः पूर्वपरयोरित्यस्याधिकारः। **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण प्राप्तः पूर्वसवर्णदीर्घः अनेन सूत्रेण निषिध्यते इत्थं सूत्रस्यार्थो भवति यत् दीर्घात् जसि परे इचि परे च पूर्वपरयोः स्थाने पूर्वसवर्ण दीर्घो न भवतीति। अतः **वृद्धिरेचि** इति सूत्रेण वृद्धौ विश्वपौ इति रूपं सिद्धयति।

यद्यपि औङ् विभक्तौ नादिचि इति सूत्रेणैव पूर्वसवर्णदीर्घस्य निषेधे सिद्धे, जसि परे च पूर्वसवर्णे दीर्घेऽपि क्षत्यभावात् प्रकृते **दीर्घाज्जसि चेति** सूत्रस्योपन्यासो न कर्त्तव्य इति चेत् अत्र कथयति मूले **तथापि गौर्यौ गौर्यः** इत्याद्यर्थं सूत्रमिहापि न्यायत्वादुपन्यस्तम्। अस्यायं भावः गौरी औ, गौरी जस् इत्यादौ इचि जसि परे पूर्वसवर्णदीर्घनिषेधाय अस्य सूत्रस्यावश्यकत्वात् अनिवार्यतयास्य सूत्रस्य पठनीयत्वात् अत्रोपन्यास उचित एवेति।

**विश्वपौ** – विश्वपाशब्दात् प्रथमाविभक्तौ द्विवचने **स्वौजस्मौट्** इत्यादिना सूत्रेण औ प्रत्यये विश्वपा औ इति जाते **वृद्धिरेचि** इति सूत्रेण प्राप्तं वृद्धिं प्रबाध्य '**प्रथमयोः पूर्वसवर्णः**' इति सूत्रेण दीर्घे प्राप्ते, **दीर्घाज्जसि** च इति सूत्रेण निषेधे, '**पुनः प्रसङ्गविज्ञानात् सिद्धम्**' इति परिभाषया पुनः **वृद्धिरेचि** इति सूत्रेण वृद्धौ कृतायां विश्वपौ इति रूपं सिद्धयति।

**विश्वपाः** – विश्वपाः = विश्वपा शब्दात् प्रथमाबहुवचने जस् विभक्तावनुबन्धलोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे विश्वपाः इति रूपं भवति।

**आतो धातोः 6.4.140 आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात्। अलोऽन्त्यस्य ( सू.४२ ) विश्वपः। विश्वपा। विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। धातोः किम्? हाहान्। टा, सवर्णदीर्घः – हाहा। ङे, वृद्धि हाहै। ङसिङसोदीर्घः – हाहाः। ओसि वृद्धि– हाहौः। ङौ आद्गुणः– हाहे। शेषं विश्पावत्। 'आतः' इति योगविभागादधातोरप्याकारलोपः क्वचित्। क्त्वा। श्नः। इत्यादन्ताः।**

**संस्कृत व्याख्या** – अस्मिन् सूत्रे पदद्वयं वर्तते। आतः इति धातो इति च षष्ठ्यन्तं पदम्। **अल्लोपोऽनः** इत्यस्मात् लोपः इत्यनुवर्तते अस्य अङ्गस्य च अधिकारः। आतोः धातोः इत्यत्र तदन्तविधिना आकारान्तो धातुः तदन्तस्य अङ्गस्य इत्यर्थो गृह्यते। एतेन – आकारान्तो यो धातुः तदन्तस्य भसंज्ञकस्य अङ्गस्य लोपो भवतीति सूत्रार्थः सम्पद्यते। **अलोऽन्त्यस्य** इति सूत्रेण अङ्गस्य इत्यस्य षष्ठ्यन्तत्वात् तदन्तग्रहणम्। सूत्रे धातोग्रहणाभावे अव्युत्पन्नहाहाशब्दस्याकारस्य लोपप्रसङ्गः स्यात् तेन हाहाशब्दात् द्वितीया बहुवचनेऽपि हाहा इति रूपापत्तिः तद्वारणार्थं धातोग्रहणम्। एतेन अव्युत्पन्नहाहाशब्दात् द्वितीयाबहुवचने हाहान् इति रूपं भवति। सूत्रे आतः इति योगविभागो भवति तेन क्वचित् धातुभिन्नस्यापि आकारस्य लोपो भवति। यथा क्त्वा इत्यस्य षष्ठ्येकवचने क्त्वः, एवमेव श्ना इत्यस्य श्नः इति रूपं भवति।

**विश्वपा** – विश्वपाशब्दात् द्वितीयाबहुवचने शस् विभक्तौ अनुबन्धलोपे विश्वपा अस् इति जाते, **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण सवर्णदीर्घे प्राप्ते **यचि भम्** इति सूत्रेण भसंज्ञायाम् '**आतो धातोः**' इति सूत्रेण विश्वपाशब्दस्य आकारलोपे वर्णसम्मेलने सस्य रुत्वे विसर्गे विश्वपः इति रूपं सिद्ध्यति।

**विश्वपा** – विश्वपाशब्दात् तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे भसंज्ञायाम्, आकारलोपे वर्णसंयोगे विश्वपा इति रूपं भवति। **भ्यामादौ विश्वपाभ्यामित्यादिरूपाणि भवन्ति। एवं शङ्ख्ध्या इत्यादीनामपि रूपाणि बोध्यानि।**

**हाहाशब्दः** गन्धर्ववाचकः तस्य प्रथमाविभक्तावेकवचने सुप्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे हाहाः, औ विभक्तौ वृद्धौ **हाहौ,** बहुवचने सवर्णदीर्घे **हाहाः** इत्यादयः।

**हाहा** – हाहाशब्दात् तृतीयैकवचने टा विभक्तौ, '**अकः सवर्णे दीर्घः**' इति सूत्रेण सवर्णदीर्घे हाहा इति।

**हाहै** – हाहाशब्दात् चतुर्थ्येकवचने ङेविभक्तावनुबन्धलोपे हाहा ए इत्यवस्थायाम् **वृद्धिरेचि** इति सूत्रेण वृद्धौ हाहै इति।

**हाहाः** – हाहाशब्दात् पञ्चमीषष्ठ्येकवचने यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे हाहाः इति।

**हाहौः** – हाहाशब्दात् षष्ठीसप्तमीद्विवचने ओस्विभक्तौ हाहा ओस् इत्यवस्थायाम्, '**ओसि च**' इति सूत्रेण वृद्धौ हाहौस् इति जाते सस्य रुत्वे विसर्गे हाहौः इति रूपं भवति।

**हाहे** = हाहाशब्दात् सप्तम्येकवचने ङिविभक्तावनुबन्धलोपे हाहा इ इति जाते **आद्गुणः** इति सूत्रेण गुणे हाहे इति रूपं भवति।

शेषं विश्वपावत् रूपाणि बोध्यानि।

**इत्यादन्ताः**

**हरिः। प्रथमयोः पूर्वसवर्णः ( सू. १६४ ) हरी।**

**हरिः** = हरिशब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने स्वौजस्मौट् इत्यादिना सुप्रत्ययेऽनुबन्धलोपे हरि स् इति जाते सस्य रुत्वे विसर्गे हरिः इति।

**हरी** = हरिशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ हरि औ इति जाते **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण पूर्वसवर्णदीर्घे हरी इति रूपं भवति।

**जसि च ७.३.१०९ ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे। हरयः।**

**संस्कृत व्याख्या** – सूत्रेऽस्मिन् पदद्वयं वर्तते, जसि इति सप्तम्यन्तं प्रथमं पदं चेत्यव्ययं द्वितीयं पदम्। '**ह्रस्वस्य गुण**' इति सूत्रमनुवर्तते। अनुवृत्तञ्च ह्रस्वस्येति पदम् अङ्गस्य विशेषणं तेन तदन्तविधिः। **अलोऽन्त्यस्य** इति परिभाषया अन्त्य अल् इत्युपस्थितो भवति। एतेन जस् विभक्तौ ह्रस्वान्तस्य अङ्गस्य अन्त्यवर्णस्य गुणः स्यादिति सूत्रार्थो भवति। तेन हरि शब्दाज्जसि इकारस्य गुणे अयादेशे हरयस् इति सस्य रुत्वे हरयः इति।

**हरयः** = हरिशब्दात् प्रातिपदिकसंज्ञायां जस् विभक्तौ अनुबन्धलोपे हरि अस् इति जाते '**जसि च**' इति सूत्रेण हरिशब्दस्य इकारस्य गुणे एकारादेशे हरे अस् इति जाते '**एचोऽयवायावः**' इति सूत्रेण अयादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे हरय इति रूपं सिद्ध्यति।

**ह्रस्वस्य गुणः ७.३.१०८ ह्रस्वस्य गुणः स्यात्सम्बुद्धौ।**

**एङ् ह्रस्वात् ( सू. 193 ) इति सम्बुद्धिलोपः। हे हरे। हरिम्। हरी। हरीन्।**

**संस्कृतव्याख्या** – अस्मिन् सूत्रे द्वे पदे वर्तेते। ह्रस्वस्य इति षष्ठ्यन्तं, गुण इति प्रथमान्तं पदम्। सम्बुद्धौ च इति सूत्रात् सम्बुद्धौ इत्यस्यानुवृत्तिर्भवति। अङ्गस्याधिकारः, ह्रस्वस्य इति पदम् अङ्गस्य विशेषणम्। एतेन तदन्तविधिः, **अलोऽन्त्यस्य** इति परिभाषासूत्रेण अन्त्यपदमुपतिष्ठते। इत्थम् ह्रस्वान्ताङ्गस्य अलोऽन्ताङ्गस्य गुणो भवति सम्बुद्धौ इति सूत्रस्य तात्पर्यम्। तद्यथा – सम्बोधने एकवचने सुविभक्तौ हे हरि सु इति जाते सम्बुद्धिसंज्ञायाम् इकारस्य गुणे हे हरे इति रूपं भवति।

**हे हरे** = हरिशब्दस्य सम्बोधने एकवचने सुविभक्तौ अनुबन्धलोपे हरि स् इति जाते **एकवचनं सम्बुद्धिः** इत्यनेन सम्बुद्धिसंज्ञायां **ह्रस्वस्य गुणः** इति सूत्रेण हरिशब्दस्य इकारस्य गुणे एकारादेशे हे हरे स् इति जाते '**एङ् ह्रस्वात् सम्बुद्धेः**' इति सूत्रेण सलो पे हे हरे इति रूपं **सिद्ध्यति। हरिम्। हरी। हरीन्।**

**शेषो घ्यसखि १.४.७**

अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्। शेषः किम्– मत्यै। एकसंज्ञाधिकारे शेषग्रहणं स्पष्टार्थम्। ह्रस्वौ किम्– वातप्रम्ये। यू किम्? मात्रे।

**संस्कृत व्याख्या** – संज्ञासूत्रमिदम्। त्रिपदात्मकमेतत्। शेषः घि असखि इति सूत्रस्य पदविभागः। न सखि इत्यसखि। उक्तादन्यः शेषः। अत्र '**ङिति ह्रस्वश्च**' इति सूत्रात् ह्रस्वपदमनुवर्तते तस्य च वचनविपरिणामेन द्विवचनान्ततया 'ह्रस्वौ' इति गृह्यते। '**यू स्त्र्याख्यौ नदी**' इत्यस्मात् 'यू' इति पदमनुवर्तते। ह्रस्वौ इत्यस्य यू इत्यनेन गृहीतेन इकारेण उकारेण सह प्रत्येकमन्वयो भवति, यू इति विशेषणं तस्मात् तदन्तविधिः। इत्थम् सखिशब्दं परित्यज्य ह्रस्वेकारान्तस्य उकारान्तस्य च शब्दस्य घिसंज्ञा भवति इति सूत्रार्थो भवति।

अत्र सूत्रे – शेष इति कथनेन नदीसंज्ञकभिन्नस्यैव घिसंज्ञा भवति अन्यथा शेषग्रहणाभावे ह्रस्वेकारान्तस्य उकारान्तस्य च घिसंज्ञायां नदीसंज्ञकस्य मतिशब्दादेरपि घिसंज्ञा स्यात् तद्वारणाय **शेषग्रहणम्**। शेषपदग्रहणात् मतिशब्दस्य '**ङिति ह्रस्वश्च**' इति सूत्रेण नदीसंज्ञासत्वात् घिसंज्ञाया अभावे चतुर्थ्येकवचने ङे विभक्तौ मति ए इत्यवस्थायां गुणो न भवति, वृद्धौ कृतायां मत्यै इत्येव रूपं भवति इति।

यद्यपि **आ कडारादेकासंज्ञा** इति एकसंज्ञाधिकारे नदीसंज्ञया घिसंज्ञायाः स्वतो बाधात् शेषग्रहणमनावश्यकं तस्मिन् पक्षे स्पष्टार्थमेव शेषग्रहणं बोध्यम्।

सूत्रेऽस्मिन् '**ह्रस्वौ**' इति कथनेन **वातप्रमी** इत्यादि दीर्घेकारान्तशब्दादेः घिसंज्ञा न भवति, तदभावे दीर्घेकारादीनामपि घिसंज्ञा, तन्माभूत् तदर्थं ह्रस्वौ इति पदं बोध्यम्।

एवमेव 'यू' इति कथनेन इकारान्तोकारान्तस्यैव ग्रहणम्। अन्यथा तद्भिन्नानामपि घिसंज्ञायां सत्यां ऋकारान्तमातृशब्दादेरपि घिसंज्ञाप्रसङ्गः तेन च मात्रे इत्यादिरूपस्य असिद्धिः, अतः इकारान्तोकारान्तभिन्नस्य घिसंज्ञावारणार्थं यूग्रहणमावश्यकमिति बोध्यम्।

**आङो नाऽस्त्रियाम् 7.3.120 घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा प्राचाम्। हरिणा। 'अस्त्रियाम्' किम्? मत्या।**

**संस्कृतव्याख्या** – 'आङो न अस्त्रियाम्' इति सूत्रस्य पदच्छेदः। न स्त्री–अस्त्री, तस्याम्–अस्त्रियाम् इति। सूत्रे आङः इति षष्ठ्यन्तं, ना इति लुप्तप्रथमाकम्, अस्त्रियाम्, इति सप्तम्यन्तं पदम्। **अच्च घेः** इत्यस्मात् 'घेः' इत्स्यानुवृत्तिर्भवति। एतेन घिसंज्ञकात् परस्य आङः स्थाने ना इत्यादेशो भवति स्त्रीत्वभिन्ने सतीति सूत्रार्थः। अस्मिन् सूत्रे आङ्पदेन तृतीयैकवचनस्य 'टा' इत्यस्य ग्रहणं प्राचीनैराचार्यैः टा इत्यस्य आङ्संज्ञा विधानात्।

**हरिणा** – हरिशब्दात् तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे हरि आ इति जाते '**शेषो घ्यसखि**' इति सूत्रेण घिसंज्ञज्ञयाम् '**आङो नाऽस्त्रियाम्**' इति सूत्रेण आकारस्य स्थाने ना इत्यादेशे हरिना इति जाते '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' इति सूत्रेण नस्य णत्वे हरिणा इति रूपं सिद्ध्यति।

तृतीया द्विवचने बहुवचने च यथाक्रमं **हरिभ्याम्, हरिभिः** इति रूपं भवति।

**घेर्ङिति 7.3.111 घिसञ्ज्ञकस्य ङिति सुपि गुणः स्यात्।**

**हरये। घेः किम्? सख्ये। ङिति किम्? हरिभ्याम्। सुपि किम् – पट्वी। 'घेर्ङितिः' गुणे कृते –**

**संस्कृतव्याख्या** – घेः ङिति इति सूत्रस्य पदविभागः। घेरिति षष्ठ्यन्तं ङिति इति सप्तम्यन्तं पदम्। घेः इत्यस्य षष्ठ्यन्तत्वात् '**अलोऽन्त्यस्य**' इति परिभाषासूत्रेण 'अन्त्यस्य' उपस्थितिर्भवति। स्थानान्तर्यात् यथाक्रमं इकारस्य स्थाने एकारादेशः उकारस्य च स्थाने ओकारादेशः गुणः प्रवर्तते। एतत्सर्वमाकल्य घिसंज्ञकस्य शब्दस्य अन्त्यस्य इकारस्य, उकारस्य च स्थाने गुणादेशो भवति ङित्सुप्प्रत्यये परे इति सूत्रार्थः सम्पद्यते।

सूत्र 'घेः' इति कथनेन सखिशब्दस्य इकारान्तत्वेऽपि न गुणो, घिसंज्ञाभावात्। अतः सखि ए इत्यवस्थायां यणि सख्ये इति रूपं भवति। अतः सखिशब्दस्य घिसंज्ञावारणार्थं सूत्रे 'घेः' इति पदम्।

एवमेव सूत्रे 'ङिति' ग्रहणाभावे केवलं घिसंज्ञकस्यैव गुणे प्राप्ते ङित्भिन्नेऽपि प्रत्यये हरिभ्याम् इत्यादावपि गुणप्राप्तिः तन्माभूत् तदर्थं ङितिग्रहणम्।

सुपि इति पदोपादानेन पटुशब्दात् स्त्रीत्वविवक्षायां ङीष्प्रत्यये पटु ई इत्यवस्थायां सुपिभिन्ने ङीष्प्रत्यये सति न पटुशब्दस्य उकारस्य गुणः। सुप्ग्रहणाभावे पट्वी इत्यादावपि गुणप्रसङ्ग तन्माभूत् तदर्थं सुप् ग्रहणमिति। **घेर्ङिति सूत्रेण गुणे कृते** – **हरये** = हरिशब्दात् प्रातिपदिकात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे हरि ए इत्यवस्थायां '**शेषो घ्यसखि**' इति सूत्रेण हरिशब्दस्य घिसंज्ञायाम् '**घेर्ङितिः**' इति सूत्रेण इकारस्य गुणे एकारादेशे हरे ए इति जाते '**एचोऽयवायावः**' इति सूत्रेण एकारस्य स्थाने अयादेशे वर्णसंयोगे हरये इति रूपं सिद्ध्यति। **हरिभ्याम्, हरिभ्यः।**

**ङसिङसोश्च। 6.1.110 एङो ङसिङसोरिति परे पूर्वरूपमेकादेशः स्यात्। हरेः। हर्योः। हरीणाम्।**

**संस्कृतव्याख्या** – ङसिङसोः च इति सूत्रस्य पदविभागः। ङसि च ङस् च तयोरित्यर्थे **ङसिङसोः** इति षष्ठीद्विवचनान्तं पदम्, च इत्यव्ययम्। **एङः पदान्तादति** इति सूत्रात् एङः अति इत्यनयोरनुवृत्तिर्भवति। **एकः पूर्वपरयोः** इत्यस्याधिकारः। एवं सर्वसंगृह्य सूत्रस्यार्थो भवति यत् – एङात् परस्य ङसि ङस् सम्बन्धिनोऽकारस्य पूर्वपरयोस्स्थाने पूर्वरूप इत्येकादेशः स्यादिति। तद्यथा–

**हरेः** = हरिशब्दस्य पञ्चमीषष्ठ्येकवचने यथाक्रमं ङसिङस्प्रत्ययेऽनुबन्धलोपे हरि अस् इति जाते '**शेषो घ्यसखि**' इति सूत्रेण घिसंज्ञायां '**घेर्ङिति**' इति सूत्रेण इकारस्य स्थाने गुणे एकारादेशे हरे अस् इति जाते '**ङसिङसोश्च**' इति सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपमेकादेशे एकारे कृते हरेस् इति जाते सस्य रुत्वे विसर्गे हरेः इति रूपं सिद्ध्यति।

**हर्योः** = हरिशब्दात् षष्ठीसप्तमी द्विवचने ओस् विभक्तौ अनुबन्धलोपे हरि ओस् इति जाते **इको यणचि** इति सूत्रेण यणि वर्णसंयोगे सस्य रुत्वे विसर्गे हर्योः इति रूपं सिद्ध्यति।

**हरीणाम्** = हरिशब्दात् षष्ठीबहुवचने आम् हरि आम् इत्यवस्थायाम्, **ह्रस्वद्यापो नुट्** इति सूत्रेण नुटि, अनुबन्धलोपे '**नामि**' इति सूत्रेण दीर्घे नस्य णत्वे हरीणाम् इति रूपं भवति।

**अच्च घेः 7.3.119 इदुद्भ्यामुत्तरस्य ङेरौत् स्याद् घेरन्तादेशश्चाकारः। वृद्धिः। हरौ। हर्योः। हरिषु। एव श्रीपत्यग्निरविकव्यादयः।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदत्रयम्। अत् इति प्रथमान्तं, च इत्यवस्थायाम्, घे इति षष्ठ्यन्तं पदम्। अस्मिन् सूत्रे इदुदभ्याम् इत्यस्य **ङेराम्नाद्याम्नीभ्यः** इत्यस्मात् ङे इत्यस्य, औत् इत्यतः औत् इत्यस्य च अनुवृत्तिर्भवति। **इदुद्भ्याम्** इत्यस्य पञ्चम्यन्तत्वात् '**तस्मादित्युत्तरस्य**' इति परिभाषासूत्रेण अव्यवहितपरस्य इत्यर्थो लभ्यते, 'ङेः' इत्यस्य षष्ठ्यन्तत्वात् स्थाने इति पदमुपतिष्ठते। इत्थम् – ह्रस्वेकारात् उकारात् परस्य ङि इत्यस्य स्थाने औत् (औकार) इत्यादेशो भवति घिसंज्ञकस्य च इकारस्य उकारस्य च स्थाने अत् (ह्रस्व अकारः) इत्यादेशश्च भवतीति।

**हरौ** = हरिशब्दात् सप्तम्येकवचने ङिविभक्तौ हरि ङि इति जाते, **शेषो घ्यसखि** इति सूत्रेण हरिशब्दस्य घिसंज्ञायाम्, '**अच्च घेः**' इत्यनेन सूत्रेण 'ङि' इत्यस्य स्थाने औकारादेशे हरिशब्दस्य इकारस्य च स्थाने अकारादेशे हर औ इति जाते '**वृद्धिरेचि**' इतिसूत्रेण वृद्धौ हरौ इति रूपं भवति।

**हरिषु** – हरिशब्दात् सप्तमीबहुवचने सुप् विभक्तावनुबन्धलोपे हरि सु इति जाते '**आदेशप्रत्यययोः**' इतिसूत्रेण सस्य षत्वे वर्णसंयोगे हरिषु इति रूपं भवति। हरिशब्दवत् एव श्रीपति अग्नि रवि, कवि इत्यादीनां शब्दानां रूपाणि भवन्तीति बोध्यम्।

सखि शब्दो निरूप्यते – समानं ख्यायते जनैरिति **सखा**।

**अनङ् सौ। 7.1.93 सख्युरङ्गस्यानङादेशः स्यादसम्बुद्धौ सौ परे।**

**ङिच्च ( सू. 43 ) इत्यन्तादेशः**

**संस्कृतव्याख्या** – अत्र सूत्रे पदद्वयं विद्यते। अनङ् इति प्रथमान्तम् आदेशवाचकं, सौ इति सप्तम्यन्तं निमित्तवाचकम्। सख्युरसम्बुद्धौ इति सम्पूर्णं सूत्रमावर्तते। अङ्गस्य अधिकारः। अनङ् इत्यस्य ङित्वात् ङिच्च इति सूत्रेण अयमन्तादेशो भवति। एतेन सम्बुद्धिभिन्ने सुप्रत्यये परे अङ्गसञ्ज्ञकस्य सखिशब्दस्य स्थाने अनङ् इत्यादेशः स्यादिति सूत्रार्थो भवति। सखि स् इत्यवस्थायाम् इकारस्य स्थाने अनङादेशेऽनुबन्धलोपे सखन् स् इति जाते –

**अलोऽन्त्यात्पूर्व उपधा 1.1.65 अन्त्यादलः पूर्वो वर्ण उपधासञ्ज्ञः स्यात्।**

**संस्कृतव्याख्या** – संज्ञासूत्रमिदम्। सूत्रे चत्वारि पदानि सन्ति अलः इति पञ्चम्यन्तम्, अन्त्यात् इति पञ्चम्यन्तं, पूर्वः उपधा इति पदद्वयं प्रथमान्तम्। अल् इति वर्णपर्यायः। इत्थम् – स्वापेक्षितस्य वर्णसमुदायस्य अन्त्यात् पूर्वो वर्ण उपधासञ्ज्ञो भवतीति सूत्रार्थः। तद्यथा सखन् स इत्यत्र अपेक्षितो वर्णसमुदायः सखन् इति समुदायः तस्यान्तिमो वर्णः नकारः तस्मात् पूर्व अकारः, तस्य उपधा संज्ञा भवति। या या संज्ञा सा सा फलवती तस्मात् उपधासंज्ञाया अत्र प्रयोजनं कथयति अग्रिमेण सूत्रेण –

**सर्वनामस्थाने चासम्बुद्धौ 6.4.8 नान्तस्योपाधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।**

**संस्कृतव्याख्या** – सर्वनामस्थाने च असम्बुद्धौ इति सूत्रस्य पदविभागः। सूत्रेऽस्मिन् पदत्रयम्। सर्वनामस्थाने इति सप्तम्यन्तम्, च इत्यव्ययम्, असम्बुद्धौ इति सप्तम्यन्तं पदम्। असम्बुद्धौ = न सम्बुद्धिः असम्बुद्धिः, तस्याम् – असम्बुद्धौ। अत्र नोपधाया इत्यस्मात् न उपाधाया इत्येतस्य पदद्वयस्य, **ढ्लोपे पूर्वस्य दीर्घोऽणः** इत्यतः दीर्घपदस्य चानुवृत्तिर्भवति। एतत्सर्वम् आदाय सूत्रस्यार्थो भवति सर्वनामस्थानसंज्ञके भिन्ने प्रत्यये परे नकारान्तस्य उपधासंज्ञकस्य वर्णस्य दीर्घो भवतीति। सखन् स इत्यवस्थायाम् उपधा सञ्ज्ञकस्य अकारस्य दीर्घे सखान् स् इति स्थितिर्भवति।

**अपृक्त एकाल्प्रत्ययः 1.2.41 एकाल् प्रत्ययो यः सोऽपृक्तसञ्ज्ञः स्यात्।**

**संस्कृतव्याख्या** – संज्ञासूत्रमिदम्। त्रिपदमिदं सूत्रम्। अपृक्तः एकाल् प्रत्यय इति पदत्रयमपि प्रथमान्तम्।

एकश्चासौ अल् इति एकाल् अर्थात् एकाल्रूपो यः प्रत्ययः तस्य अपृक्तसंज्ञा भवति। तद्यथा सखान् स् इत्यत्र स इति सुप्रत्ययः तस्येत्संज्ञया स् इत्येकाल्रूपः प्रत्यय तस्य अपृक्तसंज्ञा इति।

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् 6.1.68 हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते हल्ङ्याब्भ्यः किम्? ग्रामणीः। दीर्घात् किम्? निष्कौशाम्बिः। अतिखट्वः। सु तिसि इति किम्? अभैत्सीत्। तिपा सहचरितस्य सिपो ग्रहणात् सिचो ग्रहणं नास्ति। अपृक्तम् इति किम्? बिभर्ति। हल् किम्? बिभेद। प्रथमहल् किम्? राजा। नलोपादिर्न स्यात्, संयोगान्तस्य असिद्धत्वात्। सखा। हे सखे।**

**संस्कृतव्याख्या** – हल्ङ्याब्भ्यः दीर्घात् सुतिस्यपृक्तं हल् इति सूत्रस्य पदविभागः। पदचतुष्टयात्मकं सूत्रमिदम्। हल् च ङीप् च आप् च तेषामितरेतरद्वन्द्वसमासः हलङ्याबः, तेभ्यः हल्ङ्याब्भ्य इति पञ्चम्यन्तं पदम्। सुश्च तिश्च सिश्च इति समाहारद्वन्द्वेन सुतिसि इति तस्मात् सुतिसिनोऽपृक्तम्। अत्र **लोपो व्योर्वलि** इत्यस्मात् लोप इत्यनुवर्तते। एतेन हलन्तात् अङ्गात् परौ दीर्घौ यौ ङीप् आप् प्रत्ययान्तौ, ताभ्यां ङ्याबन्ताभ्याम् अङ्गाभ्यां परस्य सु ति सि इत्येतस्य अपृक्तस्य हलो लोपो भवतीति सूत्रार्थः सङ्गच्छते। यथा सखान् स् इत्यवस्थायां सकारस्य अपृक्तस्य लोपे सखान् इति जाते नकारस्य लोपे सखा इति।

अस्मिन् सूत्रे पठितस्य प्रत्येकं पदस्य प्रयोजनं निर्दिशति मूले भट्टोजीदीक्षितः। तथाहि –

सूत्रे **हल्ङ्याब्ग्रहणं** किमर्थम् – अर्थात् हलन्तात् दीर्घौ यौ ङ्यापौ ताभ्यां परस्य इति विधानस्य किं प्रयोजनम् केवलं दीर्घात् सुतिस्यपृक्तं हल् लुप्यत इत्येव वक्तव्यं हल्ङ्याप्ग्रहणेन किम् इति जिज्ञासायां कथयति – **ग्रामणीः** इत्यादौ दीर्घात् परस्य सु इत्यस्य लोपो मा भूत्।

अर्थात् सूत्रे ङ्याब्ग्रहणाभावे दीर्घात् परस्य अपृक्तस्य सुति सि इत्यस्य हल लोपः इत्यर्थे **ग्रामं नयति** इति विग्रहे ग्राम् उपपदात् नी धातोः क्विप् प्रत्यये उपपदसमासे नस्य णत्वे ग्रामणी इति जाते प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे ग्रामणी स् इत्यवस्थायां दीर्घात् परस्य स् इत्यस्य लोपः स्यात् तन्माभूत् तदर्थं ङ्याब्ग्रहणम्, तद्ग्रहणे तु ङीपः आपश्च यो दीर्घीभूतः ई आ इत्युभाभ्यां परस्यैव लोपे ग्रामणी इत्यादौ सुलोपो न भवति तस्य रुत्वे विसर्गे ग्रामणीः इति रूपं भवति। एवमेव सूत्रे दीर्घग्रहणाभावे निष्कौशाम्बिः इत्यादौ यत्र ङीपः इकारस्य ह्रस्वो भवति तस्मात् ह्रस्व-इकारात्परस्यापि सुलोपः स्यात् **एकदेशविकृतमनन्यवत्** परिभाषाबलात् 'तन्माभूत् तदर्थं दीर्घग्रहणम्' आवश्यकम्।

एवमेव अतिखट्वः इत्यत्रापि टापः आकारस्य ह्रस्वे अतिखट्व स् इत्यवस्थायां सुलोपापत्तिः स्यात्।

सूत्रे सु तिसि इत्येतेषां ग्रहणेन **अभैत्सीत्** इत्यादौ सिच् प्रत्ययस्य सकारस्य अपृक्तत्वेऽपि तस्य लोपो न भवति अपृक्तत्वेऽपि सु ति सि इत्येभ्यो भिन्नत्वात्। अन्यथा सिचः सकारस्यापि लोपप्रसङ्गः आपतति।

**अपृक्तं ग्रहणं किमर्थमिति** चेत् कथयति – अपृक्तग्रहणाभावे अपृक्तभिन्नस्यापि स त् इत्यनयोर्लोपे बि भर् ति इत्यादौ रेफात् हलः परत्वेऽपि तकारस्य लोपो न भवति अन्यथा तस्यापि लोपे बिभर्ति इति रूपं न स्यात्। अतोऽपृक्तग्रहणमपि कर्त्तव्यमेवेति।

प्रकृतसूत्रस्य हल्ग्रहणेन बिभेद इत्यादौ अचो अकार 'णलोऽनुबन्धभूतः अपृक्तोऽपि' ति सम्बन्धितोऽपि वर्तते तस्य लोपः स्यात् तद्वारणाय हल्ग्रहणं कृतम्।

सूत्रे प्रथमहल्ग्रहणस्य प्रयोजनं कथयति– **राजा** इति। अस्यायं भावो राजा इत्यत्र राजन्स् इत्यवस्थायां **संयोगान्तस्य लोपः** इति सूत्रेण सकारस्य लोपे संभवे प्रथम हल्ग्रहणस्य नास्ति प्रयोजनमिति तत्र समाधानमुखेन कथयति मूले– न लोपे कार्ये कर्त्तव्ये संयोगान्तलोपस्य असिद्धत्वात् नकारलोपः न स्यात् तस्मात् अनेन सूत्रेण सलोपाय प्रथम हल्ग्रहणं कर्त्तव्यमेवेति।

**सखा** – सखिशब्दात् प्रातिपदिकसंज्ञायां प्रथमाविभक्तावेकवचने **स्वौजसस्मौट्** इत्यादिना सूत्रेण सुप्रत्ययेऽनुबन्धलोपे सखि स् इत्यवस्थायां '**अनङ् सौ**' इति सूत्रेण सखिशब्दस्य इकारस्य स्थाने अनङादेशेऽनुबन्धलोपे सखन् स् इति जाते, '**अलोऽन्त्यात् पूर्व उपधा**' इति सूत्रेण अकारस्य उपधासंज्ञायां, सु इत्यस्य च '**सुडनपुंसकस्य**' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् '**सर्वनामस्थाने चाऽसम्बुद्धौ**' इति सूत्रेण उपधा दीर्घे सखान् स् इति जाते '**हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्**' इतिसूत्रेण सलोपे, **नलोपः प्रातिपदिकान्तस्य** इति सूत्रेण नलोपे सखा इति रूपं सिद्ध्यति।

**हे सखे!** =सखिशब्दात् सम्बोधनविवक्षायां सम्बोधनैकवचने सुविभक्तौ अनुबन्धलोपे सखि सु स् इति जाते '**एकवचनं सम्बुद्धिः**' इति सूत्रेण सम्बुद्धिसंज्ञायां, '**ह्रस्वस्य गुणः**' इति सूत्रेण इकारस्य गुणे एकारादेशे हे सखे स् इति जाते '**एङ्ह्रस्वात्सम्बुद्धेः**' इति सूत्रेण सलोपे हे सखे! इति रूपं सिद्ध्यति।

**सख्युरसम्बुद्धौ 7.1.92 सख्युरङ्गात् परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् स्यात्।**

**संस्कृतव्याख्या** – सख्युः असम्बुद्धौ इति सूत्रस्य पदविभागः। अत्र पदद्वयम्। सख्युः इति पञ्चम्यन्तं पदम्, असम्बुद्धौ इति न सम्बुद्धि, असम्बुद्धि, तस्याम् इत्यर्थे सप्तम्येकवचनम्। अत्र '**इतोऽत् सर्वनामस्थाने**' इत्यस्मात् सर्वनामस्थाने इत्यस्य '**गोतो णित्**' इत्यस्मात् णित् इत्यस्य चानुवृत्तिर्भवति। अङ्गस्य च अधिकारः। इत्थम् – अङ्गसंज्ञकात् सखिशब्दात् परस्य सम्बुद्धिभिन्नस्य सर्वनामस्थानस्य णिद्वद्भावो भवति। णिद्वद्भावे तन्निमित्तकं वृद्ध्यादिकार्यं विधीयते। तद्यथा –

**अचो ञ्णिति 7.2.115 ञिति णिति च परेऽजन्ताङ्गस्य वृद्धिः स्यात्। सखायौ। सखायः। सखायम्। सखायौ। घिसंज्ञाभावान्न तत्कार्यम्, सख्या। सख्ये।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयम्। अचः इति षष्ठ्यन्तम्, ञ च ण च इति ञणौ, ञ्णौ इत् यस्य तत् ञ्णित् तस्मिन् 'ञ्णिति' इति सप्तम्यन्तं पदम्। अत्र **मृजेर्वृद्धिः** इत्यस्मात् सूत्रात् वृद्धिपदस्यानुवृत्तिर्भवति, अङ्गस्य च अधिकारः। अच इति अङ्गस्य विशेषणं तेन तदन्तविधिर्भवति। ञ्णिति इत्यस्य सप्तम्यन्तत्वात् **तस्मिन्निति‌र्दिष्टे** पूर्वस्य इति परिभाषासूत्रेण 'अव्यवहितपूर्वस्य' इत्यर्थो गृह्यते। एवं सर्वमादाय सूत्रस्यार्थो भवति यत् ञित्णित्प्रत्यये परे अजन्तस्य अङ्गस्य वृद्धिर्भवति इति। तद्याथा– सखि औ इत्यवस्थायाम्, इकारस्य वृद्धौ सखै औ, अयादेशे सखायौ इति।

**सखायौ** – सखिशब्दात् प्रथमाद्विवचने औ विभक्तौ सखि औ इत्यवस्थायां **सख्युरसम्बुद्धौ** इति सूत्रेण णिद्वद्भावे '**अचो ञ्णिति**' इतिसूत्रेण इकारस्य वृद्धौ ऐकारादेशे सखै औ इति जाते '**एचोऽयवायावः**' इतिसूत्रेण आय् इत्यादेशे वर्णसंयोगे सखायौ इति रूपं भवति। द्वितीया द्विवचनेऽपीदमेव रूपं भवति।

**सखायः** – सखिशब्दात् प्रथमाबहुवचने जस् विभक्तौ सखि जस् इति जातेऽनुबन्धलोपे सखि अस् इत्यवस्थायां **सख्युरसम्बुद्धौ** इति सूत्रेण णिद्वद्भावे, वृद्धौ आय् आदेशे सखाय् अस् इति जाते वर्णसंयोगे सस्य रुत्वे विसर्गे सखायः इति रूपं भवति।

**सखायम्** = सखिशब्दात् द्वितीयैकवचने अम् विभक्तौ सखि अम् इति जाते, णिद्वद्भावे वृद्धौ आयादेशे, वर्णसंयोगे सखायम् इति रूपं भवति।

**सखीन्** = सखिशब्दात् द्वितीयाबहुवचने शस् विभक्तौ अनुबन्धलोपे सखि अस् इति जाते '**प्रथमयोः पूर्वसवर्णः**' इतिसूत्रेण पूर्वसवर्णदीर्घे सखीस् इति जाते, '**तस्माच्छसो: नः पुंसि**' इति सूत्रेण सस्य नत्वे सखीन् इति।

**सख्या** = सखिशब्दस्य तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे घिसंज्ञाया अभावे सखि आ इति जाते '**आङो नास्त्रियाम्**' इति सूत्रेण आ इत्यस्य स्थाने ना आदेशे सखिना इति रूपं भवति।

**सखिभ्याम्** = सखिशब्दात् तृ च पञ्चमी द्विवचने भ्याम् विभक्तौ सखिभ्याम्।

**सखिभिः** = सखिशब्दात् तृतीयाबहुवचने भिस् विभक्तौ सखिभिस् इति जाते सस्य रुत्वे विसर्गे सखिभिः इति।

**सख्ये** = सखिशब्दात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे सखि ए इति जाते घिसंज्ञाया अभावे **'इको यणचि'** इति सूत्रेण यणि वर्णसंयोगे सख्ये इति रूपं भवति।

**ख्यत्यात्परस्य 6.1.112 खितिशब्दाभ्यां खितीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत् स्यात्। सख्युः।**

**संस्कृतव्याख्या** – ख्यत्यात् परस्य इति सूत्रस्य पदविभागः। ख्यश्च त्यश्च तयोः समाहारद्वन्द्वात् ख्यत्यम्, तस्मात् ख्यत्यात् इति पञ्चम्यन्तं रूपम्, ख्यत्य इत्यत्र कृतयण्सन्धिनिर्देशे खि, खी, ति ती इत्युभयोर्ग्रहणं भवति यणादेशस्य उभयत्र प्रवृत्तेः।

परस्य इति षष्ठ्यन्तं पदम्। अत्र **ङसिङसोश्च** इत्यस्मात् ङसिङसोः इत्यस्य **एङः पदान्तादति** इत्यस्य अति इत्यस्य विभक्तिं विपरिणम्य अत इत्यस्य, ऋत् उत् इत्यतः उत् इत्यस्य च अनुवृत्तिर्भवति। एतेन यणादेशः कृतो यस्य एवंभूतात् खिशब्दात् तिशब्दात् एवमेव खीशब्दात् ती शब्दात् परस्य ङसि ङस् इत्यनयोः अकारस्य स्थाने उकारादेशे (ह्रस्वो) भवतीति सूत्रार्थः सम्पद्यते। सख्युः इति।

**सख्युः** – सखिशब्दस्य पञ्चमीषष्ठ्योरेकवचने यथासंख्यं ङसि ङस्प्रत्ययेऽनुबन्धलोपे सखि अस् इति जाते **'इको यणचि'** इति सूत्रेण इकारस्य यणादेशे वर्णसंयोगे सख्यस् इति जाते **'ख्यत्यात्परस्य'** इति सूत्रेण अकारस्य स्थाने उकारादेशे सख्युस् इत्यवस्थायां सस्य रुत्वे विसर्गे सख्युः इति रूपं भवति।

**सख्योः** = सखिशब्दात् षष्ठीसप्तम्योः द्विवचने ओस् विभक्तौ सखि ओस् इत्यवस्थायायाम् **इको यणचि** इति सूत्रेण यणि वर्णसंयोगे, सस्य रुत्वे विसर्गे सख्योः इति।

**सखीनाम्** = सखिशब्दात् षष्ठीबहुवचने आम् विभक्तौ सखि आम् इति जाते नुटि, अनुबन्धलोपे, नामि इति सूत्रेण दीर्घे सखीनाम् इति रूपं सिद्धम्।

**औत् 7.3.118 इदुद्भ्यां परस्य ङेरौत्स्यात्।**

**उकारानुवृत्तिरुत्तरार्था। शेषं हरिवत्। शोभनः सखा सुसखा। सुसखायौ। सुसखायः। अनङ्णिद्वद्भावयोराङ्गत्वात्तदन्तेऽपि प्रवृत्तिः। समुदायस्य सखिरूपत्वाभावाद् असखि ( सू. 243 ) इति निषेधाप्रवृत्तेर्घिसञ्ज्ञा। सुसखिना। सुसखये।**

**ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यात् ( सू.255 ) इत्युत्वं न। सुसखे। सुसखावित्यादि। एवमतिशयितः सखा अतिसखा। परमसखा यस्य इति विग्रहे परमसखा परमसखायौ इत्यादि।**

**गौणत्वेऽप्यनङ्णित्वे प्रवर्तेते। सखीमतिक्रान्तोऽतिसखिः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न टच्। हरिवत्। इहानङ्णित्वे न भवतः। गोस्त्रियो ( सू. 656 ) इति ह्रस्वेन सखिशब्दस्य लाक्षणिकत्वात्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् ( प.114 )**

**संस्कृतव्याख्या** – एकपदात्मकम् इति सूत्रम्। औत् इति प्रथमान्तम्। अत्र **इदुद्भ्याम्** इति सूत्रस्य, **ङेराम्नद्याम्नीभ्यः** इत्यस्मात् **'ङे'** इत्यस्य चानुवृत्तिर्भवति इत्थम् ह्रस्वेकारात् उकारात् परस्य ङे इत्यस्य स्थाने औत् (औ) इत्यादेशो भवतीति सूत्रार्थः।

अत्र पूर्वसूत्रात् इदुद्भ्याम् इत्यस्यानुवृत्तिर्भवति परं सखिशब्दे इत् (इकारस्यैव) इत्यस्यैव सत्वात् उत् इत्यस्य च अभावात् केवलम् इत् इत्यस्यैवानुवृत्तिः कर्त्तव्या उत् इत्यस्यानुवृत्तिर्व्यथा इत्याशङ्कायां समाधानरूपेण मूले कथयति – **उकारानुवृत्तिरुत्तरार्था।** अर्थात् उत्तरार्थम् उकारानुवृत्तिः कृता अस्ति। '**अच्च घेः**' इत्यस्मिन् सूत्रे उकारानुवृत्तिरावश्यिकी तदर्थमत्राप्यनुवृत्तौ न काचित्क्षतिरिति। सख्यौ।

अत्र शोभनः सखा, सुखा इत्यादिसमासस्थले सुसखिशब्दे कथम् अनङादेशः णिद्वद्भावश्चेति शङ्कायां कथयति, अनङ् सौ सख्युरसम्बुद्धौ इत्यनयोरङ्गाधिकारे पाठात् एतदुभयमपि कार्यम् आङ्गकार्यं वर्तते। आङ्गकार्यस्य च '**पदाङ्गाधिकारे तस्य च तदन्तस्य च** इति परिभाषानियमात् सखिशब्दात् विधीयमानं कार्यं समासस्थले तदन्ते सुसखि इत्यादिस्थलेऽपि भवति। किञ्च सुसखि इत्यस्य **शेषो घ्यसखि** इति सूत्रेण घिसंज्ञा भवति परम् अस्य अङ्गाधिकाराभावे तदन्तस्य घिसंज्ञा न भवति। **सुसखिना**।

किञ्च ङसिङसोर्गुणे कृते कृतस्य यणादेशस्य अभावात् **ख्यत्यात्परस्य** इति सूत्रेण उत्वमपि न भवति। सुसखे इत्यादि। एवमेव अतिसखा इत्यादि रूपं भवतीति।

**सख्यौ** = सखिशब्दात् सप्तम्येकवचने ङिविभक्तौ, अनुबन्धलोपे सखि इ इति जाते, **औत्** इति सूत्रेण इकारस्य स्थाने औकारादेशे सखि औ इत्यवस्थायाम् '**इको यणचि**' इतिसूत्रेण यणि वर्णसंयोगे सख्यौ इति रूपं सिद्ध्यति।

**सखिषु** – सखिशब्दात् सप्तमीबहुवचने सुविभक्तावनुबन्धलोपे सखि सु इति जाते '**आदेशप्रत्यययोः**' इति सूत्रेण सकारस्य षत्वे सखिषु इति।

**सुसखा** – शोभनः सखा इत्यर्थे तत्पुरुषे समासे सुसखि शब्दात् प्रातिपदिकसंज्ञायां सुविभक्तौ अनुबन्धलोपे सुसखि स् इति जाते '**पदाङ्गाधिकारे तस्य च तदन्तस्य च**' इति परिभाषया तदन्तेऽपि आङ्गकार्यस्य सिद्धत्वात् अनङ् सौ इति सूत्रेण इकारस्य अनङादेशेऽनुबन्धलोपे सुसखन् स् इति जाते **संयोगान्तस्य लोपः** इति सूत्रेण सलोपे उपधादीर्घे नलापे च सुसखा इति रूपं भवति।

एवमेव **सखिशब्दवत् सुसखायौ, सुसखायः इत्यादयः।**

**सुसखिना** = सुसखिशब्दात् तृतीयैकवचने टा विभक्तौ, अनुबन्धलोपे '**शेषो घ्यसखि**' इति सूत्रेण घिसंज्ञायाम्, '**आङो नाऽस्त्रियाम्**' इति सूत्रेण आकारस्य स्थाने ना आदेशे वर्णसंयोगे सुसखिना इति।

**सुसखये** = सुसखिशब्दात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे सुसखि ए इत्यवस्थायां घिसंज्ञायां '**घेर्ङिति**' इति सूत्रेण इकारस्य गुणे सुसखे ए इति जाते अयादेशे वर्णसंयोगे सुसखये इति।

**सुसखेः** = सुसखिशब्दात् पञ्चमीषष्ठ्योरेकवचनं यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे, सुसखि अस् इत्यवस्थायां यणादेशं प्रबाध्य **घेर्ङिति** इति सूत्रेण इकारस्य गुणे सुसखे अस् इति जाते '**ङसिङसोश्च**' इतिसूत्रेण पूर्वरूपे सुसखेस् इति जाते सस्य रुत्वे विसर्गे सुसखेः इति। एवमेव अतिशयितः सखा, **अतिसखि** शब्दस्य, परमः सखा यस्य इति विग्रहे परमसखि शब्दस्य च रूपाणि भविष्यन्ति।

**पतिः समास एव 1.4.8 पातिशब्दः समास एव घिसंज्ञः स्यात्।**

**पत्या। पत्ये। पत्युः। पत्युः। पतीनाम्। पत्यौ। शेषं हरिवत्। समासे तु भूपतये। कतिशब्दो नित्यं बहुवचनान्तः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयं वर्तते। पतिः इति प्रथमान्तं, समासे इति सप्तम्यन्तम् एव इत्यव्ययपदं

प्रथमान्तम्। '**शेषो घ्यसखि**' इत्यस्मात् 'घि' इत्यनुवर्तते। एतेन समासे सत्येव पतिशब्दो घिसंज्ञको भवतीति सूत्रार्थः।

इदं सूत्रं नियमसूत्रं वर्तते। तथाहि – '**शेषो घ्यसखि**' इति सूत्रेण पतिशब्दस्य समासे असमासे इत्यभुयदशायां घिसंज्ञा सिद्धा तत्रानेन सूत्रेण एतन्निम्यते यत् पतिशब्दस्य घिसंज्ञा समास एव भविष्यति। तस्मात् समस्ते पदे एव घिसंज्ञानिमित्तं कार्यं भवति न तु केवलं पतिशब्दे, एतेन पतिशब्दस्य पत्या, पत्ये, पत्युः इत्यादीनि रूपाणि भवन्ति।

अत्र सूत्रे सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवतीत्यनया परिभाषया आरभ्यमानो विधिः 'पति समास एव' इति सूत्रं वर्तते। एतेन स्वतोऽस्य नियमार्थत्वं सङ्गच्छते पुनः सूत्रे एव शब्दस्य पाठः कथम् इति जिज्ञासायाम् कथयति– अनेन सूत्रेण द्विविधं नियमस्वरूपं सङ्गच्छते तथाहि – **प्रथमः** – समासे पतिशब्दः एव घिसंज्ञकः इति, द्वितीयश्च समासे एव पतिशब्द घिसंज्ञकः। तत्र समासे पतिशब्दस्यैव घिसंज्ञा स्वीकारे अन्यस्य इकारान्तशब्दस्य न घिसंज्ञा। अयं विपरीतनियमः। द्वितीयेन नियमेन पतिशब्दस्य यदि घिसंज्ञा तर्हि समास एव इति नियमः। सूत्रे 'एव' शब्दपाठात् विपरीतनियमस्य ग्रहणं न भवति। तस्मात् समासे तु भूपतिना इत्यादिरूपं भवति।

पतिशब्दस्य प्रथमाद्वितीयाविभक्तौ हरिशब्दवत् **पतिः, पती, पतयः, पतिम्, पती, पतीन्** इत्येवं रूपं भवति।

**पत्या** = पतिशब्दस्य तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे पति आ इत्यवस्थायां '**शेषो घ्यसखि**' इति सूत्रेण यणि वर्णसंयोगे **पत्या** इति रूपं सिद्ध्यति।

**पत्ये** =पतिशब्दस्य चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे पति एव इत्यवस्थायां घिसंज्ञाभावे '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे पत्ये इति रूपं सिद्धम्।

**पत्युः** = पतिशब्दस्य पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे पति अस् इत्यवस्थायाम् '**इको यणचि**' इति सूत्रेण यणि पत्यस् इति जाते '**ख्यत्यात्परस्य**' इति सूत्रेण अकारस्य उत्वे पत्युस् इति जाते, सस्य रुत्वे विसर्गे पत्युः इति रूपं सिद्ध्यति।

**पत्यौ** = पतिशब्दस्य सप्तम्येकवचने ङि विभक्तौ अनुबन्धलोपे पति इ इत्यवस्थायाम् '**औत्**' इति सूत्रेण इकारस्य स्थाने औकारादेशे '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे पत्यौ इति रूपं सिद्ध्यति।

घिसंज्ञाभावे '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे पत्ये इति रूपं सिद्धम्।

**शेषं हरिवत्।**

**कति शब्दो नित्यं बहुवचनान्तः**= कति शब्दो नित्यमेव बहुवचन एव प्रयुज्यते तस्मात् एकवचने द्विवचने चास्य रूपं न भवतीति तात्पर्यम्। कतिशब्दोऽयं डति प्रत्ययान्तः।

**बहुगणवतु डति संख्या 1.1.23। एते संख्यासंज्ञा स्युः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयं वर्तते। बहुश्च गणश्च वतुश्च डतिश्च तेषां समाहारद्वन्द्वसमासान्तं बहुगणवतुडति इति प्रथमान्तं पदम्, संख्या इति च प्रथमान्तं विधेयं पदम्। एतेन बहुगणशब्दः वतु प्रत्ययान्त डतिप्रत्ययान्तश्च शब्दः संख्यासंज्ञको भवतीति सूत्र तात्पर्यम्।

अत्र सूत्रे प्रत्ययग्रहणे तदन्तग्रहणम् इति परिभाषया तदन्तग्रहणेन वतुप्रत्ययान्त डतिप्रत्ययान्तश्चेत्यर्थः, संख्यायतेऽनया सा संख्या इत्यन्वर्थसंज्ञया बहुगणशब्दोऽपि त्रित्वसंख्याप्रभृति परार्धपर्यन्तं संख्यावाचको गृह्यते न तु वैपुल्यवाचको बहुशब्दः संघार्थवाचकश्च गणशब्दः। वतुप्रत्ययोऽप्यत्र **यत्तदेतेभ्यः परिमाणे वतुप्** इति सूत्रेण विहितस्य परिमाणार्थतद्धितप्रत्ययस्य ग्रहणं भवति, न तु '**तेन तुल्यं क्रिया चेद्वतिः**' इतिसूत्रेण विहितस्य वतिप्रत्ययस्य।

एवमेव तद्धितप्रत्ययान्त एव डतिप्रत्ययोऽपि न त्वुणादिसूत्रेण विहितस्य डतिप्रत्ययस्य **सहचरितासहचरितयोः सहचरितस्यैव ग्रहणात्।**

संख्यापदेन लोके एकः द्वौ बहवः इत्यादीनां संख्यावाचकानां ग्रहणं भवति, प्रकृतसूत्रेणापि संख्यासंज्ञा क्रियते। एतेन संख्यापदेन अकृत्रिमस्य एकत्वादेः कृत्रिमस्य बह्वादेश्च ग्रहणे '**कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः**' इति परिभाषया कृत्रिमस्यैव ग्रहणं सिद्धं तथापि '**संख्यायाः अतिशदन्तायाः कन्**' इति सूत्रे लोकप्रसिद्धसंख्यावाचकस्य विंशति त्रिंशत् इत्यादिशब्देभ्यः कन्प्रत्ययस्य निषेधेन ज्ञाप्यते यत् संख्याग्रहणे **उभयगतिरिह** भवति। अर्थात् कृत्रिमाकृत्रिमयोरुभयोर्ग्रहणं भवति।

बहुगणशब्दः यथा – **बहुकृत्वः**, संख्यायाः विधार्थे – **बहुधा**, कन् प्रत्ययान्तो यथा – **बहुकः**, शस् प्रत्ययान्तो यथा – **बहुशः**, डट्प्रत्ययान्तः **तिथुक्** आगमविशिष्टो यथा – **बहुतिथः** इत्यादिशब्दो गृह्यते।

वतुप्रत्ययान्तः शब्दो यथा – **तावत्कृत्वः, तावद्धा, तावत्कः, तावतिथः, यावतिथः, एतावत्कृत्वः** इत्यादयः।

डतिप्रत्ययान्तो यथा– कियत्कृत्वः, कतिधा, कतिशः, कतिथ इत्यादयः।

**डति च 1.1.25 डत्यन्ता संख्या षट्सञ्ज्ञा स्यात्।**

**संस्कृतव्याख्या** – संज्ञासूत्रमिदम्। अत्र पदद्वयम्। डति इति प्रथमान्तम्, च इत्यव्ययम्। अत्र **बहुगणवतुडतिसंख्या** इत्यस्मात् संख्यापदस्य **ष्णान्ता षट्** इत्यस्मात् षट् इति संज्ञावाचकस्य पदस्य अनुवृत्तिर्भवति। प्रत्ययग्रहणे तदन्तस्य ग्रहणम् इति परिभाषया तदन्तग्रहणेन डतिप्रत्ययान्तस्य ग्रहणम्। इत्थम् – डतिप्रत्ययान्तः संख्यासंज्ञकः षट्संज्ञको भवतीति सूत्रार्थः सम्पद्यते।

**प्रत्ययस्य लुक् श्लु लुपः 1.1.61 लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्सञ्ज्ञं स्यात्।**

**संस्कृतव्याख्या** – संज्ञासूत्रम् इदम् द्विपदात्मकम्। प्रत्ययस्य इति षष्ठ्यन्तं, लुक् च, श्लुश्च, लुप् च इत्येतेषां समाहारद्वन्द्वसमासान्तं लुक्श्लुलुपः इति प्रथमाबहुवचनान्तं पदम्। '**अदर्शनं लोपः**' इत्यस्मात् अदर्शनम् इत्यस्यानुवृत्तिर्भवति। अत्र सूत्रे लुक्श्लुलुपः इत्यस्यावृत्तिं कृत्वा विभक्तिविपरिणामेन तृतीयाबहुवचने लुक्श्लुलुप्शब्दैः इत्यस्य प्रत्ययस्य अदर्शनम् इत्यनेन सहान्वयो भवति यथासंख्यमन्वयेन च सूत्रस्यार्थो भवति यत् – लुक् श्लु लुप् शब्दैः कथितस्य प्रत्ययस्य अदर्शनस्य यथासंख्यं लुक् श्लु लुप् संज्ञा भवतीति।

अर्थात् लुकशब्देन प्रत्ययस्य अदर्शनस्य लुक् संज्ञा, श्लुशब्देन प्रत्ययस्य अदर्शनस्य श्लुसंज्ञा, लुप्शब्देन च प्रत्ययस्य अदर्शनस्य लुप्संज्ञा भवतीति।

**षड्भ्यो लुक् 7.1.22 षड्भ्यः परयोर्जश्शसोर्लुक् स्यात्।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। षड्भ्य इति पञ्चम्यन्तं, लुक् इति प्रथमान्तम् इत्येतत् पदद्वयमत्र विद्यते। '**जश्शसोः शिः**' इति सूत्रेण जश्शसोः इत्यस्यानुवृत्तिर्भवति। षट्पदेन षट्संज्ञकानां ग्रहणात् षड्भ्यः इति बहुवचने प्रयोगः। इत्थं षट्संज्ञकेभ्यः शब्देभ्यः परयोः जश्शसो लुक् भवतीति सूत्रार्थः सङ्गच्छते।

**प्रत्ययलोपे प्रत्ययलक्षणम् 1.1.62**

**प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात्। इति जसि च ( सू.241 ) इति गुणे प्राप्ते –**

**संस्कृतव्याख्या** – अतिदेशसूत्रमिदम्। सूत्रे पदद्वयम् – प्रत्ययस्य लोपः इति प्रत्ययलोपः तस्मिन् प्रत्ययलोपे इति सप्तम्येकवचनान्तं पदम्, प्रत्ययोः लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम्, इति बहुव्रीहिसमासान्तं प्रथमान्तं

पदम्। एतेन प्रत्यये लुप्ते, अर्थात् प्रत्ययस्य लोपे सत्यपि तन्निमित्तम् अर्थात् प्रत्ययसत्वे तदाश्रितं यत्कार्यं प्राप्तं भवति तत्कार्यं भवतीति सूत्रस्य अर्थः संघटते।

यथा कति जस् इत्यवस्थायां जस् प्रत्यये सत्वे '**जशि च**' इति सूत्रेण प्राप्तं गुणकार्यं जस् प्रत्यये लोपेऽपि प्राप्नोतीति।

**न लुमताङ्गस्य 1.1.63 लुक् श्लु लुप् एते लुमन्तः। लुमताशब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्। कति। कति। कतिभिः। कतिभ्यः। कतिभ्यः। कतीनाम्। अस्मद्युष्मद्षट्सञ्ज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रीभिः। त्रिभ्यः। त्रिभ्यः।**

**संस्कृतव्याख्या** – अपवादसूत्रमिदम्। अत्र पदत्रयम्। तथाहि – लुः (इत्येकदेशः)अस्य अस्ति इति लुमान् तेन लुमता इति तृतीयैकवचनान्तम्। न इत्यव्ययपदम्, अङ्गस्य इति षष्ठ्यन्तं पदम्। अत्र **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रमनुवर्तते। एतेन यत्र लुमान्, तस्य– अर्थात् लुशब्देन लुक्, श्लु लुप् इत्येतस्य प्रत्ययस्य अदर्शनं (लोपसंज्ञं) भवति तन्निमित्ताश्रितम् अङ्गकार्यं न भवतीति सूत्रस्यार्थो निष्पद्यते। तथाहि कति शब्दात् जस्प्रत्यये तस्य लोपे जसि चेति सूत्रेण प्राप्तो गुणादेशो न भवति।

**कति** = कतिशब्दात् प्रथमा द्वितीया बहुवचने यथाक्रमं जस् शस् प्रत्यये अनुबन्धलोपे कति अस् इति जाते '**बहुगणवतुडतिसंख्या**' इति सूत्रेण संख्यासंज्ञायां, '**डति च**' इति सूत्रेण षट्संज्ञायां '**षड्भ्यो लुक्**' इति सूत्रेण जस् शसोः लुकि कति इति जाते, '**प्रत्ययलोपे प्रत्ययलक्षणम्**' इति सूत्रेण प्रत्यये लुप्ते तन्निमित्तके '**जसि च**' इति इतिसूत्रेण गुणे प्राप्ते '**न लुमताङ्गस्य**' इति सूत्रेण निषेधे कति इति रूपं सिद्ध्यति।

**कतिभिः** = कतिशब्दात् तृतीयाबहुवचने भिस् प्रत्यये, संयोगे सस्य रुत्वे विसर्गे कतिभिः।

**कतिभ्यः** = कतिशब्दात् च पञ्चम्योरेकवचने भ्यस् प्रत्यये सस्य रुत्वे विसर्गे कतिभ्यः।

**कतीनाम्** = कतिशब्दात् षष्ठीबहुवचने आम् विभक्तौ कति, आम् इति जाते '**ह्रस्वनद्यापो नुट्**' इति सूत्रेण नुटि, अनुबन्धलोपे, '**नामि**' इति सूत्रेण दीर्घे कतीनाम् इति।

**कतिषु** = कतिशब्दात् सप्तमीबहुवचने सुप् प्रत्ययेऽनुबन्धलोपे, सस्य षत्वे कतिषु इति।

**युष्मदस्मत्.........** युष्मद् अस्मद् षट्संज्ञकस्य शब्दः त्रिषु लिङ्गेषु समानरूपको भवति। सरूपा=समानानि रूपाणि येषां ते समानरूपवन्तो भवन्ति यतोहि तत्र लिङ्गबोधकप्रत्यया (टाप् ङीबादयः प्रत्ययाः) न भवन्ति।

त्रिशब्दो नित्यं बहुवचने एव प्रयुज्यते = **त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रयाणाम्। त्रिषु** इति।

**त्रयः** = त्रिशब्दात् प्रथमाबहुवचने जस्प्रत्ययेऽनुबन्धलोपे त्रि अस् इति जाते '**जसि च**' इति सूत्रेण इकारस्य गुणे एकारादेशे त्रे अस् इति जाते '**एचोऽयवायावः**' इति सूत्रेण अयादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे त्रयः इति रूपं सिद्ध्यति।

**त्रीन्** = त्रिशब्दात् द्वितीयाबहुवचने शस् विभक्तौ, अनुबन्धलोपे त्रि अस् इति जाते, '**प्रथमयोः पूर्वसवर्णः**' इति सूत्रेण पूर्वसवर्णदीर्घे त्रीस् इति जाते, '**तस्माच्छसो नः पुंसि**' इति सूत्रेण तकारस्य नत्वे त्रीन् इति रूपं सिद्ध्यति।

**त्रिभिः** = त्रिशब्दात् तृतीयाबहुवचने भिस् प्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे त्रिभिः इति।

**त्रिभ्यः** = त्रिशब्दात् चतुर्थीपञ्चम्योरेकवचने भ्यस् प्रत्यये सस्य रुत्वे विसर्गे त्रिभ्य इति।

**त्रेस्त्रयः 7.2.53 त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणाम्। परमत्रयाणाम्। गौणत्वे तु नेति केचित्। प्रियत्रीणाम्। वस्तुतस्तु प्रियत्रयाणाम्। त्रिषु। द्विशब्दो नित्यं द्विवचनान्तः।**

**संस्कृतव्याख्या** – द्विपदात्मकं विधिसूत्रमिदम्। त्रेः इति षष्ठ्यन्तं, त्रय इति प्रथमान्तं पदम्। अत्र **आमि सर्वनाम्नः सुट्** सूत्रात् आमि इत्यनुवर्तते। एतेन आमि विभक्तौ परे त्रिशब्दस्य स्थाने त्रय आदेशो भवतीति सूत्रार्थः सम्पद्यते। अयं त्रयादेश अनेकाल्त्वात् सम्पूर्णस्य त्रि इत्यस्य स्थाने भवति।

**त्रयाणाम्** = त्रिशब्दात् षष्ठीबहुवचने आमि विभक्तौ त्रि आम् इत्यवस्थायां **'ह्रस्वनद्यापो नुट्'** इति सूत्रेण प्राप्तं नुटं प्रबाध्य **'त्रेस्त्रयः'** इति सूत्रेण पूर्वं त्रिस्थाने त्रयादेशे इति जाते त्रय आम् इत्यवस्थायां नुटि, अनुबन्धलोपे त्रय न् आम् इति जाते, **नामि** इति सूत्रेण दीर्घे, णत्वे च त्रयाणाम् इति।

**त्रिषु** = त्रिशब्दात् सप्तमीबहुवचने सुप् प्रत्ययेऽनुबन्धलोपे त्रि सु इति जाते **आदेशप्रत्यययोः** इति सूत्रेण सस्य षत्वे त्रिषु इति।

**परमत्रयाणाम्** = परमाश्च ते त्रयः इति विग्रहे कर्मधारयसमासे परमत्रिशब्दात् **पदाङ्गाधिकारे तस्य च तदन्तस्य चेति** नियमेन, **निर्दिश्यमानस्यादेशा** भवन्ति इति परिभाषया त्रिशब्दस्य स्थाने त्रयादेशे, **परमत्रयः, परमत्रीन्, परमत्रिभिः, परमत्रिभ्यः, परमत्रयाणाम्, परमत्रिषु** इति रूपं भवति।

प्रिया त्रयो यस्य इति विग्रहे बहुव्रीहि समासे प्रियत्रिशब्दात् अन्यपदार्थस्य प्राधान्यात् त्रिशब्दस्य च अप्राधान्यात् वचनेषु रूपं भवति। तत्र आमिविभक्तिं परित्यज्य सर्वत्र हरिशब्द इव, **प्रियत्रिः, प्रियत्री, प्रियत्रय** इत्यादीनि रूपाणि भवन्ति।

केचन् आचार्या गौणत्वे न त्रयादेश इति स्वीकृत्य त्रयादेशाभावे आमि **प्रियत्रीणाम्** इत्येव रूपं कथयन्ति।

वस्तुतस्तु प्रियत्रयाणाम् इत्येवोचितम्, **गौणमुख्यन्यायस्य** अत्र न प्रवृत्तिः तस्य तदाश्रिते कार्ये एव प्रवृत्तेः, नात्र पदाश्रितं कार्यमिति तात्पर्यम्।

**त्यदादीनामः 7.2.102 एषामकारोऽन्तादेशः स्याद्विभक्तौ।**

**द्विपर्यन्तानामेवेष्टिः ( वा. 4468 ) द्वौ। द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। द्विपर्यन्तानाम् इति किम्? भवान्। भवन्तौ। भवन्तः। संज्ञायामुपसर्जनत्वे च नात्वम्, सर्वाद्यन्तर्गणकार्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वी। द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्राधान्ये तु परमद्वावित्यादिः।**

**औडुलोमिः। औडुलोमी। बहुवचने तु उडुलोमाः। लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः ( वा. 256 ) बाह्वादीञोऽपवादः। औडुलोमिम्। औडुलोमी। उडुलोमान्।**

**इति इदन्ताः**

**संस्कृतव्याख्या – त्यदा......।** विधिसूत्रमिदम्। त्यदादीनाम् अः इति सूत्रस्य पदच्छेदः। त्यद् आदिर्येषां ते त्यदादयः, तेषामित्यर्थे बहुव्रीहिसमासघटितं षष्ठीबहुवचनान्तं 'त्यदादीनाम्' इति पदम्। अ इति प्रथमान्तम् **'अष्टन आ विभक्तौ'** इत्यस्मात् विभक्तौ इत्यस्यानुवृत्तिर्भवति। एतेन विभक्तौ परत्वे त्यदादीनां पठितानां शब्दानाम् अन्त्यस्य वर्णस्य स्थाने अकारादेशः स्यादिति सूत्रार्थः।

अनेन सूत्रेण विधीयमानोऽकारः द्विपर्यन्तमेव अर्थात् त्यद् तद् यद् एतद् इदम्, अदस् एकः, द्वि इत्येतत् पर्यन्तं भवति। तद्यथा – द्वि औ इत्यवस्थायां इकारस्य स्थाने अकारादेशे **वृद्धिरेचि** सूत्रेण वृद्धौ कृतायां द्वौ इति।

अनेन द्विपर्यन्तमेव अकारान्तादेशविधानेन त्यदादीगणपठितेऽपि भवत् शब्दस्य तकारस्य स्थाने अन्तादेशो न भवति। अतः भवत् शब्दस्य **भवान् भवन्तौ भवन्तः** इत्यादीनि रूपाणि भवन्ति।

त्यदादीनाम इत्यनेन सूत्रेण विधीयमानोऽकारः संज्ञायाम् उपसर्जने (अप्रधाने) न भवति त्यदादीगणस्य सर्वादिगणान्तर्गतकार्यत्वात्। अर्थात् सर्वादिगणे यत्कार्यं न भवति तत्कार्यं तदन्तर्गतगणेऽपि न भवतीति।

यथा **द्विः** इति कस्यचित् नाम यद्यस्ति तर्हि संज्ञात्वात् न तदन्तस्य अकारादेशः। तत्र तु द्विः, द्वी द्वयः इत्येवं रूपं भवति।

उपसर्जनत्वे यथा– द्वौ अतिक्रान्तो इत्यर्थे द्वितीयातत्पुरुषे अतिद्वि इत्यत्र '**एकविभक्तिचापूर्वनिपाते**' इति सूत्रेण द्विशब्दः उपसर्जनसंज्ञकः तस्मादत्रापि अकारान्तादेशो न भवति।

यत्र तु समासेऽपि द्विशब्दः प्रधानो भवति तत्र अकारान्तादेशः भवत्येव यथा – परमश्चासौ द्वौ च इत्यर्थे कर्मधारये 'परमद्वि' इत्यस्मात् द्विशब्दस्य अकारान्तादेशे परमद्वौ इति रूपं भवति।

**द्वौ** = द्विशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ द्वि औ इति जाते, **त्यदादीनामः** इति सूत्रेण द्विशब्दस्य इकारस्य स्थाने अकारादेशे द्व औ इत्यवस्थायां **वृद्धिरेचि** इतिसूत्रेण वृद्धौ द्वौ इति रूपं सिद्ध्यति।

**द्वाभ्याम्** = द्विशब्दात् तृतीयाचतुर्थीपञ्चमी इत्येतेषां द्विवचने भ्याम् विभक्तौ द्विभ्याम् इति जाते, **त्यदादीनामः** इति सूत्रेण इकारस्य अकारादेशे, '**सुपि च**' इति सूत्रेण दीर्घे द्वाभ्याम् इति।

**द्वयोः** = द्विशब्दात् षष्ठीसप्तम्योः द्विवचने ओसिविभक्तौ द्वि ओस् इति जाते, त्यदादीनामः इति सूत्रेण अकारादेशे द्व ओस् इति जाते '**ओसि च**' इति सूत्रेण एत्वे, '**एचोऽयवायावः**' इति सूत्रेण अयादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे द्वयोः इति रूपं सिद्धम्।

**औडुलोमिः** = उडुलोम्नः अपत्यं पुमान् इत्यर्थे बाह्वादिभ्यश्च सूत्रेण इञ् प्रत्ययान्तात् आडुलोमिशब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे सस्य रुत्वे विसर्गे औडुलोमिः इति रूपं भवति।

**औडुलोमी** = औडुलोमिशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ '**प्रथमयोः पूर्वसवर्णः**' इति सूत्रेण पूर्वसवर्णदीर्घे औडुलोमी इति।

**उडुलोमाः** = उडुलोम्नः अपत्यम् इत्यर्थे बहुवचने इञ् प्रत्ययो न भवति, अपितु '**लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः**' इति वार्तिकेन अ प्रत्ययो भवति तेन बहुवचने '**उडुलोम**' शब्दो भवति। तस्मात् उडुलोमशब्दात् प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे, पूर्वसवर्णदीर्घे सस्य रुत्वे, विसर्गे उडुलोमाः इति रूपं भवतीति।

**इति इदन्ताः**

**वातप्रमीः ( उ.सू.441 ) इत्युणादिसूत्रेण माङ ईप्रत्ययः। स च कित्। वातं प्रमिमीते वातप्रमीः। दीर्घाज्जसि च ( सू.२३९ )। वातप्रम्यौ। वातप्रम्यः। हे वातप्रमीः। अमिपूर्वः ( सू.१९४ )। वातप्रमीम्। वातप्रम्यौ। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्याम्। वातप्रम्ये। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रमीभ्याम्। वातप्रम्यः। वातप्रम्योः। वातप्रम्याम्। दीर्घत्यान्न नुट्। ङौ तु सवर्णदीर्घः वातप्रमी। वातप्रम्योः। वातप्रमीषु। एवं ययीपप्यादयः।**

**यान्त्यनेनेति ययीः – मार्गः। पाति लोकमिति पपीः सूर्यः। यापोः किद्द्वे च ( उ.सू.439 ) इति ईप्रत्ययः। क्विबन्तवातप्रमीशब्दस्य त्वमि शसि ङौ च विशेषः। वातप्रम्यम्। वातप्रम्यः। वातप्रम्यि। एरनेकाचः – इति वक्ष्यमाणो यण्। प्रधीवत्।**

**बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। दीर्घङ्यन्तत्वात् हलङ्याप् ( सू.252 ) इति सुलोपः।**

**संस्कृतव्याख्या** – क्विप् प्रत्ययान्तो वातप्रमी शब्दोऽपि दीर्घ ईकारान्तः पुल्लिंगः, तस्य च ययी पपी इत्यादिवत् रूपं प्रचलति तत्र केवलं अमि शसि ङिप्रत्यये च परे विशेषो भवति। तत्र द्वितीयैकवचने अमि, वाप्तमी+अम् इत्यवस्थायाम् **अमिपूर्वः** इति सूत्रेण पूर्वरूपं प्रबाध्य '**एरनेकाचोऽसंयोगपूर्वस्य**' इति सूत्रेण यणि **वातप्रम्यम्** इति रूपं भवति, द्वितीयाबहुवचने शसि, तथा च सप्तम्येकवचने ङिप्रत्यये परे यथाक्रमं पूर्वसवर्णं प्रबाध्य यणि **वातप्रम्यः**, **वातप्रम्यि** इति रूपं भवति।

**बहुश्रेयसी** = बह्वय: श्रेयस्यो यस्य स: पुरुष: इत्यर्थे बहुश्रेयसी इति पुंवाचकात् प्रथमैकवचने बहुश्रेयसी सु इत्यवस्थायां हलङ्यादिना सुलोपे बहुश्रेयसी इति रूपं भवति।

**यू स्त्र्याख्यौ नदी 1.4.3 ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्गग्रहणं च ( वा. १०३६ ) पूर्वं स्त्राख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः।**

**संस्कृतव्याख्या** = संज्ञासूत्रमिदम्। अत्र पदत्रयं वर्तते। यू इति लुप्तप्रथमान्तं स्त्राख्यौ इति प्रथमान्तं, नदी इति च प्रथमान्तं पदम्।

तत्र ईश्च ऊश्चेति तयो यू इति इतरेतरद्वन्द्वसमासः। यू स्त्रियम् आचक्षाते इति स्त्र्याख्यौ। यू इति विशेषणं विशेषणत्वात् तदन्तविधिः, एतेन ईदन्तम् ऊदन्तम् इत्यर्थः। स्त्र्याख्यौ इत्यनेन नित्यस्त्रीलिङ्गशब्दौ गृह्येते। इत्थम् – नित्यं स्त्रीलिङ्गकः दीर्घईकारान्तः ऊकारान्तश्च इत्येतौ शब्दौ नदीसंज्ञकौ भवत इति सूत्रार्थः सम्पद्यते।

सूत्रे स्त्रियाम् इत्येव सिद्धौ आख्यौ इति पाठेन यस्य शब्दस्यार्थे स्वत एव स्त्रीत्वं तस्यैव नदीसंज्ञा, अन्यपदेन स्त्रीत्वे बोधिते सति न तस्य नदीसंज्ञा इति तात्पर्यम्। यथा – **ग्रामण्ये स्त्रियै इत्यर्थे** ग्रामणी शब्दे स्त्रियै इत्यनेन पदेन स्त्रीत्वद्योतनात् नदीसंज्ञा न भवति।

अत्र सूत्रे नदीसंज्ञाविषये विशेषमुपपादयति वार्तिकद्वारा – तथाहि **प्रथमलिङ्गग्रहणं च** – अर्थात् नदीसंज्ञाविषये प्रथमलिङ्गस्यापि ग्रहणं भवति। तात्पर्यमिदमस्ति यत् समासात्प्राक् स्त्रीलिङ्गसत्वात् समासे उपसर्जनसंज्ञायां पुंवत्वेऽपि प्रथमलिङ्गमादाय नदीसंज्ञा भवति अत एव बह्वय: श्रेयस्यां यस्य स इत्यत्र बह्वी जस् श्रेयसी जस् इत्यत्र श्रेयसी शब्दः स्त्रीलिङ्गे समासत्वात् तस्य पुंवत्वेऽपि बहुश्रेयसी इत्यस्य नदीसंज्ञा भवति इति।

**बहुश्रेयसीशब्दात् सम्बोधनैकवचने सुप्रत्यये हे बहुश्रेयसी सु इत्यवस्थायाम् –**

**अम्बार्थनद्योर्ह्रस्वः 6.3.106 अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्सम्बुद्धौ। हे बहुश्रेयसि। शसि बहश्रेयसीन्।**

**संस्कृतव्याख्या** – सूत्रमिदं विधिसूत्रम्। अत्र पदद्वयम्, अम्बा अर्थो यस्य स: अम्बार्थ:। अम्बार्थश्च नदी च अम्बार्थनद्यौ तयो: अम्बार्थनद्योरिति षष्ठ्यन्तं पदमेकम्, ह्रस्व: इति प्रथमान्तं द्वितीयं पदम्। अत्र अङ्गस्य अधिकार: तस्य वचनविपरिणामेण अङ्गयो इति द्विवचनान्तं विशेष्यं पदम्, अम्बार्थनद्योरिति अङ्गयोः विशेषणम्। एतेन अम्बार्थकशब्दानां नद्यन्तशब्दानाञ्च सम्बुद्धिपरे ह्रस्वो भवतीति सूत्रार्थः सम्पद्यते। तद्यथा – हे बहुश्रेयसि।

**हे बहुश्रेयसि** – बहुश्रेयसिशब्दात् सम्बोधनैकवचने सुविभक्तौ **'प्रथमलिङ्गग्रहणं चेति'** वार्तिकसहकारेण **यूस्त्र्याख्यौ नदी** इति सूत्रेण नदीसंज्ञायां हे बहुश्रेयसी स् इत्यवस्थायाम् अम्बार्थनद्योर्ह्रस्वः इति सूत्रेण ह्रस्वे हे बहुश्रेयसि स् इति जाते **'एङ्ह्रस्वात् सम्बुद्धेः'** इति सूत्रेण सुलोपे हे बहुश्रेयसि इति रूपं सिद्धम्।

**बहुश्रेयसीम्** = बहुश्रेयसी शब्दात् द्वितीयैकवचने अम् विभक्तौ 'अमिपूर्वः' इति सूत्रेण पूर्वरूपे बहुश्रेयसीम् इति।

**बहुश्रेयसीन्** = बहुश्रेयसीशब्दात् द्वितीयाबहुवचने बहुश्रेयसी शस् इति जाते अनुबन्धलोपे **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण पूर्वसवर्णदीर्घे, **'तस्माच्छसो नः पुंसि'** इतिसूत्रेण सस्य नत्वे बहुश्रेयसीन् इति सिद्धम्।

**बहुश्रेयस्या** = तृतीयैकवचने टा, अनुबन्धलोपे यणि।

**बहुश्रेयसीभ्याम्** = तृतीया-चतुर्थी-पञ्चमीद्विवचने भ्यामि।

**बहुश्रेयसीभिः** = तृतीयाबहुवचने भिस् सस्य रुत्वे विसर्गे।

**आण्नद्याः 7.3.112 नद्यन्तात् परेषां ङितामाडागमः स्यात्।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयम्। आट् इति प्रथमान्तं, नद्या इति पञ्चम्यन्तं पदम्। '**घेर्ङिति**' इति सूत्रात् विभक्तिवचनविपरिणामेन 'ङिताम्' इत्यस्य अनुवृत्तिः, अङ्गस्य च अधिकारः। एतेन नद्यन्तात् अङ्गात् परस्य ङिद्विभक्तेः आडागमः स्यादिति सूत्रार्थो भवति। ङेविभक्त्या ङे ङसि ङस् ङि इत्येता विभक्तयो गृह्यन्ते, अत्रैव आडागम इत्यवधेयम्।

**आटश्च 6.1.10 आटोऽचि परे वृद्धिरेकादेशः स्यात्।**

**बहुश्रेयस्यै। बहुश्रेयस्याः। बहुश्रेयस्याः। नद्यन्तात्परत्वान्नुट्, बहुश्रेयसीनाम्।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदद्वयम्। आटः इति पञ्चम्यन्तम्, च इत्यव्ययम्। **इको यणचि** इतिसूत्रात् अचि इत्यस्य '**वृद्धिरेचि**' इत्यस्मात् वृद्धिपदस्य चानुवृत्तिर्भवति। **एकः पूर्वपरयोरधिकारो** वर्तते। एतेन आटः अचि परे पूर्वपरयोः स्थाने वृद्धिः स्यादिति सूत्रार्थः सङ्गच्छते। तद्यथा = बहुश्रेस्यै इत्यादि।

**बहुश्रेयस्यै** = बहुश्रेयसी शब्दात् चतुर्थ्येकवचने ङे विभक्तौ, अनुबन्धलोपे '**यू स्त्र्याख्यौ नदी**' इति सूत्रेण नदीसंज्ञायाम्, '**आण्नद्याः**' इति सूत्रेण ङितः एकारस्य आडागमे बहुश्रेयसी आ ए इत्यवस्थायाम्, आटश्च इति सूत्रेण वृद्धौ बहुश्रेयसी ऐ इति जाते, '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे बहुश्रेयस्यै इति सिद्धम्।

**बहुश्रेयस्याः** – बहुश्रेयसीशब्दात् पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसिङस् विभक्तौ अनुबन्धलोपे बहुश्रेयसी अस् इति जाते, नदीसंज्ञायाम्, आण्नद्याः इति सूत्रेण आडागमेऽनुबन्धलोपे बहुश्रेयसी आ अस् इति जाते, आटश्च इति सूत्रेण वृद्धौ '**इको यणचि**' इति सूत्रेण यणि बहुश्रेयस्यास् इति जाते, सस्य रुत्वे विसर्गे बहुश्रेयस्याः इति रूपं सिद्धम्।

**बहुश्रेयसीनाम्** = बहुश्रेयसी शब्दात् षष्ठीबहुवचने बहुश्रेयसी आम् इति जाते नदीसंज्ञायाम्, '**ह्रस्वनद्यापो नुट्**' इति सूत्रेण नुटि, अनुबन्धलोपे '**पर्जन्यवल्लक्षणप्रवृत्तिः**' इति न्यायात् नामि इति सूत्रेण दीर्घे बहुश्रेयसीनाम् इति रूपं सिद्ध्यति।

**ङे राम्नद्याम्नीभ्यः 7.3.116 नद्यन्तादाबन्तान्नीशब्दाच्च ङे राम् स्यात्। इह परत्वादाटा नुट् बाध्यते। बहुश्रेयस्याम्। शेषमीप्रत्ययान्तवातप्रमीवत्। अङ्यन्तत्वान्न सुलोपः, अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी, क्यजन्तादाचाराक्विबन्ताद्वा कर्तरि क्विप्। हल्ङ्याप् ( सू. 252 ) इति सुलोपः।**

**संस्कृतव्याख्या** – 'ङेः' आम् नद्याम्नीभ्य इति सूत्रस्य पदच्छेदः। ङेः इति षष्ठ्यान्तं पदम्, आम् इति प्रथमान्तं विधेयं पदम्। नदी च आप् च नीश्च इत्येतेषाम् इतरेतरद्वन्द्वसमासे नद्याम्न्यः तेभ्यो ङेराम्नद्यानीभ्यः इति पञ्चम्यन्तं पदम्। अङ्गस्य अधिकारः तस्य वचनविपरिणामेन अङ्गभ्य इति पञ्चम्यन्तं विशेष्यं पदम्। तस्य च नद्याम्नीभ्य इति विशेषणम्। विशेषणत्वात् तेभ्यः तदन्तग्रहणं भवति। नद्याम्नीभ्यः इत्यस्य पञ्चम्यन्तत्वात् '**तस्मादित्युत्तरस्य**' इति परिभाषासूत्रेण अव्यवहितपरस्य कार्यं विधीयते। इत्थम् – नद्यन्तात् आबन्तात् नीशब्दाच्च परस्य ङि इत्यस्य स्थाने आमादेशो भवतीति सूत्रार्थः सम्पद्यते। आम् इत्यस्य मकारस्य **न विभक्तौ तुस्माः** इति सूत्रेण निषेधात् इत्संज्ञा, लोपश्च न भवतीति।

**बहुश्रेयस्याम्**– बहुश्रेयसीशब्दात् सप्तम्येकवचने ङि विभक्तौ बहुश्रेयसी ङि इति जाते नदीसंज्ञायाम्, '**ङे राम्नद्याम्नीभ्यः**' इति सूत्रेण ङिस्थाने आम् इत्यादेशे बहुश्रेयसी आम् इति जाते परत्वात् नुटं प्रबाध्य आडागमेऽनुबन्धलोपे

बहुश्रेयसी आ आम् इति जाते '**आटश्च**' इति सूत्रेण वृद्धौ '**इको यणचि**' यणि वर्णसंयोगे बहुश्रेयस्याम् इति रूपं भवति। अवशिष्टं सर्वं रूपं मीप्रत्ययान्त वातप्रमीवत् भवति।

**अतिलक्ष्मीः** = अतिक्रान्तो लक्ष्मीम् इत्यर्थे द्वितीयातत्पुरुषसमासे अतिलक्ष्मी शब्दात् सुविभक्तौ अनुबन्धलोपे ङीप्रत्ययान्तत्वाभावात् सुलोपो न भवति तस्मात् सस्य रुत्वे विसर्गे अतिलक्ष्मीः इति रूपं भवति। **शेषं रूपं बहुश्रेयसीवत्** भवति।

**कुमारी** = कुमारीमिच्छन्, कुमारीवाचरन् वा ब्राह्मणः इत्यर्थे क्यजन्तादाचारात् क्विबन्ताद्वा कर्तरि क्विप् प्रत्यये तस्य सर्वापहारिलोपे कुमारी शब्दात् सु विभक्तौ अनुबन्धलोपे **हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इति सूत्रेण सुलोपे कुमारी इति रूपं भवति।

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ 6.4.77 श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः 'भ्रू' इत्यस्य चाङ्गस्येङुवङौ स्तोऽजादौ प्रत्यये परे। ङिच्च ( सू.43 ) इत्यन्तादेशः। आन्तरतम्यादेरियङ्। ओरुवङ् इतीयङि प्राप्ते –**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अचि श्नुधातुभ्रुवां य्वोः इयङुवङौ इति सूत्रस्य पदविभागः। श्नुश्च धातुश्च, भ्रुश्च तेषामित्यर्थे इतरेतरद्वन्द्वसमासः इश्च उश्च तयोरित्यर्थे य्वोरिति। इत्थम् श्नु, इवर्णान्तः उवर्णान्तश्च धातुः भ्रूशब्दश्च इत्येतानि स्थानीभूतानि पदानि, इयङुवङौ इति आदेशवाचकौ अचि इति सप्तम्यन्तं पदम्। अधिकृत्यस्य अङ्गस्य वचनपरिणामेण अङ्गानाम् इति बहुवचनान्तेन अन्वयो भवति। एतेन अजादिप्रत्यये परे श्नुप्रत्ययान्ताङ्गानाम्, इवर्णोवर्णान्तानां धात्वङ्गानां भ्रू इत्यङ्गस्य च अन्त्यस्य इकारस्य उकारस्य स्थाने यथाक्रमम् इयङ् उवङ् इत्येतौ आदेशौ भवतः इति सूत्रार्थः।

एतदेव बोधयितुं कथयति मूले इयङ् उवङ् इत्यनयोः ङित्वात् ङिच्च इति सूत्रेण अन्तादेशः। किञ्च आन्तरतम्यात् इकारस्य स्थाने इयङ् उकारस्य च स्थाने उवङ् आदेशो भवति। तथाहि – कुमारी औ इत्यवस्थायाम् इकारस्य इयङादेशः प्राप्नोति –

**एरनेकाचोऽसंयोगपूर्वस्य 6.4.82 धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे। इति यण्, कुमार्यौ। कुमार्यः। हे कुमारि! अमि शसि च कुमार्यम्, कुमार्यः। कुमार्यै। कुमार्याः। कुमार्याः। कुमारीणाम्। कुमार्याम्। कुमार्योः।**

**प्रधीः। प्रध्यौ। प्रध्यः। प्रध्यम्। प्रध्यः**

**उन्नयतीत्युन्नीः। धातुना संयोगस्य विशेषणादिह स्यादेव यण्, उन्न्यौ। उन्नयः। हे उन्नीः। उन्न्यम्। ङेराम् उन्न्याम्। एवं ग्रामणीः। अनेकाचः किम्? नीः। नियौ। नियः। अमि शसि च परत्वादियङ् नियम्। नियः। ङे राम् -नियाम्।**

**असंयोगपूर्वस्य किम्? सुश्रियौ, यवक्रियौ।**

**गतिकारकेतरपूर्वपदस्य यण् नेष्यते ( वा. 5034 ) शुद्धधियौ, परमधियौ। कथं तर्हि 'दुर्धियः' वृश्चिकभिय इत्यादि? उच्यते। दुःस्थिता धीर्येषाम् इति विग्रहे दुर् इत्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। वृश्चिकसंबन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा।**

**संस्कृतव्याख्या – एरनेकाचो..........**। एः अनेकाचः, असंयोगपूर्वस्य इति पदविभागः। एः इति इ इत्यस्य षष्ठ्येकवचनान्तं पदम्, न एकम् अनेकम्, अनेके अचो यस्मिन् सोऽनेकाच्, तस्य अनेकाचः

नञ्तत्पुरुषगर्भबहुव्रीहिसमाघटितं षष्ठ्येकवचनान्तम्, नास्ति संयोगः पूर्वो यस्य स असंयोगपूर्वः, तस्य इति असंयोगपूर्वस्य इति षष्ठ्यन्तं पदम्। अङ्गस्य अधिकारः 'इ' इत्यस्य विशेषणत्वात् तदन्तविधिः। इत्थम् – धात्ववयवो यः असंयोगपूर्वकः (संयोगः पूर्वस्मिन् नास्ति एवं भूतो) इवर्णान्तो धातुः स अन्ते यस्य तादृशस्य अनेकाचः अङ्गस्य यण् भवति, अजादिप्रत्यये पर इति सूत्रार्थः। इति यण् – **कुमारी औ, कुमार्यौ** इति।

**कुमार्यौ** = कुमारी शब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ कुमारी औ इत्यवस्थायाम् '**अचिश्नुधातुभ्रुवां य्वोरियङ्गवङौ**' इति सूत्रेण इकारस्य स्थाने इयङिप्राप्ते तं प्रबाध्य '**एरनेकाचोऽसंयोगपूर्वस्य**' इतिसूत्रेण यणि, वर्णसंयोगे कुमार्यौ इति।

**कुमार्यः** = कुमारीशब्दात् प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे इयङादेशं प्रबाध्य यणि वर्णसंयोगे सस्य रुत्वे विसर्गे कुमार्य इति।

**हे कुमारि!** = कुमारीशब्दात् सम्बोधने एकवचने सुविभक्तौ अनुबन्धलोपे नदीसंज्ञायाम्, **अम्बार्थनद्योर्ह्रस्वः** इति सूत्रेण ह्रस्वे '**एङ्ह्रस्वात्सम्बुद्धेः**' सुलोपे हे कुमारि इति।

**कुमार्यम्** = कुमारीशब्दात् द्वितीयैकवचने अमि, यणि कुमार्यम् इति।

**कुमार्यः** = कुमारीशब्दात् द्वितीयाबहुवचने शसि, अनुबन्धलोपे, **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण दीर्घे प्राप्ते, **दीर्घाज्जसि च** इति सूत्रेण निषेधे, इयङिप्राप्ते, यणि कुमार्यस् सस्य रुत्वे विसर्गे कुमार्यः।

**कुमार्या** = कुमारीशब्दात् तृतीयैकवचने टाविभक्तौ अनुबन्धलोपे यणि कुमार्या इति सिद्धम्।

**कुमार्यै** = कुमारीशब्दात् चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे कुमारी ए इति जाते, नदीसंज्ञायाम्, **आण्नद्याः** इति सूत्रेण आडागमे आटश्च इति सूत्रेण वृद्धौ कुमारी ऐ इत्यवस्थायाम्, '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे कुमार्यै इति सिद्धम्।

**एवमेवान्यानि रूपाणि भवन्ति।**

**प्रधीः** = प्रध्यायतीति प्रधी, शब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे अङ्यन्तत्वात् सुलोपाभावे सस्य रुत्वे विसर्गे **प्रधीः** इति।

**प्रध्यौ** = प्रधीशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ पूर्वसवर्णदीर्घे प्राप्ते, **दीर्घाज्जसि** च इति सूत्रेण निषेधे, **अचिश्नुधातुरित्यादिना** इयङिप्राप्ते तं प्रबाध्य **एरनेकाचोऽसंयोगपूर्वस्य** इति सूत्रेण यणि **प्रध्यौ** इति रूपं सिद्धम्।

**प्रध्यम्** = प्रधीशब्दात् द्वितीयैकवचने अमि, यणि प्रध्यम् इति।

**उन्नीः** = उन्नयतीति विग्रहे क्विप्रत्यान्त उन्नीशब्दात् प्रथमैकवचने सु अनुबन्धलोपे सस्य रुत्वे विसर्गे उन्नीः इति।

**उन्न्यौ** = उन्नीशब्दात् प्रथमाद्वितीया द्विवचने औ विभक्तौ, यणि उन्न्यौ।

**उन्नयः** = उन्नीशब्दात् प्रथमाबहुवचने जहि अनुबन्धलोपे, यणि उन्नयः इति।

**उन्न्याम्** = उन्नीशब्दात् सप्तम्येकवचने ङि विभक्तौ **ङेराम् नद्याम्नीभ्यः** इति सूत्रेण ङिस्थाने आमि, यणि उन्न्याम् इति।

**ग्रामणीः** = ग्रामणीशब्दात् प्रथमैकवचने सु अनुबन्धलोपे सस्य रुत्वे विसर्गे ग्रामणीः।

सूत्रेऽस्मिन् अनेकाच् ग्रहणेन नीशब्दात् एकाच्त्वात् यण् न भवति। अनेकाच्ग्रहणाभावे एकाच्शब्देऽपि यण्प्रसङ्गः स्यात् तन्माभूत्तदर्थम् **अनेकाच् ग्रहणम्।**

**गतिकारकेतरपूर्वपदस्य यण् नेष्यते - (वा.) अस्यायम्भावः गतिसंज्ञकपूर्वपदभिन्नस्य, कारकपूर्वपदभिन्नस्य 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रेण यण् न इष्टम् तस्मात् शुद्धा धीर्यस्य इत्यस्मिन् विग्रहे शुद्धधीः शब्दात् यण् न भवति, इयङादेशे शुद्धधियौ इति रूपं सिद्ध्यति। एवमेव परमधियौ इति।**

ननु एतत्स्वीकारे दुर्धियः, वृश्चिकधियः इत्यादौ कथन्न यण् इति चेत् कथयति - दुःस्थिता धीर्येषाम् इति विग्रहे दुर् इत्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यतोहि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा। अत्रेदं तात्पर्यं यत् - दुःस्थिता धी इत्यत्र स्थाधातुं प्रति दुर् इत्यस्य गतिसंज्ञा संभवा न तु ध्यैधातुं प्रति तस्मात् इयङ्भवति।

वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। अथवा वृश्चिकसम्बन्धिनी भीः इत्यस्मिन् विग्रहे शेषषष्ठीस्वीकारात् तस्य च कारकत्वाभावात् न यण् अपितु इयङ् एवेति।

**न भूसुधियोः 6.4.85 एतयोर्यण् न स्यादचि सुपि। सुधियौ, सुधिय इत्यादि। सखायमिच्छति सखीयति ततः क्विप्। अल्लोपयलोपौ। अल्लोपस्य स्थानिवत्वाद्यणि प्राप्ते -**

**क्वौ लुप्तं न स्थानिवत् (वा.431) एकदेशविकृतस्यानन्यतयानङ्णित्वे, सखा, सखायौ, सखायः। हे सखीः। अमि पूर्वरूपात्परत्वाद्यणि प्राप्ते ततोऽपि परत्वात् सख्युरसम्बुद्धौ (सू. 253) इति सूत्रं प्रवर्तते। सखायम्। सखायौ। शसि यण्, सख्यः।**

**सह खेन वर्तते इति सखः, तमिच्छतीति सखीः। सुखमिच्छतीति सुखीः, सुतमिच्छतीति सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यात् (सू. 255) इति दीर्घस्यापि ग्रहणादुकारः, सख्युः, सुख्युः, सुत्युः। लूनमिच्छतीति लूनीः। क्षाममिच्छतीति क्षामीः। प्रस्तीममिच्छतीति प्रस्तीमीः। एषां ङसिङसोर्यण्। नत्वमत्वयोरसिद्धत्वात्, ख्यत्यात् (सू.255) इत्युत्वम् लून्युः, क्षाम्युः, प्रस्तीम्युः। शुष्कीयतेः क्विप्। शुष्कीः। पक्वीः। इयङ् शुष्कियौ, शुष्कियः। ङसिङसोः शुष्किय इत्यादि। इतीदन्ताः।**

**शम्भुर्हरिवत्। एवं विष्णुवायुभान्वादयः।**

**संस्कृतव्याख्या** - अपवादसूत्रमिदम्। द्विपदमत्र। न इत्यव्ययपदम्, भूसुधियो इति भूश्च सुधीश्च तयोरितरेतरद्वन्द्वसमासघटितं षष्ठ्यन्तं पदम्। अत्र **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ इत्यस्मात्** 'अचि' इत्यस्य, **ओः सुपि** इत्यतः सुपि इत्यस्य, **इणो यण्** इत्यतो यण् इत्यस्य चानुवृत्तिर्भवति। इत्थम् - अजादिसुप्प्रत्यये परे भू सुधी इत्यनयोः यण् न भवतीति सूत्रार्थः। तद्यथा - सुधी+औ इत्यवस्थायां सुधियौ इति।

**सुधीः** =सुष्ठु ध्यायतीति विग्रहे सु इत्युपसर्गपूर्वकात् ध्यै धातोः क्विप्प्रत्यये सम्प्रसारणे सुधीशब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे सस्य रुत्वे, विसर्गे सुधीः इति सिद्धम्।

**सुधियौ** = सुधीशब्दात् प्रथमा-द्विवचने प्रथमा-द्विवचने औविभक्तौ, अनुबन्धलोपे 'सुधी औ' इति जाते **'इको यणचि'** इति सूत्रेण प्राप्तं यणं प्रबाध्य **एरनेकाचोऽसंयोगपूर्वस्य** इति सूत्रेण यणि प्राप्ते, **'न भूसुधियोः'** इतिसूत्रेण निषेधे, **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रेण ईकारस्य स्थाने इयङादेशेऽनुबन्धलोपे वर्णसंयोगे सुधियौ इति सिद्धम्।

**सुधियः** = सुधीशब्दात् प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे सुधी अस् इति जाते, इयङादेशेऽनुबन्धलोपे, वर्णसम्मेलने सुधियस् इति जाते सस्य रुत्वे विसर्गे सुधिय इति रूपं सिद्धम्।

**सखा** = **सखायमिच्छतीति विग्रहे** सखीयति इत्यर्थे सखि अम् क्यच् विभक्तिलोपे, दीर्घे च सखीय

शब्दात् क्विप्प्रत्यये तस्य सर्वापहारिलोपे, अल्लोपयलोपौ, अत्र यलोपकर्त्तव्यतायाम्, अल्लोपस्य स्थानिवद्भावस्य निषेधो भवति परं सखि अम् इत्यवस्थायाम् यण् कर्त्तव्यतायाम् अलोपस्य स्थानिवद्भाव: प्राप्नोति परं '**क्वौ लुप्तं न स्थानिवत्**' इति वार्तिकेन निषेधे **सखीशब्दात्** प्रथमैकवचने सु विभक्तौ अनुबन्धलोपे, अनङादेशेऽनुबन्धलोपे, उपधादीर्घे सलोपे, नलोपे सखा इति रूपं सिद्ध्यति।

**सखायौ** = प्रथमाद्वितीयाद्विवचने औ विभक्तौ सखी औ इति जाते, णिद्वद्भावे, **अचोञ्णिति** इति सूत्रेण वृद्धौ, अयादेशे वर्णसंयोगे सखायौ इति।

**सखाय:** = सखीशब्दात् प्रथमाबहुवचने जसि, अनुबन्धलोपे, णिद्वद्भावे वृद्धौ अयादेशे वर्णसंयोगे, सस्य रुत्वे विसर्गे सखाय: इति।

**सखायम्** = सखीशब्दात् द्वितीयैकवचने अमि, णिद्भावभावे वृद्धौ वर्णसंयोगे सखायम् इति।

**एवमेव सह खेन वर्तते इति सखः, तमिच्छतीति सखी शब्दस्यापि रूपम्। सुखमिच्छतीति सुखी, सुतमिच्छतीति सुतीः इत्यादीनां रूपं बोध्यम्।**

**किञ्च – लूनमिच्छतीति लूनीः, क्षाममिच्छतीति क्षामीः, प्रस्तीममिच्छतीति प्रस्तीमीः इत्यादीनि रूपाणि भवन्ति।**

**एवमेव आत्मनः शुष्कमिच्छतीत्यर्थे शुष्कीः, आत्मनः पक्वमिच्छतीत्यर्थे पक्वीः इत्यादीनि रूपाणि भवन्ति।**

**शम्भुशब्दस्य** रूपं **हरिशब्दवत्** भवति।

**शम्भुः** = शम्भुशब्दस्य प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे सस्य रुत्वे, विसर्गे शम्भु: इति।

एवमेव विष्णु:, वायु:, भानु:, अणु:, शिशु:, बाहु:, इन्दु: इत्यादीनां रूपाणि बोध्यानि।

**क्रोष्टुशब्दः** = **तृज्वत्क्रोष्टुः 7.1.95 क्रोष्टुस्तृजन्तेन तुल्यं वर्तते असम्बुद्धौ सर्वनामस्थाने परे। क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः।**

**संस्कृतव्याख्या** – अतिदेशसूत्रमिदम्। तृज्वत् क्रोष्टु इति सूत्रस्य पदविभाग:। तृज्वत् इति तृचा तुल्यम् इत्यर्थे वतिप्रत्ययान्तम् अव्ययपदम्। क्रोष्टु: इति प्रथमान्तम्। अत्र **सख्युरसम्बुद्धौ** इत्यस्मात् असम्बुद्धौ इत्यस्य **इतोऽत् सर्वनामस्थाने** इत्यस्मात् सर्वनामस्थाने इत्यस्य चानुवृत्तिर्भवति। इत्थम् – सम्बुद्धिभिन्ने सर्वनामस्थाने परे क्रोष्टुशब्दस्यस्थाने क्रोष्टृ इत्यादेशो भवति इति सूत्रार्थ:।

क्रोष्टुशब्दस्य प्रथमैकवचने सुविभक्तौ सर्वनामस्थानसंज्ञायां क्रोष्टृ आदेशे क्रोष्टृ स् इति जाते –

**ऋतो ङिसर्वनामस्थानयोः 7.3.110 ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्। इति प्राप्ते।**

**संस्कृतव्याख्या** = विधिसूत्रमिदम्। ऋतो ङिसर्वनामस्थानयो: इति सूत्रस्य पदविभाग:। ऋत: इति षष्ठ्यन्तं, ङिसर्वनामस्थानयो: इति सप्तम्यन्तं पदम्। अङ्गस्य अधिकार:। **ह्रस्वस्य गुणः** इत्यस्मात् सूत्रात् 'गुण:' इत्यस्यानुवृत्तिर्भवति। एतेन ह्रस्वऋकारान्ताङ्गस्य गुणो भवति ङिपरे सर्वनामस्थाने च परे इति सूत्रार्थ:। एतेन क्रोष्टृ स् इत्यवस्थायाम् ऋकारस्य गुणे प्राप्ते तं प्रबाध्य अग्रिमं सूत्रं प्रवर्तते– तथाहि –

**ऋदुशनस्पुरुदंसोऽनेहसां च 7.1.94 ऋदन्तानामुशनादीनां चानङ् स्यादसम्बुद्धौ सौ परे।**

**संस्कृतव्याख्या** = अस्मिन् सूत्रे पदद्वयं वर्तते। ऋत् च उशना च पुरुदंसा च अनेहा च तेषाम्

ऋदुशनस्पुरुदंसोऽनेहसाम् इति षष्ठी बहुवचनान्तं पदम् 'च' इत्यव्ययम्। अत्र '**सख्युरसम्बुद्धौ**' इत्यत असम्बुद्धौ इत्यस्य **अनङ् सौ** इत्यतश्च 'सौ' इत्यस्यानुवृत्तिर्भवति, अङ्गस्य च अधिकारः।

अधिकृतस्य अङ्गस्य वचनविपरिणामेन अङ्गानाम् इति विशेष्यत्वेनान्वयः, ऋदुशनस्पुरुदंसोऽनेहसाम् इत्यस्य च विशेषणत्वात् तदन्तविधिः। इत्थम् – ह्रस्वऋकारान्तस्य शब्दस्य, उशनम् पुरुदंसस्, अनेहस् इत्येतेषां शब्दानामङ्गस्य अनङादेशो भवति सम्बुद्धिभिन्ने सुपरे इति सूत्रार्थो भवति। तद्यथा – क्रोष्टृ स् इत्यवस्थायाम्। ऋकारस्य अनङादेशेऽनुबन्धलोपे क्रोष्टन् स् इति जाते –

**अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्। ६.४.४१**

**अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।**

**नप्त्रादिग्रहणं व्युपत्तिपक्षे नियमार्थम्। उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्भवति तर्हि नप्त्रादीनामेव। तेन पितृभ्रातृप्रभृतीनां न। उद्गातृशब्दस्य तु भवत्येव। समर्थ ( सू.647 ) सूत्रे उद्गातारः इति भाष्यप्रयोगात्। क्रोष्टा। क्रोष्टारौ, क्रोष्टारः। क्रोष्टारम्, क्रोष्टारौ, क्रोष्टून्।**

**संस्कृतव्याख्या** = विधिसूत्रमिदम्। आपश्च तृन् च तृच् च स्वसा च नप्ता च, नेष्टा च त्वष्टा च, क्षत्ता च, होता च, पोता च, प्रशास्ता च तेषामिति – अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृप्रोतृशास्तॄणाम् इत्येकपदात्मकं सूत्रम्। अत्र नोपधायाः' इत्यतः उपधायाः, '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इत्यस्मात् दीर्घः इत्यस्य, **सर्वनामस्थाने चाऽसम्बुद्धौ** इत्यस्मात् असम्बुद्धौ सर्वनामस्थाने इत्यस्य चानुवृत्तिर्भवति। एतेन अप्शब्दस्य तृन्प्रत्ययान्तस्य, तृच्प्रत्ययान्तस्य, स्वसृ नप्तृ नेष्टृ त्वष्टृ, क्षतृ, होतृ प्रशास्तृ इत्येतेषां शब्दानाम् उपधायाः दीर्घो भवति सम्बुद्धिभिन्ने सर्वनामस्थाने परे इति सूत्रार्थः सम्पद्यते।

अत्र सूत्रे तृन्–तृच् प्रत्ययान्ततयोर्ग्रहणम्, स्वसृ–नप्तृ–नेष्टृ–त्वष्टृ, क्षतृ होतृ प्रशास्तृ शब्दोऽपि तृन्नन्तः, तृजन्त एव। अत्रेदमाशङ्कते यत् स्वसृ इत्यादीनामपि तृन्नन्तत्वे तृजन्तत्वे सति – अप्तृन्तृच्स्वसॄणाम् इत्येव सूत्रं कर्त्तव्यं कथं नप्त्रादिग्रहणमिति। अत्रोच्यते – मूले **नप्त्रादिग्रहणं व्युत्पत्तिपक्षे** नियमार्थम्। अत्रेदं तात्पर्यं यत् भाष्ये उणादिविषये पक्षद्वयम् – **उणादयो व्युत्पन्नानि** प्रातिपदिकानि, **उणादयोऽव्युत्पन्नानि** प्रातिपदिकानि। तत्र व्युत्पत्तिपक्षे स्वीकारे अप्तृन् तृच् स्वसॄणाम् इत्येव कार्यसिद्धे नप्त्रादिग्रहणं व्यर्थम्। व्यर्थं सञ्ज्ञापयति –

**उणादिनिष्पन्नानां तृन्तृजन्तानां चेद्भवति तर्हि नप्त्रादीनामेव नान्यस्य इति।** अव्युत्पन्नपक्षे तु तद्ग्रहणं विध्यर्थमेव। एतेन नियमाश्रयेण उणादिनिष्पन्नानां तृन्–तृच्–प्रत्ययान्तानां नप्त्रादीनामेव दीर्घ इति नियमात् पितृभ्रातृप्रभृतीनां शब्दानाम् उपधादीर्घो न भवति, तस्मात् – पितरौ पितरः, मातरौ मातर इत्येवं रूपाणि भवन्ति। उद्गातृशब्दस्य तु भवत्येव – समर्थसूत्रेण भाष्यकारेण उदगातारः प्रयुक्तत्वादिति।

**क्रोष्टा** = क्रोष्टुशब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने सुविभक्तावनुबन्धलोपे क्रोष्टु स् इत्यवस्थायां '**सुडनपुंसकस्य**' इति सूत्रेण सर्वनामस्थानसंज्ञायाम् – '**तृज्वत् क्रोष्टुः**' इतिसूत्रेण क्रोष्टुशब्दस्य स्थाने क्रोष्टृ इत्यादेशे क्रोष्टृस् इति जाते '**ऋदुशनस्पुरुदं सोऽनेहसां च**' इति सूत्रेण ऋकारस्य स्थाने अनङादेशे अनुबन्धलोपे क्रोष्टन् स इत्यवस्थायाम् उपधासंज्ञायां '**सर्वनामस्थाने चाऽसम्बुद्धौ**' इतिसूत्रेण प्राप्तम् उपधादीर्घं प्रबाध्य – '**अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृपोतृप्रशास्तॄणाम्**' इतिसूत्रेण उपधादीर्घे, क्रोष्टान् स् इति जाते, हलङ्यादिना सलोपे '**नलोपः प्रातिपदिकान्तस्य**' इति सूत्रेण नलोपे क्रोष्टा इति सिद्धम्।

**क्रोष्टारौ** = क्रोष्टुशब्दात् प्रथमाद्वितीयकद्विवचने औ विभक्तौ '**क्रोष्टु औ**' इति स्थिते सर्वनामस्थानसंज्ञायां '**ऋतो ङि सर्वनामस्थानयोः**' इतिसूत्रेण ऋकारस्य गुणे रपरत्वे क्रोष्टार् औ इत्यवस्थायाम् '**अप्तृन्तृजादिना**' उपधादीर्घे वर्णसंयोगे क्रोष्टारौ इति रूपं भवति।

**क्रोष्टारः** = क्रोष्टुशब्दात् प्रथमाबहुवचने जसि, अनुबन्धलोपे, सर्वनामस्थानसंज्ञायां, ऋकारस्य गुणे, रपरत्वे, उपधादीर्घे, वर्णसंयोगे, सस्य रुत्वे विसर्गे क्रोष्टार इति।

**क्रोष्टून्** – क्रोष्टुशब्दात् द्वितीयाबहुवचने शस् विभक्तौ अनुबन्धलोपे क्रोष्टु अस् इति जाते सर्वनामस्थानसंज्ञाभावात् तृज्वद्भावाभावे '**प्रथमयोः पूर्वसवर्णः**' इतिसूत्रेण दीर्घे, '**तस्माच्छसो नः पुंसि**' इतिसूत्रेण सस्य नत्वे क्रोष्टून् इति सिद्धम्।

**विभाषा तृतीयादिष्वचि 7.1.97**

**अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे।**

**संस्कृतव्याख्या** = अपवादसूत्रमिदम्। सूत्रे पदत्रयम् अस्ति। विभाषा इति प्रथमान्तं, तृतीयादिषु इति सप्तम्यन्तम्, अचि इति सप्तम्यन्तम्। अचि इति पदं तृतीयादिषु इत्यस्य विशेषणम्, वर्णग्रहणात्, **यस्मिन् विधिस्तदादावल्ग्रहणे** इति परिभाषया तदादिविधिना अजादिषु तृतीयादिषु इत्यर्थः। '**तृज्वत् क्रोष्टु**' इति सूत्रात् तृज्वत् इत्यनुवर्तते। इत्थम् **अजादिषु तृतीयादिषु विभक्तिषु परेषु क्रोष्टुशब्दस्थाने विकल्पेन तृज्वद्भावो भवतीति सूत्रार्थो भवति।**

इयं विभाषा अप्राप्तविभाषा वर्तते – टा ङे ङसि ङस् ओस् आम् ङि इत्यादिपूर्वसूत्रेण अप्राप्तौ विधानात्।

**क्रोष्ट्रा, क्रोष्टुना** = क्रोष्टुशब्दात् तृतीयाविभक्तौ एकवचने टा विभक्तावनुबन्धलोपे क्रोष्टु आ इति जाते, '**विभाषा तृतीयादिष्वचि**' इति सूत्रेण विकल्पेन क्रोष्टुशब्दस्य स्थाने क्रोष्टृ इत्यादेशे क्रोष्टृ आ इति जाते, '**इको यणचि**' इति सूत्रेण यणि, वर्णसंयोगे क्रोष्ट्रा इति, विकल्पपक्षे क्रोष्टु इत्यस्मात् **आङो नाऽस्त्रियाम्** इति सूत्रेण 'ना' इत्यादेशे क्रोष्टुना इति।

**क्रोष्टुभ्याम्** = क्रोष्टुशब्दात् भ्यामि **क्रोष्टुभ्याम्** इति।

**क्रोष्टुभिः** = क्रोष्टुशब्दात् तृतीयबहुवचने भिस्विभक्तौ **क्रोष्टुभिः** इति।

**क्रोष्टुभ्यः** = क्रोष्टुशब्दात् भ्यस् विभक्तौ क्रोष्टुभ्यः इति।

**क्रोष्ट्रे, क्रोष्टवे** = क्रोष्टुशब्दात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे क्रोष्टु ए इति जाते **विभाषा तृतीयादिष्वचि** इति सूत्रेण विकल्पेन क्रोष्टुशब्दस्य स्थाने क्रोष्टृ इत्यादेशे, '**इको यणचि**' इति सूत्रेण यणि वर्णसंयोगे क्रोष्ट्रे इति, विकल्पपक्षे क्रोष्टु ए इत्यवस्थायां घिसंज्ञायां '**घेर्ङिति**' इति सूत्रेण गुणे अवादेशे क्रोष्टवे इति रूपं सिद्धम्।

क्रोष्टुशब्दात् पञ्चमीषष्ठ्योरेकवचने तृज्वद्भावे क्रोष्टृ अस् इति जाते –

**ऋत उत् 6.1.111 – ऋदन्तान् ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वम्।**

**संस्कृतव्याख्या** = सूत्रे पदद्वयम्। ऋतः इति पञ्चम्यन्तम्, उत् प्रथमान्तं पदम्। अत्र '**ङसिङसोश्च**' इति सूत्रात् 'ङसिङसोः' इत्यस्य '**एङः पदान्तादति**' इति सूत्रात् 'अति' इत्यस्यानुवृत्तिर्भवति। '**एकः पूर्वपरयोः**' इत्यस्याधिकारः। ऋत इत्यस्मात् तदन्तविधिना ऋदन्तात् इत्यर्थः। एतेन ह्रस्वऋकारान्तस्य ङसिङसो अकारे परे पूर्वपरयोः स्थाने ह्रस्व उकारादेशो भवतीति सूत्रार्थः सम्पद्यते।

**तद्यथा** – क्रोष्टुशब्दात् ङसि, ङस् विभक्तौ अनुबन्धलोपे क्रोष्टु अस् इत्यवस्थायां तृजद्भावे क्रोष्टृ अस् इति जाते 'ऋत उत्' इत्यनेन पूर्वपरयोः उकारादेशे रपरत्वे क्रोष्टुरस् इति जाते –

**रात्सस्य 8.2.24 रेफात् संयोगान्तस्य सस्यैव लोपः, नान्यस्य। इति रेफस्य विसर्गः। क्रोष्टुः। आमि परत्वात्तृज्वद्भावे प्राप्ते – नुमचिरतृज्वद्भावेभ्यो नुट् विप्रतिषेधेन ( वा.4374 )। क्रोष्टूनाम्। क्रोष्टरि। क्रोष्ट्रोः। पक्षे हलादौ च शम्भुवत्।**

**इत्युदन्ताः**

**संस्कृतव्याख्या** = नियमसूत्रमिदम्। सूत्रेऽस्मिन् पदद्वयं वर्तते। रात् इति पञ्चम्यन्तं पदम्, सस्य इति षष्ठ्यन्तम्। **संयोगान्तस्य लोपः** इति सूत्रमत्र अनुवर्तते। रात् इत्यस्य पञ्चम्यन्तत्वात् '**तस्मादित्युत्तरस्य**' इति परिभाषासूत्रेण अव्यवहितस्य परस्य इत्यर्थो लभ्यते। इत्थम् – रेफात् परस्य संयोगान्तस्यैव लोपो नान्यस्य इति सूत्रार्थः।

क्रोष्टर् स् इत्यवस्थायां '**संयोगान्तस्य लोपः**' इति सूत्रेणैव लोपे सिद्धे कथमिदं सूत्रम् इति जिज्ञासायामत्रेदं बोध्यं यत् सूत्रारम्भमर्थ्यात् **सिद्धे सति आरभ्यमाणो विधिर्नियमाय** भवति इति नियमात् सूत्रमिदं नियमं करोति यत् रेफात् परस्य यदि संयोगान्तलोपः तर्हि सकारस्यैव नान्यस्य इति। अतः **संयोगान्तस्य लोप** इत्यनेनैव सलोपः। रेफस्य विसर्गः।

**क्रोष्टुः, क्रोष्टोः** = क्रोष्टुशब्दस्य पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे क्रोष्टु अस् इति जाते, **विभाषातृतीयादिष्वचि**' इति सूत्रेण विकल्पेन तृज्वद्भावे क्रोष्टृ अस् इति जाते '**ऋत् उत्**' इति सूत्रेण ऋकारस्य स्थाने पूर्वपरयोः उकारादेशे, 'उरण रपरः' इतिसूत्रेण रपरत्वे क्रोष्टुर्स् इति जाते **रात्सस्य** इति नियमेन '**संयोगान्तस्य लोपः**' इति सूत्रेण सकारस्य लोपे, रेफस्य रुत्वे विसर्गे क्रोष्टुः इति रूपं सिद्ध्यति। विकल्पपक्षे क्रोष्टोः इति।

**क्रोष्ट्रोः, क्रोष्ट्वोः** = क्रोष्टुशब्दात् षष्ठीसप्तम्योः द्विवचने क्रोष्टु ओस् इति जाते **विभाषा तृतीयादिष्वचि** इति सूत्रेण विकल्पेन तृज्वद्भावे क्रोष्टृ ओस् इति जाते **इको यणचि** इति सूत्रेण यणि, वर्णसंयोगे क्रोष्ट्रोस् इत्यवस्थायां सस्य रुत्वे विसर्गे क्रोष्ट्रोः इति रूपं सिद्धम्। विकल्पपक्षे क्रोष्टु ओस् इत्यवस्थायां घिसंज्ञायां गुणे अवादेशे, संयोगे, सस्य रुत्वे विसर्गे क्रोष्ट्वोः इति सिद्धम्।

क्रोष्टुशब्दात् षष्ठीबहुवचने क्रोष्टु आम् इत्यवस्थायाम् आमि परत्वात् तृज्वद्भावे प्राप्ते '**नुम् चिरतृज्वद्भावेभ्यो नुट्**' विप्रतिषेधेन इति वार्तिकेन नुडागमेऽनुबन्धलोपे क्रोष्टु नाम् इति जाते नामि इतिसूत्रेण दीर्घे क्रोष्टूनाम् इति रूपं सिद्धम्।

**क्रोष्टूनाम्** = क्रोष्टुशब्दात् षष्ठीबहुवचने आम् विभक्तौ क्रोष्टु आम् इत्यवस्थायां विभाषा तृतीयादिषु इत्यनेन तृज्वद्भावस्य '**ह्रस्वनद्यापो नुट्**' इत्यनेन नुटश्च युगपत्प्राप्तौ, '**नुम् चिरतृज्वद्भावेभ्यो नुट् विप्रतिषेधेन** इति वार्तिकेन नुडागमेऽनुबन्धलोपे क्रोष्टुनाम् इति जाते **नामि** इति सूत्रेण दीर्घे क्रोष्टूनाम् इति रूपं सिद्धम्।

**क्रोष्टरि** = क्रोष्टुशब्दात् सप्तम्येकवचने ङिविभक्तौ अनुबन्धलोपे क्रोष्टु इ इति जाते **विभाषा तृतीयादिष्वचि** इति सूत्रेण वैकल्पिके क्रोष्टुशब्दस्य क्रोष्टृ इत्यादेशे क्रोष्टृ इ इति जाते '**ऋतो ङि सर्वनामस्थानयोः**' इतिसूत्रेण गुणे रपरत्वे वर्णसंयोगे क्रोष्टरि इति रूपं भवति। विकल्पपक्षे क्रोष्टौ इति।

पक्षे अर्थात् **विभाषातृतीयादिष्वचि** इत्यस्य विकल्पपक्षे, हलादौ च शम्भुशब्दात् रूपं भविष्यति।

**इत्युदन्ताः शब्दाः**

**हूहूः, हूह्वौ, हूह्वः। हूहूम्, हूह्वौ, हूहून् इत्यादि।**

**अतिचमूशब्दे तु नदीकार्यं विशेषः, हे अतिचमु! अतिचम्वै। अतिचम्वाः। अतिचम्वाः। अतिचमूनाम्। अतिचम्वाम्। खलपूः।**

**संस्कृतव्याख्या** = हूहूशब्दोऽव्युत्पन्नः दीर्घोकारान्तः। अत्र घिसंज्ञा, नदीसंज्ञादयो न भवन्ति अतः प्रथमैकवचने

हूहूशब्दात् सौ अनुबन्धलोपे सस्य रुत्वे विसर्गे हूहूः इति। औ विभक्तौ **दीर्घाज्जसि** च इतिसूत्रं प्रबाध्य '**इकोयणचि**' इति सूत्रेण यणि हूह्वौ इति सिद्ध्यति। एवमेवान्यानि रूपाणि भवन्तीति।

अतिचमू इत्यादौ चमूशब्दो दीर्घोकारान्तः स्त्रीलिङ्गः। अत अस्य नदीसंज्ञा भवति। चमूम् अतिक्रान्त इत्यर्थे अतिचमूशब्दः। **प्रथमलिङ्गग्रहणं च** इतिवार्तिकसहकारेण नदीसंज्ञा भवति। नदीसंज्ञात्वात् तन्निमित्तकं कार्यं ह्रस्वः, आडागम इत्यादीनि कार्याणि भवन्ति।

**एवमेव खलं पुनातीति** इत्यर्थे खलपूशब्दः। तस्य प्रथमैकवचने खलपूः इति। खलपूशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ खलपू औ इत्यवस्थायाम् **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रेण उवङि प्राप्ते –

**ओः सुपि 6.4.83 धात्वयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।**

**गतिकारकेतरपूर्वपदस्य यण् नेष्यते ( वा.5034 ) खलप्वौ। खलप्व इत्यादि। एवं सुल्वादयः।**

**अनेकाचः किम्? लूः, लुवौ लुवः। धात्ववयव – इति किम्? उल्लूः, उल्ल्वौ, उल्लवः। असंयोगपूर्वस्य किम्? कटप्रूः, कटप्रुवौ, कटप्रुवः। गति इत्यादि किम्? परमलुवौ। सुपि किम्? लुलुवतुः। स्वभूः। न भूसुधियोः ( सू. 273 ) स्वभुवौ, स्वभुवः। एवं स्वयम्भूः।**

**सस्कृतव्याख्या** = ओः सुपि इति सूत्रस्य पदविभागः। ओः इति षष्ठ्यन्तं, सुपि इति सप्तम्यन्तं पदम्। अत्र **एरनेकाचोऽसंयोगपूर्वस्य** इत्यतः अनेकाचः असंयोगपूर्वस्य, **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्मात् धातु इत्यस्य षष्ठ्यन्ततया, तथा अचि इत्यनयोः, **इणो यण्** इत्यतो यण् इत्यस्य च अनुवृत्तिर्भवति। ओः इत्यत्र स्थानषष्ठी धातोः इत्यस्य विशेषणम्। विशेषणात् तदन्तविधिर्भवति। एतेन धात्वयवसंयोगपूर्वो न भवति यस्य तादृशः उवर्णान्तधातुः, अन्ते यस्य तादृशस्य अनेकाचो अङ्गस्य यण् भवति अजादिप्रत्यये परे इति सूत्रार्थः सम्पद्यते। तद्यथा खलपू औ इत्यवस्थायां यणि खलप्वौ इति।

**खलप्वौ** = खलपूशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ खलपू औ इति जाते **अचिश्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रेण प्राप्तम् उवङादेशं प्रबाध्य **ओः सुपि** इति सूत्रेण यणि वर्णसंयोगे खलप्वौ इति रूपं सिद्ध्यति।

एवं सुष्ठु लुनातीति सुलू अस्यापि रूपं भवति।

अस्मिन् सूत्रे अनेकाच् इति कथनेन लूशब्दस्य ऊकारस्य यण् न भवति, अत उवङादेशे **लुवौ लुवः लुवम्, लुवौ लुवः। लुवा लुवे लुवः लुवोः लुवाम् लुवि** इत्यादीनि रूपाणि भवन्ति।

एवमेव धात्ववयव इति कथनेन उल्लूशब्दस्य ऊकारस्य यण् भवति। **असंयोगपूर्वस्य** इति कथनेन कटप्रूः शब्दात् यण् न भवति। गति इत्यादिकथनेन परमलुवौ इत्यादौ यण् न भवति।

सुपि इत्यस्य ग्रहणेन लुलुवतुः इत्यत्र लूधातोः सत्वेऽपि तिङन्तत्वात् यण् न भवति इति।

**स्वभूः – स्वयं भवति, स्वस्माद्भवति,** इत्यर्थे स्वभू =शब्दात् प्रथमैकवचने सुविभक्तावनुबन्धलोपे सस्य रुत्वे विसर्गे स्वभूः इति सिद्धम्।

**स्वभूवौ** = स्वभूशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ **स्वभू औ** इत्यवस्थायाम् **इकोयणचि** इति सूत्रप्राप्तं यणं प्रबाध्य '**अचिश्नुधातु भ्रुवां य्वोरियङुवङौ**' इतिसूत्रेण उवङि तमपि प्रबाध्य '**ओः सुपि**' इति सूत्रेण

यणादेशः प्राप्नोति **'न भूसुधियोः'** इति सूत्रेण निषेधे **'अचिश्नुधातुरित्यादिना'** उवङि, अनुबन्धलोपे **स्वभुवौ, बहुवचने स्वभुवः** इति रूपं भवति।

एवमेव **'स्वयम्भूः'** इत्यस्यापि रूपाणि भवन्ति।

**वर्षाभूः** = वर्षासु भवतीति इत्यर्थे वर्षाभूशब्दात् प्रथमैकवचने सस्य रुत्वे विसर्गे **वर्षाभूः** इति।

वर्षा भू औ इत्यवस्थायाम् 'ओः सुपि' इति सूत्रेण प्राप्तं यणं प्रबाध्य 'न भूसुधियोः' इतिसूत्रेण निषेधः प्राप्नोति। तस्मात् तत्परिहाराय अग्रिमं सूत्रं प्रवर्तते –

**वर्षाभ्वश्च 6.4.84 अस्योवर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ, वर्षाभ्वः। दृभतीति दृम्भूः। अन्दूम्भूजम्बूकपेलूकर्कन्धूदिधिषूः ( उ.सू 93 ) इत्युणादिसूत्रेण निपातितः। दृम्भ्वौ, दृम्भ्वः। दृम्भूम्, दृम्भ्वौ, दृम्भून्। शेषं हूहूवत्। 'दृन्' इति नान्ते हिंसार्थेऽव्यये भुवः क्विप् दृन्भूः। दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः ( वा. 4118 ) दृन्भ्वम्। दृन्भ्व इत्यादि खलपूवत्। करभूः। करभ्वम्। करभ्वः। दीर्घपाठे तु करः एवं कारः। स्वार्थिकः प्रज्ञाद्यण्। कारभ्वम्। कारभ्वः। पुनर्भूर्यौगिकः पुंसि। पुनर्भ्वौ इत्यादि। दृग्भू-काराभूशब्दौ स्वयम्भूवत्।**

**इत्यूदन्ताः**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। सूत्रेऽस्मिन् पदद्वयमस्ति। वर्षाभ्व इति षष्ठ्यन्तं, च इत्यव्ययम्, अचिश्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रात् अचि इत्यस्य, **'ओः सुपि'** इत्यस्मात् सुपि इत्यस्य **इणो यण्** इत्यतश्च यण् इत्यस्यानुवृत्तिर्भवति। एवं सर्वं अन्वयं विधाय सूत्रार्थो भवति यत् अजादिसुप्प्रत्यये परे वर्षाभूशब्दस्य ऊकारस्य यणादेशो भवतीति।

**वर्षाभ्वौ** – वर्षाभूशब्दात् प्रथमाद्वितीयाबहुवचने औ विभक्तौ वर्षाभू औ इति जाते **'ओः सुपि'** इति सूत्रे यण् प्राप्ते **'न भूसुधियोः'** इतिसूत्रेण निषेधे **'वर्षाभ्वश्च'** इतिसूत्रेण यणि वर्णसंयोगे वर्षाभ्वौ इति सिद्धम्।

**दृम्भूः** = दम्भूशब्दात् प्रथमैकवचने सुविभक्तावनुबन्धलोपे सस्य रुत्वे विसर्गे दृम्भूः इति।

**दृम्भ्वौ, दृम्भ्वः** = दृम्भू प्रथमाद्वितीयाद्विवचने औ विभक्तौ, **'इको यणचि'** इतिसूत्रेण यणि दृम्भ्वौ इति सिद्धम्।

**दृम्भ्वः** = दृम्भूशब्दात् प्रथमाबहुवचने जस् विभक्तावनुबन्धलोपे अनुबन्धलोपे यणि, वर्णसंयोगे सस्य रुत्वे विसर्गे दृम्भ्वः इति सिद्धम्।

एवमेव करभू, कराभूः इत्यादीनां शब्दानां रूपं भवति।

**इत्यूदन्ताः**

**धाता** = धातृशब्दात् प्रथमैकवचने सुविभक्तावनुबन्धलोपे धातृ स् इति जाते सर्वनामस्थानसंज्ञायाम्, **'ऋतो ङिसर्वनामस्थानयोः'** इतिसूत्रेण गुणे प्राप्ते तं प्रबाध्य **'ऋदुशनस्पुरुदंसोऽनेहसां च'** इतिसूत्रेण अनङादेशेऽनुबन्धलोपे धातन् स् इति जाते उपधासंज्ञायाम्, **'अप्तृन्तृचस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ-प्रशास्तॄणाम्'** इतिसूत्रेण उपधादीर्घे धातान् स् इति जाते, **'हलङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'** इतिसूत्रेण स्लोपे **'नलोपः प्रातिपदिकान्तस्य'** इति सूत्रेण नलोपे धाता इति सिद्धम्।

**धातारौ** = धातृशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ, सर्वनामस्थानसंज्ञायाम्, **'ऋतो ङिसर्वनामस्थानयोः'** इतिसूत्रेण ऋकारस्य गुणे, रपरत्वे, धातर् औ इत्यवस्थायाम्, **'अप्तृन्तृच्स्वसृनप्त्रादिना'** सूत्रेण उपधादीर्घे धातार् औ इति जाते वर्णसम्मेलने धातारौ इति रूपं भवति।

एवमेव जसि–**धातारः**, अमि–**धातारम्** इति।

**धातॄन्** = धातृशब्दात् द्वितीयाबहुवचने शसि, अनुबन्धलोपे धातृ अस् इति जाते **प्रथमयोः पूर्वसवर्णः** इतिसूत्रेण पूर्वसवर्णदीर्घे, **तस्माच्छसोः नः पुंसि** इतिसूत्रेण सस्य नत्वे धातॄन् इति रूपं सिद्ध्यति।

धातृशब्दात् षष्ठीबहुवचने आम् विभक्तौ नुटि, अनुबन्धलोपे दीर्घे च धातॄनाम् इत्यवस्थायाम् – प्रवर्तते वार्तिकमिदम् –

**ऋर्णान्नस्य णत्वं वाच्यम्** (वा. 4969) धातॄणामित्यादि। एवं नप्त्रादयः। उद्गातारौ। पिता। व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य **नियमार्थतत्वान्न दीर्घः।** पितरौ, पितरः। पितरम्, पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हे नः।

**संस्कृतव्याख्या** = (ऋवर्णान्न) इदं तु वार्तिकं णत्वविधायकसूत्राणां सर्वेषां शेषभूतम्। ऋवर्णात् नस्य णत्वं वाच्यम् इति पदविभागः। ऋवर्णात् अव्यवहित परस्य नकारस्य स्थाने णकारादेशो भवतीति वार्तिकार्थः। धातॄनाम् इत्यस्य असमानपदत्वात् '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' इतिसूत्रेण न णत्वम्, **रषाभ्यां नोणः** इत्यनेनैव सम्भवात्। तस्मात् अस्य वार्तिकस्य विषये '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' सूत्रस्य न प्रवृत्तिरिति।

**धातॄणाम्** = धातृशब्दात् षष्ठीबहुवचने आमि विभक्तावनुबन्धलोपे धातृ आम् इत्यवस्थायां '**ह्रस्वनद्यापो नुट्**' इति सूत्रेण नुटि, अनुबन्धलोपे धातृ नाम् इति जाते, **नामि** इति सूत्रेण दीर्घे '**ऋवर्णान्नस्य णत्वं वाच्यम्**' इतिसूत्रेण नस्य णत्वे धातॄणाम् इति रूपं सिद्ध्यति।

**धातरि** = धातृशब्दात् सप्तम्येकवचने ङि, अनुबन्धलोपे '**ऋतो ङि सर्वनामस्थानयोः**' इति सूत्रेण गुणे, रपरत्वे, वर्णसम्मेलने च धातरि इति।

**धातृषु** = धातृशब्दात् सप्तमीबहुवचने सुप्प्रत्ययेऽनुबन्धलोपे, **आदेशप्रत्यययोः** इति सूत्रेण सस्य षत्वे धातृषु इति।

एवमेव **नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ** शब्दानामपि रूपाणि भवन्ति।

**उद्गातारौ** = यद्यपि असृन्तृच् इत्यादिसूत्रे नप्त्रादीनां ग्रहणं व्युत्पत्तिपक्षे उणादिनिष्पन्नानां नप्त्रादीनामेव दीर्घः नान्यस्य इति नियमार्थं तथापि उद्गातारः इति भाष्यप्रयोगात् 'उद्गातारौ' इत्यत्र दीर्घः।

**उद्गाता** = उद्गातृशब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे, उद्गातृ सु इत्यवस्थायां, सर्वनामस्थानसंज्ञायाम्, '**ऋदुशनस्पुरुदंसोऽनेहसां च**' इति सूत्रेण अनङि अनुबन्धलोपे, **सर्वनामस्थाने चाऽसम्बुद्धौ** इति सूत्रेण दीर्घे, सलोपे, नलोपे च उद्गाता इति।

**उद्गातारौ** = उद्गातृशब्दात् प्रथमाद्वितीया द्विवचने औ विभक्तौ उद्गातृ औ इति जाते, **सर्वनामस्थानसंज्ञायां**, **ऋतो ङि सर्वनामस्थानयोः** इति सूत्रेण गुणे, रपरत्वे दीर्घे, वर्णसम्मेलने उद्गातारौ इति।

**पिता** = पातीति पिता। पितृशब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे '**ऋतो ङि सर्वनामस्थानयोः**' इति सूत्रेण प्राप्तं गुणं प्रबाध्य, ऋदुशनस् इत्यादिसूत्रेण अनङादेशेऽनुबन्धलोपे पितन् स् इति जाते, उपधासंज्ञायां **सर्वनामस्थाने चाऽसम्बुद्धौ** इति सूत्रेण उपधादीर्घे, हलङ्यादिना सलोपे, **नलोपः प्रातिपदिकान्तस्य** इति सूत्रेण नलोपे पिता इति रूपं भवति।

**पितरौ** = पितृशब्दात् प्रथमाद्वितीयाद्विवचने औविभक्तौ पितृ औ इत्यवस्थायाम् सर्वनामस्थानसंज्ञायाम्, '**ऋतो ङि सर्वनामस्थानयोः**' इति सूत्रेण गुणे रपरत्वे दीर्घाभावे, वर्णसंयोगे पितरौ इति।

एवमेव **जसि – पितरः,** अमि **पितरम्**। शेषं धातृशब्दवत्। एवं **जामातृ भ्रातृ** इत्यादीनां शब्दानां रूपाणि भवन्तीति।

**ना** – नयति कार्याणि इत्यर्थे – **'नयतेर्डिच्च'** इत्युणादिसूत्रेण 'ऋप्रत्यये **डिद्वद्भावे'** टिलोपे मनुष्यवाचिनो **'नृ'** शब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे नृ सु इति जाते **'ऋतो ङि सर्वनामस्थानयोः'** इतिसूत्रेण प्राप्तं गुणं प्रबाध्य अनङादेशे अनुबन्धलोप नन् स इति जाते, उपधासंज्ञायाम्, उपधादीर्घे सलोपे, नलोपे च ना इति रूपं भवति।

**नरौ** = नृशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ, सर्वनामस्थानसंज्ञायाम्, **'ऋतो ङि सर्वनामस्थानयोः'** इतिसूत्रेण गुणे रपरत्वे, वर्णसंयोगे नरौ इति।

**नरः**= नृशब्दात् प्रथमाबहुवचने जस् विभक्तौ, अनुबन्धलोपे, सर्वनामस्थानसंज्ञायां, गुणे रपरत्वे वर्णसंयोगे नरस् इति जाते सस्य रुत्वे विसर्गे नरः इति।

**हे नः**= नृशब्दात् सम्बोधने एकवचने सुविभक्तौ अनुबन्धलोपे, गुणे रपरत्वे हे नर् स् इति जाते सस्य लोपे रेफस्य विसर्गे **हे नः** इति।

**नॄ च 6.4.6 नृ इत्येतस्य नामि वा दीर्घः स्यात्, नृणाम्, नॄणाम्।**

**इत्यृदन्तः**

**संस्कृतव्याख्या** – अत्र सूत्रे नृ इति लुप्तषष्ठीकं पदं, च इत्यव्ययपदम्। अत्र **छन्दस्युभयथा** इति सूत्रात् उभयथा इत्यस्य, **ढ्रलोपे पूर्वस्य दीर्घोऽणः** इति सूत्रात् दीर्घस्य, नामि इत्यस्य चानुवृत्तिर्भवति। उभयथा – इत्यस्य दीर्घो भवति, न भवति इत्यर्थः। एतेन नाम् परे नृशब्दस्य विकल्पने दीर्घो भवतीति सूत्रार्थः।

**नृणाम्, नॄणाम्** = नृशब्दात् षष्ठीबहुवचने आम् विभक्तौ, **ह्रस्वनद्यापो नुट्** इति सूत्रेण नुटि, अनुबन्धलोपे, नृ न् आम् इति जाते **नामि**, इतिसूत्रेण नित्यं दीर्घे प्राप्ते तं प्रबाध्य **नॄ च** इति सूत्रेण विकल्पेन दीर्घे, **'ऋवर्णान्नस्य णत्वं वाच्यम्'** इतिसूत्रेण नस्य णत्वे नॄणाम् इति विकल्पपक्षे नृणाम् इति रूपं सिद्ध्यति।

कृतॄ अनयोरनुकरणे **प्रकृतिवदनुकरणम्** (प.37) इति वैकल्पिकातिदेशादित्वे रपरत्वे **कीः, किरौ, किरः**। **तीः, तिरौ, तिर** इत्यादि। गीर्वत् इत्वाभावपक्षे तु **ऋदुशनस्** (276) इति ऋतो ङि (275) इति च तपरकरणादनङ्गुणो न। **कॄः क्रौ क्रः**। **कॄम् क्रौ कॄन्**। **क्रा के** इत्यादि।

गम्लृ शक्लृ अनयोरनुकरणे अनङ्। **गमा**। **शका**। गुणविषये तु लपरत्वम्। **गमलौ**। **गमलः**। **गमलम् गमलौ गम्लॄन्**। **गम्ला**। **गम्ले**। **'ङसिङसोस्तु'** ऋत उत् (सृ. 279) इत्युत्वे लपरत्वे **'संयोगान्तस्य लोपः'** (सृ. 54) गमुल्। शकुल्। इति लृदन्ताः।

इना सह वर्तते इति सेः। सयः। स्मृतेः। स्मृतयौ। स्मृतयः।

**इत्येदन्ताः**

**संस्कृतव्याख्या** – दीर्घ ॠकारान्तशब्दविवेचनप्रसङ्गे कृधातोरनुकरणं विधाय **प्रकृतिवदनुकरणं** भवति इति नियमेन वैकल्पिकातिदेशे इत्वे रपरत्वे दीर्घे च कृते कीर् शब्दात् प्रथमैकवचने **कीः**, द्विवचने **किरौ**, बहुवचने **किरः** एवमेव तृधातोः निष्पन्नस्य तीर् शब्दस्य **तीः तिरौ तिरः** इत्यादिरूपाणि भवन्ति। इत्वाभावपक्षे **कॄः, क्रौ क्रः** इत्यादीनि बोध्यानि।

गम्लृ शक्लृ अनयोरनुकरणं स्वीकृत्य गम्लृशब्दात् प्रथमैकवचने सौ **गम्ला शक्ला** इति। गुणविषये तु लपरत्वम्, **गमलौ, गमलः**।

ङसिङसोस्तु '**ऋत उत्**'(सू.279) इत्युत्त्वे लपरत्वे संयोगान्तस्य लोपे गमुल्-शकुल् इत्यादि। षष्ठीबहुवचने दीर्घे **गमॄणाम्**। इति लृदन्ताः।

**एदन्तशब्दः** - सेः = इना सह वर्तते इत्यर्थे 'से' शब्दात् प्रथमैकवचने सुविभक्तौ, अनुबन्धलोपे से स् इत्यवस्थायां **सेः** इति रूपं भवति द्विवचने से औ इति जाते अयादेशे **सयौ**, बहुवचने **सयः**।

एवमेव स्मृतः इः कामो येन इत्यर्थे **स्मृते** शब्दात् **स्मृतेः, स्मृतयौ, स्मृतयः** इत्यादीनि रूपाणि भवन्ति।

**इत्येदन्ताः**

**अथ ओकारान्तशब्दः**

**गोतो णित् 7.1.90 गोशब्दात् परं सर्वनामस्थानं णिद्वत् स्यात्। गौः। गावौ। गावः।**

**संस्कृतव्याख्या** - सूत्रमिदम् अतिदेशसूत्रम्। अत्र पदद्वयम्। गोतः इति पञ्चम्यन्तम्, णित् प्रथमान्तम्। **इतोऽत् सर्वनामस्थाने** इत्यतो विभक्तिविपरिणामेन 'सर्वनामस्थानम्' इत्यस्यानुवृत्तिर्भवति। एतेन ओकारान्तशब्दस्य विहितः सर्वनामस्थानसंज्ञकः प्रत्ययः णिद्वद्भवति इति सूत्रार्थः। णिद्वद्भावात् तत्प्रयुक्तं कार्यं भवति। तद्यथा गो स् इत्यत्र वृद्धौ गौस् इति जाते गौः इति।

**गौः** - गच्छति यो येन वा इत्यर्थे गम् धातोः 'गमेर्डोः' इत्यनेन डोप्रत्ययेऽनुबन्धलोपे 'गो सु' इति जाते, सर्वनामस्थानसंज्ञायां, '**गो गो तो णित्**' इति सूत्रेण णिद्वद्भावे '**अचो ञ्णिति**' इतिसूत्रेण ओकारस्य वृद्धौ औकारादेशे गौस् इति जाते सस्य रुत्वे विसर्गे गौः इति रूपं भवति।

**गावौ** - गोशब्दात् प्रथमाद्वितीया द्विवचने औ जाते गो औ, सर्वनामस्थानसंज्ञायाम्, णिद्वद्भावे वृद्धौ गौ औ इति स्थिति '**एचोऽयवायावः**' इतिसूत्रेण आवादेशे वर्णसंयोगे गावौ इति।

**गावः** = गोशब्दात् प्रथमाबहुवचने जसि, अनुबन्धलोपे णिद्वद्भावे, वृद्धौ आवादेशे वर्णसंयोगे गावस् इति जाते सस्य रुत्वे विसर्गे गाव इति।

**औतोऽम्शसोः 6.1.93 'आ ओतः' इतिच्छेदः। ओकारादम्शसोरचि परे आकार एकादेशः स्यात्। शसा साहचर्यात्सुबेव अम् गृह्यते। नेह - अचिनवम्, असुनवम्। गाम्, गावौ, गाः। गवा। गवे। गोः इत्यादि। ओतो णिदिति वाच्यम्, विहितविशेषणं च। तेन सुद्यौः, सुद्यावौ, सुद्यावः। सुद्यामित्यादि। ओकारान्तद्विहितं सर्वनामस्थानम् इति व्याख्यानान्नेह - हे भानो। हे भानवः। उः शम्भुः, स्मृतो येन सः स्मृतौः, स्मृतावौ, स्मृतावः। स्मृताम्, स्मृतावौ, स्मृताः इत्यादि।**

**इत्योदन्ताः**

**संस्कृतव्याख्या** - आ ओतः अम् शसोः इति सूत्रस्य पदविभागः। आ इति लुप्तप्रथमाकम्, ओतः पञ्चम्यन्तम्, अम्शसोः इति सप्तम्यन्तम्। **इको यणचि** इति सूत्रात् अचि इत्यस्यानुवृत्तिः। '**एकः पूर्वपरयोः**' इत्यस्याधिकारः। इत्थम् - ओकारात् अम् शस् सम्बन्धिनोऽच् परे पूर्वपरयोः स्थाने 'औ' इत्यादेशो भवतीति सूत्रार्थः। अत्र शस्प्रत्यय साहचर्यात् अम् एव गृह्यते - न तु तिङप्रत्ययस्थानिको अम् इति, अत एव अचिनो+अम् इत्यत्र न आकारादेशे, अवादेशे अचिनवम्, असुनवम् इत्यादिरूपं भवति।

**गाम्** = गोशब्दात् द्वितीयैकवचने अम् विभक्तौ गो अम् इति जाते सर्वनामस्थानसंज्ञायां, णिद्वद्भावे, वृद्धौ प्राप्तायां तं प्रबाध्य **औतोऽम्शसोः** इति सूत्रेण ओकारस्य अकारस्य च पूर्वपरयोः स्थाने आकारादेशे वर्णसंयोगे गाम् इति रूपं भवति।

**ओतो णिदिति वाच्यम्**, विहितविशेषणं च। तेन सुद्यौः, सुद्यावौ, सुधामिति। अस्येदं तात्पर्यं यत् 'गोतो णित्' इति सूत्रविषये भाष्ये वार्तिकद्वयं पठितम्, **ओतो णिदिति वक्तव्यम्, विहितविशेषणञ्च**। अत्रेदं तत्त्वम् – गोतो णित् इत्यस्य स्थाने ओतो णित् इति पठितव्यम्, विहितम् इति विशेषणञ्च देयम्। एतेन गो शब्देभ्योऽतिरिक्तस्य – सुद्यो इत्यादिशब्दस्यापि णिद्वद्भावः स्यात्। किञ्च 'गोतो णित्' इत्यत्र ओतः पदस्य ओकाराद्विहितं सर्वनामस्थानम् इति व्याख्यानेन हे भानो स् इत्यादौ न आकारादेशः। हे भानो, हे भानवः इति।

एवमेव उः=शम्भुः, स्मृतौ येन सः स्मृतो तस्मात् स्मृतौशब्दात् प्रथमैकवचने सुविभक्तौ, अनुबन्धलोपे, णिद्वद्भावे, वृद्धौ स्मृतौस् इति जाते सस्य रुत्वे विसर्गे स्मृतौः इति। एवमेव स्मृतावौ स्मृताव इत्यादयः। **इत्योदन्ताः**।

**रायो हलि 7.2.85 रैशब्दस्य आकारोऽन्तादेशः स्याद्धलि विभक्तौ। राः। अच्यायादेशः। रायौ, रायः। रायम्, रायौ, रायः। राया, राभ्याम् इत्यादि।**

**इत्यैदन्ताः**

**ग्लौः। ग्लावौ। ग्लावः। ग्लावम्। ग्लावौ। ग्लावः इत्यादि। औतोऽम्शसोः ( सू. 285 ) इतीह न प्रवर्तते। ऐऔच् ( म.सू.४ ) इति सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात्।**

**इत्यौदन्ताः**

**इत्यजन्तपुल्लिङ्गप्रकरणम्**

**संस्कृतव्याख्या – रायो...** विधिसूत्रमिदम्। रायः इति षष्ठ्यन्तं, हलि सप्तम्यन्तं पदम्। **अष्टन् आ विभक्तौ** इत्यतः आ इत्यस्यानुवृत्तिर्भवति। एतेन हलादिविभक्तौ परस्य रैशब्दस्य स्थाने आकारादेशः स्यात् इति।

**राः** – रै शब्दात् प्रातिपदिकसंज्ञायां सुविभक्तौ, अनुबन्धलोपे रै स् इति जाते, '**रायो हलि**' इति सूत्रेण ऐकारस्य स्थाने आकारादेशे रा स् इति जाते रुत्वे विसर्गे राः इति।

**रायौ** – रै शब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ रै औ इति जाते आयादेशे, संयोगे सस्य रुत्वे विसर्गे रायौ। रायः। इत्यादि।

**ग्लौः** – ग्लायति वियोगिनां हर्षक्षयं करोतीत्यर्थे उणादि डौ प्रत्ययेऽनुबन्धलोपे **ग्लौ** शब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे सस्य रुत्वे विसर्गे ग्लौः इति।

**ग्लावौ** = ग्लौ शब्दात् प्रथमाद्वितीया द्विवचने औ विभक्तौ ग्लौ औ इत्यवस्थायां **एचोऽयवायावः** इति सूत्रेण आवादेशे संयोगे ग्लावौ इति।

**ग्लावः** – ग्लौशब्दात् प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे आवादेशे सस्य रुत्वे विसर्गे ग्लाव इति।

अत्रेदमाशङ्कते यत् ओकारस्य स्थाने '**औतोऽम्शसोः**' इति सूत्रेण विधीयमान आकारादेश औकारस्यापि स्थाने भवेत् ओ–औ इत्यनयोः सावार्ण्यात् इति। तदुच्यते, **औतोऽम्शसो इतीह न प्रवर्तते**। अस्यायम्भावः, 'ऐऔच्' इति सूत्रारम्भसामर्थ्यात् ऐ औ, ओ औ इत्यनयोः सवर्णसंज्ञा न भवतीति ज्ञापनात् अत्रापि ओकारस्य स्थाने विधीयमान आकारादेशे औकारस्य स्थाने न भवतीति।

**इत्यौदन्ताः**

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितम् अजन्तपुँल्लिङ्गप्रकरणं समाप्तम्।**

# अथाजन्तस्त्रीलिङ्गप्रकरणम्

**रमा** = **रमयति विष्णुं जगद् च, रमते विष्णुना साकं वा** इत्यर्थे रमाशब्दात् **ङ्याप्प्रातिपदिकात्** इत्यधिकारे प्रथमैकवचने **स्वौजस्मौट्** इत्यादिना सूत्रेण सु प्रत्ययेऽनुबन्धलोपे रमा स् इत्यवस्थायाम्, **हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इति सूत्रेण सुलोपे रमा इति।

**औङ आपः 7.1.18 आबन्तादङ्गात् परस्यौङः शी स्यात्। औङ् इत्यौकारविभक्तेः संज्ञा। रमे। रमा।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। औङ आपः इति पदद्वयम्। औङः इति षष्ठ्यन्तं पदम् आपः इति पञ्चम्यन्तम्। औङ् इत्यनेन प्रथमाद्वितीययोः औ औट् इत्यनयोर्ग्रहणं भवति। अङ्गस्य अधिकारः तस्य वचनविपरिणामेण अङ्गात् इति पञ्चम्यन्तेनान्वयः। जसः शी इत्यतेन शी इत्यस्यानुवृत्तिः। आप इति विशेषणं तस्मात् तदन्तविधिः। इत्थम् आबन्तात् अङ्गात् परस्य औ इत्यस्य स्थाने शी इत्यादेशो भवतीति सूत्रार्थः। तद्यथा – रमा औ इत्यवस्थायाम् औ स्थाने शी इत्यादेशे रमा शी इति।

**रमे** = रमाशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ रमा औ इति जाते '**औङः आपः**' इति सूत्रेण औस्थाने शी इत्यादेशे रमा शी इति जातेऽनुबन्धलोपे रमा ई इत्यवस्थायाम् '**आद्गुणः**' इतिसूत्रेण गुणे रमे इति रूपं भवति।

**रमाः** = रमाशब्दात् प्रथमाबहुवचने जस् विभक्तौ, अनुबन्धलोपे रमा अस् इति जाते '**प्रथमयोः पूर्वसवर्णः**' इतिसूत्रेण पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे रमाः इति सिद्धम्।

**सम्बुद्धौ च 7.3.106 आपः एकारः स्यात्सम्बुद्धौ। एङ्ह्रस्वात् ( सू. 193 ) इति सम्बुद्धिलोपः, हे रमे। हे रमे, हे रमाः। रमाम्। रमे। रमा। स्त्रीत्वान्नत्वाभावः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयम्, सम्बुद्धौ इति सप्तम्यन्तं, च इत्यव्ययम्, अत्र आङि आपः इतिसूत्रात् आपः इत्यस्य, बहुवचने झल्येत् इत्यतः एत् इत्यस्यानुवृत्तिर्भवति। एतेन आबन्ताङ्गस्य एकारादेशो भवति सम्बुद्धिपरे इति सूत्रार्थः।

**हे रमा** = रमाशब्दात् सम्बुद्धिविवक्षायाम् एकवचने सुविभक्तौ हे रमा सु इत्यवस्थायाम् **एकवचनं सम्बुद्धि** इति सम्बुद्धिसंज्ञायां, सम्बुद्धौ च इतिसूत्रेण आकारस्य स्थाने एकारादेशे हे रमे स् इति जाते, हलङ्यादिना सलोपे हे रमे इति सिद्धम्।

**रमाम्** = रमाशब्दात् द्वितीयैकवचने अम् विभक्तौ रमा अम् इति जाते '**अमिपूर्वः**' इतिसूत्रेण पूर्वरूपे रमाम् इति रूपं सिद्ध्यति।

**रमाः** = रमाशब्दात् द्वितीयाबहुवचने शस् विभक्तावनुबन्धलोपे रमा अस् इति जाते '**प्रथमयोः पूर्वसवर्णः दीर्घः**' इति सूत्रेण दीर्घे, स्त्रीत्वान्नत्वाभावः सस्य रुत्वे विसर्गे रमाः इति सिद्धम्।

**आङि चापः 7.3.105 आङि ओसि च परे आबन्तस्याङ्गस्यैकारः स्यात्। रमया। रमाभ्याम्। रमाभिः।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। सूत्रेऽस्मिन् पदत्रयम्। आङि इति सप्तम्यन्तं च इत्यव्ययम्, आप इति षष्ठ्यन्तं पदम्। अत्र **ओसि च** इतिसूत्रात् 'ओसि' इत्यस्य **बहुवचने झल्येत** इत्यतः एत् इत्यस्य चानुवृत्तिर्भवति। अङ्गस्य अधिकारः आपः इति विशेषणं तेन तदन्तविधिः, '**अलोऽन्त्यस्य**' इतिसूत्रेण 'अन्त्यस्य' इत्यर्थो गृह्यते। एतेन आङि ओसि च परे आबन्तस्य अङ्गस्य अन्त्यस्य स्थाने ऐकारादेशो भवतीति सूत्रार्थः संगच्छते। तद्यथा रमा टा, अनुबन्धलोपे रमा इत्यस्याकारस्य स्थाने ऐकारादेशे रमै आ, अयादेशे रमया इति।

**रमया** = रमाशब्दात् प्रातिपदिकाधिकारात् तृतीयैकवचने टाविभक्तौ अनुबन्धलोपे रमा आ इत्यवस्थायाम् सवर्णदीर्घं प्रबाध्य '**आङि चापः**' इति सूत्रेण आकारस्य स्थाने ऐकारादेशे रमै आ इत्यवस्थायाम्, '**एचोऽयवायावः**' इतिसूत्रेण अयादेशे वर्णसंयोगे रमया इति।

**रमाभ्याम्** = रमाशब्दात् भ्याम् विभक्तौ वर्णसम्मेलने रमाभ्याम्।

**रमाभिः** = रमाशब्दात् तृतीयाबहुवचने भिस्विभक्तौ, सस्य रुत्वे विसर्गे रमाभिः।

**याडापः 7.3.113 आपः परस्य ङिद्वचनस्य याडागमः स्यात्। वृद्धिरेचि ( सू. 72 ) रमायै। सवर्णदीर्घः। रमायाः। रमायाः, रमयोः, रमाणाम्। रमायाम्, रमयोः, रमासु। एवं दुर्गादयः।**

**संस्कृतव्याख्या** – याट् आपः इतिसूत्रस्य पदविभागः। याट् इति प्रथमान्तम् आपः इति पञ्चम्यन्तं पदम्। '**घेर्ङिति**' इतिसूत्रात् ङिति इत्यस्य पञ्चम्यन्तत्वेन विभक्तिविपरिणामेनान्वयः। याट् इत्यस्य टित्वात् ङिद्विभक्ति पर एव याडागमः। तेन ङे ङसि ङस् ङि इत्येतेषां प्राक् याडागमः। आबन्तादङ्गात् परस्य ङित्विभक्तेः याडागमो भवति इति सूत्रार्थः सम्पद्यते। तद्यथा रमा ङे अनुबन्धलोपे रमा ए इत्यवस्थायाम् याडागमे रमाया ए इति वृद्धौ **रमायै** इति रूपम्।

**रमायै** – रमाशब्दात् प्रातिपदिकात् चतुर्थ्येकवचने ङे विभक्तौ, अनुबन्धलोपे रमा ए इत्यवस्थायाम्, याडापः इतिसूत्रेण याडागमेऽनुबन्धलोपे रमाया ए इति जाते **वृद्धिरेचि** इतिसूत्रेण वृद्धौ रमायै इति रूपं भवति।

**रमाभ्यः** = रमाशब्दात् चतुर्थीपञ्चम्योः द्विवचने भ्यस् विभक्तौ रमाभ्यस् इति जाते सस्य रुत्वे विसर्गे रमाभ्यः इति रूपं भवति।

**रमायाः** = रमाशब्दात् पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे रमा अस् इति जाते **याडापः** इतिसूत्रेण याडागमेऽनुबन्धलोपे रमाया अस् इति जाते, सवर्णदीर्घे सस्य रुत्वे विसर्गे रमायाः इति।

**रमयोः** = रमाशब्दात् षष्ठीसप्तमीद्विवचने ओस् विभक्तौ रमा ओस् इति जाते '**आङि चापः**' इतिसूत्रेण आकारस्य स्थाने एकारादेशे, '**एचोऽयवायावः**' इतिसूत्रेण अयादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे रमयोः इति रूपं भवति।

**रमाणाम्** = रमाशब्दात् षष्ठीबहुवचने आम् विभक्तौ रमा आम् इति जाते, '**ह्रस्वनद्यापो नुट्**' इतिसूत्रेण आबन्तत्वात् नुटि अनुबन्धलोपे वर्णसंयोगे रमानाम् इति जाते '**अट्कुप्वाङ्नुम्व्यवायेऽपि**' इतिसूत्रेण नस्य णत्वे रमाणाम् इति सिद्धम्।

**रमायाम्** – रमाशब्दात् सप्तम्येकवचने ङि विभक्तौ रमा ङि अनुबन्धलोपे याडागमेऽनुबन्धलोपे, '**ङेराम्नद्याम्नीभ्यः**' इतिसूत्रेण ङि स्थाने आयादेशे रमाया आम् इति जाते सवर्णदीर्घे रमायाम् इति रूपं सिद्धम्।

**रमासु** = रमाशब्दात् सप्तमीबहुवचने सुप्विभक्तौ, अनुबन्धलोपे संयोगे रमासु इति सिद्धम्।

## सर्वाशब्द

**सर्वा** = आबन्त सर्वाशब्दात् प्रथमैकवचने सुविभक्त्यौ, हलङ्यादिना सुलोपे सर्वा इति।

**सर्वे** = सर्वाशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ, **औङ आपः** इतिसूत्रेण औ इत्यस्य स्थाने शी इत्यादेशेऽनुबन्धलोपे, '**आद्गुणः**' इति सूत्रेण गुणे सर्वे इति।

**सर्वाः** – सर्वा शब्दात् प्रथमाविभक्तौ बहुवचने जस् प्रत्यये अनुबन्धलोपे सर्वा अस् इति जाते पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे सर्वाः इति।

एवमेव **सर्वम्, सर्वे, सर्वान्** इत्यादि।

**सर्वया** = सर्वा शब्दात् तृतीयैकवचने टा विभक्तावनुबन्धलोपे, '**आङि चापः**' इतिसूत्रेण सर्वा इत्यस्याकारस्य एकारादेशे, अयादेशे, वर्णसंयोगे सर्वया इति।

**सर्वनाम्नः स्याड्ढ्रस्वश्च 7.3.114 आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः। याटोऽपवादः। सर्वस्यै। सर्वस्याः। सर्वस्याः। एकादेशस्य पूर्वान्तत्वेन ग्रहणात्, आमि सर्वनाम्नः ( सू.२१७ ) सुट् सर्वासाम्। सर्वस्याम्। सर्वयोः। सर्वासु। एवं विश्वा आदयोऽप्याबन्ताः।**

**संस्कृतव्याख्या** – अपवादसूत्रमिदम्। सर्वनाम्नः स्याट् ह्रस्वश्च इतिसूत्रस्य पदविभागः। अत्र सर्वनाम्नः इति पञ्चम्यन्तं, स्याट् इति प्रथमान्तं, ह्रस्व इति प्रथमान्तं च इत्यव्ययपदम्। अत्र **याडापः** इत्यतः आपः '**घेर्ङिति**' इत्यतश्च ङिति इत्यस्यानुवृत्तिर्भवति। सूत्रे अङ्गस्य अधिकारः तस्य च वचनविपरिणामेन पञ्चम्यन्तत्वेनान्वयः, आपः इति विशेषणं, तेन तदन्तविधिः। सूत्रे सर्वनाम्नः आबन्तात् अङ्गात् इत्येतेषां सामानाधिकरण्यम्। इत्थम् – सर्वनामसंज्ञकात् आबन्तात् शब्दात् परस्य ङितः (ङित्विभक्तेः) स्याट् इत्यस्यागमः आपश्च ह्रस्वो भवतीति सूत्रार्थः। इदं सूत्रम् याट् इत्यस्यापवादसूत्रम्।

**सर्वस्यै** = सर्वा शब्दात् '**सर्वादीनि सर्वनामानि**' इतिसूत्रेण सर्वनामसंज्ञायां प्रातिपदिकत्वात् चतुर्थ्येकवचने ङे विभक्तावनुबन्धलोपे सर्वा ए इति जाते '**सर्वनाम्नः स्याड्ढ्रस्वश्च**' इतिसूत्रेण स्याडागमेऽनुबन्धलोपे 'सर्वस्या ए' इति जाते **वृद्धिरेचि** इतिसूत्रेण वृद्धौ सर्वस्यै इति रूपं भवति।

**सर्वस्याः** = सर्वाशब्दात् पञ्चमीषष्ठ्येकवचने यथाक्रमं ङसिङस् विभक्तौ अनुबन्धलोपे सर्वा अस् इति जाते, '**सर्वनाम्नः स्याड्ढ्रस्वश्च**' इतिसूत्रेण स्याडागमेऽनुबन्धलोपे सर्वस्या अस् इति जाते सवर्णदीर्घे सस्य रुत्वे विसर्गे सर्वस्याः इति।

**सर्वयोः** = सर्वा शब्दात् षष्ठीसप्तमीद्विवचने ओस् विभक्तौ सर्वा ओस् इति जाते '**आङि चापः**' इतिसूत्रेण सर्वा इत्यस्य आकारस्य एकारादेशे, अयादेशे सर्वयोस् इति जाते सस्य रुत्वे विसर्गे सर्वयोः इति।

सर्वा शब्दस्य आकारान्तत्वे सर्वादिगणे पाठाभावेऽपि सर्व आ (टाप्) इत्यत्र एकादेशस्य दीर्घस्य पूर्वान्तवद्भावेन अकारान्तत्वमादाय तस्य च सर्वादिगणे पाठात् सर्वाशब्दस्यापि सर्वनामता भवतीति कथयति मूले – **एकादेशस्य पूर्वान्तत्वेन ग्रहणात् आमिसर्वनाम्नः सुट्। सर्वासाम्।**

**सर्वासाम्** = सर्वाशब्दात् षष्ठीबहुवचने आम् विभक्तौ सर्वा आम् इति जाते एकादेशस्य पूर्वान्तवद्भावेन '**सर्वादीनि सर्वनामानि**' इति सूत्रेण सर्वनामसंज्ञायाम् '**आमि सर्वनाम्नः सुट्**' इतिसूत्रेण सुटि अनुबन्धलोपे वर्णसम्मेलने सर्वासाम् इति।

**सर्वस्याम्** = सर्वाशब्दात् सप्तम्येकवचने ङिविभक्तौ सर्वा ङि इति जाते **'ङे राम्नद्याम्नीभ्यः'** इतिसूत्रेण ङिस्थाने आमादेशे, **'सर्वनाम्नः स्याड्ढ्रस्वश्च'** इति सूत्रेण स्याडागमेऽनुबन्धलोपे सर्वस्या अम् इति जाते सवर्णदीर्घे **सर्वास्याम्** इति।

**सर्वासु** = सर्वाशब्दात् सप्तमीबहुवचने सुप् प्रत्ययेऽनुबन्धलोपे सर्वासु इति सिद्धम्। एवमेव **विश्वा, कतरा, कतमा, इत्यादीनामपि रूपाणि भवन्ति** इति।

**विभाषा दिक्समासे बहुव्रीहौ 1.1.281**

**अत्र सर्वनामता वा स्यात्। उत्तरपूर्वस्यै, उत्तरपूर्वायै।**

**दिङ्नामान्यन्तराले ( सू.854 ) इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह-योत्तरा सा पूर्वा यस्या उन्मुग्धायास्तस्यै उत्तरपूर्वायै। बहुव्रीहिग्रहणं स्पष्टार्थम्। अन्तरस्यै शालायै। बाह्यायै इत्यर्थः। अपुरि इत्युक्तेर्नेह - अन्तरायै नगर्यै।**

**संस्कृतव्याख्या** - इदं सूत्रम् अपवादसूत्रम्। सूत्रेऽस्मिन् पदत्रयम्। अत्र विभाषा इति प्रथमान्तं पदम्, दिशां समासः दिक्समासः तस्मिन् दिक्समासे इति षष्ठीतत्पुरुषसमासघटितं सप्तम्यन्तपदम्। बहुव्रीहौ इति सप्तम्यन्तं पदम्। अत्र **सर्वादीनि सर्वनामानि** इति सम्पूर्णं सूत्रमनुवर्तते।

**दिङ्नामान्यन्तराले** इति सूत्रात् दिशावाचकशब्दानां बहुव्रीहिसमासः। तस्य सर्वादीनि सर्वनामानि इति सूत्रेण नित्यं सर्वनामसंज्ञा प्राप्ता तस्य वैकल्पिकत्वं विधीयते।

एवं सूत्रस्यार्थो भवति यत् दिशावाचकशब्दानां बहुव्रीहिसमासे सर्वादिशब्दस्य विकल्पेन सर्वनामसंज्ञा भवति इति। तद्यथा-

**उत्तरपूर्वस्यै, उत्तरपूर्वायै** = बहुव्रीहिसमासघटितात् उत्तरपूर्वाशब्दात् **'विभाषादिक्समासे बहुव्रीहौ'** इतिसूत्रेण विकल्पेन सर्वनामसंज्ञायां चतुर्थ्येकवचने ङे विभक्तौ उत्तरपूर्वा ङे इत्यवस्थायां **'सर्वनाम्नः स्याड्ढ्रस्वश्च'** इति सूत्रेण स्याडागमेऽनुबन्धलोपे, ह्रस्वे च सर्वस्या ए इति जाते **'वृद्धिरेचि'** इतिसूत्रेण वृद्धौ उत्तरपूर्वस्यै इति सिद्ध्यति, विकल्पपक्षे स्याडभावपक्षे **'याडापः'** इतिसूत्रेण याडागमेऽनुबन्धलोपे उत्तरपूर्वाया ए इति जाते वृद्धौ उत्तरपूर्वायै इति।

दिङ्नामान्यन्तराले इति सूत्रे दिक्शब्दोच्चारणेन प्रतिपदोक्तस्य दिक्शब्दस्यैव ग्रहणेन बहुव्रीहिसमासघटितशब्दस्य सर्वनामशब्दस्य सर्वनामसंज्ञा न भवति तद्यथा - योत्तरा सा पूर्वा यस्या उत्तरमुग्धायास्तस्यै इत्यर्थे **उत्तरपूर्वायै** इति रूपं भवति।

सूत्रे बहुव्रीहिग्रहणं स्पष्टार्थम्। तद्भावे द्वन्द्वसमासेऽपि विकल्पापत्तिः अन्यतस्यै शालायै इत्यत्र **'अन्तरं बहिर्योगोसंव्यानयोः'** इति गणसूत्रेण बाह्ये परिधानीये अर्थ एव सर्वनामसंज्ञायाम् - अन्यतरस्यै इति। **अन्तरं बहिर्योगोपसंव्यानयोः** इत्यत्र अपुरीति वक्तव्यम् इति पठितत्वात् पुरवाच्येऽपि अन्तराशब्दस्य सर्वनामसंज्ञा न भवति - **अन्तरायै नगर्यै** इति।

**विभाषा द्वितीयातृतीयाभ्याम् 7.3.115**

**आभ्यां ङितः स्याट् स्यादापश्च ह्रस्वः। इदं सूत्रं त्यक्तुं शक्यम्, तीयस्य ङित्सूपसंख्यानात्। द्वितीयस्यै, द्वितीयायै। द्वितीयस्याः, द्वितीयायाः। द्वितीयस्याः, द्वितीयायाः। द्वितीयस्याम्, द्वितीयायाम्। शेषं रमावत्। एवं तृतीया। अम्बार्थनद्योर्ह्रस्व ( सू.267 ) हे अम्ब! हे अक्क! हे अल्ल! असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न ( वा.4592 ) हे अम्बाडे! हे अम्बाले! हे अम्बिके!**

**जरा। जरसौ। शीभावात्परत्वाज्जरस्। आमि नुटः परत्वाज्जरस्, जरसामित्यादि। पक्षे हलादौ च रमावत्। इह पूर्वविप्रतिषेधेन शीभावं कृत्वा संनिपातपरिभाषाया अनित्यतां चाश्रित्य जरसी इति केचिदाहुः, तन्निर्मूलम्। यद्यपि जरसादेशस्य स्थानिवद्भावेनाबन्ततामाश्रित्य 'औङ आपः' ( सू.287 ) 'आङि चापः' ( सू. 283 ), याडापः ( सू. 290 ), ह्रस्वनद्या ( सू. 208 ) ङे राम् ( सू. 289 ) इति च पञ्चापि विधयः प्राप्ताः, एवं नस्निश्पृत्सु तथाप्यनल्विधावित्युक्तेर्न भवन्ति, 'आ आप्' इति प्रश्लिष्याकाररूपस्यैवापः सर्वत्र ग्रहणात्। एवं हल्ङ्याप् ( सू. 255 ) इति सूत्रेऽपि 'आ आप्' ङी ई इति प्रश्लेषाद् 'अतिखट्वः' निष्कौशाम्बिः इत्यादिसिद्धेदीर्घग्रहणं प्रत्याख्येयम्। न चैवमपि अतिखट्वाय इत्यत्र स्वाश्रयमाकारत्वं स्थानिवद्भावेनाप्त्वं चाश्रित्य याट् स्यादिति वाच्यम्, आबन्तं यदङ्गं ततः परस्य याड्विधानात्, उपसर्जनस्त्रीप्रत्यये तदादिनियमात्।**

**पदन्नो ( सू. 228 ) इति नासिकाया नस्, नसः, नसा। नोभ्यामित्यादि। पक्षे सुटि च रमावत्। निशाया निश्, निशः। निशा।**

**संस्कृतव्याख्या** - विभाषा....। विधिसूत्रमिदम्। अत्र पदद्वयम्, विभाषा इति प्रथमान्तं, द्वितीया च तृतीया चेति तयोरितरेतरयोगद्वन्द्वसमासघटितं द्वितीयतृतीयाभ्याम् इति पञ्चमी द्विवचनान्तं पदम्। अङ्गस्य अधिकारः। अत्र **सर्वनाम्नः स्याड्ढ्रस्वश्च** इति सूत्रात् स्याट् ह्रस्वः इत्यनयो **'घेर्ङिति'** इत्यतः ङिति इत्यस्यानुवृत्तिर्भवति, ङिति इत्यनुवर्तितस्य विभक्तिविपरिणामेन पञ्चम्यन्ततया अन्वयः। एतेन द्वितीया तृतीयाभ्याम् उत्तरस्य ङिद्वचनस्य स्याडागमः ह्रस्वश्च भवतीति सूत्रार्थः सम्पद्यते।

अत्रेदं विचार्यते यत् विभाषाप्रकरणे **तीयस्य ङित्सूपसंख्यानम्** इति वार्तिकं पठितमस्ति, द्वितीयतृतीयशब्दयोः तीयप्रत्ययान्तत्वात् तेनैव कार्ये सिद्धे किमर्थमिदं सूत्रमिति चेत् कथयति **इदं सूत्रं त्यक्तुं शक्यम्** इति। वस्तुतः तेनैव कार्ये सिद्धेऽपि स्पष्टप्रतिपत्त्यर्थमिति स्वीकारे न कश्चन दोष इति। एतेन द्वितीयाशब्दस्य विकल्पेन सर्वनामसंज्ञापक्षे द्वितीयस्यै, विकल्पपक्षे द्वितीयायै इति रूपं भवति। एवमेव तृतीया शब्दस्यापि।

**मातृ-अर्थवाचकस्य** अम्बा अक्का अल्ला इत्यासामप्यमेवमेव रूपम्। सम्बोधने **अम्बार्थनद्योर्ह्रस्व** इति सूत्रेण हे अम्ब! हे अक्क!

**असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न...** इति वार्तिकम्। अस्यायं भावः संयुक्तरहितेन डकारेण, लकारेण, ककारेण संयुक्त अम्बार्थकशब्दस्य ह्रस्वो न भवतीति। तद्यथा अम्बाडा, अम्बाला, अम्बिका शब्दात् सम्बोधने, **सम्बुद्धौ च** इतिसूत्रेण आकारस्य एकारादेशे हे अम्बाडे, हे अम्बाले, हे अम्बिके इत्यादिरूपं भवति।

**जरा** = स्त्रीलिङ्गे जराशब्दात् प्रथमैकवचने सुविभक्तावनुबन्धलोपे, तस्य हलङ्यादिना लोपे जरा इति।

**जरसौ** = जराशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ जरा औ इत्यवस्थायाम् **'औङ् आपः'** इतिसूत्रेण औकारस्य स्थाने शी इत्यादेशे प्राप्ते परत्वात् तं प्रबाध्य **'जरायाः जरसन्यतरस्याम्'** इति सूत्रेण जरास्थाने जरसादेशे वर्णसंयोगे जरसौ इति।

**जरसाम्** = जराशब्दात् षष्ठीबहुवचने आम् विभक्तौ, जरा आम् इति जाते नुटं प्रबाध्य परत्वात् जरसादेशे वर्णसंयोगे जरसाम् इति।

**पक्षे हलादौ च रमावत् रूपं बोध्यम्।**

जरा औ इत्यवस्थायां औकारस्य स्थाने शीभावः, जरास्थाने जरस् आदेशः च युगपत् प्राप्नोति तत्र युगपत्प्राप्तौ **'विप्रतिषेधे परं कार्यम्'** इति नियमात् परत्वात् जरसादेशो भवति परमत्र केषाञ्चन आचार्याणाम् इदं मतं यत् भाष्यकारेणात्र परशब्दस्येष्टवाचकत्वं, स्वीकृत्य इष्टसिद्धौ पूर्वकार्यं शीभावो भवति इति कथयति। अस्यां स्थितौ

सन्निपातपरिभाषया जराशब्दस्य स्थाने जरसादेशो न स्यात् अतः परिभाषाया अनित्यत्वमाश्रित्य जरसादेशे जरसी इति परमेतत्कथनं निर्मूलं पूर्वप्रतिषेधस्य सन्निपातपरिभाषाया अनित्यत्त्वं सूत्रज्ञापनद्वारैव भवति न सर्वत्र। अतो जरसौ इत्येवरूपमुचितं न तु जरसी इति।

अत्रेदं विशेषं विज्ञापयत्याचार्यो यत् जरा स्थाने जरसादेशस्य स्थानिवद्भावेन आकारान्तमाश्रित्य आबन्तत्वात् तन्निमित्तानि **'औङ् आपः'** **'याडापः'**, **'ह्रस्वनद्याप.......'**, **'ङे राम्'** इत्यादि पञ्चसूत्रैः विधेयानि कार्याणि प्राप्नुवन्ति परम् अनल्विधित्वात् तानि न भवन्ति। एवमेव नस् निश् पृत् इत्यादिष्वपि स्थानिवत्वेन प्राप्तानि एत्व शीभाव याट् याडागमादिकार्याणि अपि न भवन्ति।

आप्निमित्तानि कार्याणि कथम् अल्विधित्वेन स्वीकर्त्तव्यानीति जिज्ञासायां कथयन्ति मूले **'आ आप्' इति प्रश्लिष्याकाररूपस्यैव सर्वत्र ग्रहणात् अल्विधि** इति। एवमेव **'हल्ङ्याप्'** इति सूत्रेऽपि आ आप् ङी ई इति प्रश्लेषात् अतिखट्वः, निष्कौशाम्बिः सुलोपवारणाय कृतं दीर्घग्रहणं प्रत्याख्येयमिति।

न च अत्रेदम् आशङ्क्यं यत् अतिखट्वाय इत्यत्र अतिखट्व ङे इत्यवस्थायां **ङेर्य** इति सूत्रेण ङे इत्यस्य स्थाने य आदेशे **सुपि च** इतिसूत्रेण दीर्घे अतिखट्वा य इत्यवस्थायां स्वाश्रयमाकारम् दीर्घमाश्रित्य तस्य च स्थानिवत्वेन आप्त्वमाश्रित्य याट् स्यादिति वाच्यम्, आबन्तं यदङ्गं ततः परस्य याड्विधानात्। अस्येदं तात्पर्यं यत् याट्विधायकेन सूत्रेण स्वयम् आ रूपस्य आपः तङ्गात् परस्यैव ङितः याडागमो नान्यस्य, अतिखट्वा इत्यत्र तथा नास्ति, तस्मात् न याडागम इति।

अत्र पुनरिदमाशङ्कते यत् **'ष्यङः सम्प्रसारणम्'** इतिसूत्रभाष्ये स्त्रीप्रत्यये तदादिनियमस्य निषेधे 'आबन्ततदङ्गात् परस्य याडागमः' इत्यर्थाभावे अतिखट्वः इत्यत्र याट् स्यादेवेति, अत्रोच्यते – **'स्त्रीप्रत्यये चानुपसर्जनेन'** इत्यपवादपरिभाषया तदन्तविधिनिषेधाभाव इति।

नासिका शब्दः रमाशब्दवत् **नासिका, नासिके, नासिकाः, नासिकाम्, नासिके** इति, शसादिविभक्तौ **पदन्नोमासः** (सू.228) इति नासिकाया नस् इत्यादेशे **नसः। नसा। नोभ्याम्** इत्यादिरूपाणि भवन्ति पक्षे सुटि रमावत्। एवमेव **निशायाः** ........ निश् इत्यादेशे, **निशः, निशा** इत्यादि।

**नसः** = नासिकाशब्दात् **ङ्याप्प्रातिपदिकाधिकारात्** द्वितीयाबहुवचने शस्विभक्तौ अनुबन्धलोपे नासिका अस् इति जाते, **पदन्नोमास...** इत्यादिसूत्रेण नासिका स्थाने नस् आदेशे नस् अस् इत्यवस्थायां वर्णसंयोगे सस्य रुत्वे विसर्गे नसः इति।

**नोभ्याम्** = नासिकाशब्दात् तृतीयाद्विवचने भ्याम् विभक्तौ नासिका भ्याम् इति जाते नासिकास्थाने नस् इत्यादेशे, नस्. भ्याम् इत्यवस्थायां, **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण पदसंज्ञायां सस्य रुत्वे, **हशि चेति** सूत्रेण उत्वे, गुणे सम्मेलने च नोभ्याम् इति।

एवमेव निशाशब्दस्य शसादौ निश् इत्यादेशे **निशः, निशा,** निशे इत्यादिरूपाणि भवन्ति, **भ्यामादौ – निश् भ्याम्** इत्यवस्थायाम् अग्रिमं सूत्रं प्रवर्तते–

**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः 2.36**

**व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च।**

**षस्य जश्त्वेन डकारः। निड्भ्याम्। निड्भिः। सुपि ङः सि धुट् ( सू .131 ) इति पक्षे धुट्, चर्त्वम्, तस्यासिद्धत्वात् चयो द्वितीया.... ( वा. 5023 ) इति टतयोष्ठथौ न। न पदान्ताट्टोः ( सू. ) इति ष्टुत्वं न। निट्त्सु, निट्सु।**

**संस्कृतव्याख्या** - विधिसूत्रमिदम्। सूत्रेऽस्मिन् पदद्वयम्। व्रश्च भ्रस्ज सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च, श् च इत्येतेषाम् इतरेतरद्वन्द्वसमासघटितम् षष्ठी बहुवचनान्तं व्रश्चभ्रस्जसृजमृजयजराजभ्राच्छशाम् इति, षः इति प्रथमान्तं पदम्। अत्र '**झलो झलि**' इति सूत्रात् झलि इत्यस्य **स्कोसंयोगाद्योरन्ते च** इत्यतः अन्ते इत्यस्यानुवृत्तिः। पदस्य अधिकारः षष्ठ्यन्तत्वात् **अलोऽन्त्यस्य** परिभाषा प्रवर्तते। सूत्रे छ्श् इत्यनयोर्विशेषणत्वात् तदन्तविधिः। एतेन सूत्रस्यार्थो भवति यत् झलि परे पदान्ते च व्रश्च भ्रस्ज, सृज्-मृज्-यज्-राज्-भ्राज् इत्येतेषां धातूनां छकारान्तानां शकरान्तानाञ्च शब्दानामन्ते षकारादेशः स्यादिति।

**तद्यथा** - निश् भ्याम् इत्यादौ शकारस्य स्थाने षकारादेशः। षकारस्य च जश्त्वेन डकारः। निड्भ्याम्, निड्भिः। सप्तमीबहुवचने सुप् प्रत्यये परे ङसि धुट् इति सूत्रेण पक्षे धुट्, तस्य चर्त्वम्, चर्त्वस्य च असिद्धत्वात् '**चयो द्वितीया शरि**' इत्यादिवार्तिकेन टकारस्य तकारस्य च द्वितीयवर्णः ठकारादेशः थकारादेशश्च न भवति, **तदुक्तं मूले टतथयोः ठथौ न।** एवमेव **न पदान्ताट्टोरनाम्** इति सूत्रनिषेधात् ष्टुत्वं न **निट्त्सु, निट्सु।**

**निड्भ्याम्**- निशाशब्दात् भ्याम् विभक्तौ निशा भ्याम् इति जाते '**पदन्तोमास्...**' इत्यादिसूत्रेण निशास्थाने निश् इत्यादेशे, **स्वादिष्वसर्वनामस्थाने** इति सूत्रेण पदसंज्ञायाम्, '**व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः**' इतिसूत्रेण षकारोऽन्तादेशे निष् भ्याम् इत्यवस्थायां '**झलो जशोऽन्ते**' इतिसूत्रेण षकारस्य जश्त्वे डकारे कृते वर्णसम्मेलने निड्भ्याम् इति रूपं भवति।

**निड्भिः** = निशाशब्दात् भिस् प्रत्यये निशास्थाने निश् इत्यादेशे, पदसंज्ञायां व्रश्चेत्यादिना शस्य षत्वे, जश्त्वे, निड्भिस् इत्यवस्थायां सकारस्य रुत्वे विसर्गे निड्भिः इति रूपं भवति।

**निट्त्सु, निट्सु** - निशा शब्दात् सप्तमीबहुवचने सुप्प्रत्ययेऽनुबन्धलोपे निशा सु इत्यवस्थायां निशास्थाने निश् इत्यादेशे, पदसंज्ञायां व्रश्चेत्यादिना शस्य षत्वे तस्य जश्त्वे निड् सु इत्यवस्थायां '**ङः सि धुट्**' इतिसूत्रेण विकल्पेन धुडागमेऽनुबन्धलोपे निड् ध् सु इत्यवस्थायां '**खरि च**' इतिसूत्रेण धकारस्य डकारस्य च यथाक्रमं चर्त्वे निट् त् सु इत्यवस्थायां चर्त्वस्य असिद्धत्वात् '**चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्**' इति वार्तिकेन प्राप्तयोः टकारतकारयोस्थाने ठथयोः निषेधे, निट्त्सु इति स्थिते तकारस्य '**ष्टुनाष्टुः**' इति सूत्रेण ष्टुत्वे प्राप्ते '**न पदान्ताट्टोरनाम्**' इतिसूत्रेण निषेधे निट्त्सु इति, धुडभावपक्षे निट्सु इति रूपं भवति।

निश् आदेशस्यापि वैकल्पिकत्वात् निशभावे निशाशब्दस्य **रमावत्** रूपं भवति।

**षढोः कः सि 8.2.41 षस्य ढस्य च कःस्यात्सकारे परे इति तु न भवति, जश्त्वं प्रत्यसिद्धत्वात्। केचित्तु व्रश्चादिसूत्रे 'दादेर्धातोर्घः' ( सू.325 ) इति सूत्राद् धातोः इत्यनुवर्तयन्ति, तन्मते जश्त्वेन जकारे, निज्भ्याम् निज्भिः। चोः कुः ( सू.378 ) इति कुत्वं तु न भवति। जश्त्वस्यासिद्धत्वात्। जश्त्वम्, श्चुत्वम्, चर्त्वम्, निच्शु, निच्छु।**

**मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शशादौ वा ( वा. 3496 )**

**पृतः। पृता। पृद्भ्याम्। पक्षे सुटि च रमावत्। गोपा विश्वपावत्।**

**इत्यादन्ताः**

**संस्कृतव्याख्या** - विधिसूत्रमिदं वर्तते। अत्र पदत्रयम्। षश्च ढ् चेति षढौ, तयो षढोः इति षष्ठी द्विवचनान्तं पदम्, कः इति प्रथमान्तम्, सि इति सप्तम्यन्तं पदम्। अत्र 'षढोः' इत्यस्य षष्ठ्यन्तत्वात् स्थाने ष इत्यस्य उपस्थितिः। सि इत्यस्य सप्तम्यन्तत्वात् अव्यवहितपूर्वस्य इत्यर्थः प्रवर्तते। **एतेन षकारढकारयोः स्थाने ककारदेशो भवति सकारे परे इति सूत्रार्थः सम्पद्यते।** अत्रेदमाशङ्कते यत् निशा सु इत्यवस्थायां निशास्थाने निश् इत्यादेशे कृते सकारस्य

षकारादेशे निष् सु इत्यवस्थायां '**षढोः कः सि**' इति सूत्रेण ककारादेशः कथं न भवति तदुच्यते मूले **इति तु न भवति जश्त्वं प्रत्यसिद्धत्वादिति।** अर्थात् जश्त्वं प्रत्यस्य सूत्रस्य असिद्धत्वात् तन्न भवतीति। अतः निट्त्सु, निट्सु इत्येव रूपं भवति।

केचित्तु अत्र निशाशब्दविषये कथयन्ति यत् **व्रश्चादिसूत्रे 'दादेर्धातोर्घः'** इतिसूत्रात् धातोः इति पदमनुवर्तते, तन्मते धातोरेव छकारस्य शकारस्य च षकारादेशत्वात् = षकारादेशस्य सम्भवात् प्रातिपदिकस्य च तस्याभावात् निशाशब्दस्य शकारस्य षकारादेशो न भविष्यति। अतः तन्मते निश् भ्याम् इत्यादिस्थले **झलां जशोऽन्ते'** इतिसूत्रेण शस्य जश्त्वे निज्भ्याम्, निज्भिः इत्येव रूपं भवति। अत्र '**चोः कुः**' इति सूत्रेण कुत्वं न भवति कुत्वं प्रति जश्त्वस्य असिद्धत्वात्। एतेषां मते सप्तमीबहुवचने निश् सु इत्यवस्थायां, '**स्तोः श्चुना श्चुः**' इतिसूत्रेण सस्य श्चुत्वे निज् शु, इति स्थिते **खरि चेति** सूत्रेण जकारस्य चर्त्वे निच्शु इति रूपम्। '**शश्छोऽटि**' इति सूत्रेण विकल्पेन शकारस्य छकारादेशे निच्छु इति रूपं सिद्ध्यति।

प्रशङ्गानुसारम् केषाञ्चन आकारान्तशब्दानां विशिष्टं कार्यं प्रतिपादयति वार्तिकमुखेन। तथाहि – **मांसपृतनासानूनां मांस्पृत्स्नवो वाच्या शसादौ वा।** अस्येदं तात्पर्यं यत् शसादिविभक्तौ परे मांस पृतना सानु इत्येतेषां शब्दानां स्थाने यथासंख्यं मास् पृत् स्नु इत्यादेशो भवति इति। तेन द्वितीयाबहुवचने पृतः, तृतीयैकवचने **पृता**, भ्यामि **पृद्भ्याम्** इत्यादिरूपं भवति पक्षे सुटि च **रमावत्** रूपं प्रचलति। गोपाशब्दस्य विश्वपावत् रूपं भवतीति।

### इत्याकारान्त स्त्रीलिङ्गशब्दाः

### मतिशब्दः

मतिशब्दः प्रायेण हरिशब्दवत् भवति। प्रायेण इत्युक्तत्वात् कुत्रचित् भिन्नमपि। तस्मात् भिन्नस्थले विधीयमानं कार्यं प्रतिपादयितुं सूत्रमुपस्थापयति मूले –

**मतिः** = मतिशब्दात् प्रथमैकवचने सु विभक्तौ, अनुबन्धलोपे सस्य रुत्वे विसर्गे मतिः इति।

**मती** = मतिशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ मति औ इति जाते पूर्वसवर्णदीर्घे मती।

**मतयः** = मतिशब्दात् प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे 'जसि च' इतिसूत्रेण गुणे अयादेशे सस्य रुत्वे विसर्गे मतयः।

**मतीः** = द्वितीयाबहुवचने शत् विभक्तौ, अनुबन्धलोपे पूर्वसवर्णदीर्घे स्त्रीत्वभावान्न सस्य नत्वाभावे रुत्वे विसर्गे मतीः इति सिद्धम्।

**मत्या** = तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे आकारस्य स्थाने स्त्रीत्वात् घिसंज्ञाभावे, यणि मत्या इति।

**मतिभ्याम्** = भ्याम् विभक्तौ वर्णसम्मेलने मतिभ्याम्।

**मतिभिः** = मतिशब्दात् तृतीयाबहुवचने भिस् विभक्तौ अनुबन्धलोपे सस्यरुत्वे विसर्गे मतिभिः।

**ङिति ह्रस्वश्च 1.4.6**

**इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे। आण्नद्याः ( सू.268 )। मत्यै, मतये। मत्या, मतेः। नदीत्वपक्षे औत् ( सू. 256 ) इति ङेरौत्वे प्राप्ते-**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदत्रयम्। ङिति सप्तम्यन्तं ह्रस्वः प्रथमान्तं चेति अव्ययम्। अस्मिन् सूत्रे **नेयङुवङ्स्थानावस्त्री** इति सूत्रं नकारवर्ज्यं, '**यू स्त्र्याख्यौ नदी**' इति सूत्रञ्च सम्पूर्णम् अनुवर्तते।

'**वामि**' इत्यतः वा इत्यस्यानुवत्तिः। इत्थम् प्रकृतसूत्रे वाक्यद्वयं भवति। ङिति पदेन सह '**यू स्त्र्याख्यौ नदी**' **इयङुवङ्स्थानीवस्त्री**, वा इत्येतानि पदानि संयुज्य **प्रथमं वाक्यम्** – यस्य अर्थो भवति – **इयङुवङ्स्थानी स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूदन्तौ विकल्पेन नदीसंज्ञकौ भवतः ङिद्विभक्तिपरे सति इति। द्वितीयं वाक्यं** 'ह्रस्वं' इत्यनेन पदेन सह **यू स्त्र्याख्यौ** नदी वा इत्येतानि पदानि संयुज्य, अस्यार्थो भवति = **स्त्रीवाचकौ ह्रस्वौ इवर्णोवर्णौ अपि** ङिति परे विकल्पेन नदी संज्ञकौ भवतः। अस्य सूत्रस्य द्विविधस्याप्यर्थस्य एकेन वाक्येन सम्मिलितार्थोऽयम् – **स्त्रीशब्दं परिवर्ज्य नित्यस्त्रीलिङ्गौ इयङुवङ्स्थानी दीर्घेकारोकारान्तौ, ह्रस्वेकारोकारान्तौ शब्दौ च ङिति विभक्तिपरे, विकल्पेन नदीसंज्ञकौ भवत इति।**

अत्रेदं बोध्यम् दीर्घेकारोकारान्तशब्देषु **यूस्त्र्याख्या नदी** इति सूत्रेण नित्यनदीसंज्ञायां प्राप्तायां '**नेयङुवङ्स्थानावस्त्री**' इति सूत्रेण निषेधात् ह्रस्वेकारोकारान्त शब्देषु नदीसंज्ञायामप्राप्तायां ङिद्विभक्तौ विकल्पेन तद् विधानाय सूत्रमिदमारब्धम्। इत्थम् – **अप्राप्तविभाषा इदम्।**

नदीसंज्ञा घिसंज्ञायाः बाधिका भवति, अतो नदीसंज्ञापक्षे – नदीसंज्ञाश्रितं कार्यं तदभावपक्षे घिसंज्ञकत्वात् तदाश्रितं कार्यं भवति येन मत्यै, मतये इत्येवं द्विविधं रूपं भवतीति।

**मत्यै, मतये** = मतिशब्दात् चतुर्थ्येकवचने ङिविभक्तौ अनुबन्धलोपे घिसंज्ञां प्रबाध्य '**ङिति ह्रस्वश्च**' इतिसूत्रेण विकल्पेन नदीसंज्ञायां नदीसंज्ञापक्षे मति ए इति जाते '**आण्नद्याः**' इतिसूत्रेण आडागमेऽनुबन्धलोपे मति ऐ इत्यवस्थायाम्, '**इको यणचि**' इति सूत्रेण वृद्धौ संयोगे **मत्यै** इति नदीसंज्ञाभावे घिसंज्ञापक्षे हरिशब्दवत् इकारस्य गुणे अयादेशे वर्णसंयोगे **मतये** इति।

**मत्याः, मतेः** = मतिशब्दात् पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसिङस्विभक्तौ अनुबन्धलोपे मति अस् इत्यवस्थायाम् विकल्पेन नदींसञ्ज्ञायाम्, आडागमे, वृद्धौ यणि वर्णसंयोगे सस्य रुत्वे विसर्गे **मत्याः**, विकल्पपक्षे, गुणे 'मत् अस्' इति सूत्रेण '**ङसिङसोश्च**' इतिसूत्रेण पूर्वरूपे मतेस् इति स्थिते सस्य रुत्वे विसर्गे **मतेः** इति।

**मत्योः** = मतिशब्दात् षष्ठीसप्तमीद्विवचने ओस् विभक्तौ यणि, संयोगे सस्य रुत्वे विसर्गे मत्योः इति।

**मतीनाम्** = षष्ठीबहुवचने आम् विभक्तौ, नुटि, अनुबन्धलोपे दीर्घे मतीनाम् इति। **मतिशब्दात् सप्तम्येकवचने ङिविभक्तौ, मति ङि इत्यवस्थायां 'ङेरौत्' इति सूत्रेण औत्वे प्राप्ते** –

**इदुद्भ्याम् 7.3.117 नदीसंज्ञकाभ्याम् इदुद्भ्यां परस्य ङेराम् स्यात्।**

**पक्षे अच्च घेः ( सू. 247 ) मत्याम्, मतौ। एवं श्रुत्यादयः।**

**संस्कृतव्याख्या** – एकपदात्मकं नियमसूत्रमिदम्। इच्च उच्च इति इदुतौ, ताभ्याम् इदुद्भ्याम् इति पञ्चमीद्विवचनान्तम्। अस्मिन् सूत्रे नदीभ्याम् इत्यस्य ङे, आम् इत्यनयोश्चानुवृत्तिर्भवति, पञ्चम्यन्तत्वात् इदुद्भ्यां परस्य इत्यर्थो लभ्यते। इत्थम् – **नदीसंज्ञकाभ्याम् इकारोकाराभ्यां परस्य 'ङि' इत्यस्य स्थाने आम् इत्यादेशो भवति इति।** पक्षे नदीसंज्ञाभावपक्षे '**शेषो घ्यसखि**' इति सूत्रेण घिसंज्ञापक्षे '**अच्च घेः**' इतिसूत्रेण इकारस्य स्थाने अकारादेशः मतौ इति।

**मत्याम्, मतौ** = मतिशब्दात् सप्तम्येकवचने ङिविभक्तौ अनुबन्धलोपे, मति इ इत्यवस्थायां घिसंज्ञां प्रबाध्य '**ङिति ह्रस्वश्च**' इतिसूत्रेण विकल्पेन नदीसंज्ञायां '**इदुद्भ्याम्**' इतिसूत्रेण इकारस्य स्थाने आमादेशे, '**आण्नद्याः**' इतिसूत्रेण आडागमेऽनुबन्धलोपे मति आ आम् इत्यवस्थायाम् '**आटश्च**' इतिसूत्रेण वृद्धौ, '**इकोयणचि**' इति सूत्रेण यणि वर्णसम्मेलने मत्याम् इति विकल्पक्षे घिसंज्ञायाम्, '**अच्च घेः**' इतिसूत्रेण इकारस्य स्थाने अकारादेशे प्रत्ययस्य इकारस्य स्थाने औकारादेशे मत औ इति जाते, '**वृद्धिरेचि**' इतिसूत्रेण वृद्धौ **मतौ** इति।

मतिशब्दवत् एव श्रुति इत्यादीनां शब्दानां सिद्धिर्भवतीति।

**त्रिशब्दो नित्यं बहुवचनान्तः - तस्य स्त्रीलिङ्गे रूपं साधयितुम् अग्रिमं सूत्रम् उपस्थापयति -**

**त्रिचतुरोः स्त्रियां तिसृचतसृ 7.2.19**

**स्त्रीलिङ्गयोरेतावादेशौ स्तो विभक्तौ परतः।**

**संस्कृतव्याख्या** - विधिसूत्रमिदम्। अत्र पदत्रयम्। त्रिश्च चतुश्च तयोरिति त्रिचतुरोः षष्ठीद्विवचनान्तम्, तिसृ च चतसृ चेति तयोः तिसृचतसृ इति प्रथमान्तं पदम्, स्त्रियाम् इति वैषयिकं सप्तम्यन्तं पदम्। त्रिचतुरोः इति स्थानिबोधकम् उद्देश्यपदम्, तिसृचतसृ इति आदेशबोधकं विधेयं पदम्। यथासंख्येन तयोरन्वयः, स्त्रियाम् इत्यस्य स्त्रीत्वविषये इत्यर्थः। अत्र '**अष्टन आ विभक्तौ**' इति सूत्रात् विभक्तौ इत्यस्यानुवृत्तिः। इत्थं सूत्रस्यार्थो भवति यत् - विभक्तौ परे त्रिलिङ्गे विद्यमानस्य त्रिशब्दस्य चतुर् शब्दस्य च स्थाने यथाक्रमं तिसृ चतसृ इत्यादेशौ भवत इति।

**अचि र ऋतः 7.2.100 तिसृ चतसृ एतयोर्ऋकारस्य रेफादेशे स्यादचि। गुणदीर्घोत्त्वानामपवादः। तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। तिसृभ्यः।**

**आमि 'नुमचिर...' ( वा. 4374 ) इति नुट्।**

**संस्कृतव्याख्या** - अचि र ऋतः इति सूत्रस्य पदविभागः। त्रिपदात्मकमिदं सूत्रम्। अचि इति सप्तम्यन्तं, 'र' प्रथमान्तम्, ऋत इति षष्ठ्यन्तं पदम्। '**त्रिचतुरोः स्त्रियां तिसृचतुसृ**' इत्यतः विभक्तिविपरिणामेन तिसृचतस्रोः इत्यस्यानुवृत्तिर्भवति। इत्थम् - **अचि परे तिसृ चतसृ इत्यनयोः ऋकारस्य स्थाने रेफादेशो भवतीति सूत्रार्थः सम्पद्यते।**

तिसृशब्दात् बहुवचने जस् विभक्तौ पूर्वसवर्णदीर्घं प्रबाध्य '**ऋतो ङि सर्वनामस्थाने**' इति सूत्रेण प्राप्तस्य गुणस्य, शस् विभक्तौ प्राप्तस्य पूर्वसवर्णदीर्घस्य, '**ऋत् उत्**' इति सूत्रेण प्राप्तस्य उत्वस्य बाधकमिदं सूत्रं, तद्बोधनाय मूले कथयति **गुणदीर्घोत्त्वानामपवाद** इति। आमि नुम्चिर् इत्यादिवार्तिकेन परत्वात् नुट् भवति।

**तिस्रः** = त्रिशब्दात् प्रथमाबहुवचने जस् विभक्तौ, अनुबन्धलोपे त्रि अस् इति जाते, '**त्रि चतुरोः स्त्रियां तिसृचतसृ**' इति सूत्रेण त्रिस्थाने तिसृ इत्यादेशे तिसृ अस् इति जाते पूर्वसवर्णदीर्घं प्रबाध्य '**ऋतो ङि सर्वनामस्थाने**' इति सूत्रेण प्राप्तं गुणं प्रबाध्य '**अचि र ऋतः**' इति सूत्रेण ऋकारस्य स्थाने रेफादेशे तिस् र् अस् इति जाते वर्णसम्मेलने सस्य रुत्वे विसर्गे तिस्रः इति।

**तिस्रः** = त्रिशब्दात् द्वितीयाबहुवचने शस् विभक्तौ अनुबन्धलोपे त्रि अस्, इति जाते त्रिस्थाने तिसृ इत्यादेशे तिसृ अस् इति जाते पूर्वसवर्णदीर्घं प्रबाध्य '**अचि र ऋतः**' इति सूत्रेण ऋकारस्य स्थाने रेफादेशे वर्णसम्मेलने सस्य रुत्वे विसर्गे तिस्रः इति।

**तिसृभिः** = त्रिशब्दात् भिसि, त्रिस्थाने तिसृ इत्यादेशे संयोगे सस्य रुत्वे विसर्गे **तिसृभिः** इति।

**तिसृभ्यः** = त्रिशब्दात् भ्यस् विभक्तौ तिसृ भ्यस्, वर्णसम्मेलने सस्य रुत्वे विसर्गे **तिसृभ्य** इति।

**त्रिशब्दात् आमि विभक्तौ, तिस्रादेशे, नुम्चिर इत्यादिना वार्तिकेन नुटि अनुबन्धलोपे तिसृ नाम् इति जाते इति 'नामि' इति सूत्रेण दीर्घे प्राप्ते -**

**न तिसृचतसृ 6.4.4. तिसृ चतसृ एतयोर्नामि दीर्घो न स्यात्। तिसृणाम्। तिसृषु। स्त्रियाम् इति त्रिचतुरोर्विशेषणान्नेह - प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः। मतिशब्दवत्। आमि तु प्रियत्रयाणाम् इति विशेषः।**

**प्रियास्तिस्रो यस्य सः इति विग्रहे तु प्रियतिसा, प्रियतिस्रौ, प्रियतिस्रः। प्रियतिस्रमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि। स्वमोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः। न लुमता (सू. 263) इति निषेधस्यानित्यत्वात् पक्षे प्रियतिसृ।**

**रादेशात् पूर्वविप्रतिषेधेन नुम् (वा. 5036) प्रियतिसृणी। प्रियतिसृणि। तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात् प्रायेण नुम्रभावौ - प्रियतिसृणा, प्रियतिस्रा इत्यादि।**

**द्वेरत्वे सत्याप्, द्वे। द्वे। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। इति इदन्ताः। गौरी। गौर्यौ। गौर्यः। नदीकार्यम्। हे गौरि! गौर्यै इत्यादि। एवं वाणी नद्यादयः।**

**प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादनङि णिद्वद्भावे च प्राप्ते 'विभक्तौ लिङ्गविशिष्टाग्रहणम्' (प.)। सखी। सख्यौ। सख्यः इत्यादि गौरीवत्। अङ्यन्तत्वान्न सुलोपः, लक्ष्मीः। शेषं गौरीवत्। एवं तरी, तन्त्रादयः।**

**स्त्री। हे स्त्रि!**

**संस्कृतव्याख्या** = द्विपदात्मकं सूत्रमिदम् न इत्यव्ययपदम्, तिसृचतसृ इति लुप्तषष्ठीकं पदम्। अत्र नामि इत्यस्य '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इत्यतः दीर्घः इत्यस्य च अनुवृत्तिर्भवति। नामि इत्यस्य सप्तम्यन्तत्वात् अव्यवहितपूर्वस्य इत्यर्थो लभ्यते। एतेन नाम् शब्दे परे तिसृ चतसृ शब्दस्य दीर्घो न भवतीति सूत्रार्थो भवति। तद्यथा - तिसृ नाम इत्यवस्थायां '**नामि**' इतिसूत्रेण प्राप्तस्य दीर्घस्य निषेधो भवतीति।

त्रिचतुरोः स्त्रियाम् **तिसृचतसृ** इत्यस्मिन् सूत्रे स्त्रियाम् इति त्रिचतुरोः विशेषणं तेन स्त्रीत्वे विद्यमानस्य त्रिचतुरोः स्थाने तिसृचतसृ इत्यादेशो भवतीत्यर्थः। एतेन प्रियाः त्रीणि सन्ति यस्याः स्त्रियाः सा इत्यर्थे अथवा प्रियाणि त्रीणि सन्ति यस्या सा इत्यर्थे समासे जाते निष्पन्नस्य प्रियत्रिशब्दघटकस्य त्रिशब्दस्य स्थाने तिस्रादेशो न भवति तस्य पुल्लिङ्गे नपुंसकलिङ्गे च विद्यमानात्। एवं प्रियत्रिशब्दस्य मतिशब्दवत् रूपं भवति। आम् विभक्तौ हि त्रेस्त्रयः इति सूत्रेण आङ्गकार्यस्य तदन्तेऽपि सत्वात् त्रयादेशे कृते **प्रियत्रयाणाम्** इति रूपं भवतीति विशेषः। तदेव प्रतिपादयितुं मूले उच्यते - **स्त्रियाम् इत्यादिः।**

प्रियास्तिस्रो यस्य सः इतिविग्रहे प्रियत्रि इतिसमासे त्रिशब्दस्य स्त्रीलिङ्गबोधकस्य शब्दस्य विशेषणत्वात् तिस्रादेशो भवति तेन प्रियतिसृ तस्य प्रथमैकवचने प्रियतिसा इति रूपं भवति। एवमेव यथाक्रमम् औ जस् अम् औट् इत्यादिषु परेषु '**अचि र ऋतः**' इति सूत्रेण ऋकारस्य स्थाने र् इत्यादेशे प्रियतिस्रौ, प्रियतिस्रः, प्रियतिस्रम्, प्रियतिस्रौ इत्यादिरूपाणि भवन्ति। टा ङे ङसि ङस् ओस् ङि इत्यादिषु अजादिप्रत्ययेषु परेषु रभावे प्रियतिस्रा, प्रियतिस्रः, प्रियतिस्रोः प्रियतिस्रि इत्येवं रूपाणि सिद्ध्यन्ति। आम् प्रत्यये परे रभावं प्रबाध्य नुडागमे प्रियतिसृणाम् इत्यादिरूपाणि भवन्ति।

स्त्रीलिङ्गत्रिशब्दगर्भबहुब्रीहिसमासस्थलेऽव्याप्तिदोषनिरासार्थमपि 'स्त्रियाम्' इतिपदं 'त्रिचतुरोः' इत्यस्य विशेषणम्। एतेन **प्रियाः तिस्रोः यस्या सा प्रियतिसा** इत्यस्मिन् विग्रहे स्त्रीलिङ्गगर्भत्रिशब्दसमासेऽपि पिततिसृ शब्दवदेव रूपाणि भवन्ति।

प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि इति समासे शब्दे सु प्रत्यये 'स्वमोर्लुकालुप्तत्वेन प्रत्ययलक्षणाभावात्' तिस्रादेशो न भवति तेन प्रियत्रि इत्येवं रूपं भवति। न लुमाङ्गस्य इति सूत्रेण कृतस्य निषेधत्वात्, पक्षे प्रियतिसृ इत्येव भवति।

अत्रेदमाशङ्कते यद् - अजादिविभक्तिषु एव नुमः रभावस्य च प्राप्तिर्भवति। अतः परत्वात् नुम् एव स्यात्,

नुमि कृते च अजादित्वे व्यवधानात् रभावो न स्यात् इति। अत्र एतत्परिहाराय वार्तिकम् उपस्थापयति – **रादेशात् पूर्वविप्रतिषेधेन नुम्** (वा. 5036) इति। अस्यायम्भावः पूर्वविप्रतिषेधेन रभावात् पूर्वमेव नुम् भवति। अतएव प्रियतिसृ औ इत्यादौ **नपुंसकाच्च** इति सूत्रेण औङः स्थाने शी इत्यादेशेऽनुबन्धलोपे पियतिसृ ई इत्यवस्थायां पूर्वविप्रतिषेधेन नुमागमे, नस्य णत्वे प्रियतृिसणी, बहुवचने प्रियतिसृणि इति रूपं भवति। तृतीयादिषु विभक्तिषु वक्ष्यमाणेन **तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य** इति सूत्रेण विकल्पेन पुंवद्भावे नपुंसकपक्षे नुम्, तद्भावपक्षे च रभावो भवति। एतेन तिसृ इत्यादेशे रभावे प्रियतिस्रा तदभावे '**इकोऽचि विभक्तौ**' इति सूत्रेण नुमागमे प्रियतिसृणा इति। **हलादिविभक्तिष्वपि** एवमेव रूपद्वयं बोध्यम्।

**तिसृणाम्** = त्रिशब्दात् षष्ठीबहुवचने आम् विभक्तौ त्रि आम् इति जाते '**त्रेस्त्रयः**' इति सूत्रेण प्राप्तं त्रयादेशं प्रबाध्य '**त्रिचतुरोः स्त्रियाम् तिसृ चतसृ**' इति सूत्रेण तिसृ इत्यादेशे तिसृ आम् इति जाते – **नुम् चिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन इति** नियमात् '**ह्रस्वनद्यापो नुट्**' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'तिसृनाम्' इत्यवस्थायां '**नामि**' इतिसूत्रेण दीर्घे प्राप्ते '**न तिसृचतसृ**' इतिसूत्रेण निषेधे '**ऋवर्णान्नस्य णत्वं वाच्यम्**' इतिसूत्रेण नस्य णत्वे **तिसृणाम्** इति।

**तिसृषु** = त्रिशब्दात् सप्तमीबहुवचने सुप्प्रत्यये त्रयादेशं प्रबाध्य तिसृ आदेशे तिसृ सु इति जाते सस्य षत्वे तिसृषु इति।

इत्थम् – त्रिशब्दस्य स्त्रीलिङ्गे सर्वासु विभक्तिषु यथाक्रमम् – **तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। तिसृणाम्। तिसृषु** इति रूपाणि भवन्ति।

**संस्कृतव्याख्या** – द्वेरत्वे सत्याप्। द्वे। द्वे। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। अस्येदं तात्पर्यम्, द्विशब्दो नित्यं द्विवचनान्तः। अत्र विभक्तिषु परेषु पूर्वं त्यदादीनामः इति सूत्रेण इकारस्य स्थाने अत्वं भवति तत **अजाद्यतष्टाप्** इतिसूत्रेण टाप्प्रत्ययेऽनुबन्धलोपे सवर्णदीर्घे द्वा औ इत्यवस्थायाम् '**औङ आपः**' इतिसूत्रेण औ इत्यस्य स्थाने शी इत्यादेशेऽनुबन्धलोपे गुणे द्वे इति, तृतीयाचतुर्थीपञ्चमीनां द्विवचने **द्वाभ्याम्,** षष्ठीसप्तमीद्विवचने च **द्वयोः** इति।

**इति इदन्ताः**

**दीर्घ ईकारान्तशब्दनिरूपणम्** –

**गौरी** = गौरशब्दात् स्त्रीत्वविवक्षायां '**षिद्गौरादिभ्यश्च**' इति सूत्रेण ङीष् प्रत्ययेऽनुबन्धलोपे गौरी इत्यस्मात् प्रातिपदिकात् प्रथमैकवचने सुविभक्तौ, अनुबन्धलोपे, '**हलङ्याब्भ्यो दीर्घात्सु तिस्यपृक्तं हल्**' इति सूत्रेण सुलोपे गौरी इति।

**गौर्य्यौ, गौर्यौ**= गौरीशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ गौरी औ इति जाते पूर्वसवर्णदीर्घे प्राप्ते, '**दीर्घाज्जसि**' च इति सूत्रेण निषेधे, **इको यणचि** इति सूत्रेण यणि गौर् य् औ इति जाते, '**अचो रहाभ्यां द्वे**' इति सूत्रेण विकल्पेन यकारस्य द्वित्वे, वर्णसम्मेलने गौर्य्यौ, विकल्पपक्षे गौर्यौ इति।

गौरीशब्दात् सम्बोधने नदीसंज्ञाप्रयुक्ते ह्रस्वकार्ये कृते हे गौरि, हे गौर्य्यः इत्यादि।

एवं वाणी नदी ङ्यन्त स्त्रीलिङ्गशब्दानामपि रूपाणि बोध्यानि।

**सखिशब्दस्य स्त्रीलिङ्गे सखीशब्दः तस्य रूपम्** –

सखिशब्दात् स्त्रीत्वविवक्षायां **सख्यशिश्वीति भाषायाम्** इत्यनेन ङीष्प्रत्ययेऽनुबन्धलोपे भसंज्ञायाम्, अकारलोपे वर्णसम्मेलने सखी इति। अत्र **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्** इति परिभाषया सखिशब्दवत् सखीशब्दस्यापि सुविभक्तौ, '**अनङ् सौ**' इति सूत्रेण अनङादेशः प्राप्नोति। एवमेव '**सख्युरसम्बुद्धौ**' इतिसूत्रेण

णिद्वद्भावोऽपि, परं तयोरनभीष्टत्वात् **वार्तिकं प्रारभते – विभक्तौ लिङ्गविशिष्टाग्रहणम्** इति अर्थात् विभक्त्याश्रये कार्ये कर्त्तव्ये लिङ्गविशिष्टपरिभाषा न प्रवर्तत इति। तस्मात् न अनङ्गादेशो न च णिद्वद्भाव इति। इत्थं सखीशब्दस्यापि रूपं **गौरीशब्दवत्, सखी सख्यौ सख्य** इत्येवं रूपाणि भवन्ति।

**लक्ष्मीशब्दः**

लक्ष्मीशब्द अङ्यन्तः तस्मात् ङ्यन्तलक्षणमाश्रित्य, **'हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'** इति सूत्रेण सुलोपो न भवति।

**लक्ष्मीः** = लक्ष् धातोः **'लक्षेर्मुट् च'** इतिसूत्रेण मुडागमेऽनुबन्धलोपे ईप्रत्यये च लक्ष्मी इत्यस्मात् प्रातिपदिकात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे, अङ्यन्तत्वात् सुलोपाभावे सस्य रुत्वे विसर्गे लक्ष्मीः इति।

अन्यत्र नदीशब्दवत्। एवमेव **अवी, तरी तन्त्री** इत्यादीनामपि रूपाणि भवन्ति।

**स्त्रीशब्दः**

**स्त्री** = स्त्रीशब्दात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे, हलङ्यादिना सुलोपे स्त्री इति।

**हे स्त्रि!** = स्त्रीशब्दात् सम्बोधने एकवचने सुविभक्तौ, अनुबन्धलोपे, नदीसंज्ञायाम् **अम्बार्थनद्योर्ह्रस्व** इति सूत्रेण ह्रस्वे हे स्त्रि स् इति जाते **'एङ्ह्रस्वात्सम्बुद्धेः'** इति सूत्रेण सुलोपे हे स्त्रि इति।

**स्त्रियाः 6.4.79 स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे।**

**स्त्रियौ। स्त्रियः**

**संस्कृतव्याख्या** = विधिसूत्रमिदम्। एकपदात्मकं सूत्रमेतत्। स्त्रियाः इति षष्ठ्यन्तम्। अत्र **'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ'** इत्यस्मात् सूत्रात् अचि इत्यस्य इयङ् इत्यस्य चानुवृत्तिर्भवति। प्रत्यये इत्यध्याह्रियते, अचि इति प्रत्यये इत्यस्य विशेषणम्, **यस्मिन् विधिस्तदादावल्ग्रहणे** इति परिभाषया तदादिविधिः। इयङ् इत्यस्य ङित्वात् अन्त्यस्य स्थाने प्रवर्तते। एतेन अजादिप्रत्यये परे स्त्रीशब्दस्य ईकारस्य स्थाने इयङादेशो भवतीति सूत्रार्थः सम्पद्यते। स्त्रियौ। स्त्रियः।

**स्त्रियौ** = स्त्रीशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ स्त्री औ इति जाते **'इको यणचि'** इति सूत्रेण यणि प्राप्ते तं प्रबाध्य **'स्त्रियाः'** इति सूत्रेण ईकारस्य स्थाने इयङादेशेऽनुबन्धलोपे, वर्णसम्मेलने स्त्रियौ इति।

**स्त्रियः** = स्त्रीशब्दात् जसि, अनुबन्धलोपे यणं प्रबाध्य, स्त्रियाः इति सूत्रेण ईकारस्य स्थाने इयङादेशे, वर्णसम्मेलने स्त्रियस् इति जाते सस्य रुत्वे विसर्गे स्त्रिय इति रूपं भवति।

**वाऽम्शसोः 6.4.80 अमि शसि च स्त्रिया इयङ् वा स्यात्।**

**स्त्रियम्, स्त्रीम्। स्त्रियौ, स्त्रियः, स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः। स्त्रियाः। स्त्रियोः। परत्वान्नुट्, स्त्रीणाम्। स्त्रियाम्। स्त्रियोः। स्त्रीषु। स्त्रियमतिक्रान्तोऽतिस्त्रिः। अतिस्त्रियौ।**

**गुणनाभावौत्वनुड्भिः परत्वात्पुंसि बाध्यते।**

**क्लीबे नुमा च स्त्री शब्दस्येयङित्यवधार्यताम्।।**

**जसि च ( सू.241 ) अतिस्त्रयः, हे अतिस्त्रेः!, हे अतिस्त्रियौ! हे अतिस्त्रियः वाऽम्शसोः ( सू. 302 )अतिस्त्रिणा। घेर्ङिति ( सू. 245 ) अतिस्त्रये। अतिस्त्रेः। अतिस्त्रियोः। अतिस्त्रीणाम्। अच्च घेः ( सू. 247 ) अतिस्त्रौ। अतिस्त्रियोः।**

**ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया।**

**इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने।।**

**क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणा। अतिस्त्रिणा। ङे प्रभृतावजादौ वक्ष्यमाणपुंवद्भावात्पक्षे प्राग्वद्रूपम्, अतिस्त्रये, अतिस्त्रिणे। अतिस्त्रेः, अतिस्त्रिणः। अतिस्त्रेः, अतिस्त्रिणः। अतिस्त्रियोः, अतिस्त्रिणोः इत्यादि। स्त्रियां तु प्रायेण पुंवत्। शसि अतिस्त्रीः। अतिस्त्रिया 'ङिति ह्रस्वश्च' (सू. 296) इति ह्रस्वान्तत्वप्रयुक्तो विकल्पः। अस्त्री इति तु इयङुवङस्थानावित्यस्यैव पर्युदासः, तत्सम्बुद्धस्यैवानुवृत्तेः। दीर्घस्यायं निषेधः, न तु ह्रस्वस्य। अतिस्त्रियै, अतिस्त्रये। अतिस्त्रियाः, अतिस्त्रेः। अतिस्त्रियाः। अतिस्त्रेः। अतिस्त्रीणाम्। अतिस्त्रियाम्, अतिस्त्रौ।**

**श्रीः। श्रियौ। श्रियः।**

**संस्कृतव्याख्या - वाम्शसोः.....**। वा अम्शसोः इति सूत्रस्य पदविभागः। अम् य शस् च तयोः अम्शसोः इति सप्तमीद्विवचनान्तं, वा इति प्रथमान्तं पदम्। अत्र '**अचिश्नुधातुभ्रुवां य्वोरियङुवङौ**' इत्यतः इयङ् इत्यस्य 'स्त्रियाः' इति सूत्रस्य चानुवृत्तिर्भवति वा इति विकल्पवाचकम्। इत्थम् अस्यायमर्थः यत् अमि शसि विभक्तौ परे स्त्रीशब्दस्य विकल्पेन इयङादेशः स्यात् इति। अमि परे अमिपूर्वः इति सूत्रेण पूर्वरूपं, शसि परे च पूर्वसवर्णदीर्घं प्रबाधते। एवं सूत्रमिदम् अपवादसूत्रम्।

**स्त्रियम्, स्त्रीः** = स्त्रीशब्दात् द्वितीयैकवचने अम् विभक्तौ स्त्री अम् इति जाते अमिपूर्वः इति सूत्रेण पूर्वरूपे प्राप्ते तं प्रबाध्य वा अम्शसोः इति सूत्रेण विकल्पेन ईकारस्य स्थाने इयङादेशे वर्णसम्मेलने स्त्रियम् इति, विकल्पपक्षे **अमि पूर्वः** इति सूत्रेण पूर्वरूपे स्त्रीम् इति रूपं भवति।

**स्त्रियौ** = स्त्रीशब्दात् औ विभक्तौ '**स्त्रियाः**' इति सूत्रेण इयङादेशे, पूर्वसम्मेलने स्त्रिया इति।

**स्त्रियः स्त्रीः** = स्त्रीशब्दात् शसि, अनुबन्धलोपे विकल्पेन **वाम्शसोः** इयङादेशे वर्णसम्मेलने सस्य रुत्वे विसर्गे स्त्रियः इति। विकल्पपक्षे **प्रथमयोः पूर्वसवर्णः** इति सूत्रेण पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे **स्त्रीः** इति रूपं भवति।

**स्त्रिया** = स्त्रीशब्दात् तृतीयैकवचने टा विभक्तौ, अनुबन्धलोपे नित्यम्, इयङादेशे वर्णसम्मेलने **स्त्रिया** इति।

**स्त्रीभ्याम्** = भ्यामि, वर्णसम्मेलने **स्त्रीभ्याम्** इति।

एवमेव भिस् प्रत्यये भ्यस् प्रत्यये च वर्णसम्मेलने सस्य रुत्वे विसर्गे **स्त्रीभिः स्त्रीभ्यः** इति।

**स्त्रियाः** = स्त्रीशब्दात् पञ्चमीषष्ठ्योरेकवचने यथाक्रमं ङसि ङस् प्रत्ययेऽनुबन्धलोपे स्त्री अस् इति जाते '**आण्नद्याः**' इति सूत्रेण आडागमेऽनुबन्धलोपे 'स्त्री आ अस्' इति जाते '**स्त्रियाः**' इति सूत्रेण नित्यम् इयङादेशेऽनुबन्धलोपे '**अकः सवर्णे दीर्घः**' इति सूत्रेण दीर्घे वर्णसम्मेलने सस्य रुत्वे विसर्गे च **स्त्रियाः** इति।

**स्त्रियोः** = स्त्रीशब्दात् षष्ठी सप्तमी द्विवचने ओस् विभक्तौ, स्त्रियाः इति सूत्रेण इयङादेशेऽनुबन्धलोपे वर्णसम्मेलने सस्य रुत्वे विसर्गे स्त्रियोः इति।

**स्त्रीणाम्** - स्त्रीशब्दात् षष्ठीबहुवचने आम् विभक्तौ स्त्री आम् इति जाते परत्वात् **ह्रस्वनद्यापो नुट्** इति सूत्रेण नुटि, अनुबन्धलोपे, नस्य णत्वे वर्णसम्मेलने **स्त्रीणाम्** इति रूपं भवति।

**स्त्रीषु** = स्त्रीशब्दात् सप्तम्येकवचने सुप्प्रत्ययेऽनुबन्धलोपे स्त्री सु इति जाते **आदेशप्रत्यययोः** इति सूत्रेण षत्वे स्त्रीषु इति।

**स्त्रीशब्देन सह समासे कृते पुल्लिङ्गे नपुंसकलिङ्गे च जाते स्त्रीशब्दस्य विशिष्टं निरूपणं कर्त्तुमुपक्रमते मूले – तद्यथा–**

स्त्रियम् अतिक्रान्तो इत्यर्थे अति स्त्री अम् इत्यलौकिकविग्रहे **'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'** इति वार्तिकेन समासे विभक्तिलोपे ह्रस्वे च **अतिस्त्रिशब्दात् प्रथमैकवचने सुविभक्तौऽनुबन्धलोपे सस्य रुत्वे** विसर्गे **अतिस्त्रिः** इति रूपं भवति। द्विवचने इयङादेशे अतिस्त्रियौ इति।

**अत्रेदमाशङ्क्ते यत् इयङादेशो दीर्घस्त्रीशब्दस्य ईकारस्य भवति अतिस्त्रि इत्यादौ ह्रस्व इकारात् कथमियङादेशः। अत्रोच्यते 'एकदेशविकृतमनन्यवत्' इति परिभाषया स्त्रीशब्दादभिन्नत्वे इयङादेश इति। किञ्च इयङादेशस्य अङ्गाधिकारत्वात् 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया स्वतंत्र स्त्रीशब्दवत् समासान्तस्त्रीशब्दस्यापि इयङादेश इति।**

**इयङादेशस्य बाधककार्याणामुल्लेखः एकस्यां कारिकायां करोति मूले। तद्यथा –**

**गुणनाभावौत्वनुड्भिः परत्वात्पुंसि बाधते।**

**क्लीबे नुमा च स्त्रीशब्दस्येयङित्यवधार्यताम्।।**

**अस्यायम्भावः** पुल्लिङ्गे गुणादेशः, नाभावः, औकारादेशः नुडागमश्च इत्येतानि सर्वाणि कार्याणि इयङापेक्षा परत्वात् इयङादेशं प्रबाध्य भवन्ति। नपुंसकलिङ्गे नुमागमेन इयङादेशस्य बाध इति निश्चीयताम्। इत्थम्, ङे ङसि ङस् विभक्तौ गुणादेशः, टाविभक्तौ नाभावः, ङिविभक्तौ अच्च घेः इति सूत्रेण औकारदेशः, आमि नुडागमो भवति। तेन अतिस्त्रिणा, अतिस्त्रये अतिस्त्रे, अतिस्त्रीणाम् अतिस्त्रौ इति रूपं भवति।

किञ्च समासस्थले इयङादेशात् परत्वात् विधीयमानां कार्याणां प्रतिबोधनाय पूर्वकारिकाशेषरूपं पुनर्द्वितीयस्यां कारिकायां कथयति –

**ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया।**

**इयादेशेऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने।।**

**अस्येदं तात्पर्यं यत्** उपसर्जनत्वदशायां समासस्थले गौणे च पुल्लिङ्गे स्त्रीलिङ्गे वा स्त्रीशब्दे जाते 'स्त्रियाः' इति सूत्रेण विधीयमानो इयङादेशः ओसि विभक्तौ, प्रथमाद्वितीयायाम् औ विभक्तौ नित्यं भवति, अमि शसि च विकल्पेन। अन्यत्र अचि परत्वेऽपि इयङादेशो न भवति तत्र परत्वात् घिसंज्ञा प्रयुक्तानि गुणादिकार्याणि भवन्ति इति।

## श्रीः शब्दः

**श्रयति हरिम्** इत्यर्थे श्रिञ् सेवायाम् इत्यस्माद्धातोः क्विप्प्रत्यये तस्य सर्वापहारिलोपे इकारस्य दीर्घे श्री इति रूपं भवति अस्य च धातोः ईकारत्वात् इयङादेशः अङ्यन्तत्वात् सुलोपो न भवति।

**श्रीः** = श्रीशब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे सस्य रुत्वे विसर्गे श्रीः इति।

**श्रियौ** =श्रीशब्दात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ श्री औ इति जाते, यणं प्रबाध्य **'प्रथमयोः पूर्वसवर्णः'** इतिसूत्रेण पूर्वसवर्णदीर्घे प्राप्ते, **दीर्घाज्जसि च** इतिसूत्रेण निषेधे **'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ'** इतिसूत्रेण इयङादेशे वर्णसंयोगे श्रियौ इति रूपं भवति।

**श्रियः** = श्रीशब्दात् जसि, अनुबन्धलोपे इयङादेशे वर्णसंयोगे सस्य रुत्वे विसर्गे श्रिय इति।

**नेयङुवङस्थानावस्त्री 1.4.4 इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसञ्ज्ञौ न स्तः, न तु स्त्री। हे श्रीः! श्रियम्, श्रियौ, श्रियः। श्रियै, श्रिये। श्रियाः, श्रियः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदत्रयम् अस्ति। न इत्यव्ययपदम्, इयङ् च उवङ् च तौ इति 'इयङुवङौ' इयङुवङौ स्थितिः (स्थानं) ययोस्तौ इयङुवङस्थानौ इति बहुव्रीहिः समासघटितं प्रथमान्तं पदम्। न स्त्री इति अस्त्री नञ्तत्पुरुषघटितं प्रथमान्तम्। अत्र '**यू स्त्र्याख्यौ नदी**' इति सूत्रात् यू नदी इत्यनयोरनुवृत्तिर्भवति। एतेन इयङ् उवङ् इत्यनयोः स्थानीभूत दीर्घईकारः दीर्घोकारश्च नदीसंज्ञकौ न भवतः इति सूत्रार्थः सम्पद्यते। अत्र श्री इत्यादिषु शब्देषु इयङादेशत्वात् श्री इत्यस्य ईकारः इयङः स्थानी वर्तते श्रीशब्दस्य दीर्घेकारान्तत्वात् प्राप्तायाः नदीसंज्ञाया बाधो भवति।

**हे श्रीः** = श्रीशब्दात् सम्बोधनविवक्षायां सुविभक्तौ अनुबन्धलोपे हे श्री स् इत्यवस्थायां '**यू स्त्र्याख्यौ नदी**' इति सूत्रेण नदीसंज्ञायां प्राप्तायां '**नेयङुवङस्थानावस्त्री**' इतिसूत्रेण निषेधे नदीसंज्ञाभावात् **अम्बार्थनद्योर्ह्रस्व** इति सूत्रेण ह्रस्वाभावे, सुलोपाभावे च सस्य रुत्वे विसर्गे हे श्रीः इति रूपं भवति।

**श्रियम्। श्रियौ। श्रियः। श्रियः** इत्यादौ इयङादेशे रूपाणि भवन्ति।

**श्रियै, श्रिये** = श्रीशब्दात् चतुर्थ्येकवचने 'ङे विभक्तौ' अनुबन्धलोपे '**यू स्त्र्याख्यौ नदी**' इति सूत्रेण प्राप्तायाः नदीसंज्ञायाः, '**नेयङुवङस्थानावस्त्री**' इतिसूत्रेण निषेधे, '**ङिति ह्रस्वश्च**' इति सूत्रेण विकल्पेन नदीसंज्ञायां, नदीसंज्ञापक्षे '**आण्नद्याः**' इतिसूत्रेण आडागमेऽनुबन्धलोपे, '**आटश्च**' इतिसूत्रेण वृद्धौ श्री ऐ इति जाते '**अचिश्नुधातुभ्रुवां य्वोरियङुवङौ**' इतिसूत्रेण इयङादेशेऽनुबन्धलोपे वर्णसम्मेलने **श्रियै** इति। विकल्पपक्षे इयङादेशेऽनुबन्धलोपे वर्णसम्मेलने **श्रिये इति** रूपं भवति।

एवमेव पञ्चमीषष्ठीसप्तमी इत्येतासां विभक्तीनामेकवचने विकल्पेन क्रमशः **श्रियाः, श्रियः। श्रियाः, श्रियः। श्रियाम्, श्रियि** इति रूपं भवति।

**श्रियोः** = श्रीशब्दात् षष्ठीसप्तमीद्विवचने ओसि विभक्तौ इयङादेशेऽनुबन्धलोपे, वर्णसम्मेलने श्रियोस् इति जाते सस्य रुत्वे विसर्गे श्रियोः इति।

**वाऽऽमि 1.4.5 इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः, न तु स्त्री। श्रीणाम्, श्रियाम्। श्रियाम्, श्रियि। प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्, पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम् इति स्वीकारात्। लिङान्तरानभिधायकत्वं तत् इति कैयटमते तु पुंवद्रूपम्। प्रकृष्टा धीः इति विग्रहे तु लक्ष्मीवत्। अमि शसि च प्रध्यम्, प्रध्य इति विशेषः।**

**सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे तु वृत्तिकारमते सुधीः श्रीवत्। मतान्तरे तु पुंवत्। सुष्ठु धी इति विग्रहे श्रीवदेव। ग्रामणीः पुंवत्। ग्रामनयनस्योत्सर्गतः पुंधर्मतया पदान्तरं विनापि स्त्रियामप्रवृत्तेः। एवं खलपवनादेरपि पुंधर्मत्वादौत्सर्गिकं बोध्यम्।**

**इति ईदन्ताः। धेनुर्मतिवत्।**

**संस्कृतव्याख्या** – वामि =वा आमि इति सूत्रस्य पदच्छेदः। वा इति विकल्पवाचकम् अव्ययपदम् आमि इति सप्तम्यन्तं पदम्। अपवादसूत्रमेतत् तथाहि '**यू स्त्र्याख्यौ नदी**' इति सूत्रेण विधीयमानां नदीसंज्ञां प्रबाध्य अनेन विकल्पेन नदीसंज्ञा क्रियते। अत्र **नेयङुवङस्थानावस्त्री** इत्यतः नेयङुवङ्स्थानौ इत्यस्य, '**यू स्त्र्याख्यौ नदी**' इति सूत्रस्य चानुवृत्तिर्भवति। एतेन इयङ् उवङोः विद्यमानस्य ईकारस्य ऊकारस्य च आमि परे विकल्पेन नदीसंज्ञा भवतीति सूत्रार्थः। स्त्रीशब्दे नेदं प्रवर्तते। तद्यथा – श्रीणाम्, श्रियाम् रूपद्वयम्। प्रध्यायति (स्त्री) इत्यर्थे 'ध्यायतेः सम्प्रसारणं च' इत्यनेन क्विप्प्रत्यये तस्य सर्वापहारीलोपे सम्प्रसारणाच्चेति सूत्रेण पूर्वरूपे हलः इति सूत्रेण दीर्घे निष्पन्नस्य प्रधीशब्दस्य प्रशब्देन सह समासे प्रधी शब्दो निष्पद्यते। पुल्लिङ्गोऽपि धीशब्दः वृत्तिकारमते अयं प्रधीशब्दः

लक्ष्मीशब्दवत् भवति तन्मते **पदान्तरं विनापि** स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम् इति लक्षणनेन प्रधीशब्दस्य लक्ष्मीशब्दवत् रूपं भवतीति।

कैयटस्तु **'लिङ्गान्तरानभिधायकत्वं तत्'** अर्थात् यस्मिन् शब्देऽन्यलिङ्गस्य बोधकता न भवति तदेव नित्यस्त्रीत्वमिति स्वीकारे तन्मते प्रकर्षेण ध्यायति प्रधीशब्दस्य पुंवद्रूपम्, तन्मते नदीसंज्ञा न भवति।

**प्रकृष्टा धी** इति विग्रहे तु लक्ष्मीवत् रूपम्। केवलम् अमि शसि च प्रध्यम्, प्रध्य इति विशेषः।

**सुष्ठुधीर्यस्या, सुष्ठु ध्यायति** वेति विग्रहे तु निष्पन्नः सुधीशब्दो वृत्तिकारमते श्रीवत्, मतान्तरे (कैयटादिमते) पुंवत् भवति। सुष्ठु धी इति विग्रहेऽपि श्रीवदेव रूपमिति।

**ग्रामणी** शब्दः वृत्तिकारमते कैयटमते समानमेव भवति यतोहि ग्रामनयनस्य = ग्रामनेतृत्वस्य उत्सर्गतः, पुंधर्मतया, पुरुषसाध्यत्वात् पदान्तरं विनापि ब्राह्मी इत्यादिशब्दप्रयोगं विनापि स्त्रियाम् प्रवृत्यभावे पुल्लिङ्ग एव।

एवं **खलं पुनाति** स्त्री इत्यादिविग्रहे स्त्रीलिङ्गे **खलपू** पुंवदेव। धेनुशब्दस्य रूपं मतिशब्दवदेव भवति। केवलम् उकारस्य स्थाने गुणादिकार्यं भिन्नमिति।

**श्रीणाम्, श्रियाम्** = श्रीशब्दात् षष्ठीबहुवचने आम् विभक्तौ श्री आम् इति जाते 'वामि' इति सूत्रेण विकल्पेन नदीसंज्ञायां, नदीसंज्ञापक्षे, **'ह्रस्वनद्यापो नुट्'** इतिसूत्रेण नुटि, अनुबन्धलोपे 'नामि' इतिसूत्रेण दीर्घे, नस्य णत्वे श्रीणाम् इति, विकल्पपक्षे इयङादेशेऽनुबन्धलोपे, वर्णसम्मेलने श्रियाम् इति रूपं भवति।

**श्रियाम्, श्रियि** = श्रीशब्दात् सप्तम्येकवचने ङि प्रत्ययेऽनुबन्धलोपे, विकल्पेन नदीसंज्ञायां नदीसंज्ञापक्षे **'आण्नद्याः'** इतिसूत्रेण आडागमे, **'ङेराम्नद्याम्नीभ्यः'** इतिसूत्रेण ङिस्थाने आमागमे, **'आटश्चश्चेति'** इतिसूत्रेण वृद्धौ, 'इयङादेशेऽनुबन्धलोपे' वर्णसम्मेलने श्रियाम् इति विकल्पपक्षे इयङादेशेऽनुबन्धलोपे वर्णसम्मेलने श्रियि इति रूपं भवति।

**क्रोष्टुशब्दः –**

**स्त्रियां च 7.1.96 स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते।**

**संस्कृतव्याख्या** – अतिदेशसूत्रमिदम्। अत्र पदद्वयम्, स्त्रियाम् इति सप्तम्यन्तं निमित्तवाचकं पदम्, च इत्यव्ययपदम्। **'तृज्वत् क्रोष्टुः'** इति सम्पूर्णः सूत्रम् अनुवर्तते। एतेन स्त्रीवाची क्रोष्टुशब्दोऽपि तृजप्रत्ययान्तवद् भवति अर्थात् तृज्वद्भावं प्राप्नोतीति सूत्रार्थः। एतेन क्रोष्टुशब्दस्य स्थाने तृज्वद्भावे क्रोष्टृ इति जाते –

**ऋन्नेभ्यो ङीप् 4.1.5 ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रौष्ट्र्यः। वधूर्गौरीवत्। भ्रूः श्रीवत्। हे सुभ्रुः। कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः। प्रमाद एवायमिति बहवः। खलपूः पुंवत्। पुनर्भूः। दृन्कर (वा. 4118) इति यणा उवङो बाधनात् नेयङुवङ् (सू. 303) इतिसूत्रेण निषेधो न, हे पुनर्भु। पुनर्भ्वम्। पुनर्भ्वौ।**

**संस्कृतव्याख्या – 'ऋन्ने.....'।** विधिसूत्रमिदम्। अत्र पदद्वयम्। ऋतश्च नान्तश्च तेषाम् इति इतरेतरद्वन्द्व ऋन्नाः, तेभ्यः ऋन्नेभ्य इति पञ्चम्यन्तं पदम्, ङीप् इति प्रथमान्तं विधेयं पदम्। अत्र ङ्याप्प्रातिपदिकात् इति सूत्रात् वचनविपरिणामेण 'प्रातिपदिकेभ्यः' इत्यस्यानुवृत्तिर्भवति। ऋत् न् इत्यनयोर्विशेषणत्वात् तदन्तविधिः। एतेन ऋकारान्तात् नकारान्तात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप्प्रत्ययः स्यादिति सूत्रार्थः। तथाहि = क्रोष्टृशब्दात् ङीप्प्रत्ययेऽनुबन्धलोपे भसंज्ञायाम्, अकारलोपे वर्णसंयोगे क्रोष्ट्री इति स्त्रीलिङ्गे भवति।

**क्रोष्ट्री** = क्रोष्ट्री शब्दात् **'ङ्याप्प्रातिपदिकात्'** इत्यधिकारे प्रथमाविभक्त्येकवचने सुप्रत्ययेऽनुबन्धलोपे **'हलङ्याब्भ्यो दीर्घात्'**-**इत्यादिना सलोपे'** क्रोष्ट्री इति रूपं भवति।

**क्रोष्ट्र्यौ**= क्रोष्ट्री – औ इत्यवस्थायां पूर्वसवर्णदीर्घे प्राप्ते तस्य **दीर्घाज्जसि च** इति सूत्रेण निषेधे, **'इको यणचि'** इति सूत्रेण यणि, वर्णसंयोगे क्रोष्ट्र्यौ इति।

**क्रोष्ट्र्यः** = स्त्रीत्वे क्रोष्ट्रीशब्दात् प्रथमाबहुवचने जस् विभक्तौ, अनुबन्धलोपे पूर्वसवर्णदीर्घे प्राप्ते, तस्य **दीर्घाज्जसि** चेति सूत्रेण निषेधे यणि, वर्णसम्मेलने कष्ट्र्यस् इति जाते सकारस्य रुत्वे विसर्गे क्रोष्ट्र्यः इति।

एवमेव **क्रोष्ट्रीम्, क्रोष्ट्रीः क्रोष्ट्र्या, क्रोष्ट्रीणाम्** इत्यादीनां रूपाणां सिद्धिर्भवति।

**वधूशब्दस्य** रूपं गौरीशब्दवत् भवति, **वहति सुखानि प्रापयति इत्यर्थे** (प्रापणे) इत्यस्माद्धातोः **'वहो धश्च'** (उ.सू.63) इतिसूत्रेण ऊप्रत्यये हकारस्य स्थाने धकारादेशे वधूशब्दो निष्पद्यते। तस्य स्त्रीलिङ्गे गौरीशब्दवदेव रूपाणि, केवलम् उकारनिमित्तकं गुणादिकार्यं भिन्नम्। तद्यथा वधू, वध्वौ, वध्वः। वधूः। वध्वा। वध्वै। वध्वाः। वध्वाम्। इत्यादिः।

**भ्रूशब्दः श्रीशब्दवत्। भ्रमति चलति इत्यर्थे भ्रमु अनवस्थाने इत्यस्मात् धातोः 'भ्रमेश्च डू' इतिसूत्रेण डूप्रत्ययेऽनुलोपे भ्रम् ऊ डित्वात् टिलापे संयोगे भ्रूशब्दो स्त्रीलिङ्गो भवति तस्य श्रीशब्दवत् रूपं प्रचलतीत्यर्थः।**

**भ्रूः, भ्रुवौ, भ्रुवः। भ्रुवम्। भ्रुवः। भ्रुवा। भ्रुवै, भ्रुवे। भ्रुवाः, भ्रुवाः, भ्रुवः। भ्रुवाम्, भ्रूणाम्, भ्रुवाम्, भ्रुवि। हे भ्रूः इत्यादि।**

**शोभना भ्रूर्यस्या सा सुभ्रू इत्यर्थेऽपि** स्त्रीप्रत्ययान्तत्वाभावात् समासे सत्वेऽपि **'गो स्त्रियोरुपसर्जनस्य'** इतिसूत्रेण ह्रस्वो न भवति **'नेयङुवङस्थानावस्त्री'** इतिसूत्रेण निषेधात् भ्रूशब्दस्य तदन्तस्य सुभ्रूशब्दस्य च नदीसंज्ञा न भवति तस्मात् सुभ्रूः, सुभ्रुवौ, सुभ्रुवः इत्यादीनि रूपाणि भवन्ति। अतः सम्बोधनेऽपि ..... हे सुभ्रू सु इत्यवस्थायामनुबन्धलोपे हे सु भ्रू स् इति जाते नदीसंज्ञाया अभावे **'अम्बार्थनद्योर्ह्रस्वः'** इतिसूत्रेण ह्रस्वो न भवति सकारस्य च रुत्वे विसर्गे **हे सुभ्रूः** इति रूपं भवति।

**अत्रेदमाशङ्कते** कथं तर्हि **'हापितः क्वासि' हे सुभ्रु इति भट्टिप्रयोगः सङ्गच्छते तत्रोच्यते मूले प्रमाद एवायं बहवः।**

**परन्नागेशभट्टः काञ्चित् विलक्षणतां प्रतिबोधयति तथाहि भगवतो श्रीरामस्य विरह-पीडितात् अनवधानरूपमेव** ज्ञापनं काव्यपोषकत्वात् गुण एव न कविप्रमाद इति। महावैयाकरणेन भट्टिना प्रमादः चिन्त्य एवेति। एवमेव अन्यत्रापि कालिदासादिग्रन्थे तथा प्रयुक्तत्वात्। **विमानिता सुभ्रु पितुर्गृहे कुतः इति कालिदासः।**

**खलपूः** शब्दः पुंवद्भवति, तस्य पुंशब्दवत् रूपं प्रचलतीति तात्पर्यम्। पुनर्भूः (पुनर्विवाहकर्त्री स्त्री) शब्दस्यापि पुंवद्रूपं बोध्यम्।

अत्र **'दृन्करभू'** इति यण्द्वारा उवङो बाधनात् **'नेयङुवङ्'** इत्यादिसूत्रेण निषेधो न भवति हेपुनर्भुः। पुनर्भ्वम्। पुनर्भ्वौ इति।

**पुनर्भूशब्दात् षष्ठीबहुवचने आम् विभक्तौ, नद्यन्तत्वात् 'ह्रस्वनद्यापो नुट्' इतिसूत्रेण नुडागमेऽनुबन्धलोपे पुनर्भू+नाम् इति जाते पुनर्भू इत्यस्य सखण्डपदत्वात् 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इतिसूत्रेण णत्वस्य अप्राप्तौ णत्वविधानाय अग्रिमं सूत्रं प्रवर्तते –**

**एकाजुत्तरपदेणः 8.4.12 एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तानुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थम्। यणं बाधित्वा परत्वान्नुट्, पुनर्भूणाम्। वर्षाभूः। भेकजातौ नित्यस्त्रीत्वाभावाद् हे वर्षाभूः कैयटमते। मतान्तरे तु हे वर्षाभू!, भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान् इति यादवः।**

**वर्षाभ्वश्च ( सू. 282 ) इति वर्षाभ्वौ, वर्षाभ्वः। स्वयम्भूः पुंवत्। इत्यूदन्ताः**

**संस्कृतव्याख्या** – अस्मिन् सूत्रे पदद्वयं वर्तते, एकोऽज् यस्मिन् स एकाच्, एकाच् उत्तरपदं यस्य तत् एकाजुत्तरपदम्, तस्मिन्, एकाजुत्तरपदे इति सप्तम्यन्तं पदम्, णः इति प्रथमान्तम्। अत्र **पूर्वपदात्संज्ञायामगः** इत्यतः पूर्वपदात् इत्यस्य विभक्तिं विपरिणामेण पूर्वपदाभ्याम् इत्यस्य, **'रषाभ्यां नो णः समानपदे'** इतिसम्पूर्णसूत्रस्य, **प्रातिपदिकान्तनुमविभक्तिषु** च इत्यस्य च अनुवृत्तिर्भवति। पूर्वपदाभ्याम् इति रषाभ्याम् इत्यस्य विशेषणम्। एतेन एकोऽच् यस्मिन् पदे अस्ति तादृशं पदम् उत्तरपदं यस्मिन्समासे भवति तत्र पूर्वपदे स्थितात् रेफात् षकारात् परस्य प्रातिपदिकान्तस्य नुमः, विभक्तिस्थस्य नकारस्य च णत्वं भवतीति सूत्रार्थः सम्पद्यते। **अत्रेदमाशङ्कते** यत् **'रषाभ्यां नो णः समानपदे'** इत्यतः णकारस्य अनुवृत्तिसिद्धेः नित्यणत्वविधानं नोचितम्, यतोहि **आरम्भसामर्थ्यादेव नित्यत्वं सिद्धमिति** – अत्रोच्यते पुनर्णग्रहणं स्पष्टार्थमेव।

पुनर्भू आम् इत्यत्र **'दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्य'** इति वार्तिकेन प्राप्तं यणं परत्वात् प्रबाध्य ह्रस्वनद्यापो नुट् इति सूत्रेण नुट् भवति।

**पुनर्भूणाम्** – पुनर्भूशब्दात् षष्ठीबहुवचने आम् विभक्तौ पुनर्भू आम् इति जाते यणं प्रबाध्य **'ह्रस्वो नद्यापो नुट्'** इतिसूत्रेण नुटि, अनुबन्धलोपे पुनर्भू नाम् इति जाते **'एकाजुत्तरपदे णः'** इतिसूत्रेण नस्य णत्वे पुनर्भूणाम् इति रूपं भवति। एवमेव जम्बू, श्वश्रू इत्यादीनां रूपाणि बोध्यानि।

**न षट्स्वस्रादिभ्यः 4.1.10 षट् संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप् टापौ न स्तः।**

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।**

**याता मातेति सप्तैते स्वस्रादय उदाहृताः।।**

**असृन ( सू. 277 ) इति सूत्रेण दीर्घः – स्वसा, स्वसारौ, स्वसारः। माता पितृवत्। शसि मातृः। इत्यृदन्ता। द्यौर्गोवत्। इत्योदन्ताः। राः पुंवत्। इत्यैदन्ताः। नौग्लौवत्। इत्यौदन्ताः।**

**इत्यजन्तस्त्रीलिङ्गप्रकरणम्।**

**संस्कृतव्याख्या** – न षट्....। अत्र पदद्वयं वर्तते। षट् च स्वस्रादयश्च इति तेभ्यः षट्स्वस्रादिभ्यः इति पञ्चम्यन्तं पदम्, न इत्यव्ययपदम्। **'ऋन्नेभ्यो ङीप्'** इत्यतः ङीप् इति **अजाद्यतष्टाप्** इति सूत्राच्च टाप् इति चेत्यनुवर्तेते। एतेन षट्संज्ञकात् शब्दात् स्वस्रादिगणपठितशब्दाच्च स्त्रीत्वविवक्षायां ङीप् टापौ न स्तः इति सूत्रार्थः। इत्थम् अपवादसूत्रमिदम् – तथाहि पञ्चन्, षष् स्वसृ, तिसृ, चतसृ इत्यादिशब्देभ्यः ऋकारान्तत्वात् नकारान्तत्वाच्च ऋन्नेभ्यो ङीप् इति सूत्रेण प्राप्तस्य ङीप्प्रत्ययस्य निषेधः अनेन सूत्रेण भवति। तथाहि स्त्रीप्रत्ययाभावेऽपि एषां शब्दानां स्वतः स्त्रीत्वं बोध्यत इति।

कस्तावद् स्वस्रादिरितिचेत् कारिकामाध्यमेन कथयति –

**स्वसा तिस्रश्चेत्यादिना।** अर्थात् स्वसृ, तिसृ (संख्या, स्त्रीलिङ्गे) चतसृ ननान्दृ, दुहितृ, यातृ, मातृ एते शब्दाः स्वस्रादिगणपठिता इति।

**स्वसा।** – स्वसृशब्दात् ऋकारान्तत्वात् **ऋन्नेभ्यो ङीप्** सूत्रेण ङीप्प्रत्यये प्राप्ते **न षट्स्वस्रादिभ्य** इतिसूत्रेण निषेधे स्वसृ इत्यस्मात् प्रातिपदिकात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे स्वसृ स् इति जाते **'सर्वनामस्थानसंज्ञायाम्'** ऋकारस्य अनङादेशेऽनुबन्धलोपे स्वसन् स् इति जाते **'हलङ्यादिना सुलोपे' असृन् तृच्** इत्यादिना उपधा दीर्घे स्वसान् इति जाते, नलोपे स्वसा इति रूपं भवति।

**स्वसारौ** – स्वसृशब्दात् प्रथमाद्वितीया द्विवचने औ विभक्तौ सर्वनामस्थानसंज्ञायां, गुणे, उपधादीर्घे वर्णसम्मेलने च स्वसारौ इति।

**स्वसारः** = स्वसृशब्दात् प्रथमाबहुवचने जस् विभक्तौ, अनुबन्धलोपे, सर्वनामस्थानसंज्ञायां, गुणे रपरत्वे, उपधादीर्घे वर्णसम्मेलने सस्य रुत्वे विसर्गे स्वसार इति। एवमेवान्यान्यपि रूपाणि बोध्यानि।

**ओकारान्त द्यो** शब्दस्य गोशब्दवत् रूपं भवति द्यौः द्यावौ द्यावः इति।

**ऐकारान्त रै शब्दस्य** पुल्लिङ्गशब्दवत् **'रायो हलि'** इति सूत्रेण हलि परे ऐकारस्य आकारादेशे रा स् इत्यवस्थायां सस्य रुत्वे विसर्गे राः। रायौ रायः इत्येवं रूपं भवति।

**नौ** = औकारान्त नौ शब्दस्य ग्लौ शब्दवत्, नौ नावौ नावः इत्येवं रूपं भवतीति।

**इत्यजन्त स्त्रीलिङ्गप्रकरणं समाप्तम्**

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितम् अजन्तस्त्रीलिङ्गप्रकरणं सम्पूर्णम्।**

# अथाजन्तनपुंसकलिङ्गप्रकरणम्

क्रमप्राप्तस्य नपुंसकलिङ्गशब्दस्य निर्वचनं क्रियते। यद्यपि नपुंसकलिङ्गे प्रथमाविभक्तौ यानि रूपाणि तान्येव द्वितीया विभक्तौ भवन्ति, शिष्टानि सर्वाणि पुंवदेव भवन्ति। तस्मात् नपुंसकलिङ्गे यद्विशिष्टं कार्यं तदुपस्थापयति अस्मिन् प्रकरणे। तथाहि –

**अतोऽम् 7.1.24 अतोऽङ्गात् क्लीबात् स्वमोरम् स्यात्। अमिपूर्वः ( सू.194 ) इति हल्मात्रलोपः, हे ज्ञान! ज्ञानम् – एङ्ह्रस्वात् ( सू.१९३ )**

**संस्कृतव्याख्या** – अतः अम् इति सूत्रस्य पदविभागः। पदद्वयं वर्तते अङ्गस्य इत्यधिकारः, **स्वमोर्नपुंसकात्** इति सम्पूर्णं सूत्रमावर्तते। अधिकृतस्य अङ्गस्य वचनविपरिणामेन पञ्चम्यन्तत्वेन अङ्गात् इति विशेष्यत्वनेनान्वयः एतेन अतः इति पञ्चम्यन्तं पदं तस्य विशेषणम्, विशेषणत्वात् तदन्तविधिः।

इत्थं सूत्रस्यार्थो भवति यत् **नपुंसकलिङ्गे विद्यमानात् अदन्तात् अङ्गात् परस्य सु इत्यस्य स्थाने अम् इत्यस्य च स्थाने अम् आदेशः स्यादिति। तद्यथा** – ज्ञान सु इत्यवस्थायाम् अमादेशे ज्ञान अम्, पूर्वरूपे **ज्ञानम्** इति भवति।

**ज्ञानम्** = आकारान्त नपुंसकात् ज्ञानशब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने सुविभक्तौ ज्ञान सु इति जाते **'अतोऽम्'** इतिसूत्रेण सु इत्यस्य स्थाने अम् इत्यादेशे ज्ञान अम् इत्यवस्थायाम्, **'अमि पूर्वः'** इतिसूत्रेण पूर्वरूपे ज्ञानम् इति।

द्वितीयैकवचने अम् विभक्तौ अपि एवमेव ज्ञानम् इति रूपं सिद्ध्यति।

**हे ज्ञान** = नपुंसकात् ज्ञानशब्दात् सम्बोधनविवक्षायां सुविभक्तौ अनुबन्धलोपे हे ज्ञान स् इति जाते **'विप्रतिषेधे परं कार्यम्'** इति नियमात् परत्वात् **'अतोऽम्'** इतिसूत्रेण अमादेशे पूर्वरूपे हे ज्ञानम् इति जाते **'एङ् ह्रस्वात्सम्बुद्धेः'** इतिसूत्रेण सम्बुद्ध्यवयवस्य हल्मात्रस्य मकारस्य लोपे हे ज्ञान इति रूपं भवति।

**नपुंसकाच्च 7.1.19 क्लीबात् परस्यौङः शी स्यात्। भसञ्ज्ञायाम्।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदद्वयं वर्तते। नपुंसकात् इति पञ्चम्यन्तं, च इत्यव्ययं पदम्। अत्र **औङ् आपः** इत्यस्मात् 'औङः' इत्यस्य, **जसः शी** इत्यतः शी इत्यस्य चानुवृत्तिर्भवति।

एवं नपुंसकात् अङ्गात् परस्य औ इत्यस्य स्थाने शी इत्यादेशः स्यादिति। तद्यथा ज्ञान औ इत्यवस्थायाम्

औकारस्य स्थाने शी आदेशे कृतेऽनुबन्धलोपे ज्ञान ई इति स्थितिर्भवति। अत्र '**यचि भम्**' इतिसूत्रेण भसंज्ञायाम् भसंज्ञानिमित्तं कार्यं विधातुमग्रिमं सूत्रं प्रवर्तते –

**यस्येति च 6.4.148 भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे।**

**इत्यकारलोपे प्राप्ते। 'औङः श्यां प्रतिषेधो वाच्यः ( वा. 4186 ) ज्ञाने।**

**संस्कृतव्याख्या** – अस्मिन् सूत्रे पदत्रयम् अस्ति। यस्य ईति च। तत्र इश्च यश्च इति यम् समाहारद्वन्द्वः, तस्य इत्यर्थे, यस्य इति षष्ठ्यन्तं पदम्, ईति इति सप्तम्यन्तम्, च इत्यव्ययम्। अत्र '**नस्तद्धिते**' इत्यस्मात् सूत्रात् तद्धिते इत्यस्य **अल्लोपोऽनः** इत्यस्माच्च लोपः इत्यस्यानुवृत्तिर्भवति। भस्य अधिकारः। अङ्गस्य इति विशेष्यम् यस्य इति विशेषणम्, '**अलोऽन्त्यस्येति**' परिभाषासूत्रेण अन्त्यस्योपस्थितिर्भवति। इत्थम् – ईकारे तद्धिते च परे भसंज्ञकस्य इवर्णस्य अवर्णस्य च लोपो भवतीति सूत्रार्थः सम्पद्यते। तथाहि ज्ञान ई इत्यवस्थायाम् अकारलोपप्राप्ते वार्तिकमुपस्थापयति – **औङ् श्यां प्रतिषेधो वाच्य** इति। अस्येदं तात्पर्यं यत् औङः स्थाने विधीयमानस्य 'शीपरत्वे '**यस्येति च**' इतिसूत्रस्य प्रतिषेधो वक्तव्य, अर्थात् भसंज्ञानिमित्तकः अकारलोपः इकारलोपश्च न भवत इति। ज्ञाने।

**ज्ञाने** = ज्ञानशब्दात् नपुंसकात् प्रथमाद्वितीयाद्विवचने औ विभक्तौ ज्ञान औ इति जाते '**नपुंसकाच्च**' इतिसूत्रेण औङः स्थाने शी इत्यादेशेऽनुबन्धलोपे ज्ञान ई इति जाते '**यचि भम्**' इतिसूत्रेण भसंज्ञायाम्, '**यस्येति च**' इतिसूत्रेण अकारलोपे प्राप्ते '**औङ्श्यां प्रतिषेधो वक्तव्यः**' इति वार्तिकेन निषेधे, '**आद्गुणः**' इतिसूत्रेण गुणे ज्ञाने इति रूपं भवति।

**जश्शसोः शिः 7.1.20 क्लाबादनयोः शिः स्यात्।**

**संस्कृतव्याख्या** – 'जश्शसोः शि'। द्विपदमिदं सूत्रम्। जस् च शस् चेति तयोः जश्शसोः इति षष्ठ्यन्तं, शि प्रथमान्तं पदम्। अत्र स्वमोर्नपुंसकात् इत्यतः नपुंसकात् इत्यस्यानुवृत्तिर्भवति। एतेन नपुंसकात् शब्दात् परे जस्शसोः स्थाने शि इति सर्वादेशो भवति। अनेकाल्त्वात् सम्पूर्णस्य जसः शसस्थाने च शि इत्यादेश इति तात्पर्यम्।

**शि सर्व.....।** अत्र शि इति लुप्तप्रथमाकं पदम्, सर्वनामस्थानम् इति प्रथमान्तम्, शि इत्युद्देश्यवाचकं संज्ञी सर्वनामस्थानम् इति च विधेयवाचकं संज्ञापदम्। एतेन जश्शसोः विधीयमानः शि इत्यादेशः सर्वनामसंज्ञको भवतीति सूत्रार्थः। अत्र शस् इत्यनेन '**सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्**' इति परिभाषया जस्साहचर्येण सुपः शस् प्रत्यय एव गृह्यते न तु तद्धितः शस् प्रत्यय इति बोध्यम्। '**सुडनपुंसकस्य**' इतिसूत्रेण विधीयमाना सर्वनामस्थानसंज्ञा अनपुसंक एव सत्वात् नपुंसकलिङ्गे शि इत्यस्य सर्वनामसंज्ञा अनेन क्रियत इति। **ज्ञान शि** इत्यवस्थायां सर्वनामस्थानसंज्ञायाम् –

**नपुंसकस्य इलचः 7.1.72 झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे। उपधादीर्घः, ज्ञानानि। पुनस्तद्वत्। शेषं रामवत्। एवं धनवनफलादयः।**

**संस्कृतव्याख्या** – सूत्रेऽस्मिन् पदद्वयम्। नपुसंकस्य इति षष्ठ्यन्तं, झल् च अच् चेति तयोः समाहारद्वन्द्वः तस्य झलचः इति षष्ठ्येकवचनान्तं पदम्। अत्र '**इदितो नुम्धातोः**' इतिसूत्रेण नुमः, **उगिदचां सर्वनामस्थानेऽधातोः** इत्यतः सर्वनामस्थाने इत्यस्य चानुवृत्तिर्भवति। अङ्गस्य अधिकारः अधिकृतस्य अङ्गस्य झलचः इति विशेषणं, विशेषणत्वात् तदन्तविधिः। एतेन **सर्वनामस्थाने परे नपुंसकलिङ्गे विद्यमानस्य झलन्तस्य अजन्तस्य च शब्दस्य नुमागमो भवतीति सूत्रार्थः।** ज्ञान न् इ इति जाते उपधादीर्घे ज्ञानानि इति रूपं भवति। द्वितीयायां पुनस्तद्वत् अर्थात् प्रथमावदेव रूपाणि। एवमेव धनवनफलादीनां नपुंसकलिङ्गशब्दानां रूपाणि बोध्यानि।

**ज्ञानानि** – नपुसंकात् ज्ञानशब्दात् प्रथमाबहुवचने जस् विभक्तौ ज्ञान जस् इति जाते, '**जश्शसोःशि**' इति

सूत्रेण जसः स्थाने शि इत्यादेशे, '**शि सर्वनामस्थानम्**' इति सूत्रेण सर्वनामस्थानसंज्ञायां, '**नपुंसकस्य झलचः**' इतिसूत्रेण नुमागमेऽनुबन्धलोपे ज्ञान न् इ इति जाते, उपधासंज्ञायां, '**सर्वनामस्थाने चाऽसम्बुद्धौ**' इतिसूत्रेण उपधादीर्घे वर्णसम्मेलने ज्ञानानि इति रूपं भवति।

**इत्थं प्रथमाविभक्तौ – ज्ञानम् ज्ञाने ज्ञानानि। द्वितीयायामपि एवमेव ज्ञानम् ज्ञाने ज्ञानानि इति। एवमेव धनवनफलादीनां रूपाणि भवन्तीति।**

**अदड्डतरादिभ्यः पञ्चभ्यः 7.1.25 एभ्यः क्लीबेभ्यः स्वमोरदडादेशः स्यात्।**

**संस्कृतव्याख्या** – अपवादसूत्रमिदम्। अत्र पदत्रयम्। अदड् इति प्रथमान्तम्, डतर आदि येषान्ते डतरादयः तेभ्यः, डतरादिभ्यः इति पञ्चम्यन्तं पदम्, पञ्चभ्यः इति पञ्चम्यन्तम्। अत्र डतरादिभ्यः इत्यनेन डतरप्रत्ययान्तः डतमप्रत्ययान्तः, अन्य अन्यतर इतर इत्येते शब्दाः गृह्यन्ते। सूत्रेऽस्मिन् '**स्वमोर्नपुंसकात्**' इति सूत्रं वचनविपरिणामेन नपुंसकेभ्यः स्वमोः इति चानुवर्तते। इत्थम् – सूत्रस्यार्थो भवति यत् डतर, डतम, अन्य अन्यतर, इतर इत्येतेभ्यः पञ्चभ्यः नपुंसकशब्देभ्यः परयोः सु अम् इत्यनयोः स्थाने 'अदड्' इत्यादेशो भवतीति।

**टेः 6.4.143 डिति परे भस्य टेर्लोपः स्यात्। वाऽवसाने ( सू.206 ) कतरद्, कतरत्। कतरे। कतराणि। भस्य इति किम्? पञ्चमः। टेर्लुप्तत्वात् प्रथमयोः ( सू.164 ) इति पूर्वसवर्णदीर्घः, एङ्ह्रस्वात् ( सू.193 ) इति सम्बुद्धिलोपश्च न भवति। हे कतरत्। पुनस्तद्वत्। शेषं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतम शब्दस्य तु अन्यतमम् इत्येव।**

**एकतरात्प्रतिषेधो वक्तव्यः ( वा.4287 ) एकतरम्। सोरमादेशे कृते सन्निपातपरिभाषया न जरस्, अजरम्। अजरसी–अजरे। परत्वाज्जरसि कृते झलन्तत्वान्नुम्।**

**संस्कृतव्याख्या** – टेः षष्ठ्यन्तम् एकपदात्मकं सूत्रम्। अत्र **ति विंशतेर्डिति** इत्यतः '**अल्लोपोऽनः**' इतिसूत्रात् लोपः इत्यस्य अनुवृत्तिर्भवति। भस्य अधिकारः एतेन डित् परे भसंकस्य अङ्गस्य टेः लोपः स्यादिति सूत्रार्थः। तद्यथा कतर सु = कतर अदड् कतर् अद् = कतरद् कतरत् इति।

सम्बोधने हे कतरत् इत्यत्र टेर्लुप्त्वात् न हि पूर्वसवर्णदीर्घो न वा सम्बुद्धिलोपः। तेन हे कतरत् इति।

सूत्रे '**भस्य' ग्रहणं किमर्थम्** इति चेत् अत्रेदं बोध्यं यत् पञ्चानां पूरणः इत्यर्थे पञ्चन् शब्दात् तद्धिते डट्प्रत्यये पञ्चन् अ इत्यवस्थायां डट्प्रत्ययेऽनुबन्धलोपे '**पञ्चन् अ**' अत्र प्रत्ययस्य '**नान्तादसंख्यादेर्मट्**' इतिसूत्रेण मडागमेऽनुबन्धलोपे पञ्चन् म इत्यवस्थायाम् अजादित्वाभावात् न भसंज्ञा तस्मात् टिलोपो न भवति। भस्याभावे एतादृशस्थलेऽपि टिलोपापत्तिः तद्वारणाय भस्य ग्रहणं बोध्यमिति।

**कतरत्** – डतरप्रत्ययान्त नपुंसकात् कतर शब्दात् प्रथमैकवचने सु विभक्तौ, कतर सु इत्यवस्थायाम्, **अतोऽम्** इति सूत्रेण सुस्थाने अमादेशे प्राप्ते तं प्रबाध्य '**अदड् डतरादिभ्यः पञ्चभ्यः**' इतिसूत्रेण अदड् इत्यादेशे अनुबन्धलोपे कतर अद् इति जाते, भसंज्ञायां '**टेः**' इतिसूत्रेण टिलोपे कतर् अद् इति जाते वर्णसम्मेलने कतरद् इति, **वाऽवसाने** इति सूत्रेण विकल्पेन चर्त्वे कतरत् इति रूपं भवति।

**कतरे** – कतरशब्दात् प्रथमा द्वितीया द्विवचने औ विभक्तौ कतर औ इति जाते वृद्धिं प्रबाध्य '**नपुंसकाच्च**' इतिसूत्रेण औकारस्थाने शी इत्यादेशेऽनुबन्धलोपे भसंज्ञायाम् अकारलोपे प्राप्ते, '**औङ श्यां प्रतिषेधो वाच्य**' इति वार्तिकेन निषेधे '**आद्गुणः**' इतिसूत्रेण गुणे कतरे इति रूपं सिद्ध्यति।

**कतराणि** – कतरशब्दात् नपुंसकलिङ्गे प्रथमाबहुवचने जस्विभक्तौ कतर जस् इति जाते '**जश्शसोः शि**' इतिसूत्रेण जसः स्थाने 'शि' इत्यादेशे, **शि सर्वनामस्थानम्,** इति सूत्रेण सर्वनामस्थानसंज्ञायाम्, '**नपुंसकस्य**

**झलचः'** इतिसूत्रेण नुमागमेऽनुबन्धलोपे उपधासंज्ञायां, '**सर्वनामस्थाने चाऽसम्बुद्धौ'** इतिसूत्रेण उपधादीर्घे नस्य णत्वे वर्णसम्मेलने कतराणि इति रूपं भवति।

एवमेव कतमत्, इतरत्, अन्यतरत्, इत्येतेषां रूपाणि भवन्ति।

**अन्यतमशब्दस्य तु अन्यतमम् इत्येव रूपम्। अत्रेदं तत्त्वम् - अन्यतमशब्दः अव्युत्पन्नप्रातिपदिकः तस्मात् डतरादिपञ्चभ्य अतिरिक्तत्वात् अन्यतमशब्दात् परस्य सु इत्यस्य स्थाने अदड् इत्यादेशो न भवति। अतोऽस्य ज्ञानशब्दवदेव रूपम् अन्यतमम्, अन्यतमे, अन्यतमानि इत्येवं भवतीति।**

**एकतरा.... अदड् डतरादिसूत्रस्य बाधकमिदं वार्तिकम्। डतरप्रत्ययान्तैकतरशब्दात् अदड् इत्यादेशस्य निषेधो वक्तव्यः। अर्थात् एकशब्दात् 'एकाच्च प्राचाम्' इतिसूत्रेण डतरच् प्रत्ययान्तनिष्पन्नात् एकतरशब्दात् सु इत्यस्य स्थाने अदड् इत्यादेशो न भवति तेन एकतरम् इत्येव रूपम्।**

**जराशब्देन सह समस्तस्य अजरशब्दस्य निरूपणं करोति मूले -**

अविद्यमाना जरा यस्य तत् कुलम् इत्यस्मिन् विग्रहे अजरा इत्यस्य '**गो स्त्रियोरुपसर्जनस्य**' इतिसूत्रेण ह्रस्वे अजरशब्दो निष्पद्यते। अजरशब्दात् विभक्तौ परे **पदाङ्गाधिकारे तस्य च तदन्तस्य च, निर्दिश्यमानस्यादेशा भवन्ति, एकदेशविकृतमनन्यवत्** इत्यादिना अजर इत्यस्यैकदेशस्य जर इत्यस्य स्थाने 'जराया जरसन्यतरस्याम्' इतिसूत्रेण विकल्पेन जरसादेशः प्राप्नोति तद्वारणाय कथयति मूले -

**सोरमादेश कृते सन्निपातपरिभाषया न जरस्, अजरम्।** अस्येदं तात्पर्यं यत् अजर सु इत्यत्र अमादेशे अजादित्वात् प्राप्तः जरसादेशः **सन्निपातल्लक्षणोविधिरनिमित्तं तद्विघातस्य** अनया परिभाषया सन्निपातनिरोधात् न भवति अदन्तप्रातिपदिकमाश्रित्य अमादेशः, तम् अमेव अजादित्वमाश्रित्य जरसादेशे सन्निपातविरोध इति।

**अजरम्** - समासप्रातिपदिकात् अजरशब्दात् नपुंसके प्रथमैकवचने सु विभक्तौ तत्स्थाने अमादेशे 'अमि पूर्वः' इति पूर्वरूपे अजरम् इति।

**अजरसी-अजरे** - अजरशब्दात् औ विभक्तौ अजर औ इतिजाते '**नपुंसकाच्च**' इतिसूत्रेण औकारस्य स्थाने शी इत्यादेशे, '**जरायाः जरसन्यतरस्याम्**' इतिसूत्रेण विकल्पेन जरसादेशे, वर्णसम्मेलने अजरसी, विकल्पपक्षे अजर ई इति जाते गुणे अजरे इति।

**अजरांसि** - अजरशब्दात् प्रथमाबहुवचने जस् विभक्तौ तत्स्थाने शि इत्यादेशे अजर इ इति जाते परत्वात् **विप्रतिषेधे परं कार्यम्** इति नियमात् विकल्पेन जरस् इत्यादेशे, अजरस् इ इति जाते '**नपुंसकस्य झलचः**' इति सूत्रेण नुमागमेऽनुबन्धलोपे अजरन् स् इ इति जाते -

**सान्तमहतः संयोगस्य 6.4.10 सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधायाः दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे। अजरांसि, अजराणि। अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस्, ततः सन्निपातपरिभाषया न लुक् - अजरसम्-अजरम्। अजरसी, अजरे। अजरांसि, अजराणि। शेषं पुंवत्।**

**पद्दन् ( सू.228 ) इति हृदयोदकास्यानां हृद् उदन् आसन्। हृन्दि। हृदा। हृद्भ्यभ्यामित्यादि। उदानि। उद्ना। उद्भ्यामित्यादि। आसानि। आस्ना। आसभ्यामित्यादि। मांसि। मांसा। मान्भ्यामित्यादि। वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम्। अत एव भाष्ये 'मांस्पचन्या उखायाः' इत्युदाहृतम्। अयस्मयादित्वेन भत्वात् संयोगान्तलोपो न। पद्दन्( सू. 228 ) इत्यत्र हि छन्दसि इत्यनुवर्तितं वृत्तौ, तथापि अपो भिः ( सू. 442 ) इत्यत्र मासश्छन्दसि ( वा.4634 ) इति वार्तिके छन्दोग्रहणसामर्थ्याल्लोकेऽपि क्वचित् इति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम्। इत्यदन्ताः।**

**संस्कृतव्याख्या - सान्तमहत.....।** दीर्घविधायकं सूत्रमिदम्। सूत्रेऽस्मिन् पदत्रयं वर्तते। स अन्ते यस्य सः सान्तः, तस्य सान्तस्य इत्यर्थे 'सान्त' इति लुप्तषष्ठीकं पदम्, महत। इति संयोगस्य इति च द्वयमपि षष्ठ्यन्तम्, अत्र **'नोपधायाः'** इतिसूत्रात् न, उपधायाः इत्यनयोः, **'ढ्रलोपे पूर्वस्य दीर्घोऽणः'** इतिसूत्रात् दीर्घ इत्यस्य च अनुवृत्तिर्भवति। **सर्वनामस्थाने चासम्बुद्धौ** इति सम्पूर्णं सूत्रमनुवर्तते। इत्थम् - सम्बुद्धिभिन्ने सर्वनामस्थाने परे सकारान्तसंयोगस्य महत्शब्दस्य च नकारस्य उपधाया दीर्घः स्यादिति सूत्रार्थः सम्पद्यते। तद्यथा - **अजरांसि, अजराणि** इति।

**अजरांसि, अजराणि** - अजरशब्दात् प्रथमाबहुवचने जस् विभक्तौ तत्स्थाने शि इत्यादेशे विकल्पेन जरस्थाने जरसादेशे अजरस् इ इति जाते **'नपुंसकस्य झलचः'** इतिसूत्रेण नुमागमेऽनुबन्धलोपे अजरनस् इ इति जाते **'सान्त महतः संयोगस्य'** इतिसूत्रेण दीर्घे अजरान्स् इ इति जाते, **'नश्चापदान्तस्य झलि'** इतिसूत्रेण अनुस्वारे वर्णसम्मेलने **अजरांसि** इति, विकल्पपक्षे जरसादेशाभावपक्षे नुमागमेऽनुबन्धलोपे अजरन् इ इति जाते, **'सर्वनामस्थाने चाऽसम्बुद्धौ'** इतिसूत्रेण उपधादीर्घे वर्णसम्मेलने नस्य णत्वे, अजराणि इति रूपं सिद्ध्यति।

**अजरसम्, अजरम्** - अजरशब्दात् अमि, **स्वमोर्नपुंसकात्** इति सूत्रं प्राप्तं अम्लोपं प्रबाध्य **'अतोऽम्'** इतिसूत्रेण अमादेशे, विकल्पेन जरसादेशे, वर्णसंयोगे अजरसम् इति विकल्पपक्षे अजरम् इति रूपं भवति।

**एवं द्वितीयाद्विबहुवचने च प्रथमावत् रूपाणि बोध्यानि। शेषं पुंवत्।**

हृदय, उदक, आस्य इत्येतेषां नपुंसकलिङ्गशब्दानां रूपाणि बोधयितुं प्रवर्तते -

तदुच्यते **'पद्दन'** (सू. 228) इत्यनेन सु औ जस् अम् औट् इत्येतासु विभक्तिषु एतेषां शब्दानां ज्ञानशब्दवत् रूपाणि भवन्ति। शसादिप्रत्यये परे **पदन्नोमास** इत्यादिसूत्रेण यथाक्रमं हृदयस्थाने हृद् आदेशे, उदकस्थाने उदन् आदेशे, आस्यशब्दस्य स्थाने आसन् आदेशे विकल्पेन रूपद्वयं भवति। हृदयशब्दस्य द्वितीयाबहुवचने **हृदि, हृदयानि** इति, तृतीयैकवचने **हृदा, हृदयेन** इति। चतुर्थ्येकवचने **हृदे, हृदयाय,** पञ्चम्येकवचने **हृदः, हृदयात्** इति। एवमेवान्यान्यानि रूपाणि।

**उदानि- उदकानि** = उदकशब्दात् द्वितीयाबहुवचने शस् विभक्तौ तत्स्थाने शि इत्यादेशे विकल्पेन उदन् आदेशे, **सर्वनामस्थाने चासम्बुद्धौ** इति सूत्रेण दीर्घे उदानि, विकल्पपक्षे उदकानि इति। तृतीयैकवचने **उद्ना, उदकेन,** चतुर्थ्येकवचने **उदने, उदकाय,** पञ्चम्येकवचने **उदनः, उदकात्,** षष्ठ्येकवचने **उद्नः-उदकस्य** इति। एवमेवान्यानि रूपाणि।

**आस्यानि, आसानि** = आस्यशब्दात् द्वितीयाबहुवचने शसि, तत्स्थाने शि आदेशेऽनुबन्धलोपे विकल्पेन आसन् इत्यादेशे दीर्घे आसानि इति, विकल्पपक्षे नुमागमे, दीर्घे च आस्यानि इति। **एवमेवान्यानि रूपाणि भवन्ति।**

**अकारान्तनपुंसकलिङ्गस्य मांसशब्दस्य सुटि सुप्रभृति द्वितीया विभक्ते औट्पर्यन्तं ज्ञानशब्दवत् मांसम्, मांसे, मांसानि, मांसम् मांसे इति रूपाणि।**

शसादि विभक्तिषु **मांसपूतनासानूनां मांस्पूत्स्नवो वाच्याः शसादौ वा** इत्यनेन वार्तिकेन विकल्पेन मासशब्दस्य स्थाने मांस् इत्यादेशे द्वितीया बहुवचने **मांसि, मांसानि,** तृतीयैकवचने **मांसा, मांसेन,** चतुर्थ्येकवचने **मांसे, मासाय** पञ्चम्येकवचने **मांसः, मांसात्,** षष्ठ्येकवचने **मांसः, मांसस्य** इत्यादीनि रूपाणि भवन्ति।

मूले कथयति **वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तम् - इत्यादि।** अस्येदं तात्पर्यं यत् **पद्दनोमास** इत्यादिसूत्रे तद्वार्तिके च शसप्रभृतिषु इति यदुक्तं तत्र प्रभृतिग्रहणं प्रकारवाचकं (सादृश्यवाचकं) वर्तते, सादृश्यञ्च तत्र प्रत्ययत्वेन गृह्यते। किञ्च प्रभृतिग्रहणस्य प्रकारार्थत्वेऽपि **'स्वमोर्नुपंसकात्'** इत्यनेन लुमि मांस् इत्याद्यादेशा न

भविष्यन्तीति न वाच्यम् – प्रभृतिग्रहणस्य प्रकारवाचकत्वं स्वीकृत्य भाष्यकारेण **मांसपचन्या उखायाः** इत्याद्युदाहृतत्वात्। अयस्मयादित्वेन भसंज्ञकत्वात् पदसंज्ञायाः बाधात् संयोगान्तलोपो न भवतीति।

**पद्नोमास** इत्यत्र वृत्तिकारेण **'शीर्षच्छन्दसि'** (6.1.601) इत्यतः छन्दसि इत्यनुवृत्तिं स्वीकृत्य छन्दस्येव, पद् दत् मांस् इत्यादेशा इत्युक्तम्, परं छन्दोगहणसामर्थ्याल्लोकेऽपि क्वचित् इति कैयटोक्तप्रयोगम् अनुसृत्य पदाद्यादेशा भवन्तीति बोध्यम्।

**इत्यदन्ताः**

**आकारान्तनपुंसकस्य श्रीपा शब्दस्य रूपं साधयितुं प्रवर्तते – तथाहि श्रियं पाति इति विग्रहे क्विप् प्रत्यये, तस्य सर्वापहारिलोपे श्रीपाशब्दः आकारान्तनपुंसकलिङ्गे दीर्घान्तस्य ह्रस्वं विधातुं सूत्रमुपस्थापयति –**

**ह्रस्वो नपुंसके प्रातिपदिकस्य 1.2.47 क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्। श्रीपं ज्ञानवत्। श्रीपाय। अत्र सन्निपातपरिभाषया 'आतो धातोः ( सू. 240 ) इत्याकारलोपो न।**

**इत्यादन्ताः**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदत्रयं वर्तते। ह्रस्वः इति प्रथमान्तं, नपुंसके इति सप्तम्यन्तं, प्रातिपदिकस्य इति षष्ठ्यन्तं पदम्। अचश्च इति परिभाषासूत्रेण षष्ठ्यन्तं पदमुपतिष्ठते। **अलोऽन्त्यस्य** इति सूत्रेण च अन्त्यस्य इत्यर्थो गृह्यते। एतेन नपुंसकलिङ्गे अजन्तप्रातिपदिकान्तस्य अन्त्यस्य ह्रस्वो भवतीति सूत्रार्थः सम्पद्यते। एतेन नपुंसकलिङ्गे श्रीपा इत्यस्यान्त्यस्य ह्रस्वे श्रीप इति रूपं भवति तस्य च ज्ञानशब्दवत् **श्रीपम् श्रीपे श्रीपाणि** इत्यादीनि रूपाणि भवन्ति।

श्रीपाय इत्यादौ श्रीप शब्दात् चतुर्थ्येकवचने ङे विभक्तौ ङे इत्यस्य स्थाने यकारादेशे दीर्घे च श्रीपा य इत्यवस्थायां स्थानिवद्भावेन यादिप्रत्ययपरत्वेन **यचि भम्** इतिसूत्रेण भसंज्ञायाम्, एकदेशविकृतमनन्यवत् इति परिभाषया धातुत्वात् दीर्घे च आकारान्तत्वात् **'आतो धातोः'** इतिसूत्रेण आकारलोपः स्यादिति अत्रोच्यते मूले सन्निपातपरिभाषया आकारलोपो न भवतीति।

**इत्यादन्ताः**

**इकारान्तनपुंसकलिङ्गे विद्यमानस्य शब्दस्य रूपं निरूपयितुं प्रवर्तते –**

**स्वमोर्नपुंसकात् 7.1.23 क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्। वारि।**

**संस्कृतव्याख्या** – विधिसूत्रमिदम्। अत्र पदद्वयम्। सुश्च अम् च तयोः स्वमोः इति षष्ठ्यन्तं पदम्, नपुंसकात् इति पञ्चम्यन्तं पदम्। अत्र **षड्भ्यो लुक्** इत्यतः लुक् इत्यस्यानुवृत्तिर्भवति। अङ्गस्य अधिकारः। एतेन – नपुंसकलिङ्गात् अङ्गात् परस्य सु अम् इत्यनयोर्लुक् स्यादिति सूत्रार्थः। **वारि**।

**वारि** – नपुंसकलिङ्गात् वारिशब्दात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे स्वमोर्नपुंसकात् इति सूत्रेण सुलोपे वारि इति रूपं भवति।

**इकोऽचि विभक्तौ 7.1.103 इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ। वारिणी। वारिणि। न लुमता ( सू. 263 ) इति निषेधस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः, हे वारे! हे वारि! आङो ना ( सू.244 ) इति वारिणा। 'घेर्ङिति' ( सू.245 ) इति गुणे प्राप्ते –**

**वृद्धयौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन ( वा.4373 ) वारिणे। वारिणः। वारिणोः। नुमचिर ( वा. 4374 ) नुट्। नामि। ( सू.209 ) इति दीर्घः। वारीणाम्। वारिणि हलादौ हरिवत्।**

**संस्कृतव्याख्या** - इकः अचि विभक्तौ इति सूत्रस्य पदविभागः। अत्र पदत्रयम्। इकः इति षष्ठ्यन्तम्, अचि इति सप्तम्यन्तम्, विभक्तौ इति सप्तम्यन्तम्। अत्र **नपुंसकस्य झलचः** इत्यस्मात् नपुंसकस्य, इदितो नुम्धातोः इति सूत्राच्च नुमः अनुवृत्तिर्भवति। अङ्गस्य अधिकारः। इकः इति पदम् अनुवृत्तस्य नपुंसकस्य विशेषणम्। विशेषणत्वात्तदन्तविधिः। अचि इत्यत्र '**यस्मिन् विधिस्तदावल्ग्रहणे**' इति परिभाषया तदादिविधौ अजादौ इत्यर्थः। एतेन इगन्ताङ्गस्य नपुंसकस्याङ्गस्य नुमागमो भवति अजादौ विभक्तौ परे इति सूत्रार्थः सम्पद्यते। वारि औ, वारिणौ इति।

सम्बोधने हे वारि इत्यत्र प्रत्ययलक्षणेन सम्बुद्धिमाश्रित्य '**ह्रस्वस्य गुणः**' इतिसूत्रेण प्राप्तस्य गुणस्य **न लुमताङ्गस्य** इति सूत्रेण निषेधे हे वारि इत्येवं रूपं स्यात् परं भाष्यकारेण न लुमताङ्गस्य इत्यस्य अनित्यत्वस्वीकारात् अनित्यत्वपक्षे गुणे हे वारे, इत्यपि रूपम्। न लुमताङ्गस्य अनित्यत्वे इकोऽचि विभक्तौ इत्यस्मिन् सूत्रे अचि ग्रहणमेव ज्ञापकम्।

तृतीयैकवचने टा विभक्तौ, **आङो ना** इत्यादिसूत्रेण नाभावे वारिणा इति। ङित्विभक्तौ '**घेर्ङिति**' इति सूत्रेण गुणे प्राप्ते **वृद्धयौ त्वतृज्** इत्यादि वार्तिकेन पूर्वविप्रतिषेधेन वृद्धिम् औत्वं, तृज्वद्भावं, गुणञ्च प्रबाध्य परत्वात् '**इकोऽचि विभक्तौ**' इतिसूत्रेण नुमागम इति। **वारिणे। वारिणः**। षष्ठीबहुवचने वारि आम् इत्यवस्थायाम् - **नुम्चिर**-इत्यादिना पूर्वविप्रतिषेधेन नुडागमेऽनुबन्धलोपे, '**नामि**' इतिसूत्रेण दीर्घे, णत्वे च **वारीणाम्** इति। हलादिविभक्तौ वारिशब्दस्य हरिशब्दवत् रूपाणि भवन्ति।

**वारिणी** = नपुंसकात् वारिशब्दात् प्रथमाद्वितीया द्विवचने औ विभक्तौ वारि और इति जाते '**नपुंसकाच्च**' इतिसूत्रेण औकारस्य स्थाने शी इत्यादेशे अनुबन्धलोपे, '**इकोऽचि विभक्तौ**' इति सूत्रेण नुमागमेऽनुबन्धलोपे, '**अट्कुप्वाङ्**' इत्यादिना नस्य णत्वे वारिणी इति रूपं सिद्ध्यति।

**वारीणि** = वारिशब्दात् नपुंसके प्रथमाबहुवचने जस् विभक्तौ वारि जस् इति जाते '**जश्शसोः शि**' इतिसूत्रेण जसः स्थाने शी इत्यादेशेऽजनुबन्धलोपे, '**इकोऽचि विभक्तौ**' इतिसूत्रेण नुमागमेऽनुबन्धलोपे, '**सर्वनामस्थाने चासम्बुद्धौ**' इतिसूत्रेण उपधादीर्घे नस्य णत्वे वर्णसम्मेलने वारीणि इति रूपं भवति।

**वारिणा** = वारिशब्दात् तृतीयैकवचने टा विभक्तौ, अनुबन्धलोपे वारि आ इत्यवस्थायाम् '**इकोऽचि विभक्तौ**' इतिसूत्रेण प्राप्तं नुमं प्रबाध्य '**आङो नाऽस्त्रियाम्**' इतिसूत्रेण आकारस्य स्थाने ना इत्यादेशे नस्य णत्वे, वर्णसम्मेलने वारिणा इति।

**वारिणे** = वारिशब्दात् चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे वारि ए इत्यवस्थायां '**घेर्ङिति**' इतिसूत्रेण गुणे प्राप्ते किन्तु '**वृद्धयौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन**' इति वार्तिकसहकारेण परत्वात् '**इकोऽचि विभक्तौ**' इतिसूत्रेण नुमागमेऽनुबन्धलोपे, नस्य णत्वे वर्णसम्मेलने वारिणे इति रूपं भवति।

**वारीणाम्** = नपुंसकात् वारिशब्दात् षष्ठीबहुवचने आम् विभक्तौ वारि आम् इति जाते '**नुमचिरतृज्वद्भावेभ्यो नुट् विप्रतिषेधेन**' इति वार्तिकसहकारेण नुमागमं प्रबाध्य '**ह्रस्वनद्यापो नुट्**' इतिसूत्रेण नुटि, अनुबन्धलोपे वारि न् आम् इति जाते '**नामि**' इतिसूत्रेण दीर्घे नस्य णत्वे, वर्णसम्मेलने वारीणाम् इति रूपं सिद्ध्यति।

**वारिषु** = वारिशब्दात् सप्तमीबहुवचने सुप् प्रत्ययेऽनुबन्धलोपे '**आदेशप्रत्यययोः**' इतिसूत्रेण सस्य षत्वे वारिषु इति।

**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य 7.1.74**

**प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं, पुवंद्वा स्याट्टादावचि।**

**अनादये, अनादिने इत्यादि। शेषं वारिवत्। पीलुर्वृक्षः, तत्फलं पीलु तस्मै पीलुने। अत्र न पुंवत्, प्रकृतिनिमित्तभेदात्।**

**संस्कृतव्याख्या** - पुंवद्भावविधायकं सूत्रमिदम्। '**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य**' इति सूत्रस्य पदविभागः। तृतीया आदौ यासां तास्तृतीयादयस्तासु तृतीयादिषु इति सप्तम्यन्तं पदम्। भाषितः पुमान् येन तत् भाषितपुस्कं शब्दस्वरूपम् इति बहुब्रीहि समासघटकं प्रथमान्तम्, पुंवत् इति प्रथमान्तम् अव्ययपदम्, गालवस्य इति षष्ठ्यन्तम् एतन्नाम्न आचार्यस्य।

अत्र सूत्रे अनुवृत्तस्य विभक्तौ इत्यस्य वचनविपरिणामेन विभक्तिषु इति कृत्वा तृतीयादिषु इत्यनेन सहान्वयो भवति, एवमेव अनुवृत्तस्य इकः इत्यस्य इक् इति प्रथमान्तत्वेनान्वये तदन्तविधिना च इगन्तम् इत्यर्थः, नपुंसकस्यापि एवमेव नपुंसकम् इति प्रथमान्तत्वेनान्वयो भवति। इत्थम् - सूत्रस्यार्थो भवति यत् प्रवृत्तिनिमित्तस्य ऐक्ये भाषितपुंस्क इगन्तनपुंसकशब्दो विकल्पेन पुंवद् भवति अजादिषु विभक्तिषु परेष्विति आचार्यगालवमते इति।

**प्रवृत्तिनिमित्तन्नाम** - स्वार्थबोधनाय शब्दे विद्यमानं यत् निमित्तं तदेव प्रवृत्तिनिमित्तमित्यर्थः। तद्यथा ब्राह्मणस्यार्थबोधाय ब्राह्मणशब्दः प्रवृत्तो भवति तत्र प्रवृत्तेर्निमित्तं ब्राह्मणत्वम्। इत्थमेकं विशिष्टमर्थं निमित्तीकृत्य प्रवर्तनं प्रवृत्तिनिमित्तमिति तात्पर्यम्।

यद्विशेषणं निमित्तीकृत्य शब्दः पुल्लिङ्गे प्रवृत्तः तदेवविशेषणमुद्दिश्य शब्दस्य नपुंसकलिङ्गे प्रवर्त्तनम् - प्रवृत्तिनिमित्तैक्यम्। यथा अनादिशब्दः। अत्र न विद्यते आदिर्यस्य इति विग्रहे अनादित्वप्रवृत्तिनिमित्तेन पुल्लिङ्गे नपुंसकलिङ्गे च प्रवर्तनात् अनादिशब्दो भाषितपुस्कः (प्रवृत्तिनिमित्तैक्यम्) अतः अनादिशब्दे पुंवदभावपक्षे '**इकोऽचि विभक्तौ**' इतिसूत्रेण नुमागमो न भवति, तस्मात् चतुर्थ्येकवचने **अनादये, अनादिने** इति द्वयमपि रूपं भवति। **पीलर्वृक्षः फलं** पीलु तस्मै **पीलुने** अत्र न पुंवत् प्रवृत्तिनिमित्तस्य भिन्नत्वात्। अतस्तस्य पीलुने इत्येकमेव रूपं भवतीति।

**दधिशब्दनिर्वचनम्** -

दधिशब्दस्य प्रथमाद्वितीयाविभक्तौ वारिशब्दवदेव रूपं भवति तृतीयाद्यजादिषु विभक्तिषु भेदात् तत्स्वरूपं निरूपयितुमग्रिमं सूत्रं प्रवर्तते। तथाहि -

**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः 7.1.75 एषामनङ् स्याट्टादावचि, स चोदात्तः। अल्लोपोऽनः (सू. 234) दध्ना। दध्ने। दध्नः, दध्नोः, दध्नाम्। दध्नि, दधनि,। दध्नोः। शेषं वारिवत्। एवमस्थि सक्थ्यक्षीणि। तदन्तस्याप्यनङ्। अतिदध्ना।**

**इति इदन्ता**

**संस्कृतव्याख्या** - अस्थिदधिसक्थ्यक्ष्णाम् अनङ् उदात्तः इति सूत्रस्य पदविभागः। अत्र पदत्रयम्। अस्थि च दधि च सक्थि च अक्षि च तेषाम्, अस्थिदधिसक्थ्यक्ष्णाम् इति षष्ठ्यन्तं पदम्, अनङ् उदात्त एतद्वयं प्रथमान्तं पदम्। अत्र '**इकोऽचि विभक्तौ**' इतिसूत्रात् विभक्तौ, अचि इत्यनयोः वचनविपरिणामेण अक्षु विभक्तिषु इति पदद्वयमनुवर्तते। **तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य** इत्यतः तृतीयादिषु इत्यप्यनुवर्तते। इत्थम् - तृतीयादिषु अजादिषु विभक्तिषु परेषु अस्थि दधि अक्षि इत्येतेषां शब्दानाम् अन्त्यस्य स्थाने अनङादेशः स्यात् इति सूत्रार्थः। **अल्लोपोऽनः** इति सूत्रेण अल्लोपे दध्ना दध्ने इत्यादीनि रूपाणि भवन्तीति।

**दध्ना** –दधिशब्दात् तृतीयैकवचने टा विभक्तौ, अनुबन्धलोपे दधि आ इति जाते **'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इ**ति सूत्रेण इकारस्य स्थाने अनङादेशेऽनुबन्धलोपे दध् अन् आ इति जाते, **'अल्लोपोऽनः'** इतिसूत्रेण अकारलोपे, वर्णसम्मेलने दध्ना इति।

एवमेव चतुर्थ्येकवचने दध्ने, पञ्चमीषष्ठ्येकवचने **दध्नः**, ओसि **दध्नोः**, षष्ठीबहुवचने **दध्नाम्** इति।

**दधनि, दध्नि** = दधिशब्दात् सप्तम्येकवचने ङि विभक्तौ, अनुबन्धलोपे अनङादेशेऽनुबन्धलोपे, **'विभाषा ङिश्योः'** इतिसूत्रेण विकल्पेन अकारलोपे दध्नि, विकल्पपक्षे दधनि इति रूपद्वयं भवति। शेषं वारिवत्

**इति इदन्ताः**

**सुधीशब्दः** – सुधि। सुधिनी। सुधीनि। हे सुधे! हे सुधि! सुधिया, सुधिना। सुधियाम्, सुधीनाम्। प्रध्या, प्रधिना। **इति इदन्ताः।**

सुष्ठु ध्यायति अथवा शोभना धीर्यस्य तत् कुलम् इत्यर्थे सुधी शब्दस्य नपुसंकलिङ्गे, **'ह्रस्वो नपुसंके प्रातिपदिकस्य'** इति सूत्रेण ईकारस्य ह्रस्वे सुधिशब्दः। तस्य **सुधि सुधिनी सुधीनि, सुधिया, सुधिना** इत्यादीनि रूपाणि भवन्ति। एवमेव प्रध्यापयति कुलम् इत्यर्थे प्रधिशब्दस्यापि रूपाणि बोध्यानि।

**इति ईदन्ताः**

**मधु। मधुनी। मधूनि। हे मधो! हे मधु। एवम्ब्वादयः। सानुशब्दस्य स्नुर्वा स्नूनि, सानूनि।**

**प्रियक्रोष्टु। प्रियक्रोष्टुनी। तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्। प्रियक्रोष्टूनि। टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा, प्रियक्रोष्टुना। प्रियक्रोष्ट्रे, प्रियक्रोष्टवे। अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव। प्रियक्रोष्टुना। नुमचिर ( वा. 4374 ) इति नुट्। प्रियक्रोष्टूनाम्।**

**इत्युदन्ताः**

**संस्कृतव्याख्या – मधुशब्दस्य रूपं** वारिशब्दवदेव भवति केवलं नुमागस्य नस्य णत्वमत्र न भवति। तद्यथा= मधु मधुनी मधूनि, हे मधो, हे मधु – इत्यादीनि रूपाणि भवन्ति। एवमेव अम्बु इत्यादीनां शब्दानां रूपाणि।

सानुशब्द (पर्वतः) पुल्लिङ्गे नपुंसकलिङ्गे चापि भवति तस्य नपुंसके मधुशब्दवत् सानु सानुनी, सानूनि। शसादिविभक्तिषु **पद्दनोमास्** इत्यादिना विकल्पेन स्नु आदेशे नुमागमे दीर्घे च **स्नूनि,** विकल्पपक्षे **सानूनि** इति रूपं भवति।

**प्रियक्रोष्टुः** = प्रियः क्रोष्टा यस्य कुलस्य इति बहुव्रीहिसमासे प्रियक्रोष्टुशब्दस्य नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने सुविभक्तौ **स्वमोर्नपुंसकात्** इति सूत्रेण सुलोपे प्रियक्रोष्टु इति।

**प्रियक्रोष्टुनी** = औ विभक्तौ, **नपुंसकाच्च** इति सूत्रेण औकारस्य स्थाने शी आदेशे **'इकोऽचि विभक्तौ'** इतिसूत्रेण नुमागमेऽनुबन्धलोपे, वर्णसम्मेलने प्रियक्रोष्टुनी इति।

**प्रियक्रोटूनि** = प्रथमाबहुवचने जस् विभक्तौ शि आदेशे, अनुबन्धलोपे नुमागमे, **'सर्वनामस्थाने चाऽसम्बुद्धौ'** इतिसूत्रेण उपधा दीर्घे प्रियक्रोष्टूनि इति।

**टादौ 'तृतीयादिषु भाषितपुंस्कं गालवस्य इतिसूत्रेण विकल्पेन पुंवद्भावे रूपद्वयम्। प्रियक्रोष्ट्रा, प्रियक्रोष्टुना इत्यादि द्विविधं रूपं भवति, हलादौ समानमेवेति।**

**इत्युदन्ताः**

**सुलु, सुलुनी, सुलूनि। पुनस्तद्वत्। सुल्वा, सुलुना।**

**इत्यूदन्ताः**

**धातृ। धातृणी। धातृणि। हे धातः। हे धातृः! । धात्रा, धातृणा। एवं ज्ञातृकर्त्रादयः।**

**इत्यृदन्ताः**

सुष्ठु लुनाति इत्यर्थे क्विप्प्रत्यये तस्य सर्वापहारिलोपे दीर्घे च सुलूशब्दो निष्पद्यते तस्य नपुंसके **'ह्रस्वो नपुंसके प्रातिपदिकस्य'** इतिसूत्रेण ह्रस्वे कृते सुलू (शस्त्र) विशेष्यनिघ्नः त्रिलिङ्गः।

एवं सुलूशब्दस्यापि पूर्ववदेव सुलु सुलुनी सुलूनि प्रथमाविभक्तौ तान्येव रूपाणि द्वितीया विभक्तौ अपि। तृतीया अजादिविभक्तिषु तृतीयादिषु भाषित इत्यादिसूत्रेण विकल्पेन पुंवद्भावे रूपद्वयं भवति, सुल्वा, सुलुना इत्यादि।

**इति ऊकारान्ताः शब्दाः**

धातृ(कुलम्) इत्यर्थे धातृशब्दस्यापि पूर्ववदेव नुमागमे उपधादीर्घे णत्वे च कृते धातृ - धातृणी धातॄणि इत्यादीनि रूपाणि भवन्ति। तृतीयादिषु रूपद्वयं धात्रा, धातृणा इत्यादि। एवं ज्ञातृ-कतृ इत्यादिनपुंसकानां रूपाणि।

**इत्यृदन्ताः**

**प्रकृष्टा द्यौर्यस्मिन् दिने तद् दिनम् प्रद्यु ( मेघरहितः स्वच्छ आकाराः ) अत्र प्र उपसर्गपूर्वकात् द्यो शब्दः क्विप्प्रत्ययान्त 'प्रद्यो' इति नपुंसकलिङ्गः। तस्य ह्रस्वो नपुंसके इति सूत्रेण ह्रस्वे प्राप्ते अग्रिमं सूत्रं प्रवर्तते।**

**एच इग्घ्रस्वादेशे 1.1.48 आदिश्यमानेषु ह्रस्वेषु च इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनी। प्रद्युनेत्यादि। इह न पुंवत्, यदिगन्तं प्रद्यु इति, तस्य भाषितपुंस्कत्वाभावत्। एवमग्रेऽपि। इत्योदन्ताः।**

**प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृतस्यानन्यत्वात्'रायो हलि' इति ( सूत्र 286 ) इत्यात्वम्। प्राराभ्याम्। प्राराभिः। नुमचिर ( वा. 4374 ) इति नुट्यात्वे प्राराणाम् इति माधवः। वस्तुतस्तु सन्निपातपरिभाषया नुट्यात्वं न। नामि इति दीर्घस्त्वारम्भसामर्थ्यात्सन्निपातपरिभाषां बाधत इत्युक्तम्। प्ररीणाम्। इत्यैदन्ताः।**

**सुनु, सुनुनी, सुनूनि। सुनुना, सुनने इत्यादि। इत्यौदन्ताः।**

**इत्यजन्तनपुंसकलिङ्गप्रकरणम्**

**संस्कृतव्याख्या - एच इग्घ्र......।** नियमसूत्रमिदम्। एच इक् ह्रस्वादेशे इति पदत्रयम्, ह्रस्वश्चासौ आदेश ह्रस्वादेशः, तस्मिन् ह्रस्वादेशे इति सप्तम्यन्तम् पदम् एचः इति षष्ठ्यन्तम्। इक् इति प्रथमान्तं पदम्। एचः इत्यस्य षष्ठ्यन्तत्वात् 'स्थाने' इति पदम् उपतिष्ठते। एतेन एचां स्थाने इक् एव ह्रस्वः स्यादिति सूत्रार्थः।

अत्रेदं बोध्यं यत् **'ह्रस्वो नपुसंके प्रातिपदिकस्य'** इति सूत्रेणैव ह्रस्वे सिद्धे कथमिदं सूत्रमिति चेत् कथयति एच प्रत्याहारस्थाः वर्णा ह्रस्वसंज्ञका न भवति यदि एचः स्थाने ह्रस्वः स्यात्तदा स्थानआन्तर्यात् इक एव स्यादिति नियमाय सूत्रमिति। यद्यपि सूत्रमिदं भाष्यकारेण प्रत्याख्यातम् स्थानकृतान्तर्येणैव ह्रस्वसिद्धत्वात्।

**प्रद्युः** = प्रद्यूशब्दात् नपुंसके कृतह्रस्वात् प्रद्युशब्दात् प्रथमैकवचने सुविभक्तौ स्वमोर्नुपुंसकात् इतिसूत्रेण सुलोपे प्रद्यु इति।

**प्रद्यूनि** = प्रद्युशब्दात् औ विभक्तौ तत्स्थाने शी इत्यादेशे नुमि, अनुबन्धलोपे प्रद्युनी इति।

**प्रद्यूनि** = प्रद्युशब्दात् जसि, तत्स्थाने शि आदेशे नुमि, अनुबन्धलोपे, सर्वनामस्थानसंज्ञायाम् उपधादीर्घे प्रद्यूनि इति। एवमेव द्वितीयायामपि।

तृतीयादौ, **तृतीयादिषु भाषितपुंस्क** इत्यादिना विकल्पेन पुंवद्भावो न भवति भाषितपुंस्कत्वाभावात् तस्मात् एकमेव रूपं प्रद्युना, प्रद्युने इत्यादीनि बोध्यानि।

**इत्योदन्ताः**

**प्रकृष्टो = राः ( धनं ) यस्य कुलस्य तत्** इत्यर्थे प्रोपसर्गत पूर्वकात् रै धातोः क्विप् प्रत्यये प्रै इति जाते, नपुंसके ह्रस्वोनपुंसके प्रातिप्रदिकस्य इति सूत्रेण **'एच इग्घ्रस्वादेशे'** इति नियमात् ऐकारस्य स्थाने ह्रस्वे इकारादेशे प्ररि इति, तस्य प्रथमाद्वितीयाविभक्तौ प्ररि। प्ररिणी। प्ररीणि। इति रूपाणि, तृतीयादौ वारिशब्दात् रूपाणि भवन्ति।

**प्ररीणाम् = प्ररिशब्दात् षष्ठी बहुवचने आम् विभक्तौ माधवाचार्यमते 'नुमचिरतृज्वद्भावेभ्यो नुट् विप्रतिषेधेन' इति वार्तिकेन परत्वात् नुडागमे, 'रायो हलि' इति सूत्रेण इकारस्य आकारादेशे प्राणाम् इति रूपं भवति।**

**वस्तुतः अत्र दीक्षितमते सन्निपातपरिभाषय नुटि, आत्वं न भवति अपितु प्ररि आम् इत्यवस्थायां ह्रस्वनद्यापो नुट् इतिसूत्रेण नुटि, अनुबन्धलोप, नामि इतिसूत्रेण दीर्घे, नस्य णत्वे प्ररीणाम् इति रूपं भवति।**

**इत्यैदन्ताः**

सुष्ठु नौर्यस्य तत् कुलम् इत्यर्थे क्विप् प्रत्यये सुनौ इत्यस्य नपुंसके **'एच इग्घ्रस्वादेशे'** इति नियमात् **'ह्रस्वो नपुंसके प्रातिपदिकस्य'** इतिसूत्रेण ह्रस्वे सुनु इति शब्दो भवति तस्य सुनु सुनुनी, सुनूनि इत्यादीनि रूपाणि भवन्तीति शम्।

**इति राजधरमिश्रकृतया संस्कृतव्याख्यया सहितमजन्तनपुंसकलिङ्गप्रकरणं सम्पूर्णम्।**

**इत्यजन्तत्रिलिङ्गप्रकरणम्**

# पाणिनीयशिक्षा

**१. प्रतिज्ञा**

**अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।**

**शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः।।१।।**

**प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः।**

**पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम्।।२।।**

शब्दोच्चारणविषये लौकिकेषु वैदिकेषु च प्राचीनेषु शिक्षाग्रन्थेषु यादृशं पाणिनीयं मतं कथितं तत्प्रकृष्टरूपेण कथयिष्यामीति तद् शिष्यजनो जानीयात्=अवबुध्येत।।१।।

पूर्वेषु प्रातिशाख्यादिशास्त्रेषु स्पष्टतया प्रतिपादितत्वेन प्रसिद्धमपि अध्येतुमसमर्थैरल्पज्ञानिभिः सामान्यतो ज्ञातमपि विशेषतोऽज्ञातं यज्ञादिप्रयोगे उच्चारणकाले स्थानप्रयत्नादिनोच्चारणमूलकम् अपभ्रंशजन्यात् दोषात् रक्षणाय बालानामपि सुखबोधाय च लघुना=सरलरीत्या, वाचः उच्चारणे विधिं स्पष्टीकरिष्यामि इति।।२।।

**२. वर्णसङ्ख्या-**

**त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः सम्भुमते मताः।**

**प्राकृते संस्कृते चाऽपि स्वयं प्रोक्ताः स्वयम्भुवा।।३।।**

शौरसेन्यादिप्राकृतभाषायां वैदिकलौकिकसंस्कृतभाषायां च ब्रह्मणा स्वयं प्रतिपादिता वर्णाः **त्रिषष्टिः, चतुः षष्टिः** वा विदुषां सम्मता वर्तत इति तात्पर्यम्।

**३. वर्णानां पृथक्-पृथक् भेदः संख्या च**

**स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**

**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।४।।**

**अनुस्वारो विसर्गश्च ⌣क  पौ चाऽपि पराश्रितौ।**

**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च।।५।।**

अकारादयः स्वरा **एकविंशति** सङ्ख्याकाः, कादयो मावसानाः स्पर्शाः **पञ्चविंशति**सङ्ख्याकाः, यकारादयो

हकारान्ता अन्तस्थाः ऊष्माणश्चेति **अष्टौ** वर्णाः, वर्गप्रथमद्वितीयतृतीयचतुर्थसमानधर्मवर्णा कुँ खुँ गुँ घुँ इति लिपिभिर्वर्णसमाम्नायलेखे सङ्केतिताः यमाख्याः नासिकास्थाना वर्णाः **चत्वारः, अनुस्वार विसर्गः, जिह्वामूलीयः, उपध्मानीयः, दुःस्पृष्टः** इत्यपि व्यवह्रियमाण प्लुतलृकारश्चेति संकले **त्रिषष्टिः** वर्णाः विज्ञेयाः। अनुस्वारमतविशेषे अनुस्वाररङ्गभेदभिन्नस्य द्वित्वेन च गणने चतुःषष्टिः वर्णा बोध्याः।

**४. वर्णोत्पत्तिप्रक्रिया**

**आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।**

**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।६।।**

**मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।**

**प्रातस्सवनयोगं तं छन्दो गायत्रमाश्रितम्।।७।।**

**कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।**

**तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्।।८।।**

**सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।**

**वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः।।९।।**

जीवो बुद्धया विषयान् सम्यग् ज्ञात्वा विचार्य च वक्तुमिच्छया मनः योजयति, मनः शारीरम् अग्निं व्यापारे प्रवर्तयति, तथा प्रवृत्तोऽग्निः कोष्ठ्यं वायुं प्रेरयति।।६।। तथा प्रेरितो वायुः उरसि चरन् प्रातः सवनभक्तं गायत्रंछन्दोऽनुगतं मन्द्रं स्वरम् उत्पादयति।।७।। कण्ठे चरन् माध्यन्दिनसवनभक्तं त्रिष्टुप् छन्दोऽनुगतं मन्द्रतारमध्यवर्तिनं स्वरम् उत्पादयति, शिरसि चरन् तृतीयसवनभक्तं जागतछन्देऽनुगतं तारं स्वरं जनयति।।८।। यथास्थानं त्रिविधान् स्वरान् उत्पादयिता उदीर्णः वायु मूर्ध्नि प्रतिहतो वदनं (मुखं) प्राप्य अकारादिकान् वर्णान् जनयति इति।।९।।

**५. वर्णभेदकारणगणना-**

**स्वरतः कालतः स्थानात्प्रयत्नाऽनुप्रदानतः।**

**इति वर्णविदः प्राहुर्निपुणं तन्निबोधत।।१०।।**

तथोत्पन्नानां वर्णानाम् उदात्तदिस्वरात्, ह्रस्वदीर्घादिकालात्, कण्ठमूर्धताल्वादिस्थानात्, आभ्यन्तरप्रयत्नबाह्यप्रयत्नाभ्यां चेति पञ्चप्रकारेण विभेदो भवति इति वर्णविशेषज्ञाः शास्त्रज्ञाः कथयन्ति। तद्वर्ण विकारं सूक्ष्मेक्षिकया जानीयात्।।१०।।

**६. स्वरकृतकालकृतवर्णभेदा-**

**उदात्तश्चाऽनुदात्तश्च स्वरितश्च स्वरास्त्रयः।**

**ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि।।११।।**

अकारादिषु स्वरेषु उदात्तः अनुदात्तः, स्वरितश्चेति त्रयः स्वराः, ह्रस्वः दीर्घः, प्लुत इत्येते कालकृतभेदाः भवन्ति।।११।।

**७. पाठस्वर-गानस्वर-संवादः-**

**उदात्ते निषादगन्धारावनुदात्त ऋषभधैवतौ।**

**स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः।।१२।।**

गान्धर्ववेदे गाने वा प्रसिद्धौ निषादगान्धारौ स्वरौ वैदिके स्वरे अन्तर्भवतः, तथैव ऋषभधैवतौ स्वरे अनुदात्ते अन्तर्भवतः, प्रसिद्धाः षडज-मध्यमपञ्चमस्वराः वैदिकस्वरितस्वरमूला इति स्वरिते अन्तर्भवन्ति। इति।।१२।।

**८. वर्णस्थानगणना-**

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**

**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।१३।।**

अकारादीनां वर्णानाम् उरः, कण्ठः, मूर्धा, जिह्वामूलम्, दन्ताः, नासिका, ओष्ठौ तालु चेति अष्टौ स्थनानि भवन्ति। (उरः=वक्षः)

**९. उष्मगतिभेदाः-**

**ओभावश्च विवृत्तिश्च शषसा रेफ एव च।**

**जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।।१४।।**

ऊष्मणः =विसर्गस्य ओकारभावः, विवृत्तिः, शकारभावः, षकारभावः, सकारभावः, रेफभावः, जिह्वामूलीयभावः, उपध्मानीयभावश्चेति अष्टप्रकारेण परिणता भवन्ति।

**१०. ऊष्मगतिविशेषविचारः-**

**यद्योभावप्रसन्धानमुकारादिपरं पदम्।**

**स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः।।१५।।**

यदि ओभावप्राप्तिमता सन्धिना युक्तं पदम् उकारादिकपदपरं भवति तर्हि तादृशं पदम् अकारस्वरान्तं जानीयात्, यत् परस्थिताऽनुकारादिकपरम् ओभावप्राप्तिमता सन्धिना युक्तं पदं भवति तर्हि तत् स्पष्टरूपेण विसर्गस्य ओभावप्राप्तिरूपेण गतिविशेषेण युक्तं पदम् अवबुध्येत।

**११. वर्णविशेषस्थाननिरूपणम्-**

**हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।**

**औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्।।१६।।**

**कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।**

**स्युर्मूर्धन्या ऋटुरषा दन्त्या लतुलसाः स्मृताः।।१७।।**

**जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।**

**एऐ तु कण्ठतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ।।१८।।**

वर्गपञ्चमवर्णैः संयुक्तम् अन्तस्थासंज्ञकैः वर्णैः संयुक्तं च हकारम् उकारस्थानकं जानीयात्, वर्गपञ्चमैर्वर्णैः अन्थासंज्ञकैर्वर्णैश्चाऽपि असंयुक्तं हकारं तु कण्ठस्थानकमेव जानीयात्।।१६।।

अकारहकारौ कण्ठस्थानौ, इकारः चवर्गीयवर्णः यकारः शकारश्च तालुस्थाीयः। उकारः पवर्गीयवर्णौ ओष्ठस्थानौ, ऋकारटवर्गीयवर्णः-रेफ-षकारा मूर्धस्थानकाः, लृकार-तवर्गीयवर्णः लकारः शकरश्च दन्तस्थानका वर्णा भवन्ति।।१७।।

कवर्गीयवर्णो बुधैः जिह्वामूलोत्पन्नः कथितः, वकारो दन्तकरणकः ओष्ठभवः स्मृतः, ऐकारैकारौ बुधैः कण्ठतालुभवौ कथितौ, ओकारौकारौ कण्ठोष्ठोत्पन्नौ कथितौ इति।

१२. ए ओ ऐ औ- वर्ण विचारः

**अर्धमात्रा तु कण्ठया स्यादेकारैकारयोर्भवेत्।**

**ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम्।।१९।।**

ऐकारे औकारे च आद्यअर्धमात्रात्मको भागः कण्ठ स्थानकस्य अवर्णस्य भवेत्। एकारे ओकारे च आद्यः मात्रात्मको भागः कण्ठस्थानकस्य अवर्णस्य भवेत् परिशेषात् अवशिष्टो भागः ऐकारे एकारे च इवर्णस्य औकारे ओकारे च उ वर्णस्य भवेत्, तयो ऐकारौकारयो एकारौकारयोश्च पूर्ण भागयोः अवर्णयो क्रमेण विवृतं संवृतं च करणं भवति।

**१३. संवृत विवृतवर्णविशेष विचारः**

**संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।**

**घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः।।२०।।**

**स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्।**

**तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च।।२१।।**

ह्रस्वम् अवर्णं संवृतं ज्ञेयम्, दीर्घं तु अवर्णं विवृतं ज्ञेयम् सर्वे घोषवन्तो वर्णाः संवार प्रयत्नाः कथिताः, अघोषवर्णा विवारप्रयत्नवन्तः कथिताः सन्ति। अकारादीनां स्वराणां शषसहानां च करणं विवृत कथितम्, स्वरेभ्यः शषसहेभ्यश्च एकारौकारौ विवृततरौ स्मृतौ एकारोकाराभ्यामपि ऐकारौकारौ विवृततरौ निगदितौ इति।

**१४. अनुस्वार यम-अयोगवाहवर्णविचारः-**

**अनुस्वारयमानां च नासिका स्थानमुच्यते।**

**अयोगवाहा विज्ञेया आश्रयस्थानभागिनः।।२२।।**

अनुस्वारस्य, यमाख्यानां वर्णानां च उच्चारणस्थानं नासिका कथ्यते। अयोगवाहनामका अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयमनासिक्या वर्णा स्वाश्रयभूतस्व-पूर्ववर्तिस्वरस्थानभागिनः विज्ञेयाः।

**१५. अनुस्वाराद्युच्चरणवैशिष्ट्यनिरूपणम्-**

**अलाबुवीणानिर्घोषो दन्तमूल्यः स्वरानुगः।**

**अनुस्वारस्तु कर्तव्यो नित्यं होः शषसेषु च।।२३।।**

**अनुस्वारे विवृत्त्यां तु विरामे चाऽक्षरद्वये।**

**द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः।।२४।।**

स्वरस्य पृष्ठे आगतः अनुस्वारः (स्वरमनुगच्छन् अनुस्वारः) हकाररेफ-श ष ष स इत्येतेषु परेषु तु नित्यं दन्तमूलस्थानकः जम्भरूपः, तुम्बीवीणाध्वनितुल्यो ध्वनि उच्चारणीयः।

यथा वकारौकारयोः उच्चारणीययोः सतो ओष्ठौ द्विवारं प्रचालयेत् तथैव अनुस्वारे, विवृतौ, विरामे, अक्षरद्वये च ओष्ठ्यो स्वरयोर्मध्ये विद्यमाने सति तयोः ओष्ठयोः स्वरयो उच्चारणीययो सतो ओष्ठौ द्विवारं प्रचालयेत्।

**१६. वर्णोच्चारणे कौशलवर्णनम्-**

**व्याघ्री यथा हरेत् पुत्रान्दंष्ट्राभ्यां न च पीडयेत्।**

**भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।२५।।**

यथा व्याघ्री मम शावको मुखात् कदाचित् न पतेत् न वा छिद्रितं भवेत् इति चिन्तयन्ती भीता सती सावधानतया तां दंष्ट्राभ्याम् इतस्ततः नयति परं तं न पीडयति तथैव वर्णोच्चरणकर्त्रा अकारादिकान् वर्णान् प्रयोजयेत्= उच्चारयेत् इति।

**१७. रङ्गवर्णोच्चारणनिरूपणम्-**

**यथा सौराष्ट्रिका नारी तक्रऽाँ इत्यभिभाषते।**

**एवं रङ्गाः प्रयोक्तव्याः खे अराऽ।ँऽ इव खेदया।।२६।।**

**रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत् पूर्वमक्षरम्।**

**दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत्।।२७।।**

**हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि।**

**नासिकायां तथाऽर्धं च रङ्गस्यैवं द्विमात्रता।।२८।।**

**हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरन्।**

**मार्दवं च द्विमात्रं च जघन्वाऽ।ँ इति निदर्शनम्।।२९।।**

यथा सुराष्ट्रदेशोत्पन्ना गुर्जरी तक्रविक्रयिणी गोपालवनिता येन प्रकारेण ह्रस्वान्तमपि तक्रपदं दीर्घान्तं कृत्वा तद्दीर्घकृतस्वरप्रान्ते ह्रस्वम् ऑ इत्येतादृशं वर्णं योजयित्वा स्वतक्रविक्रयार्थं भ्रमणसमये तक्रऽऽऑ'' इति वदति एवमेव ''खे अराऽऽआँऽ इव खेदया'' इत्यादिषु स्थलेषु रङ्गवर्णा उच्चारणीयाः।

वेदाध्यायिनो जना रङ्गवर्णं पटुतया प्रस्फुटतया उच्चारयेयुः रङ्गपूर्ववर्तिनं स्वरं न ह्रस्व कुर्युः तं दीर्घम् उच्चारयेयुः रङ्गपूर्ववर्तिदीर्घस्वरोच्चारणानन्तरं नासिकामात्रस्थानकं वर्णं रङ्गाख्यम् उच्चारयेयुः।।२७

हृदये तु एकमात्रः मूर्धनि तु अर्धमात्रः तथा नासिकायाम् अर्धञ्च एवं रङ्गस्य द्विमात्रता बोध्या।। २८।।

उरः स्थलादुपरि आगच्छन् कांस्यवाद्यध्वनिना समानं ध्वनिः दधद् मृदु द्विमात्रश्च रङ्ग उच्चारणीयः, तद्यथा- ऋग्वेदे जघन्वाऽाँ इति। २९।।

**१८. कम्पस्वरोच्चारणवैशिष्ट्यवर्णनम्**

**मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्।**

**सरङ्गं सम्पयेत्कम्पं रथीवेति निदर्शनम्।।३०।।**

कम्पनशीलं स्वरमुच्चारणकाले स्वरमध्यभागे कम्पितम् इव कृत्वा उच्चारयेत्, मध्यभागात् पूर्वं परं च भागम् उदात्ततया, अनुदात्ततया वा तुल्यं (समानं) कृत्वा उच्चारयेत्, यदि क्वचित् कम्पस्वरः रङ्गसहितो भवति तदा रङ्गसहितं स्वरं कम्पयेत्। यथा- ऋग्वेदे आगत वरष्याँ ३ इत्यत्र सरङ्गः कम्पस्वरो विद्यते।

**१९. वर्णोच्चारण कौशलमहात्म्यम्-**

**एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ता न च पीडिताः।**

**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।।३१।।**

उपरि वर्णितेन प्रकारेण अकारादयो वर्णा उच्चारणीयाः, शिथिलकरणप्रयोगेन अव्यक्ता वर्णाः नोच्चारणीयाः न अतिदृढ़करणप्रयोगेण पुरुषीकृताः वर्णा अपि उच्चारणीयाः। सुष्ठु वर्णोच्चारणेन उच्चारणकर्ता ब्रह्मलोके ब्राह्मणसमाजे वाऽपि सत्कार्यः पूजनीयो भवति।

**२०. अधमपाठकलक्षणम्-**

**गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।३२।।**

गायन्निव पठन् अतिशीघ्रतया पठन् शिरः कम्पनं कृत्वा पठन्, गुरूच्चरणानुच्चारणरहितम् अनभ्यस्तं लिखितं वेदादिकं पठन् अर्थज्ञानरहिततया पठन्, अल्पकण्ठज्ञतया पठन् एते षट् प्रकारकाः पाठकाः अधमपाठकाः कथ्यन्ते।

**२१. पाठकगुणाः-**

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**

**धैर्यं लयसमर्थं च षडेते पाठका गुणाः।।३३।।**

मधुरत्वम् सुश्रत्वम्- वर्णानामुच्चारणे स्पष्टत्वम्, अक्षरव्यक्ति- वर्णानां स्पष्टता, पदच्छेदः= अर्थानुसारं पदविभागः, सुस्वारः, धैर्यम्= स्थैर्यम्, धैर्यपूर्वकम्, लयसमर्थम्, = लयछन्दोयुक्तम् एते पाठकानां षड् गुणा= शोभनाः धर्माः बोध्याः इति।

**२२. पाठकप्रकारविशेषाणां निषेध -**

**शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम्।**

**काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्।।३४।।**

**उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।**

**निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्।।३५।।**

शङ्कायुक्तं भययुक्तम्, उत्युच्चैः प्रयुक्तम्, अस्पष्टम्, अनुनासिकीकृतं, काकवाशितवत्= काकस्वरवत् कटुस्वरम्, शिरसिगम्= अतिशीघ्रमुच्चारितम्, तथैव स्व-उच्चारणस्थानात् भिन्नोच्चारणस्थानात् अन्यत् उच्चारितं वर्णं न वदेत्।।३४।। उपाशुं= अनिर्गतशब्दम् अन्येन न श्राव्यम्, दष्टम् दन्तपङ्क्तिविश्लेषरहितम् अति शीघ्रम् निरस्तम्= अम्बूकृतम् = स्ठीव। (हिन्द्याम्, थूक) निक्षेपणसहितम्, विलम्बितम्= अतीव मन्दगतिकम् (अतिशनैरुच्चारितम्), गद्गदितम्=श्लथकण्ठस्वरम्, प्रगीतम्, गानस्वरयुतम्, निष्पीडितम्, = अतीव दृढेन स्थानकरणसंयोगेनोच्चरितम् ग्रस्तपदाक्षरम्= एकेन पदेन अन्यस्य पदस्य एकेन अक्षरेण अन्यस्य अक्षरस्य अतिक्रमणेन युतम्, अपि वाक्यं न उच्चारयेत्। दीनम्= उत्साहरहितम्, सानुस्वारं सम्पूर्णम् आनुनासिक्येन युक्तञ्च वाक्यं नोच्चरयेत् इति।

**२३. श्रौतसोमयागेषु त्रिषु सवनेषु वाचः स्थानविशेषाणां प्रयोगस्य प्रकाराः-**

**प्रातः पठेन्नित्यमुरः स्थितेन स्वरेण शार्दूलरुतोपमेन।**

**माध्यन्दिने कण्ठगतेन चैव चक्राह्वसङ्कूजितसन्निभेन।।३६।।**

**तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।**

**मयूरहंसान्यमृतस्वराणां तुल्येन नादेन शिरःस्थितेन।।३७।।**

सोमयागेषु प्रातः कालिके सवने (यज्ञे) उरः स्थितेन व्याघ्रध्वनिसदृशेन स्वरेण शास्त्रादिवाक्यं पठेत्। माध्यन्दिने सवने सदा कण्ठगतेन चक्रवाकूकूजिततुल्येन स्वरेण शास्त्रादिकं पठेत्। तृतीयं संवनं शास्त्रादिकं तु तारस्वरं विजानीयात्। तत्र शास्त्रादिपाठादिषु उच्चतमस्थानगतम् तारः स्वरः मयूर हंस कोकिलस्वरतुल्येन शिरः स्थितेन नादेन उच्चारणीयः।।३६-३७।।

२४. आस्यप्रयत्नाः ( आभ्यन्तरप्रयत्ना )

**अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलःस्मृताः।**

**शेषाः स्पृष्टा हलः प्रोक्ता निबोधाऽनुप्रदानतः।।३८।।**

स्वराः (अच्वर्णाः), अस्पृष्टा = विवृता, अन्तस्था (यण्वर्णाः) ईषत्स्पृष्टा, ऊष्माणः (शल्वर्णा) अर्धविवृताः कथिताः, अवशिष्टा (मकारादिपकारर्यन्तम्) वर्णाः स्पृष्टा निगदिताः। अथ बाह्यप्रयत्नतो वर्णभेदान् जानीहि।।३८।।

२५. अनुप्रदानम् ( बाह्य प्रयत्नाः, स्वरयन्त्रप्रयत्नाः वा )

**अमोऽनुनासिका अहो नादिनो ह झषः स्मृताः।**

**ईषन्नादा यण्जशस्तु श्वासिनस्तु खफादयः।।३९।।**

**ईषच्छ्वासाँश्चरो विद्याद्गोर्धामैतत्प्रचक्षते।**

**दाक्षीपुत्रः पाणिनेय येनेदं व्याहृतं भुवि।।४०।।**

अहः= हकाररेफवर्जिताः अनुासिका= मुखनासिका अपि अम् अ इ उ ऋ लृ ए ओ ऐ औ य व ल ञ म ङ ण न इत्येते वर्णाः, ह झ ष = हकार झ भ घ ढ ध इत्येते वर्णा नादिनः = नादवन्तः, स्मृताः= निगदिताः। यण्–जश् य व र ला, ज ब ग दा: तु = ईषन्नादाः = अल्पनादवन्तः कथिताः। ख फा दयः = ख फ छ ध था, तु = हि, श्वासिनः = श्वासवन्त स्मृताः /३९, चर = च ट त क प श ष स इत्येतान् वर्णान् ईषच्छ्वासान्= अल्पश्वासवतः जानीयात्। एतत् अत्र प्रोक्तं शास्त्रं गोः = वाचः, धाम्= स्थानम् प्रचक्षते = कथ्यते। येन एतत्कार्यकर्तृत्वेन बुद्धौ स्थितेन एतत् शास्त्रं भुवि= पृथिव्याम्, व्याहृतम्= प्रोक्तम् स एतत् कार्यकर्ता दाक्षीपुत्र पाणिनेयः = पाणिनिः अस्तीति।।४०।।

२६. वेदपुरुषाङ्गपरिचयः, साङ्गवेदाध्ययनमाहात्म्यं च –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।४१।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तास्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।४२।।**

चत्वारिंशत् पद्यपर्यन्तं वर्णाः तेषां स्वरतः कालतः स्थानात् आभ्यन्तरप्रयत्नाः बाह्यप्रयत्नाश्च वर्णानां कृता विभागाः, कतिपयैः प्रसक्तानुप्रसक्तविषयैः सह प्रतिपादिताः, एते मुख्याः शिक्षाग्रन्थविषयाः। इदानीं शिक्षामाहात्म्यादिपरिशिष्टविषयप्रतिपादकं तत्त्वमुपस्थाप्यते। तथाहि– वेदस्य **पादौ** छन्दः। पाठ्यवस्तुगतस्वर परिमाणसम्बद्ध–विशेषनियमबोधकं पिङ्गलादिप्रणीतम् शास्त्रम्, वेदस्य **हस्तौ** कल्पः= शाखान्तरस्थोपसंहरणीयगुणोपसंहारपूर्वकं वैदिकयज्ञानुष्ठानक्रमविशेषादिकस्य ब्राह्मणग्रन्थगतिविधिवाक्यानुसारेण कल्पकं शाङ्खायनकात्यायनलाट्यायनादिप्रणीतं शास्त्रं कथ्यते, वेदस्य **चक्षुः** ज्योतिषामयनम् = सूर्यादीनां ज्योतिषां गतेर्विज्ञानेन कालानुपूर्व यज्ञानुविधानज्ञानस्य साधनं शास्त्रं पञ्चसंवत्सरमयमित्यादिकं लगाधादिप्रोक्तं ज्योतिषशास्त्रम्।

**श्रोत्रम्** निरुक्तम्= व्याकरणेन व्याख्यातुमशक्यस्य पदपदार्थसम्बन्धस्य निरूपणाय सिद्धान्तरूपाणां प्रतिपादकं **यास्कप्रणीतं** शास्त्रम्। वेदस्य घ्राणं = नासिका तु शिक्षा= वर्ण स्वर= मात्रा स्थानकरणप्रयत्नानुप्रदा न रूप= वलसामसन्तानप्रतिपादकं **प्रतिशाख्यादिरूपं** शौनकादिप्रणीतम्, **मुखम्**= व्याकरणम्, वाक्यतदर्थसम्बन्ध ज्ञानस्य स्फुटप्रकृतिप्रत्ययादिकल्पनपूर्वकैः तत्तदर्थसम्बन्धज्ञापनादिभिरुपकारकं शब्दानुशासनापरपर्यायं शाकटायनादिप्रणीतं शास्त्रं कथितम्। तस्मात् साङ्गमेव वेदमधीत्य अध्येता ब्रह्मलोके महीयते=पूज्यत इति।

२७. हस्तकार्य-स्वर- निर्देश प्रकारः-

**उदात्तमाख्याति वृषोङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा।**

**उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव।।४३।।**

**उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम्।**

**निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम्।।४४।।**

अङ्गुष्ठतर्जनीमूलस्थापिताग्रः सन् उदात्तं स्वरं सूचयति, उपान्याङ्गुलिमूल- स्थापिताग्रः सन् स्वरितं स्वरं सूचयति, मध्यमाङ्गुलितमूलस्थापिताग्रःसन् प्रचयं (एकस्वरः) स्वरं सूचयति, कनिष्ठिकामूलस्थापिताग्रः सन् अनुदात्तस्वरं सूचयति। ४३

उदात्त स्वरं तर्जन्यां सङ्केत्यं जानीयात् प्रचयस्वरम् (एकस्वरम्) मध्यमायामङ्गुल्यां सङ्केत्यं जानीयात् अनुदात्तं स्वरं कनिष्ठिकायां सङ्केत्यं जानीयात् स्वरितं स्वरम् अनामिकायां सङ्केत्यं जानीयात्। इति।।४४।।

२८. पदशय्या ( उदात्तादिस्वरमूलकपदप्रस्तारः )

**अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम्।**

**मध्योदातं स्वरितं द्व्युदात्तँ त्र्युदात्तमिति नव पदशय्याः।।४५।।**

**अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती।।**

**अग्निरित्यन्तोदात्तं, सोम इत्याद्युदात्तं, प्रेत्युदात्तं,**

**व इत्यनुदात्तम्, वीर्यं नीचस्वरितम्।**

**हविषां मध्योदात्तं, स्वरिति स्वरितम्।**

**बृहस्पतिरिति द्व्युदात्तम्, इन्द्राबृहस्पती इति त्र्युदात्तम्।।४६-४७।।**

अन्तोदात्तं पदम्, आद्युदात्तः पदम्, उदात्तस्वरमात्रयुतं पदम्, अनुदात्तस्वरमात्रयुतं पदम्, क्रमेण अनुदात्तेन स्वरितेन च स्वरेण युतं पदम्, मध्येन उदात्तेन स्वरेण युतं पदम्, स्वरितस्वरमात्रयुतं पदम्, द्वाभ्याम् उदात्ताभ्यां युतं पदम्, त्रिभिरुदात्तैर्युतं पदम् इति **नव प्रकाराः** पदविशेषरूपाः स्वरावस्थितिः स्थानविशेषाः भवन्ति।।४५, ४६, ४७।।

**एतेषामुदाहरणानि- अग्निः सोम, प्र, वः**, वीर्यम्, हविषाम्, स्वः बृहस्पतिः, इन्द्राबृहस्पति इत्येतानि क्रमशः उदाहरणानि सन्ति।

२९. अनुदात्तदिस्वरस्थानतयोच्चारणविधानम् -

**अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः।**

**स्वरितः कर्णमूलीयः सर्वास्यो प्रचयः स्मृतः।।४८।।**

अनुदात्तः स्वरः उरः प्रदेशे (हस्तं नीत्वा) उच्चारणीयो बोध्यः, उदात्तस्वरः शिरः प्रदेशे (हस्तं नीत्वा) उच्चारणीयः कथित, स्वरितस्वर कर्णमूलप्रदेशे हस्तं नीत्वा उच्चारणीयः  प्रचयः स्वरः आस्यप्रदेशे हस्तं नीत्वा उच्चारणीयः इति स्मृतः कथितः।

३०. मात्राविशेषनिदर्शनानि-

**चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः।**

**शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम्।।४९।।**

चाषः-नीलपक्षपुरो ग्राम्यारण्यपक्षिविशेषः मात्राकालिकं शब्दं सम्प्रवदति, काकः द्विमात्रं शब्दं सम्प्रवदति, शिखी= मयूरः = त्रिमात्रं शब्दं सम्प्रवति, नकुल= बभ्रुः (नेवलाः) अर्धमात्रकं शब्द सम्प्रवदति। अत एतन्निर्दिष्टं श्रुत्वा तदनुसारमेव ह्रस्वादीनां वर्णानामुच्चारणं कर्त्तव्यमिति।

**३१. कुतीर्थनिन्दा- ५०**

**कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्।**

**न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्विषात्।।५०।।**

कुतीर्थात्= अनधितसाङ्गवेदाद् उच्चारगुणदोषाभिज्ञाद् अयोग्यात् अध्यापकात् आगतम्, प्राप्तम्=अधीतं ज्ञानं दग्धरज्जुन्यायेन स्थितमाभासमात्रं, निवीर्यं = स्वकार्यासमर्थम्, वर्णविकलम्= अस्पष्टोच्चारित न मुक्तिसाधकं भवति। अर्थात् तादृशेन वेदपाठेन प्रकोपिताद् दुष्टसर्पादिव पापात् मुक्तिर्न भवति इति।

**३२. सुतीर्थ प्रशंसा-**

**सुतीर्थादागतं व्यक्तं स्वाम्नातं सुव्यवस्थितम्।**

**सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते।।५१।।**

सुतीर्थाद्- धर्माधिगतसाङ्गवेदकाद् उच्चारणगुणदोषभिज्ञाद् योग्यात् अध्यापकात् प्राप्तम् अधीत् = स्पष्टं स्वाम्नातम्= शुद्धरूपेणाभ्यस्तं सुव्यवस्थितम् सम्यक् कण्ठे स्थितम्, सुस्वरेण सुवक्त्रेण शोभनदन्तोष्ठादिवद् वदनेन प्रयुक्तं ब्रह्म वेदः, शब्देन अर्थेण प्रभावेण च राजते दीप्यते इति।।५१।।

**३३. दुष्टोच्चारणे हानिः-**

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।५२।।**

**अवक्षरं ह्यनायुष्यं विस्वरं व्याधिपीडितम्।**

**अक्षताऽशस्त्ररूपेण वज्रं पतति मस्तके।।५३।।**

स्वरात् वर्णाद् वा अपकृष्टः (हीनः) मिथ्याप्रयुक्तः= अयथावदुच्चारितः मन्त्रः बुद्धिस्थं विवक्षितम् अभिधेयम् अर्थं न बोधयति, अयथावत् प्रयुक्तो वाग्वज्ररूपः स मन्त्रः स्वरदोषाद् दुष्टः इन्द्रशत्रुशब्द इव यजमानं हिनस्ति। तस्मात् दुष्टोच्चारणं न कर्तव्यम्। वर्णविकलतयोच्चारितो वेद उच्चारयितारम्, आयुष्यहीनं करोति स्वरविकारेणोच्चारितो वेद उच्चारयितारं रोगनिपीडितं करोति, उच्चारणविकृतब्रह्मरूपं वज्रम् मस्तके= उच्चारयितुः शिरसि पतति तस्मात् दुष्टोच्चारणन्न कर्त्तव्यमिति।।५३।।

**३४. हस्तस्वर निर्देशावश्यकता-**

**हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।**

**ऋग्-यजुः-सामभिर्दग्धो वियोनिमधिगच्छति।।५४।।**

**हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।**

**ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते।।५५।।**

यो द्विजः हस्तहीनं - हस्तस्वरसङ्केतरहितम्, उदात्तादिभिः स्वरैः अकारादिभिर्वर्णैश्च विकलं वेदमधीयत

पादवद्धमन्त्र-गद्यमन्त्रगेयमन्त्ररूपैः ऋग्-यजुः-सामभिः प्लुष्टः स द्विजो वर्णवाह्यमनुष्यपशुम्गपक्षिसरीसृपकीट-कृमिस्थावरविशेषादिकुयोनिं प्राप्नोति।।५४।।

अथ- यः उदात्तदिस्वैरः अकारादिभिर्वर्णैः, अर्थज्ञानेन चाऽविकलं वेदं हस्तकृतस्वरनिर्देशनेन सह पठति स ऋग्-यजुः-समाभिः परिपूरितो ब्रह्मलोके ब्रह्मणः विद्वत्समाजे वा पूजितो भवति।

**३५. शिक्षागुरुपरम्परा पाणिनिगौरखंञ्च-**

**शङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते।**

**वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः।।५६।।**

**येनाऽक्षरसमाम्नायमधिगम्य महेश्वरात्।**

**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।५७।।**

**येन धातौ गिरः पुंसां विमलैः शब्दवारिभिः।**

**तमश्चाऽज्ञानजं भिन्नं तस्मै पाणिनये नमः।।५८।।**

**अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।**

**चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः।।५९।।**

शङकरः श्रुतिस्मृतिपुराणेभ्यो वाङ्मयेभ्यः सारं सङ्गृह्य कल्याणकारिणीं देवीं=द्योतनशीलां वर्णसमाम्नायरूपां वाणीं दाक्षीसुताय पाणिनये प्रादात् इति स्थितिः = निश्चयो बोध्यः। इयमेव पाणिनीयवैयाकरणानां धारणेति तात्पर्यम्।।५६।।

इत्थं येन शङ्कराद् वर्णसमाम्नायसूत्राणि प्राप्य सम्पूर्णं व्याकरणशास्त्रं प्रोक्तं= कथितं तस्मै पाणिनये मुनये नमः।।५७।।

येन शुद्धपदवाक्यरूपैः शब्दजलैर्जनानां वचनानि विमलानि कृतानि, अज्ञान जनितोऽन्धकारश्च निराकृतः तस्मै पाणिनये नमः इति।।५८।।

येन ज्ञानरूपया नेत्रतिमिरहरदिव्यया अञ्जनशलाकया अज्ञानाच्छादितचक्षुष्कस्य जनस्य नेत्रम् उद्घटितं तस्मै पाणिनये नमः।।५९।।

**३६. पाणिनीयशिक्षापठनाधिकारिमाहात्म्यम् ६०**

**त्रिनयनमुखनिःसृतामिमां य इह पठेत्प्रयतः सदा द्विजः।**

**स भवति धनधान्यकीर्तिमान् सुखमतुलं च समश्नुते दिवि।।६०।।**

यो वेदाध्ययनार्थम् उपनीतो द्विजः (द्विजन्मा) नियमपालनेन पूतः सन् शङ्करवदननिर्गताम् एतां शिक्षां सदा पठति स इहलोके धन-धान्य कीर्तियुक्तो भवति। दिवि च सालोक्यमुक्तिरूपं परमं सुखं प्राप्नोति इति।

**इति राजधरमिश्रलिखितया व्याख्यया सहिता पाणिनीयशिक्षा सम्पूर्णा।।**

----

# परिशिष्टः

**शिक्षाशास्त्रसम्बद्धाः केचन पारिभाषिकशब्दाः**

**अक्षरम्**- अक्षरं क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्, वर्णं वाऽऽहु=वर्णवाची वा अक्षरशब्दः।

**अभिनिष्टानः**- विसर्जनीयः **'अभिनिसः स्तनः शब्दसंज्ञायाम्'** इति पाणिनिः

**उपांशु** -करणवदशममनः प्रयोगमुपांशुः, यस्मिन् मन्द्रादयो न विज्ञायन्ते, न स्वरो न व्यञ्जनम्, केवलमेवोष्ठचालनं श्वासो वा तदुपांशुः (कात्यायनः)

**तारः** - उच्चस्वरविशेषः

**दीर्घः**- द्विगुणितमात्रः स्वरः।

**दुस्स्पृष्टः**- प्राग् घकारात् चतुर्णाम्, दुस्स्पृष्टश्चेति विज्ञेयो डढ़योः स्वरमध्ययोः।

**नादः** - कण्ठविलस्य (स्वरयन्त्रमुखस्य) अणुभावेन स्वरतन्त्रीझङ्कारे जातं श्वासस्य गुञ्जितं ध्वरनुरणनं वा नादः।

**पार्षदम्** - परिषदा निर्णीतस्य वेदोच्चारणसिद्धान्तस्य प्रतिपादकं प्रातिशाख्यापरपर्यायं शास्त्रम्।

**मन्द्रः**- मधुरगम्भीर स्वरः।

**मात्रा** - परिमाणविशेषः। रूपम् अ इ ड ऋ लृनाम् पूर्णं लघुतमं च यत्। सा मात्रा तन्मितः कालो भक्त्या मात्रेति कीर्त्यते।। कौण्डिन्न्यायशिक्षायाम्।।

**रक्तः**- अनुनासिकस्वरः।

**वर्णः**- पृथक् प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः, मनुष्यस्य वाण्याः पृथक्प्रयत्नजाभ्यां भागाभ्यां तादृशैः भागैर्वा रहितः स्वतन्त्रेण यत्नेन निर्वत्य शब्दविशेषो वर्णः।

**वर्णसमाम्नायः**- वर्णसमुदायोपदेशः, अक्षरसमाम्नायः।

**स्वर-व्यञ्जनम्**- स्वयं राजन्त इति स्वर, अन्वग् भवतीति व्यञ्जनम्। स्वरात् प्राक् पश्चात् वा गत्वा स्वरेण सहाक्षराङ्गत्वं गच्छन्तो वर्णा व्यञ्जनानि।

**शिक्षा**- वर्णस्वरमात्रा-स्थानकरणप्रयत्नानुप्रदानरूपबल सामसन्तानादि प्रतिपादकं शास्त्रम्, शिक्ष्यतेऽनया वर्णोच्चारणमिति शिक्षा।

**संहिता** - वर्णयोः परः सन्निकर्षः। पदयोः परः सन्निकर्षो वा।

**सन्धिः**- वर्णयोः वर्ण लोपागमविकारप्रकृतिभावान्यतमफलकः परसन्निकर्षः

**साम** - अतिद्रुतत्वादिदोषशून्यं माधुर्यादिगुणयुक्तं लययुक्तमुच्चारणम्।

**स्थानम्** - तिष्ठन्ति अस्मिन् इति। स्वराणां यत्रोपसंहारः तत् स्थानम्, अन्येषां तु यत्र स्पर्शनं तत् स्थानम् इति (तैत्तिरीयप्रातिः)।।

---